मातृकाभ्यासेन्नेयं॥ निर्जिता इति॥ कर्मबाहुल्यान्निर्जिता इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ स्वतंत्रोक्तपरित्यागात्कालात्ता वा तन्मितो पि वा॥ स्वगुरुणोक्तो वापि मं
त्रसिद्धिक्रमादपि॥ जपतर्पणहोमार्चाभाजेनापि पुनः पुनः॥ कुर्वतो मंत्रराजः स्यान्निर्जितो गर्हितः सदा॥ फलं न यच्छति फलं तस्मै कल्पकोटिशतैरपि॥ तस्मात्सर्वप्र
यत्नेन स्वतंत्रोक्तं समाचरेदिति॥ ५०० ॥ असहा इति॥ अनियमेन जप्तो मंत्रो सह इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ नियमस्य च भंगेन मंत्रस्यादसहः सदेति॥ सत्यवर्जि
ता इति॥ पुरश्चरणवर्जिता इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ गावीर्यहीनो यथा देही सर्वकर्मसु न क्षमः॥ पुरश्चरणहीनोपि तथा मंत्रः प्रकीर्तितः॥ निस्त्वने मिलितकाद्ये अपुर
श्चर्यादिभिर्मनुः॥ भवेत्सलगुणोपेतः स वध्यानपतिर्यथा॥ सत्वगुणं समापन्नो मंत्रः कल्पलतासम इति॥ अपूर्णरूपा इति॥ स्वरवर्णपल्लवरहिता इत्यर्थः॥ तदुक्तं त्रि
पुरार्णवे॥ पल्लवाद्यैर्विलोपेन स्वरवर्णविलोपतः॥ अपूर्णत्वं समापन्नः समं त्रासितो त्रासंशक इति॥ त्रैलोक्यडामरतंत्रे॥ मंत्राणां पल्लवो वासो मंत्राणां प्राणशि
रः॥ शिरः पल्लवसंयुक्तो मंत्रः कामदुघाफलः॥ न्यासं विना भवेन्मूकः सुप्तः स्यादासनं विना॥ पल्लवेन विना मंत्रो नग्नः स परिकीर्तितः॥ शिरोहीनो मृतः प्रोक्तो य
था मंत्रो गुरुं विना॥ हतो दुष्टाय दत्तो यो निर्बीर्यः श्रद्धिकाक्षरः॥ अन्तरा मन्नवीतेन व्याप्तः कीलितमुच्यते॥ यस्य नाप्त्यंश [illegible] समं त्रः भन्न्यडवाहो॥ ऋषिदेवतछंदांसि
पारलक्तो भुजंगमः॥ मूकः सुप्तो मृतो नग्नो वीर्यहीनो यथा हतः॥ भुजंगः कीलितः भ्रष्ट्य इदं मंत्रो वृथाफलः॥ यत्नादि वर्जये मंत्रं यदि तल्लिङ्गिमिच्छति॥ नमो नतः शां
तिकपुष्टौ प्रणिपाते च कीर्तितः॥ वषण्णाकर्षणे होमे पुष्ट्याह्वं तं सिद्धिदायकः॥ वौषट् पल्लवसंयुक्तो मंत्रः पुष्प्यादिसाधकः॥ हुंकारपल्लवोपेतो मारणे ब्राह्मणं विना॥ मं
त्र न कार्यं वसुघोरभयनाशने॥ वषडंतो महाकालग्रहमालाविनाशकः॥ स्वाहांतो [illegible] दनेवधे मंत्रः षट्पल्लवान्विताः॥ ओंकारमुखरो मंत्रो वेदागमसमुद्भवो पल्लवो सम
गमे मंत्रे वैदिके नास्ति पल्लवः॥ पल्लवेन विना प्राप्तो मंत्रो वेदसमुद्भवः॥ नग्नः कीर्त्यते यस्मादैश्वर्यं परिधानवानिति॥ स्तंभिता इति॥ अनुनासिकाक्षरसहिता इत्य
र्थः॥ सानुनासिकं निरनुनासिकलक्षणं तु मातृकाभ्यासेन्नेयं॥ त्रिपुरार्णवेपि॥ सानुनासिकवर्णेन संयुक्ताः स्तंभिता मता इति॥ अकालचितियोगेनेति॥ अमता इति श्री
परणीयं॥ तदुक्तं त्रिपुरार्णवे॥ स्वरग्रामक्रमेणाप्ते क्रमेणाप्ते काले प्रबुध्यते॥ अन्यदा विलियुक्तश्च मंत्रो मत तदाहृतः इति॥ काललक्षणं तु काम्याभ्यासेबो १९
ध्यं॥ ५०७॥ अप्रबोध इति॥ स्वापकालप्रातादिस्यर्थः॥ ताराशुभा मताः॥ इति ताराफलं ज्ञाला मंत्रं दद्यादिशालधीः॥ ॥ अथ नक्षत्राणां गणभेदः॥ कुलमूलावतार

© Dharmartha Trust J&K. Digitized by eGangotri

तदुक्तं त्रिपुरार्णवे ॥ स्वापकाले यमवहे जाग्रे दक्षिणावहे । स्वापकाले जपान्मन्त्रो ह्यवबुद्धो हन्ति मन्त्रिणमिति । मन्त्रा इति पञ्चपठनात् जपनात् कुद्ध
इति स्मरणीयं । तदुक्तं त्रिपुरार्णवे ॥ पुस्तके लिखितं दृष्ट्वा जपेद्यः साधकाधमः । वलयारिस्तस्य नश्यन्ति मायुः कीर्तिर्धनं [illegible] जपात्तत्र पुमन्त्रस्य आत कुद्धः सन्
हन्ति साधकमिति । यस्मिन् मन्त्रे पादवर्णाः कीलकेनाभिसंयुक्ता विनाद इत्यर्थः । तदुक्तं योगिनीहृदये ॥ बीजं मन्त्रादिमे स्यात् मन्त्रमध्ये तु कीलकं । मन्त्रान्ते शक्तिरुद्दिष्टा
बीजकीलकशक्तयः ॥ यद्वर्णाः कीलकत्वेनाविहितस्त्वविहायवान् सर्वे स्तम्भपरोऽपि स्तम्भपत कीलकत्वतः स मन्त्रस्त्व[illegible] कीलितः सिद्धिरोधक इति । क्रू
रा इति । संधिरहिता रूक्षा इत्यर्थः । विसंधिकोऽभवद्दुष्टः सर्वकर्मसु गर्हित इति । योगिनीहृदयवचनात् । दुःखा इति । वैरिव्यक्षरसमन्विता दुःखिता इत्यर्थः । तदुक्तं
त्रिपुरार्णवे ॥ दुःखितास्ते समुद्दिष्टा वैरिवर्णैश्च संयुता इति । खण्डीभूता इति ॥ अंशजपात् खण्डीभूता इत्यर्थः । तदुक्तं त्रिपुरार्णवे ॥ खण्डिता वर्णलोपनेति । अङ्गही
ना इति । असंवृताः कवचादिरहिता इत्यर्थः । तथा च योगिनीहृदये ॥ अङ्गप्रसंगकवचस्तोत्रकवचपाठे विना मनुः । असंवृतः सिद्धिं नैव प्रयच्छति । अत्र पूर्णेति । अ समाख्यातः
पूर्णेनोपदिष्टा हीनवीर्या इत्यर्थः । तथा च ॥ द्वितीयेनाभिषेकेण पूर्णत्वं पादितः मनुः । अन्यथा हीनवीर्यः स्या किमेव हि फलं । इति योगिनीहृदये नातः
सदा प्रयोगादिति । सर्वदा काम्यप्रयोगात् मन्त्रस्य कुण्ठता भवतीत्यर्थः ॥ तदुक्तं त्रिपुरार्णवे ॥ प्रयुज्यन्ते सदा मन्त्रास्तत्र कुण्ठाति विजानतः । ते मन्त्राः कुण्ठतां यान्ति तस्मा
त्काम्यं समाचरेदिति । अत्र शपेति स्वल्पफल सावित्र्युपसहिता पुत्र मूलमन्त्रजपः । तद्विधिं प्रयोगपटले वक्ष्यामः । क्लिष्टतेति । दीर्घाक्षरस्य प्लुतस्य नोच्चारणेन क्ल
स्वस्य दीर्घत्वेनोच्चारणेन मन्त्रस्य क्लेशो भवतीत्यर्थः । तथा च तन्त्रान्तरे ॥ एकमात्रो लघुर्ज्ञेयो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेय इत्येवं स्वरलक्षणं । ह्रस्वस्य
न च दीर्घस्य दीर्घत्वे न प्लुतस्य च । प्लुतत्वे न च दीर्घस्य ह्रस्वे दीर्घतया पुनः । उच्चारणवशान्मन्त्रः क्लिष्टो भवति नान्यथा । यो मन्त्रः क्लिष्टतां प्राप्तः स मन्त्रः सिद्धिरोधकृदि
ति । रुष्टा इति । प्रलम्बजपात् रुष्टो भवतीत्यर्थः । तदुक्तं त्रिपुरार्णवे ॥ मौनं विना जपेन्मन्त्रं राक्षसेन्द्र [illegible] जपः । मन्त्रोऽपि रुष्टतां याति सिद्धिं नैव प्रयच्छतीति । अत्र मन्त्रैरि
ति । अन्यदेवतामन्त्रैः सह मूलमन्त्रजपादित्यर्थः । तदुक्तं योगिनीहृदये ॥ मन्त्रान्तरं नरः [illegible] ह्यन्यदेवतान्तरं । प्रयोजनान्तरे चैव वर्जयेत्साधकोत्तमः । तदा मन्त्रो भवेन्
नंक्षिप्तं काम इच्छाफलं । चतुर्भिः संयुतो मन्त्रो भवेन्मलिनसंज्ञक इति । उपेक्षेति । उपेक्षा देवतागुरुमन्त्राणां तमेषु । अवस्थात्रागुरता । वेपथ्यो मन्त्रग्रहणान्तरम

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
२०

मद्दषवशात्किं विंदुः खं वेत्याप्यते तदाऽयं मंत्रः किमर्थं गृहीत इति मन्त्रसन्निधावपि जपो विक्रियते स एव वैषम्याज्जप इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ मंत्रे
गुरौ देवतायामुपेक्षा क्रियते यदि। अवस्थायां वैषम्यान्मंत्रः स्यादवमानितः॥ इति। बंधनमिति। योनिमुद्राबंधने न सर्वदोषाणां छेत्रीत्यर्थः॥ तत्राप्युक्तं मुभय
मनसाधारणं॥ बाह्यसंस्कारविशेषः॥ अनादीति। मातृकाद्यंतयोजनं प्रसारणं स्या॥ ७३॥ ॥ अथ मंत्रमलनप्रकारः॥ तदुक्तं तंत्रराजे॥ निस्वानं त्रिपुरार्णे
नावक्ष्यास्त्वंशकादयः। तथाप्यत्रोच्यते किं चिदाभिचारादिसिद्धये। अश्विन्यादिषु ऋक्षेषु विंदुसर्गांतवर्जितं। चत्वारि योजयेद्यातु वदाद्यान् विंदुसर्गौ तु सर्वगौ इति न
मंत्रादिवर्णेन नाम्नाद्याक्षरेण वा गणयेत्। चतुष्टयं वाप्यथ मंत्रदशं तु वा। रिपार्णे त्वाद्यवर्णः स्यात्तं न तस्याहतं भवेत्। राशिष्वन्येषु ऋक्षेषु सप्तपंचततीयको
साध्यनामाधिविज्ञेयमंशकाद्यमनुग्रहे। यत्तस्ते तत्त्वविज्ञानरहितास्तेन चोदितमिति॥ निस्वानमिति। यावंतो निस्वा मंत्राः यावंतस्त्रिपुरामंत्रास्तत्प्राप्तेशकादय
मंत्रमेमलनप्रकारानावक्षणीयादित्यर्थः॥ तथापीति। अभिचारादीति॥ अयमर्थः। निस्वेने मिलितके नावक्षणीयाः। काम्येऽवक्षणीया इत्यर्थः। अश्विन्यादिष्वि
ति। ऋक्षेषु राशिचक्रेषु विंदुविसर्गौ सर्ववर्जितं कृत्वा चत्वारि चत्वारि वर्णाक्षराणि विलिखेत्। अश्विन्यादिषु। नक्षत्रचक्रेषु विंदुसर्गौ सर्वगौ कृत्वा त्रीणि त्रीणि अक्षरा
णि लिखेदित्यर्थः॥ तदुक्तं मातृकार्णवे॥ प्राक्प्रत्यक्दक्षिणोदक्च चतुः सूत्राणि पातयेत्। एकैकं कोणदेशेषु चतुः सूत्राणि विन्यसेत्। तेन खंडानि जायंते तेरवि
संख्यानि नान्यथा। तेषु पूर्वादितो लेख्यं प्रादक्षिण्यक्रमेण तु। विंदुसर्गौ सकारं च हित्वा वर्णचतुष्टयं। तथाष्टचत्वारिंशत्तां परमेश्वरि। तेन क्रमेण मेषादीन् राशीं
श्च वृषकल्पयेत्। जायते राशिचक्रं हि साधकोत्र विचारयेदिति॥ नक्षत्रचक्रमपि तत्रैव। रविखंडात्मकं चक्रं प्राग्वत् कृत्वा विधानतः। लिखेत्तेषु खंडेषु पूर्वादि न्यसेद्बुधः
त्रिशः क्रमात्। देवी मधुमती नाम्नी षट्त्रिंशद्भागनान्तिकौ। तथैव विंदुयुक्तौ च सर्गयुक्तौ तथैव च। खंडखंडे च॥ जायंते वर्णा नव नव क्रमात्। सप्तविंशति ऋक्षा
णामष्टोत्तरशतांघ्रिषु। एकस्यैकराशेस्तु नवांशक्रमभेदतः। विचारयेन्महाचक्रे साधकोरिक्षसंज्ञके इति॥ योगिनीहृदये॥ षट्त्रिंशत्कं नमोकाराग्रोक्तामधु
मतीयसा। पंचाशद्वर्णनिष्पन्ना मालिनी कादि कामते। कालीमतेतु पंचाशद्वर्णमय्युच्यते उमे॥ तत्तन्मते तथा प्रोक्तं तन्तदाद्यं सुरेश्वरीति। तेनेति। द्वादशखंडात्मके
चक्रे राशिमयेन समये च प्रादक्षिण्यक्रमेण गणयेत्। यस्मिन्खंडे मंत्राद्यवर्णोस्ति तत आरभ्य नामाद्याक्षरं यस्मिन्खंडे तिष्ठति तत्पर्यंतं। अथवा नामा

श्री
२०

© Dharmartha Trust J&K. Digitized by eGangotri

द्यक्षरमारभ्य मंत्राद्यक्षरपर्यंतं गणयेत् तत्तदा प्रष्ठं वाऽपमं द्यादयं तु वामं चादितो नामाद्यक्षरं नामादितो मंत्राद्यक्षरं वा भवति समं चारि पा... तं भवतीत्य
र्थः॥ अभिचारेषु प्रशस्तमित्यर्थः॥ शिछिन्ति। वृत्तं येव रामसमपंचमं तृतीयं वै कृवति अनुष्टुप्प्रशस्तमित्यर्थः॥ सिद्धारिचक्रमाह। प्राक्प्रत्यक् दक्षिणोदक्च
सप्तपंचकयोगतः। कोष्ठानि षोडशात्र स्युस्तेषु वर्णान् क्रमाल्लिखेत्। चतुश्चतुर्विभागेन कल्पयेत्तानि वै क्रमात्। प्रथमं प्रथमे लायं द्वितीयं प्रथमे तथा। द्विती
यमन्यतस्थान्यत्तथान्यदपि कल्पयेत्। तत्र कोष्ठेषु विलिखेत्तत्तत्पंचममक्षरं। एवं चतुर्षु कोष्ठेषु क्षांतावधि समालिखेत्। स्वनामाद्यक्षरं यत्र कोष्ठे संदृश्यते त...॥
सिद्धादीन्गणयेद्यावन्मंत्राक्षरदर्शनं। सिद्धसिद्धौ तथा लिख्य द्विगुणाल्लिखेद् साधकः॥ सिद्धसुसिद्धसाध्या सिद्धारिरिति गोत्रजान्। सासिद्धः ध्यातिसंक्लेशात्सा
ध्यसाध्यो ऽति दुःखकृत्। साध्यसुसिद्धो भजनात् सिद्धो भवति शोकारि॥ साध्यारिः कन्यकां हंति तस्मात्तं परिवर्जयेत्। सुसिद्धसिद्धो ऽध्ययनात् फलं दद्यात् यथोदितं
सुसिद्धसाध्यो जापाद्यैः सिद्धये स्याद्दतो न्यथा। सुसिद्धस्तु सुसिद्धः स्यात् पूर्वजन्मकृतश्रमगतस्मात्तं सर्वसिद्धीनां साधनेष्वजपेन्न तु॥ ७॥ अभिचारे रिपोर्वधं यादृशं स्यात्
विपर्यये। सुसिद्धारिरशेषाणि स्वकुलानां नाशयेद्ध्रुवं॥ अरिसिद्धः सुतं हन्यात् दारसाध्यस्तु योषितं। अरेः सुसिद्धो मंत्रस्तु कुलोत्सादनकृद्भवेत्। अर्यरिर्नाशमाह मंत्रः स्वयं
यस्तु निश्चयः॥ स्पष्टोऽर्थः॥ \ ॥ ऋणधनशोधनप्रकारमाह श्रीतंत्रराजे॥ नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकं। त्रिधा कृत्वा स्वरैर्भिद्यात् तदन्यद्विपरीतकं। ऋणाधिका
णी तेषां ऋणी वै सं मंत्र उत्तमः॥ स्वयं ऋणी चेन्मंत्रं त्यजेत् पूर्वं ऋणी यत इति॥ अत्र पंचाशद्वर्णात्मा मातृका यो नामाक्षरमारभ्येत्यादि विकारणीयं षट्त्रिंशद्व्यंजनेषु वा पूर्ण
मंडलरूपमातृका यो वा तदुक्तं त्रिपुरार्णवे॥ मधुमत्यां महादेवी ऋणशोधो विशिष्यते। कालीमते तु मालिन्यां मंत्रशक्त्या मन्यते इति। अत्र मधुमती षट्त्रिंश
द्व्यंजनात्मिका महामधुमती पूर्णमंडलवर्णरूपा। मालिनी पंचाशद्वर्णरूपा। तथा च। कथं ऋणिनां मंत्राणां साधकानां च भवेद। पूर्वजन्मकृताभ्यासपापादस्याः फल
निकृतः। पापेन नष्टफलावाप्तिः पापेदहं क्षयादृणी। मंत्रः सेव्याभिमानेनानृणः सिद्धये भवेत्॥ सिद्धमंत्रा कुशलैर्ध्यानमंत्रो कुशलैर्ध्यानमंत्रः सिद्धिभाक्...
क्ष्मीमदादनादत्त मंत्रभोगमवाप्तवान्। समे त्वस्य ऋणी ज्ञेयो भजनं तस्य पर्वगं। तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वतः॥ इति॥ ॥ अथ कालीमते मंत्रमेलनप्रका
र॥ तत्रादौ नक्षत्रचक्रं तंत्रश्रीरुद्रयामले॥ राज्यलाभोपकाराय प्रारभ्यादिस्वरः ककारादि गोपालान् कुकुटीप्रायान् फुल्लाविशुद्धिता लिपिः॥ अथैतच्चक्ररचनाप्रकारः॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र दक्षिणोत्तरायताश्च तस्रो रेखाः प्राक्प्रत्यगायताश्च तस्रो रेखाश्च विलिख्य सप्तविंशतिकोष्ठानि कृत्वा कादि नव टादि नव पादि पंच याद्यष्टौ एतत्संज्ञा कवर्ग
क संख्याप्रकारेण सर्वाध्येपंक्तेः प्रथमकोष्ठमारभ्य पंक्तिपंक्तिक्रमेणाक्षराणि विलिख्य तत्र पूर्वमश्विन्यादिनक्षत्राणि विलिख्य विचारयेत्। तत्र यस्मिन्कोष्ठे साध
कनामाक्षरं तिष्ठति तत्रस्थमंकवर्णांश्च विज्ञाय तत्र यन्नक्षत्रमायाति तत्साधकस्य जन्मनक्षत्रं परिकल्प्य तदारभ्य यस्मिन्कोष्ठे मंत्राक्षरं तिष्ठति तावत्पर्यन्तं गणापि
लात्तन्नक्षत्रं मंत्रनक्षत्रं विज्ञाय साधकनक्षत्रमारभ्य मंत्रनक्षत्रपर्यन्तं। नामाद्यक्षरमारभ्य यावन्मंत्राद्यमक्षरं। जन्मसंपद्विपत्क्षेमप्रत्यरिः साधको वधमैत्रे परम
मैत्रं च जन्मादी त्रिपुनः। इति कुलार्णवोक्तप्रकारेण जन्मादिनवकं पर्यायेणाव विज्ञाय फलानि निर्दिशेत्।। तत्र कुलार्णवे।। तत्तु प्रस्तार यामस्तु रायुक्ता प्रसस्ती [illegible]
पंचमतारायां सप्तमो घातको मतः। द्विचतुःषड्ष्टनवमगतास्ताराः शुभाः। इति तारा फलं ज्ञात्वा मंत्रं दद्याद्बुधालधीः।। अथ नक्षत्राणां गणभेदः [illegible] कुले मला
वतारे।। अश्विनी मृगशीर्षं च तथा पुष्यपुनर्वसू। हस्तस्वातीरनूराधा रेवती विष्णुदैवतं। भरणी रोहिणी चैव आर्द्रा पूर्वोत्तरा तथा। पूर्वाषाढोत्तराषाढा पूर्वाभाद्रो
रान्नजेः। कृत्तिका हि मघा चित्रा विशाखा ज्येष्ठका तथा। मूलं धनिष्ठा शतभिषा च रक्षोगणाः प्रिये। विष्णुः श्रवणनक्षत्रं दैवतं देवगणः। अत्र विसर्गलोपश्छांद
सः।। कुड्यामके।। स्वगणे चोत्तमा प्रीतिर्मध्यमा देवमानुषे। अधमा राक्षसे देवे मृत्युर्मानवराक्षसे।। अथ राशिचक्रं।। तत्र श्रीकुलार्णवे।। बालेगोरे शु [illegible] शामी
शश्भेतिराशिषु। क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः।। ८५।। अत्राक्षरसंकेतस्तु आयुक एवा। चक्रं तु प्राक्प्रत्यगायतं रेखाद्वयं दक्षिणोत्तरायतं रेखाद्वयम
ज्ये चतुरस्रे यथा भवति तथा विलिख्य बहिः चतुःकोणेषु एकैकां रेखां कृत्वा द्वादश खंडानि निष्पाद्य तेषु खंडेषु प्रागादि आदक्षिण्येन वर्णान्विलिख्य कन्यायां श
अं अः शषसहळक्ष इति विलिखेत्। ततः तेषु प्रागादिषु द्वादशखंडेषु एकादिद्वादशांकान्विलिख्य तेषु मेषादिद्वादशराशीन्परिकल्प्य विचारयेत्। नामाक्षरमारभ्य
यावन्मंत्रादिवर्णकं। लग्नं धनं भ्रातृ बंधु पुत्र शत्रु कलत्रकाः। मरणं धर्मकर्मायव्ययाद्वादशराशयः।। अथैतेषां फलानि लक्ष्मसागरे।। एको वाप्यथवा पंचमो नव
लो राशेषु सद्धो धवो राशिः स्याद्दशमो द्वितीयसहितः षष्ठो भवेत्सेवकः। [illegible] द्वाविंशस्तु रसंख्याया [illegible] मतो मंत्रो भवेल्लाभकृत् [illegible] स्याद्द्वादशो [illegible] नो मंत्रः सं
तो घातक इति।। अथ राशीनां वर्णभेदः।। स्तुः कर्कटो धनिष्ठे के मीनराशिर्दिशा नराः सिंहो [illegible] मेषः तुलास कुंभो मिथुनं वैश्याः [illegible] अकृत्वाभङः।।

श्री
२१

© Dharmartha Trust J&K. Digitized by eGangotri

अथ पांचभौतिकचक्रं ॥ तत्र दक्षिणामूर्त्तिसंहितायां ॥ उ ऊ ओ ग जडा वर्णा दवर्गा लथ पार्थिवाः ॥ ऐ औ ओ घ फ ढा वर्णा अभ्यासस्तु नीरनामाः ॥ इ ई ... रा ... वर्णा सापर

रः क्षश्च वह्निकाः ॥ अ आ ए क ट ठा वर्णास्तथा यथाः ॥ सस्तुवायुनामाः ॥ लृ लॄ अं ङ न ण ग वर्णा नाम साहसास्तु नाभसाः ॥ श्रीकुलार्णवे ॥ मही सलिलयोर्मैत्र्यं ... अग्नि ... लयोरपि सामा

न्यमग्निभूम्योस्तु सलिलानिलयोस्तथा ॥ शत्रुवं वैपरीत्ये तु मित्रं सर्वत्र वापरं ॥ परस्परविरुद्धा नाम मंत्राणां मंत्रसंगतिः ॥ वर्जयेन्मतिमान् मंत्री नाशकं तं कुलेश्वरी ॥ इति ॥ अथ

सिद्धसाध्यादिशोधनप्रकारः ॥ तत्रादौ द्वादशारचक्रं ॥ तत्र कुलमूलावतारे ॥ द्वादशारे तथा चक्रे कूटखंडविवर्जितान् ॥ आदिहांतान् लिखेद्वर्णान् पूर्वे मायावदीश्व

रे ॥ अंकानेकादिभान्तांतान् लिखेत्पूर्वादितः क्रमात् ॥ सिद्धः साध्यः सुसिद्धोऽरिश्चतुर्वर्गः स्फुटो भवेत् ॥ एतेषां फलानि कुलमूलावतारे ॥ नवैकपंचमः सिद्धः साध्यः षड्दश

युग्मकः ॥ सुसिद्धस्त्रिरुद्राग्निर्वेदाष्टद्वादशो रिपुः ॥ इति शालावतारे ॥ मंत्रदशाक्षिणाल ... तेषां फलानि सिद्धारिचक्रोक्तानि ह्यानि ॥५००॥ ॥इति श्रीविद्यार्णवे ...

... स ॥ ॥ अथ षोडशारचक्रं ॥ तत्र कुलमूलावतारे ॥ चतुरस्रं तु वं भित्वा कोष्ठानां षोडशालिखेत् ॥ अकारादिक्षकारांतां मातृकामविधिं न्यसेत् ॥ ईशानकोणा

दारभ्य वायव्यां तं लिखेत्सुधीः ॥ प्रादक्षिण्यक्रमेणैव ... तल्लेखनप्रकारमाह लक्ष्मीकुलार्णवे ॥ एकत्रिरुद्रनवनेत्रयुगार्कपंक्तिवर्णा गो षोडश चतुर्दश पंच

कोष्ठेषु कोष्ठे लिखेन्मुनितिथीषु तथा वाशिष्टवर्णान् कृत्वा शान्तामितान् क्रमशो विकाया इति ॥ सिद्धः सिध्यति कालेन साध्यः सिध्यति वा न वा ॥ सुसिद्धस्तत्क्षणाद्दे

व अरिर्मूलं निकृंतति ॥ भैरवीतंत्रे ॥ उपदेशे ... भूतादिवर्णेषु चतुरस्रमंत्रकं ॥ सम्यक्परीक्ष्यते यत्ता ... मतिमान् नरः ॥ सिद्धसाध्यादियोगेषु मंत्रदानविशेषतः ॥

... सिद्धं नामग ... ल्लीयात् सुषुप्तो येन जागराः ॥ आदौ सिद्धस्तथांते च सर्वसिद्धिफलप्रदः ॥ आदावंते भवेत्साध्यः ... कुसाध्य ... आदावंते सुसिद्धस्तु क्षिप्रमे

व प्रसिध्यति ॥ आदावंते रिपुश्चेत्तु साधकं सा निकृंतयेत् ॥ आदौ सिद्धोऽथ साध्यो ... एवं न सा सिध्यति ॥ आदौ साध्यः सुसिद्धोंऽते ... मार्गेण सिध्यति ॥ सुसिद्धा

दिस्तु साध्यांतश्चतुर्गुणमपेक्षते ॥ आद्यंतयोर्यदा सिद्धो मध्ये साध्यः प्रजायते ॥ आद्यंतयोर्यदा साध्यो मध्ये सिद्धः प्रजायते ॥ तावुभौ साध्यसिद्धौ हि जपाधिक्येन

सिद्ध्यतः ॥ आदौ सिद्धेन संयुक्तः सुसिद्धस्तथांततः ॥ श्रवणादेव सिद्धोऽत साधकस्य न संशयः ॥ सिद्धोंऽतरितसाध्यस्तु सुसिद्धोंऽतरितोऽथवा ॥ शीघ्रं सिध्यति मंत्रो वै

यथोक्तं मंत्रविन्नमः ॥ सिद्धोंऽतरितः शत्रुः सुसिद्धो नापि वै फलं ॥ नासौ रिपुर्भवेन्मंत्रः किंतु कष्टेन सिध्यति ॥ साध्योंऽतरितः सिद्धः सुसिद्धोऽपि तथा यदि ॥ सिध्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि पा०
२२

त्यतीवकल्पे । न साधकस्य नचान्यथा । रिपुर्णं तरितं सिद्धं सुसिद्धं च तथा त्यजेत् । रिपुर्ण दूषितो मंत्रो नैव ग्राह्यः कथंचन ॥ अत्र त्वेदो यावद्गुणो मंत्रो देयाति
वारणोः । सिद्धादि कोष्ठकं ज्ञात्वा ततः सिद्धिः प्रजायते ॥ एकाक्षरे तथा कूटे पुरमंत्रनायके । स्त्रीदत्ते स्वप्नदत्ते च सिद्धादीन्नैव शोधयेत् । नृसिंहार्कवराहाणां
प्रासाद प्रणवस्य च । सपिंडाक्षरमंत्राणां सिद्धादीन्नैव शोधयेत् । पाशादौ त्र्यक्षरे मंत्रे त्रैपुरे चंडनायके । सौरमंत्रेषु नवपंचाशत्कं शांभवे विमला सुतं । सौरमंत्रा सूर्यस्य विद्यु
वैष्णवा नारसिंहकाः । सिद्धसाध्यसुसिद्धारिविचारपरिवर्जिताः । प्रणवत्र्यक्षरं मायां व्योमव्याप्यं षडक्षरं ॥ मालामंत्रेषु सर्वेषु सिद्धादीन्नैव शोधयेत् ॥ रत्नसा
रे ॥ हंसस्याष्टाक्षरस्यापि तथा पंचाक्षरस्य च । एकद्वित्रिबीजस्य सिद्धादीन्नैव शोधयेत् । नृसिंहार्कवराहाणां कालिकासिद्धकालिकाः पापमत्ता [illegible] देवीसिद्ध
दिपरिवर्जनं ॥ रुद्रयामले ॥ अघोरमंत्रदेवेशि मालामंत्रस्य पार्वति । नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ कुलमूलावतारे ॥ स्वप्नोपादिष्टदिष्टमंत्रस्य
न विधिर्नैव चाक्रिकाः । उद्दिष्टदेवतां ध्यात्वा जपकुंभकरं भवेत् ॥ आगमस्य संहितायां । राममंत्रेषु सर्वेषु श्रुत्यश्च मुनिपुंगव । तारकेला मंत्रराजेति सिद्धादीन्नैव शोधयेत्
सिद्धांतशेखरे ॥ एकद्विपंचसप्तार्णे च नवाक्षरान्विते । द्वात्रिंशदक्षरे मंत्रे सिद्धादीन्नैव शोधयेत् । पंचवक्त्रो [illegible] गोपालाव [illegible] सिद्धसाध्यसुसि
द्धारिविचारपरिवर्जिताः । व्योमव्यापी षडर्णोऽष्टमातृका हरवल्लभा । वक्रतुंड कपाकाख्या मंत्राः पंचसाधारणी मताः ॥ अथ षट्पदचक्रं तत्र कुलमूलावतारे ॥
द्दलं च समालिख्य आदिषु दलेषु च । अकादिवर्णान्केकान्तान् लिखेत्तु षट्कूटकाः । स्वनामाद्यक्षरं पत्र तदारभ्य विचारयेत् । प्रथमे संपत्करी द्वितीये सं
पदं तथा । तृतीये तु धनं विद्याच्चतुर्थे बंधुनिग्रहः ॥ पंचमे संशयं विद्यात् षष्ठे सर्वविनाशनं ॥ अथ ऋणधनशोधनचक्रं ॥ तत्र कुल [illegible] इदशे
रविपंचदर्शकुंचदेव [illegible] नवाभिर्गुणितां [illegible] सा [illegible] गिरि [illegible] मुनीषु [illegible] गुणितान् पसाधकाणो [illegible] फलादके श्री
वा फ़ज [illegible] शोधं [illegible] अधिकं शेषमृणं धने स्यात् ॥ अथैतच्चक्रनिर्माण [illegible] दशारं २२
[illegible] लिख्य षट्पङ्क्तिकोष्ठानि कृत्वा तत्र सर्वोपरि [illegible] दशकोष्ठात्मक [illegible] स्वरादि दक्षिणं [illegible] द्वितीये २ [illegible] चतुर्थे
पंचमे ५ षष्ठे ६ सप्तमे ७ अष्टमे [illegible] एकादशे [illegible] लिख्यत द्वितीयपंक्तौ स्वरादि दक्षि [illegible] ३ ६

© Dharmartha Trust J&K. Digitized by eGangotri

एऐओऔअंअः इत्येकादश स्वराः नैकादशा कोष्ठके लिख्यंते तदधः कोष्ठके ककारादि टकारांतान् आदध्यः यं क्षौ वकारादि हकारांतान् वर्णान् लिख्य तदधः
यं क्षौ १०।२।३।४।८।२।३।१।५।४।६।७ इत्येकादश अंकानेकादश सु कोष्ठपुरि लिखेत् [illegible] निर्माय विचारयेत् [illegible] वर्णमंत्र वर्णं [illegible] तत्र विंदुवि
दुविसर्गान् पृथक् कृत्वा सर्वोपरिगत संकेन यस्य यस्य वर्णस्य याः तं तं वर्णं तेन तेन [illegible] सा वशिष्टमंकं पृथ
संस्थाप्य शिष्यनामाक्षराणि [illegible] स्वरव्यंजनानि विंदुविसर्गाः पृथक् कृत्य सर्वोपरि [illegible] तेन तेन [illegible] गणयित्वा संजातांके
मुदायम [illegible] भिराहृत्वा व शिष्टमंकं पृथक् संस्थाप्य मंत्रसाधकयोः वशिष्टांकम [illegible] इति साधकस्य [illegible] समं त्र्योगाधिकः
यस्य मंत्रस्य साधकोऽग्रणी भवति स मंत्रस्तस्य सिद्धिदः ।। ।।अथ वक्ष्ये जगद्धात्री मातृकां मंत्रविग्रहां। सा कर्णाथेहि मंत्राणां न्यासपूजाजपस्य च ।। उक्तं
रसाधकानां च विशेषात् कालिकामते।। रुद्र।। तारस्य पंचभेदेभ्यः पंचाशद्वर्णगाः कलाः। निवृत्तिश्च प्रतिष्ठा च विद्या शांतिरनंतरं। इंधिका दीपिका चैव रेचिका मो
चिका परा। सूक्ष्मा सूक्ष्मामृता ज्ञाना मृता वाप्यायिनी तथा। व्यापिनी व्योमरूपा स्युरनंता स्वरजाः कलाः। सृष्टि ऋद्धिः स्मृति मेधा कांति लक्ष्मी द्युति स्थिरा।
स्थितिः सिद्धिरिति प्रोक्ताः क्रमात् ककारवर्गकाः। ततो जरा च पालिनी शांतिरैश्वरी रतिरेव च कामिका वरदा तथा। ह्लादिनी प्रीति दीर्घा च क्रमात्
टतवर्गजाः। तीक्ष्णा रौद्री भया निद्रा तंद्री क्षुत् क्रोधिनी क्रिया। उत्कारी मृत्युरेताः स्युः क्रमात् पयवर्गजाः। पवर्गोत्थकलाः प्रोक्ताः पीता श्वेता ऽरुणा सिता। अ
नंता च तथा प्रोक्ताः पंचाशद्वर्णसंभवाः। अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः। शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा। पूर्णा पूर्णामृता काम
दायिन्यः स्वरजाः कलाः। तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः। सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा। कभाद्या वसुदाः सौराः षट्डांता द्वादशो
रिताः। धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी। सुश्री सुरूपा कपिला हव्यकव्यवहा अपि। यादीनां दशवर्णानां कला धर्मप्रदा इमाः। सोमसूर्या
ग्निरूपिण्यः साधकानां फलप्रदाः। श्रीकंठोऽनंतसूक्ष्मौ च त्रिमूर्तिरमरेश्वरः। अर्घीशो भारभूतिश्च तिथीशः स्थाणुको हरः। झिंटीशो भौतिकः सद्योजातश्चा
नुग्रहेश्वरः। अक्रूरश्च महासेनः षोडश स्वरसंभवाः। पश्चात् क्रोधीश चंडीशौ पंचांतकशिवोत्तमौ।।१५०।। तथैकरुद्रकूर्मैकनेत्राख्य चतुराननाः। अजेश सर्व सोमे

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२३
23

श्रीकंठस्तथाऽनंतः लांगलि दारुको ऽर्धनारीश्वरस्त्वोमाकांतश्चाषाढ दंडिनौ। अत्रिर्मीन मेषाख्यौ लोहितात्मा शिखी तथा। छगलंडद्विरंडौ सुमहाकालपालिनौ। भुजंगे
श पिनाकी शखड्गीशाख्य बकौ स्तथा। श्वेतभृग्वीशलकुलीशी वासंवर्तकः स्मृताः। पूर्णोदरी स्याद्विरजा शाल्मली लोलदन्ततरा। लोलाक्षी वर्तुलाक्षी च दीर्घघोणा ततः परं।
सुदीर्घमुखि गोमुखी दीर्घजिह्वा कातत: परं। कुंडोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि। ज्वालामुखी ततो उल्कामुखी श्रीमुखी तथा। विद्यामुखी च कथिता: [illegible]
न्यस्ताः क्रमशः महाकाली सरस्वत्यो सर्वसिद्धि ततः परं गौरी त्रैलोक्यविद्या स्यान्मंत्रशक्तिस्ततः परे। आत्मशक्तिर्भूतमाता ततो लंबोदरी तथा। द्राविणी नागरी भूयः खेचरी
चापि मंजरी। रूपिणी वीरिणी पश्चात् काकोदर्यपि पूतना। स्याद्भद्रकाली योगिन्यो शंखिनी गर्जिनी तथा। कालरात्रिश्च कुर्दिन्या कपर्दिन्यपि वज्रिका। जया च सुमुखी च
रेवती माधवी तथा। वारुणी वायवी चैव तथा रक्षोविदारिणी। ततश्च सहजा लक्ष्मी व्यापिनी च ततः परं। महामाया च कथिताः क्रमात्तादृश्या क्रमशः [illegible]
[illegible] धृतशूलकपालकाः। शाकपाणिश्च पीठस्थाः सिंदूरारुणविग्रहाः। रक्तोत्पलकपालाभ्याम् अलंकृतकरांबुजाः। केशवो नारायणो माधवो गोविंद विष्णुर्वा म
धुसूदनसंज्ञोन्यः स्यात्त्रिविक्रम वामनौ। श्रीधरश्च हृषीकेशः पद्मनाभस्ततः परं। दामोदरो वासुदेवः संकर्षण इतीरितः। प्रद्युम्नश्चानिरुद्धश्च क्रमात्स्युः स्मर
मूर्तयः। पश्चाद्गदाशार्ङ्गी खड्गी शंखी पुनः मुसली मुशली लाङ्गली शूली च ततः परं। मुकुंदो नंदजो नंदी नरो नरकजित् हरिः। कृष्णः सत्यः सा[illegible]
जनार्दनः भूधरो विश्वमूर्तिश्च वैकुंठः पुरुषोत्तमः। बली बलानुजो बालो वृषघ्नो वृषभस्ततः। हंसो वराहो विमलो नृसिंहो मूर्तयो हरेः। कीर्तिः कांतिस्तथा तुष्टिः पु
ष्टिश्च धृतिस्ततः। शांतिः क्रिया दया मेधा हर्षा श्रद्धा ततः परं। लज्जा लक्ष्मी सरस्वती प्रीतिः रतिरिमाः क्रमात्। जया दुर्गा प्रभा सत्या चंडा वाणी विलासिनी। विजया विरजा वि
श्वा विनदा सुनदा स्मृतिः। ऋद्धिः समृद्धिः शुद्धिश्च भुक्ति बुद्धिर्मतिः क्षमा। रमा मोमा क्लेदिनी क्लिन्ना वसुदा वसुधा परा। परायणा च सूक्ष्मा च संध्या प्रज्ञा प्रभा निशा।
अमोघा विद्युता च मिता कादीनां मतो ऽयो हरेः। केशवाद्या द्रुमश्यामाः शंखचक्रलसत्कराः। शक्तयः स्तुतियोग्या [illegible] समातंगपः पंकजा भय
वाहवः। [illegible] रविः प्रभाकरो [illegible] पूषा मरीचिः [illegible] भग आदित्यो [illegible] वेदमूर्तिः कर्मसाक्षी दिवाकरः। मित्रोऽर्यमा [illegible] द्वादशात्मा विभाकरः। [illegible]
[illegible]तेयश्चैते स्मरः सूर्यो विभावसुः। अहस्करोऽरुणो [illegible] भास्वान् सप्ततुरंगमः। हरिदश्वो [illegible] भानुस्त्वयः विकर्तनः सहस्रांशुर्मिहिरो मित्र[illegible] कर्मसा

श्री
२३

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीजगन्नेत्रसरणिः पद्मिनीप्रियः । चंडांशुः पिंगलो दंडो गभस्ती घृणिरंशुमान् ॥ ... जगच्चक्षुः स्नपनो लोकबांधवः । हंसस्तमोपहंता च त्रयीमूर्तिश्च मूर्तयः ॥ वि
धात्री पुष्पः प्रहासिनी बाली कुहूः पुनाग... द्वीपोष्मानंदस्या ... दाशुभा । कालरात्रिर्महारात्रिर्भद्रकाली कपालिनी । विकृतिर्दंडिमुंडि च ... खंडा शिखंडि
नी । शुनिशुंभ शुंभमथिनी महिषासुरमर्दिनी । इंद्राणी चैव रुद्राणी शंकरार्धशरीरिणी ॥ नारी नारायणी चैव त्रिशूलिन्यपि पालिनी । ... विकारिणी चैव समृद्धि
रि रवचा । पिंगलाक्षी विशालाक्षी मायासंतावसुंधरा । ... स्वाहा स्वधा भिक्षा देवकी कमलासना । त्रिलोकधात्रि सावित्री गायत्री त्रिदशेश्वरी । सुरूपा बहुरूपा च
पंचाशत्कुरूपोरवेः ॥ ॥ कामः कामदकांतश्च कांतिमान्कामगस्तथा । कामवारश्च कामी च कामुकः कामवर्धनः । वामो रामश्च रमणो रतिनाथो रतिप्रियः । रात्रिनाथ
रमाकांतो रममाणो निशाचरः । नंदको नंदनो नंदी ततो नंदयिता ततः । पंचबाणो रतिसखो पुष्पधन्वा महाधनुः । भ्रामणो भ्रमणश्चैव भ्रममाणो ... भ्रांतो भ्राम
कर्भ गोबभ्रांतचारो भ्रमावहः । मोहनो मोहको मोहो मोहवर्धन एव च । मदनो मन्मथश्चैव मातंगो भृंगनायकः । गायकश्चैव गीतिश्च नर्तकः खेलकस्ततः । उन्मत्तो मत्तकश्चैव वि
लासी लोभवर्धनः । कामस्य मूर्तयः ... कारा ... संचयाः । रतिः प्रीतिश्च तदनु कामिनी मोहिनी ततः । कमला सुविलासिन्या ततः कल्याणी तथा । श्यामा शुचिस्मिता
विस्मिता तदनंतरं । विलाक्षी लेलिहाना ततश्चैव दिगंबरा । वामा च कुब्जिका कांता निर्या कुल्या च भोगिनी । कामदा चैव तत्पश्चात् ... सुलोचना । सुलापिनी मर्दिनी च नल
श्च कलहप्रिया । वराक्षी सुमुखी चैव नलिनी जटिनी तथा । पालिनी च शिवा ... ततश्चैव रमा भ्रमा । लोला च चंचला चैव दीर्घजिह्वा रतिप्रिया । लोलाक्षी भंगिनी चैव पाटला
मदना तथा । मालावहं हंसिनी चैव ततस्या ... सुरभी ॥ ७० ॥ जगदानंदिनी चैव रमणी कांतिरेव च । ततस्यात्कलंक ... दर्पविसा तथा मेघश्यामा तथा लोभवर्धि
नीश रूपस्तथा । ततः कामा ... क्रीडा ... कुसुमोपमान् ... शक्तिसहितान् पुष्पबाणेक्षुकार्मुकान् । शर ... कुंकुमनिभाः सर्वाभरणभूषिताः । नीलोत्पलकरा
यास्त्रैलोक्याकर्षणक्षमाः ॥ ॥ अथ त्रिपुरामातृका ॥ कामिनी मोदिनी चैव मदनोन्मादिनी ततः । द्राविणी खेचरी चैव घोटिका च कलावती । ... दिनी ... ततश्च सु
भगा भगा । विद्येशी च महालक्ष्मी कौलिनी च सुरेश्वरी । त्वरा ... प्रोक्ता ततश्च कुलमालिनी ॥ व्यापिनी च भगा चैव वागीशी तदनंतरं । वषट्कारी पिंगला च भा

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव २४

सर्पिण्यतः परं। सुंदरी च ततो नीलपताका त्रिपुरा ततः। सिद्धेश्वरी ह्यमोघा च रक्तमालिन्यतः परं। मंगला भगमाला च निल्यारोहीत तः परं। व्योमेश्वरी ततो विकवाप्याद्दहा सा ततः परं। आप्यायनी च वज्रेशी क्षोभिणी शांभवी ततः। स्तंभिनी व्यापना मा च रक्ता शुष्का पराजिता। संवर्तिका च विमला अघोरा घोररया युता। त्रिवादिभैरवी चैव सर्वकर्षिणिका तथा। एताः पंचाशदाख्याताः पंचाशद्वर्णविग्रहाः। विघ्नेशो भैरवो विद्याराज्ञो विनायकः शिवोत्तमः। विघ्नकृद्विघ्नहर्त्ता च विघ्नराड्गणनायकः। एकदंतो द्विदंतश्च गजवक्त्रो निरंजनः। कपर्दी दीर्घवक्त्रश्च शंकुकर्णश्च वृषध्वजः। गणनाथो गजेंद्रश्च शूर्पकर्णस्त्रिलोचनः। लंबोदरो महानादो चतुर्मूर्तिः सदाशिवः। आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः। एकपादो द्विजिह्वश्च शूरो वीरश्च षण्मुखः। वरदो वामदेवश्च वक्रतुंडो द्विरंडकः। सेनानी ग्रामणी मेत्तो विमत्तो मत्तवाहनः। जटी मुंडी च खड्गी च वरेण्यो वृषकेतनः। भक्ष्यप्रियो मेघनादो गणपश्च गणेश्वरः। एते पंचाशदाख्याताः मूर्तयो गणपस्य तु। श्रीर्ह्रीस्तुष्टिश्च शांतिश्च पुष्टिश्चैव सरस्वती। रतिर्मेधा च कांतिश्च कामिनी मोहिनी नटा। तीव्रा वज्रा केशिनी नंदा सुरसा कामरूपिणी। उग्रा च जापिनी सत्या विघ्नेशी च सुरूपिणी। कामदा च ततः प्रोक्ता तथा च मदविक्लवा। विकृता च ततो धूम्रा भ्रमिर्जीमी सतीरमा। ततश्च मानुषी चैव ततश्च मकरध्वजा। विकर्णा भ्रूकुटी लज्जा दीर्घघोणा च धनुर्धरा। ततश्च यामिनी रात्रिश्चंद्रिका च शशिप्रभा। लोला च चंचलाक्षी च तथा ऋद्धिश्च डभगा। सुभगा च शिवा दुर्गा कालिका कालजिह्विका। विघ्नहारिणिका चैव [illegible] ततश्चामोघकेशिनी। ऋद्धिदा च तथा कपाली कराला पिंगाक्षी तथा। एकपादा तथैव च [illegible] काराचैव गणेशितुः॥ ॥अथ योगिनीमातृकाः॥ अमृता [illegible] स्वराणां शक्तयः क्रमात्। कालरात्रिश्च ख्याता तु गायत्री तदनंतरं। चंडधारिणिका चैव ततो डंगर्भिणिका तथा। चामुंडा चैव छायाचतलिका। त्र्यंबिका वासरा चैव टंकहस्ता ततस्तंकारिणी तथा। डामरी चैव ढंकारी णंकारी तामसी ततः। स्कंदानदेवी च दाक्षायण्यथ ख्याता नंदिका। पार्वती चैव याश्चेकारिणी तथा। वाणलिका टंकहस्ता ततस्तंकारिणी तथा। वरदा शशिनी चंडा तथा चैव सरस्वती। ततो हंसवती चैव ततः कोकाक्षमावती॥ [illegible] पीठमारीवंदिनी भद्रकालिका। महामाया यशस्विन्यौ रमा लंबोष्ठिका तथा। पुरा स्थिरका अकुकं पूर्णगिरिर्यबुदं ततः। आम्रातकेश्वरं चैव एकाम्रं तदनंतरं। त्रिस्रोतः कामकोटं च कैलासं भृगुपतकाः। केदारं चंद्रपुरं श्रीपीठं कामरूपं च काशी। नेपालं पौंड्रवर्धनं। पुरास्थिरं काश्मीरं गोकर्णं मरुलेशं च अट्टहासं ततः परं। विरजा राजगेहं [illegible] ततः परं कोल्लदर्बणं केदारं चंदनगरं श्रीपुरं कारके ततः जालंधरं मालवं च कुलांते देविकोटकं गोकर्णं मरुलेशं च अट्टहासं ततः परं।

श्री २४

© Dharmartha Trust J&K. Digitized by eGangotri

मेलापुरं चैव कौलेश्वरमतः परं। जयंतिकाचोज्ञनीचरित्रंक्षीरकं ततः हस्तिनापुरमुड्डीशं प्रयागं तदनंतरं। षष्ठीश्च मायानगरे जलेश्वरमतः परं। मलयं चैव श्रीपीठं श्री
शैलं मेरुपीठकं। ततो गिरिवरं चैव महेंद्रं वामनं ततः। हिरण्यकं महालक्ष्मीपुरमुड्याणमेव च। छायाछत्रं महापीठं पंचाशद्दुर्लभं यथा॥ ॥ अथ कामाकर्षिण्यादि
मातृका॥ कामाकर्षिणिका चैव बुद्ध्याकर्षिणिका तथा। अहंकाराकर्षिणी च शब्दाकर्षिणिका ततः। स्पर्शाकर्षिणिका चैव स्पर्शाकर्षिणिका तथा। रूपाकर्षि
णिका चैव रसाकर्षिणिका तथा। गंधाकर्षिणिका चैव चित्ताकर्षिणिका ततः। धैर्याकर्षिणिका चैव स्मृत्याकर्षिणिका तथा। नामाकर्षिणिका चैव बीजाकर्षिणिका त
था। आत्माकर्षिणिका चैव अमृताकर्षिणी तथा। शरीराकर्षणी चैव षोडश स्वरगाः क्रमात्। सर्वसंक्षोभिणी शक्तिः सर्वविद्राविणी ततः। सर्वाकर्षिणिका चैव
सर्वाह्लादिनिका ततः। सर्वसंमोहिनी सर्वस्तंभिनी सर्वजृंभिनी। ततः सर्ववशंकरि सर्वरंजनिका तथा। सर्वोन्मादनकारी च ततः सर्वार्थसाधिनी। सर्वसंपत्
पूरा च सर्वमंत्रमयी तथा। सर्वद्वंद्वक्षयंकारी सर्वसिद्धिप्रदा ततः। सर्वसंपत्प्रदा चैव सर्वप्रियकरी ततः। सर्वमंगलकारी च सर्वकामप्रदा ततः। सर्वदुःखविमोचिन्याः सं
घोका तदनंतरं। सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी। सर्वांगसुंदरी चैव सर्वसौभाग्यदा तथा। सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यफलप्रदा। सर्वज्ञानमयी चैव सर्वव्याधि
विनाशिनी। सर्वाधारस्वरूपा च सर्वपापहरा तथा। सर्वानंदमयी चैव सर्वरक्षास्वरूपिणी। ततः संप्रोच्यते चैव सर्वेप्सितफलप्रदा॥ ॥ अथ त्रिशक्तिमातृकाः अस्म
क्षरं नामद्वयं॥ प्रपंचरूपा प्रद्वीपरूपा मायायाः बिंदुरूपिणी। कमला गिरिरूपा च ततो वै विष्णुवल्लभा। ततः पद्मरूपा च ततो वै पद्मधारिणी। पीठरूपा समुद्रादित
यासेव्यरूपिणी। लोकमाता वनरूपा ततः कमलवासिनी। ततः आश्रमरूपा च देहिरा च ततः परं। गुहारूपा ततो माया च नदीरूपा रमा ततः। तथा चत्वररूपा च पद्मा
ज्वरस्वरूपिणी। नारायणप्रिया चैव ततः स्वेदजरूपिणी। सिंधुलक्ष्मी तथा प्रोक्ता ततश्चांडजरूपिणी। जरायुजस्वरूपा च महालक्ष्मी ततः परं। ततश्च लय
रूपा धात्रिदृष्टिरूपा सुमा तथा। कलारूपा चंडिका च काष्ठारूपा च दुर्गिका। निमेषरूपा वाशिवा च श्वासरूपा ततः परं। अपर्णा घटिकारूपा ह्रांबिका च ततः परं। मुहू
र्तरूपा च सती ततः प्रहररूपिणी। ईश्वरी दिनरूपा च शांभवी च ततः परं। संध्यारूपा तथैशानी रात्रिरूपा च पार्वती। तिथिरूपा मंगला च वाररूपा ततः परं। दाक्षायणी
च नक्षत्ररूपा हैमवती ततः। योगरूपा महामाया ततः करणरूपिणी। महेश्वरी पक्षरूपा मृडानी मासरूपिणी। रुद्राणी राशिरूपा च पार्वती ऋतुरूपिणी। ...

© Dharmartha Trust J&K. Digitized by eGangotri

रवि॰ काली
२५

येयनरूपा कालीवत्स्वरूपिणी ॥६६॥ कात्यायनी मुमादिक्ष्यरूपा गौरी तथैव च। ततः प्रलयरूपा च भवानीति तदनंतरं। पंचभूतस्वरूप
तरं। तथा च यंत्रुत त्राची रूपा जागीश्वरी ततः कर्मेंद्रियस्वरूपा च वाणी चैव ततः परं। ज्ञानेंद्रियस्वरूपा च सावित्री प्राणरूपिणी। स्वाचे श्रीच [illegible] तत्त्व
कुणात्रयस्वरूपिणी। गायत्र्यंतःकरणरूपा या कप्रदा च ततः परं। अवस्थात्रयरूपा च शारदा च ततः परं। सप्तधातुस्वरूपा च भारतीति तदनंतरं। द्वापंच
रूपा च ततो विद्या त्रिकाला तथा। अ पंचमातृका ख्याता सर्वसिद्धिप्रदा स्मृता ॥ ॥इति प्रपंचमातृका॥२००॥ अथ कालीमातृका॥ क्रीं काली कपालिनी कुल्ला कुरु
कुल्ला विरोधिनी। विप्रचित्ता तथा उग्रा उग्रप्रभा दीप्ता तथैव च। नीला घना बलाका च मात्रा मुद्रा मिता तथा। आ ह्लीं लषे वसं श्रीं क्षः [illegible] नारा
यणी च माहेश्वरी चामुंडा च ततः परं। कौमारी च तथैव वैष्णवी पंचमी चापराजिता वाराही नारसिंही च भैरवीति तदनंतरं। महदाद्या भैरवी च प्रोक्ता कालसंहारिणी [illegible]
भैरवी तथा धूम्रभैरवी च संप्रोक्ता भीमभैरवी। ऊ उन्मत्तभैरवी चैव वशीकरणभैरवी। मोहनाख्या भैरवी च ऐं ह्रां गें यी ततः परं। धाम्या च शब्द [illegible] च
रूपिणी वायवी तथा। कौवेरी च तथैशाना ब्रह्मलोली विदण्डी तथा। वज्रिणी शाकिनी चैव वंदे डिंडि नीरखड्गिनी तथा। पाशिन्यंकुशिनी चैव नगदिनी [illegible] वी तथा। मा
लिनी वज्रिणी चैव प्रोक्ता न्यंतनशक्तयः॥ ॥अथ तारामातृका॥ त्रिपंचपक्षराणां। कुलेश्वरी कुलनंदा च वागीशी भैरवी तथा। [illegible] कालिकाचंडा [illegible] का
कालि कपालिनी। धूम्रा काली करालिनी वाग्वादिनी नित्यकुली भद्रकाली राशिप्रभा। प्रत्यंगिरा सिद्धलक्ष्मी रमा तेशी च चंडि [illegible] का
माक्षी हिंगुला च सा [illegible] विनया चाथ जिता नित्या पराजिता। विलासिनी तथा घोरा चित्रा मुग्धा धनेश्वरी। सोमेश्वरी महावेदा [illegible] का।
वेदगर्भा तथा भीमा उग्रा वेधा च समृतिः। उग्रेश्वरी चैव गंगा भोग्या ज्योत्स्ना सत्या यशोवती। कुलिका कामिनी काम्या [illegible] ज्ञानवती तथा [illegible]
नीचाथ काकिनी शाकिनी त्वपि। हाकिनी च चतुःषष्टिप्रकयः सिद्धिदायकाः॥ ॥इति तारामातृका॥ ॥अथ षोडशीमातृका॥ कामेश्वरी [illegible]
च नित्यक्लिन्ना ततः परं॥ भेरुंडा वह्निवासिन्यौ वज्रेशी तदनंतरं। शिवादूती त्वरिता च ततश्च कुंदसुंदरी। नित्या नीलपताका च विजया सर्वमंगला ज्वाला
मालिनी विचित्रा च महात्रिपुरसुंदरी। षोडशीमातृकाख्या स्वरसंख्यकाः॥ अत्र सिन्नां [illegible] पदाशिन्या कराली च कपालिनी। भिन्ना घोरा चंडपुच्छावती

श्री
२५

© Dharmartha Trust J&K. Digitized by eGangotri

रेमावाकूप्रदा तथा।नारायणी च क्रो।हिन्या प्रज्ञा च शिरिविकाहि[illegible]नी।भीषणा वायुवेगा च भीमा चैव विनायकी।।पूर्णाशक्तिश्च[illegible]का रिकुर्दिनी कालिका तथा।
दीपिनी च जयंतिन्यापाविनीलं विनी तथा।संहारिणी कौंगली च पतनामोदिका तथा।परशक्तिस्तथा च बहुच्छाशक्तिस्ततः परं।महा[illegible] प्रोक्ता व्यंजनानां च शक्तयः।।
।। ।।इति षोडशीमातृका।।अथ भुवनेश्वरीमातृका।।■ जया च विजया चैव अजिता चापराजिता।।नित्या विलिंसिनी दोग्ध्री अघोरा मंगला तथा।डाकिनी राकिनी चैव लाकि-
नी काकिनी तथा।साकिनी हाकिनी चैव याकिनी च स्वरशक्तयः।मंगला च महाकाली कुंडली कुलसुंदरी।कपाली कमला चल्या चामुंडा मकरवासिनी।भुवनेशी सरस्वती च कपिला कु-
लमालिनी।विनायकी जयानंदा महालक्ष्मी च भैरवी।ब्रह्माणी च तथा ज्वाला बलीलिंग प्रभा तथा।मुंडिनी च महावेगा उग्रा वैष्णवी शिवा महामाया तु चक्रांगी एकपादा सुरेश्वरी।
कौवेरी मंगली चैव वाराही च तलंधरी।कामाक्षा कामम ध्यस्था व्यंजनानां तु शक्तयः।। ।।इति भुवनेश्वरीमातृका।।अथ भैरवीमातृका।।त्रिपुरा त्रिपुरेशी च तथा त्रिपुरसुंदरी।।
त्रिपुराघावासिनी च त्रिपुराश्रीस्ततः परं।त्रिपुरामालिनी चैव त्रिपुरासिद्धा ततः परं।।त्रिपुरां चाततश्चैव महात्रिपुरभैरवी च [illegible]काली मा हे[illegible]री चैव कौमारी [illegible] तथा पवा या
हीबलधंक्राली चामुंडा स्वरशक्तयः।।विशाला च विशालाक्षी निर्मदा मदवर्जिता।काली च कालकल्या च कालरात्रिर्निशाचरी ऊर्ध्वकेशी मुक्तकेशी [illegible] रा
जयदामालिनी माया अवंडा बिंदुमालिनी।विरूपा च विरूपाक्षी खट्वांगी विश्वरूपिणी।रौद्री माया च प्रेताक्षी फेत्कारी भयदीननी।धूम्राक्षी योगिनी घोरा विम-
रूपा भयंकरी भैरवी भीषणी या च लंबोष्ठी च महाबला।व्यंजनानां विशेषेण संप्रोक्ताः शक्तयः क्रमात्।। ।।इति भैरवीमातृका।।अथ छिन्नमस्तामातृका।।लक्ष्मीलं-
ज्वाष्ठिया माया बाणी क्राली च वैष्णवी रौद्री भैरवी जया पद्मा वर्णिनी डाकिनी तथा।कराली विकराली च घोरा च स्वरशक्तयः।काली च खड्गिनी चंडा भैरवी पिंगला तथा।
इंद्राणी चैव फेत्कारी हारिणी योगिनी तथा।प्रकाशा नागजिह्वा च सिता पीता रमा तथा।।दिगंबरी महाघोरा मुक्तकेशी विदाम्रया।चामुंडा छिन्नमस्ता च भीमा हुंकारिणी
तथा सिता।पद्मानना पद्मगर्भा पुष्पिणी वारुहासिनी।विजया मंगला कांतिर्मालिनी तारिणी तथा।महोदन्यस्थिमाला च नागयज्ञोपवीतिनी।व्यंजनानां च संप्रोक्ताः सि-
द्धयः सर्वकामदाः।। ।।इति छिन्नमस्तामातृका।।अथ धूमावतीमातृका।।धूमावती धूमनेत्रा घर्मा टीमर्कटी तथा।घोररूपा च लंबोष्ठी श्यामा श्याममुखी शिवा।
काकध्वजा कोटराक्षी धूम्रा धूम्रांधकारिणी।मुक्तकेशी महाघोरा तथा लंबपयोधरा।स्वराणां शक्तयः प्रोक्ताः सर्वसिद्धिप्रदायकाः।कोटरा कोटराक्षी च ऊर्ध्वकेशी
दिगंबरी।तामिस्रा तामसी चोग्रा विवर्णा मलिनांबरा।लंबस्तनी [illegible]।विधवा शूर्पहस्ता च रूक्षा रूक्षशिरोधरा।वल[illegible]लाक्षी

© Dharmartha Trust J&K. Digitized by eGangotri

वि धार्णव
२६

जटिला कुटिलेक्षणा। क्षुधातुरा पिपासार्त्ता तीक्ष्णा रौद्रा भयानका। दुःखकारी क्रोधिनी मत्सुः क्रिया रिपुविमर्दिनी। सत्वरा काकजिं(घ)का च स्मशानालयवासिनी। महाकाली
वरदा दिनी सिद्धार्यं व्यंजनशक्तयः॥ ॥इति धूमावतीमातृका॥ अथ बगलामातृका॥ बगला स्तंभिनी चैव जंभिनी मोहिनी तथा। वश्याऽचला चलाचैव दुर्धरा कल्मषा तथा।
धीरा च कल्पना कालकर्षिणी भ्रामका तथा। तुतः स्यमंदगमना भोगिनी योगिनी तथा। एताः सुसिद्धिदायिन्यः षोडशस्वरशक्तयः। भगा वा भगमाला च भगावाहा भगोदरी।
भगिनी भगजिह्वा च भगस्था भगसर्पिणी। भगकोला भगाक्लिन्ना शिवा भगनिपातिनी। जया च विजया धात्री अजिता चापराजिता। जंभिनी स्तंभिनी चैव मोहिन्याकर्षिणी क्षमा।
रंभिणी जंभिणी चैव कीलिनी वाशिनी तथा। रंभा माहेश्वरी चैव मंगला रूपिणी तथा। पीता पीता वराभव्या सुरूपा च कुभाषिणी। एताः स्युः शक्तयः प्रोक्ता व्यंजनानां तु सिद्धिदाः॥
॥ ॥इति बगलामातृका॥ अथ मातंगीमातृका॥ वामा ज्येष्ठा च रौद्री च शांतिः श्रद्धा तथैव च। वागीश्वरी क्रिया लक्ष्मीः सृष्टिश्चैव तु मोहिनी। प्रमथा [illegible]नी [illegible] ह्लता वि-
क्लिरेव च। ततश्चक्षुं दरा वेदना गवुद्धिस्तथैव च। एताः संसिद्धिदायिन्यः षोडशस्वरशक्तयः। सरस्वती रतिः प्रीतिः कीर्त्तिः कांतिस्तथैव च। पुष्टिः स्तुष्टिरमा [illegible] कर
ध्वजा मदना पुष्पवापा च द्राविणी शोषिणी तथा। बंधिनी मोहनी च स्यात्ततस्याकर्षिणी तथा। हृल्लेखा गगनारक्ता महोत्सुष्मा करालिका। अनंगकुसुमा [illegible] लता:
परं। अनंगमदना चैव अनंगमदनातुरा। अनंगमदनानंगवेगानंगादिसंभवा। अनंगभुवनपाला चानंगा शशिरेखिका। मनोभवा च मातंगिकामा व्यंजनशक्तयः॥ [illegible]
तिमातंगीमातृका॥ ॥अथ लक्ष्मीमातृका॥ प्रकृतिर्विकृतिर्विद्या सर्वभूतादिभावना। श्रद्धा विभूतिः सुरभिर्वाक्प्रदा प्रणवात्मिका पद्मालया शुचीपद्मा [illegible]
धा तथा। धन्याचैव च संप्रोक्ताः षोडशस्वरशक्तयः। हिरण्या च तथा लक्ष्मी नित्यपुष्टा विभावरी। अदितिश्चादितिश्चैव दीप्ता च वसुधा तथा। [illegible] कमलिका [illegible] क्षी
मृत धारिणी। पद्मप्रभा वेदमाता पद्महस्ता ततः परं। पद्मोद्भवा पद्ममुखी पद्मसुंदरिका तथा। पद्मनाभप्रिया पद्मगंधिनी पद्मिनी रमा पद्ममाला धरा पद्मा सु-
प्रसन्ना प्रिया तथा। कांतिः प्रभा च कमला अनघा हरिवल्लभा। अमोघा अमला तादि [illegible] द्विया शोका व्यंजनशक्तयः॥ २१५॥ ॥इति लक्ष्मीमातृका॥ ॥अथ का-
मेश्वरीमातृका॥ कामेश्वरी महामाया योगी शीव्रह्म संहिता। अक्षरा च त्रिमात्रा च त्रिपदा त्रिगुणात्मिका। सुरसिद्धगणा [illegible] मातागणेश्वरी। वंदिकावं
डमुंडा च चामुंडी दंडिलीप्रदा। स्वराणीशयः प्रोक्ताः सर्वसिद्धिप्रदायकाः। विश्वंभरा विश्वयोनि [illegible] माता च सुप्रदा। स्वाहा स्व [illegible] कृष्णी गायत्री गोमती च
गा। वेदमाता वसिष्ठा च सुप्रभा [illegible] हव्यवाहिनी। [illegible] दित्यहृदया वंद्या भाचानुमंडला। ज्योत्स्ना हिरण्मयी भव्या भगदुःखभया [illegible] शिवा शांता शांतदा

श्री
२६

© Dharmartha Trust J&K. Digitized by eGangotri

शांतिरूपिणी। सौभाग्यदा शुभा गौरी उमा हैमवती प्रिया। दक्षा च यंजनानां लुगदिता: शक्तय: क्रमात्॥२८२॥ ॥इति का... मातृका॥ अथ भगमा
लिनीमातृका॥ भगमाला भगा भाग्या भागिनी च भगोदरी। गुह्यादत्यली कन्या दक्षक्षत्रियदृष्टिनाशिनी। जया च विजया चैव अजिता चापराजिता। सुदासा लोलि
हानाच कराला स्वरशक्तय:। आकाशनिलया ज्वाला लीलावाव बलस्वारिणी। ब्रह्मला स्यास्यरता अर्की सावित्री ब्रह्मरूपा जिता। प्रह्लाना नापरा बुद्धिपश्च मातावश
स्वती। मैत्री कात्यायनी दुर्गा दुर्गसंतारिणी परा। मूलप्रकृति शीलाना पुंप्रदाने श्वरेश्वरी। आप्यायनी पावनी च पवित्रा मंगला क्षमा। ज्योतिष्मती संहारिणी सृष्टिस्थि
तकारिणी। अघोरा घोररूपा च व्यंजनानां शक्तय:॥२९०॥ ॥इति भगमालामातृका॥ अथ नित्यक्लिन्नामातृका॥ नित्यक्लिन्ना नित्यमदद्रवमाविभ्र रूपिणी॥ का
योगेश्वरी योगगम्या योगमाताय सुंधरा। धन्या धनेश्वरी धन्या रत्नदा पशुवर्धिनी। कूष्मांडी दारुणी चंडी स्वराणां शक्तय: क्रमात्। घोराघोर ... रूपा च भ
तकामाधवी दशार्णएकाक्षरा। विश्वमूर्ति विश्वा विश्वेश्वरा ध्रुवा। शर्वा क्षमादिभूतात्मा भूतिदा भूतिरूपिणी। भूतेश्वरप्रिया भूतिर्भूतमाता च योग...
हिपूजिता सीता माया चैव भववाहिनी। सत्वस्था सत्वनिलया सत्वा सत्वविकीर्षणा। विश्वस्था विश्वनिलया श्रीफला श्रीनिकेतना। श्रीशक्तं कंधरा नेदा ...
यशय:॥२९५॥ ॥इति नित्यक्लिन्नामातृका॥ अथ भेरुंडामातृका॥ भेरुंडा भैरवी साध्वी नताख्या नंतसंभवा। त्रिगुणी चापिली घोपा लक्ष्मी: पुष्टा शिवालया। ध
दयाधर्मबुद्धिर्धर्मा धर्मपुष्टप्रिया। ज्येष्ठा यमस्य भगिनी वेलाकौबेरवासिनी। भ्रमणा भ्रामिणी भ्राम्या भ्रमाज्ञानापहारिणी। माहेंद्री वारुणी सौम्या कौबेरी हव्यवा
हिनी। वायवी नैरृती शार्वी लोकपालैकरूपिणी। मोहिनी मोहजननी स्मृतिवर्त्तानवाधिनी। यक्षाणां जननी यक्षी सिद्धिर्वैश्रवणालया। मेधा श्रद्धा धृति: प्रज्ञा
सर्वदेवनमस्कृता। आशावां क्रांतिरीहा च तथा भक्तानुवर्तिनी। शक्तय: कथिताश्चैकपंचाशद्दुर्लगा: क्रमात्॥३००॥ ॥इति भेरुंडामातृका॥ अथ वह्निवा
सिनीमातृका॥ वह्निवासिनिका वह्निनिलया वह्निरूपिणी। यज्ञविद्या महाविद्या ब्रह्मविद्या गृहालया। भूतेश्वरी ब्रह्मदात्री विमला कनकप्रभा। त्रिरूपाक्ष
विशालाक्षी हिरण्याक्षी शतानना। अक्षा च कामला विद्या सिद्धविद्याधराधिपा। दिवमाता दिति: पुण्या दनु: कद्रुसुवर्णिका। अपर्णा धर्मलाका महोर्मि वेरु
णालया। हृष्टा तुष्टिकरी छाया सामगा रुचिरा परा। रूपनु: सामनिलया वेदो तपि: सुतिप्रिया। प्रद्युम्नदयिता साध्वी सुखसौभाग्यसिद्धिदा। सर्वकामप्र

© Dharmartha Trust J&K. Digitized by eGangotri

विद्याले
२७

दाभद्रा सुभद्रा सर्वमंगला॥ धामित्री धमनी माध्वी मधुकैटभमर्दिनी। बाणप्रहरणी बाणकोका बंतनशक्त्रयः॥३०६॥ ॥इति चक्रिवासिनीमातृका॥ अथ
वल्लेश्वरीमातृका॥ महावज्रेश्वरी नित्या विघ्नस्तोभ्याट्टहासिनी। उषानिरुद्धपत्नी च रेवती रेवतात्मजा॥ हलायुधप्रिया मायागोकुलागोकुलालया… रुद्रा
कृष्णरजानंदस्वदुहिता सुभ…ता। कंसविद्राविणी कुब्जा सिद्धवारणसेविता। गोक्षीरंगा घृतवती भव्या गोपजनप्रिया। शाकंभरी सिद्धविद्या… सिद्धिकरी त्रि
या। दावाग्निर्विश्वरूपा या विश्वेशी दितिसंभवा। आधारचक्रनिलया द्वारशांतावगाहिनी। सूक्ष्मासूक्ष्मतरा स्थूला सप्रपंचा निरा…। निःप्रपंचा क्रियातीता क्रिया
रूपाफलप्रदा। प्राणाख्या मंत्रमाता च सोमसूर्याग्नितत्पदा। छंदः ख्याता च विरूपा परमानंददायिनी। निरानंदा स्तता श्लोकपंचाशक्त्रयः क्रमात्॥३०८॥ ॥इति व
ल्लेश्वरीमातृका॥ ॥अथ शिवदूतीमातृका॥ शिवदूती सुतेदवानंदिनीवि पद्मिनी। पातालखंडमध्यस्था हृत्केशावनखेचरी। कलासमदशी… पूर्णा वं… निभान
ना। आत्मज्योतिः स्वयंज्योतिरग्निज्योतिरनाहता। प्राणशक्तिः क्रियाशक्तिरिच्छाशक्तिः सुखावहा। ज्ञानज्योतिः सुखानंदा वेदिनी महिमाप्रभा। … साक्षी
सामस्वरविनोदिनी। गीतिः सामध्वनिः स्तोत्रं कृतिः सामवेदिनी। अध्वरागिरिजा क्षुद्रा नियमानुग्रहात्मिका। पुराणी शिल्पिजननी इतिहासा च … वेदिका
यज्ञजननी महावेदिः सदक्षिणा। आन्वीक्षकी त्रयी वार्त्ता गोरक्षा गदिताः क्रमात्॥ शक्त्रयः श्लोकपंचाशा सर्वकामप्रदायकाः॥३१०॥ ॥इति शि… मातृका॥
अथ त्वरितामातृका॥ त्वरिता तोतला धात्री किराती कपिवर्णिजा। सर्वेश्वरी ध्रुवा सर्वा सर्वज्ञानसमुद्भवा। त्रिमात्री त्रिपुरा सर्वा कार्या … मातः परं … शांतिक
रकार्ससंज्ञोकाः स्वरशक्त्रयः। कौमारी विश्वजननी शूलहस्ता महेश्वरी। किंकरी शक्तिहस्ता च दक्षयज्ञविनाशिनी। वरायुधा शंखरथा … वरा
हमूर्तिर्वाराही नरसिंहा सिंहविक्रमा। सहस्राक्षा सुरारा … सर्वपापापहा शिवा। शिवदूती घोररेवा क्षुरिपाशासिधारिणी। विकराली महाकाली कापाली
पापहारिणी॥ महालक्ष्मी महाकुक्षि… जिनी वंदवंदिनी। षट्चक्री वज्रनिलया… मिनी॥ इति… त्रयः॥ श्री
२२७॥ ॥इति त्वरितामातृका॥ अथ कुलसुंदरीमातृका॥ बालोमा भैरवी शांता त्रिपुरा त्रिपुरेश्वरी। आर्हं सात्रिमिर… वरायुधा वरारो २७
होवरेण्या विष्णुवल्लभा। आकृतिर्नि… सिद्धिः सर्वार्थसाधिनी। …निवासा च… शक्तिः मात्राका

© Dharmartha Trust J&K. Digitized by eGangotri

शाकलान्तिका। पीयूषावाजि[illegible]कारा[illegible]सा धारा दूरंमदा। विघूर्णितघोसिंहाक्षी ह्यापिंगांकि[illegible]रा। कपालीव घयेताक्षलीभ[illegible]स्वचनमस्कृता। स्पष्टास्पष्टप
दाभावाविभावादेशभाषिणी। सर्वोरभानिरारंभाग्रारंभाभावकाहिनी। भीरे[illegible]सुराचैव प्रोक्ता व्यंजनशक्तयः॥ [illegible]तेवाकामातृका॥ अथ निसा
निसामातृका॥ निसाव भैरवी सूक्ष्मा प्रचंडास हृतिप्रदा। प्रियावंडव भुष्यवरकोगीरक्तलेवनारस दुंगधारिणी[illegible]कपालवाहिनी। हिमघनस्यमावनासं
प्रोक्ताः स्वरशक्तयः। भूतनाथा भूतभावा दुर्वेत्तजनसंमदा। पुत्यो ह्यावापुत्यगंधा पुत्यपापविवेकिनी। दिग्वासाः क्षौमवसना एकवस्त्रा[illegible]धरा। कपालमालिनी
घंटाधरा चैव धनुर्धरा। टंकहस्ताऽबलाबाली। हाकिनी शाकिनी रमा। ब्रह्मांडपाहितसुरवा विष्णुमाया चतुर्भुजा। अष्टादशभुजा भीमा हिंग्रिका चित्ररूपिणी। [illegible]सना
पपवहा स्फुरत्कांतिः शुभावहा। भैतिनी भैतिनी माया मानदा माननवर्धिनी। जगत्प्रिया विष्णुगर्भा मंगलामंगलप्रिया। भूतिर्भूतिकरी भाग्या [illegible]गी ह्रस्व[illegible]तया मीके
रीकृता आद्यावेशविवर्धिनी। अघोघस्मनि[illegible]शोषणी शापिरूता ताश्शक्तयस्त्विमाः। एकपंचाशदर्णानां सर्वसिद्धिप्रदायकाः॥ २४२॥ ॥ इति निसानि[illegible]का॥ अथ
नीलपताकामातृका॥ ॥ अथ नीलपताका च नीलमाया जगत्प्रिया। सहस्रवक्त्रा पद्माक्षी पद्मिनी श्रीरनुत्तमा। दिव्यक्रमा दिव्यभोगा दिव्यमाल्यानुलेपि[illegible]ता छवस
नासौम्या सर्वर्तुकुसुमोचिता। स्वराणां शक्तयस्त्वेताः साधकाभीष्टदायकाः। सर्वैश्वर्यगुणोपेता प्राणवाग्वागसंभवा। व्यंजना व्यंजनको व्यक्ता सर्ववर्णानुवर्तिनी। जगन्माता
भयकरी भक्तधात्री सुदुर्लभा। काम्या नीदरिनीदंष्ट्रा खड्गमुद्गपाणी पशुहस्ता सूत्रदा दर्शिनी वीनाविवीना विज्ञिनी परा। वायव्यातिः प्रिया दीक्षा परीक्षा शिवसंभवा। राक्षसी ता
मसी सत्वा सत्वोद्रिक्ता विमोहिनी। अतीतानागतज्ञाना वर्णमापदेशिनी। आशेषोपदेशिनी सैपित्त सत्वधोधा धराधरा। प्रकृतिर्विकृतिर्भोगा धूर्जटी विकृतानना। योगिप्रि
याऽयोगिगम्या योगिध्येया परापरा। वैष्णवी त्रिपदी दक्षिरक्षया कादिशक्तयः॥ २५५॥ ॥ इति नीलपताकामातृका॥ ॥ अथ विजयामातृका॥ विजया जयदा जैत्री अजि
तास्मलोचना। प्रतिष्ठा तत्स्थिता माता जितमाया कुकोद्भवा। कृशांगी वायवी क्षामा क्षामखंडा त्रिलोचना। स्वराणां शक्तयस्त्वेताः कामा कामेश्वरी रमा। कामिका मधिपा
काम्या कामवारविहारिणी। तनुरांगी निरालस्या निरंजना सनातनी। विशल्यकरणी श्रेष्ठा मतसंजीवनी परा। संधिनी च क्रममिता चंद्ररेखा सुवर्णिका। रत्नमाला त्रि
लोकस्था शशांकावयवांकिता। तारा तीता तारयंती भूरिभूरिप्रभास्वरा। क्षेत्रक्षा भूरिशुद्धय मंत्र हुंकाररूपिणी। ज्योतिर्लीनाग्रहागतिः सर्वप्राणभृतीवरा। कादीनां श

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२८

४८

ग्राक्रयः प्रोक्ताः साधकाभीष्टसिद्धिदाः ॥ ३५७ ॥ ॥ इति त्रिपुरामातृका ॥ ॥ अथ सर्वमंगलामातृका ॥ सर्वमंगलिकाख्या मंगला मंगलप्रभा । कांतिः श्रीः प्रीतिरचला तपो
त्स्माथैव विलासिनी । वरदा वारिजाख्या गागारवीयासुदेवता । अनंतशक्तिः संप्रोक्ताः स्वराणां शक्तयः क्रमात् । कामिका शक्तिरतुला सर्वज्ञा ज्ञानदायिनी । मुक्तिः सुमुक्तिः शन्ती क्षीणु
क्षि वेधा मदालसा । ब्रह्मविद्या प्रभावेशा महापंचाप्रकाशिनी । ध्याना ध्येया ध्यानगम्या योगिनी योगसिद्धिदा । अक्षाक्षरसंताना ब्रह्मविद्या शिवप्रदा । पंचब्रह्मात्मिका रुद्रविद्य
विद्यास्वरूपिणी । पंचतत्त्वात्मिका विद्या त्रिपुरबीजतत्त्वगा । सर्वबीजात्मिका सिद्धिरहंतोपाधितमिनी । कल्पांतदहनज्वाला सहस्रविभवरूपिणी । कादीनां शक्तयस्त्वेताः साधकाभीष्टद
यकाः ॥ ३६४ ॥ ॥ इति सर्वमंगलामातृका ॥ ॥ अथ ज्वालामालिनीमातृका ॥ ज्वालिनी महज्वाला ज्वालामाला महोज्ज्वला । विभुर्भासोद्भवदना ज्ञानपुस्तकधारिणी । कपर्दिनी कृता
भासा ब्रह्माणी स्वात्मवेदिनी । आत्मज्ञानामृतानंदा नंदिनी रोमहर्षिणी । स्वराणां शक्तयस्त्वेताः कीर्तिकाली धृतिर्मतिः । विजया कापि भगमोऽत्रा धात्री सर्वभाविनी । कात्यनी
कालयाताव कुट्टिला वाजिह्वमेखकी । नाडी मुकुंती होरात्रिस्तुटी कालविभेदिनी । सोमसूर्याग्निम ध्यस्था मायातीता सुनिर्मला । केवका निष्कलाभ्रु द्वा अपिनी व्योमवि ग्रहा स्य
कं दमेरवी व्योमा व्योमातीता परेस्थिता । स्तुतिः स्तव्या नुतिः पत्या पूजार्हा पूज्यकप्रिया । कादीनां व्यंजनानां वसंप्रोक्ताः शक्तयस्त्विमाः ॥ ३७१ ॥ ॥ इति ज्वालामालिनीमातृका ॥ अ
अथ विचित्रामातृका ॥ १ विचित्रा चित्रवसना विचित्राणी चित्रभूषणा । अनुलोमापसंधिस्था मध्यमानामिकात्मिका । तेजोवती पयगर्भा मंदरस्था घ्राणावलिअवविकुटी... मिनी य
कामुकेशी स्वरशक्तयः । सोमपा सोमसंकाशा वेताली तालसंस्थिका । सोमप्रिया सोमवती मंत्रपूता पवित्रक्रिया । मणोली कुमुदा भुक्तिर्विधा ... शिरवस्थिता ... की एणी
विंबारक्तोष्ठा वारुहासिनी । वामभवावारुंजया कासुप्रसादा सुलोचना । कौशिकी केधराघोणा कुकुघ्नी कामलोचना । कामेश्वरा कामवारा अकामा पूजिता ... का मुर
प्रेद्धा हि स्यात्कादिशक्तयः ॥ ३७७ ॥ ॥ इति विचित्रामातृका ॥ ॥ अथ दुर्गामातृका ॥ दुर्गा च कौमुदी वैष्णवी माहेश्वरी शिवा ... जगद्धात्री स्थितिसंहारकारिणी योग
निद्रा भगवती देवी स्वाहा स्वधा सुधा । सप्तिराशप्रोक्ताः स्वराणां शक्तयः क्रमात् । कलामाया रमा श्रेष्ठा तुष्टिः पुष्टिः स्थितिर्गतिः । रतिः प्रीतिर्धृतिर्नीतिर्विभूतिर्मतिरुन्नतिः
क्षितिः क्षांतिः क्षमा तिः कांतिः शांति कीर्तिर्महामतिः । क्षुत्पिपासा स्पृहा सज्ञा निद्रा मुद्रा विदालिका । ... भारती लक्ष्मीः शची संज्ञा विभावनी । कादीनां शक्तयः प्रोक्ताः सर्वसिद्धि
प्रदायकाः ॥ ३९२ ॥ ॥ इति दुर्गामातृका ॥ ॥ अथ सरस्वतीमातृका ॥ सरस्वती मंत्रशक्ति वेदमाता जगन्मयी मातृसी हारा हंसी सरागा क्षेमकारिणी । अक्षया निर्वाणविभूति

© Dharmartha Trust J&K. Digitized by eGangotri

प्रीति लोमसी लोमहारिणी। विलीनदेहाः समूढाः स्वराणां शक्तयः क्रमात्। कामदा कामिनी कांता परमेष्ठी त्रिमोचना। पुण्या तु वंधाम्नेयस्का दयासाराज्ञकें
पिनी। वत्सस्तनापंचपला सुरभिः सुरपूजिता। विश्वासजीविनी विश्वा कामधेनुस्त्वकामदा। अविद्या दुहिता कांता कपिला मलवर्जिता। सुशीला जीववत्सी
वशीलवत्सा सुवत्सला। नंदिनी जयदा जेया दुर्जेया दुःखहारिणी। स्वस्तिदा स्वस्तिकृत्स्वस्तिः स्वरूपा स्वस्तिदक्षिणा। शक्तयः शुभ्रवर्णाश्च अंतर्गतानां शुभप्र
दाः॥२८४॥ ॥इति सरस्वतीमातृका॥ अथ वाराहीमातृका॥ वाराही भद्रिणी भद्रा वाराही कोलवक्त्रका। जृंभिनी स्तंभिनी विश्वा जंभिनी मोहिनी सत्वशु
भा। रूपिणी वशिनी शक्ति रमाभास्वरशक्तयः खड्गिनी शूलिनी घोरा शंखिनी गदिनी तथा। वज्रिणी वज्रिणी चैव पाशिन्यंकुशिनी शिवा। वापिनी भवबंधघ्नी
विजया जयदायिनी। महाघोरा महाभीमा भैरवी चारुहासिनी। पद्मिनी वाणिनी चोग्रा मुसलिन्यपराजिता। जयप्रदा जयादेवी रिपुहा भयवर्जिता। नमस्या
मानिनी पात्री कटिनी दंष्ट्रिणी रमा। अक्षयाकादिवर्णानां शक्तयः सिद्धिदायकाः॥२९४॥ अथ त्रिमूर्तिमातृका॥ केशवो नारायणो माधवगोविंदावेवः।
मधुसूदनसंज्ञोऽन्यः स्यात्त्रिविक्रमवामनौ। श्रीधरश्च हृषीकेशः पद्मनाभस्तथैव च। दामोदरो वासुदेवः संकर्षण इति स्मृतः। प्रद्युम्नश्चानिरुद्धश्च स्वराणां
मूर्तयः क्रमात्। ततश्चाक्षरशक्तिश्च आद्यावैवष्टपुनर्भू शान्तो गोधेनयना क्रूरः स्याद्रूपिणी तथा। कुमावलूनदोषा च ततश्चैव कलापिका। कारिणेबोध
वती वैर्वकान्या स्यादेजनप्रभा। अस्थिता लोधराचैव स्वराणां शक्तयः क्रमात्। भवः शर्वश्च रुद्रश्च ततः पशुपतिस्तथा। उग्रश्चैव महादेव भीम ईशान एव वान्
तत्तत्पुरुषो घोरः सद्योजातस्ततः परं। वामदेवस्तु विज्ञेयः कथादीनां च मूर्तयः। करभद्रा रक्तवला गरिमादिफलप्रदा। घोरस्याद्यापंक्तिमासा ततश्चाद्य
धारिणी। छंदोमयी जगद्रक्षा नाकाति ह्रीनप्रदा तथा। टं कं ढं कं धराचैव ततश्च कृतिडामरी। कभादीनां च वर्णानां प्रोक्ता द्वादशशक्तयः। ब्रह्मा प्रजापतिर्वेधाः प
रमेष्ठी पितामहः। विधाता विरिंचिश्च स्रष्टा च चतुराननः। हिरण्यगर्भो विज्ञेयो यादीनां दशमूर्तयः। पक्षिणी रंजिनी लक्ष्मी वज्रिणी शशिधारिणी। षडाधारा लया
सर्वनायिका हासिता नता। ललिता चक्षमा चैव यादीनां दशशक्तयः। त्रिमूर्तिमातृकाप्रोक्ता सर्वसिद्धिप्रदायकाः॥३०७॥ ॥इति त्रिमूर्तिमातृका॥ अथ कामद

त्रि

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि० शालीव
२९

लुप्माल्का स्वयह्मा ऐंमेव॥ अद्भुतीति रतिश्चैव धृतिः कांतिर्मनोरमा। मनोहरा ततश्चैव प्रोक्ता सा त्वन्मनोरथा। मदनोन्मादिनी पश्चान्मोहिनी शंखिनी तथा॥
शोषिणी च वशंकारी शिंजिनी सुभगा ततः। कामस्यैताः कलाः प्रोक्ताः स्वराणां षोडशोदिताः॥ ॥इति कामकलाः॥ अथ सोमकलाः॥ पूषा चैव सुमनसा रतिः प्रीतिः
धृतिस्तथा। रतिः सौम्या मरीचिश्च परतस्त्वंशुमालिनी। शशिनी चांगिरा छाया ततः संपूर्णमंडला। तुष्टिश्चामृता ख्याता कथिताः कलाः स्युः सस्वरा विधोः॥ इति सोमकला॥
अथापराजिता मातृका॥ प्रत्यंगिरा सिंहमुखी तथा ज्वालामुखी शिवा। वैष्णवी नारसिंही च त्रिमात्रा शांकरी परा। अर्धमात्रा भगवती शूलिनी शंभमर्दिनी। शशांकधारि-
लीचैव भीषिका च कपालिनी। स्वराणां शक्तयः प्रोक्ता धृतभूलकपालिका। उग्रा वीरा महाज्वाला हाकिनी विश्वरूपिणी। सुघा च ज्वलिनी लक्ष्मीस्तथा भिस्त्रासवर्जिता।
रवी। वरेण्या तालतलामुखी च खातीता च ततः परं। नमुंडमाला सिंही च वह्नी भीमा च रखंडिनी। एणगिरिणी भयदा चैव द्रविणी मत्तरूपिणी। सुकौरी मधुहारिणी उन्मत्ता
च नतिप्रिया। मालिनी म्याणरूपा च हसिनी वाशिरखंडिनी। कुंडिनी क्षांतिरूपा च कादीनां शक्तयः क्रमात्॥५१८॥ ॥इति प्रत्यंगिरामातृका॥ अथ भवानीमातृका॥
भवान्यनेला शरभी चक्रिणी करुणाकरा। एकमात्रा द्विमात्रा च त्रिमात्रा चापराजिता। अर्धमात्रा परा सूक्ष्मा षट्पदा च मनस्विनी। निष्कलाः शक्तयः प्रोक्ताः स्वरा-
णां वसुधर्मदाः। स्वच्छंदा च प्रसन्नेहा व्योमाकारा निरूपिता। गद्यपद्यात्मिका चैव सर्वालंकारसंयुता। साधुवंधपदन्यासा सर्वोक्तरत्नावली। षट्कर्मकर्कशा-
कारा सर्वतर्कविवर्जिता। आदित्यवर्णा वर्णा च तामसी पररूपिणी। ब्रह्माणी ब्रह्मसंताना वेदवादिनीश्वरी। पुराणन्यासमीमांसा धर्मशास्त्रागमाश्रि-
ता। वेदा वेदवती सर्वा हंसविद्याधिदेवता। विश्वेश्वरी जगद्धात्री विश्वनिर्माणकारिणी। वैदिका वेदरूपा च कालिका कालरूपिणी। नारायणी महादेवी सर्वस-
त्वाविवर्जिता। हिरण्यवर्णरूपा च कादीनां शक्तयः क्रमात्॥५२६॥ ॥इति दुर्गामातृका॥ अथ खेचरीमातृका॥ खेचरी शाकिनी दुष्टा व्योमांबा व्योमरूपिणी। व्यो-
मस्था व्योमरूपा च व्योमातीता जगन्मयी। शोभवी शंभुवनिता शरणार्त्तिप्रभेदिनी। जगन्माता जगद्धात्री परविद्या सुमंगला। स्वराणां शक्तयस्त्वेताः भवबंधा-
मोचकाः। परापरायणा भव्या मालिनी मदविह्वला। विद्या सूक्ष्मा प्रभासं धा [illegible] जगत्स्थिता। निशाचरी तपा [illegible] मोहनी रंजनी
वश्या च रामा तत्स्वरूपिणी। वेदविद्या महाविद्या [illegible] भोगिनी दंडिनी रभा [illegible] शारदा च शीलाक्षी ह्रादिनी चाक्षय

श्री
२९

© Dharmartha Trust J&K. Digitized by eGangotri

तथा। कादीनां शक्तयः प्रोक्ताः साधकेष्टफलप्रदाः ॥ ४२ ॥ ॥ इति [illegible] ॥ अथ चामुंडामातृका ॥ चामुंडा [illegible] चंडमुंडविनाशिनी । नारायणी
भद्रकाली विरजा विश्वमातृका । अजिता भार्गवी सौम्या दुर्गा दुर्गार्तिनाशिनी । आ[illegible]यनी वेदघंटा [illegible] प्रोक्ताः स्वरशक्तयः [illegible] कमला [illegible]डिनी चैव शादिनी चंडिका प
रा वरिस्त्रा कृत्तिलीर्न घार्णकारी जयदा ततगरटं कुहस्ता चरंकारी डामरी ढक्किकाशिवा । तमार्पहीं [illegible]नेशी दयारूपा धनप्रदा नव्यापरा च फट्कारी बंधिनी
भयवर्जिता महामाया च योगेशी रंकिली संवकेशिनी । वरदा शाकिनी चंडा सर्वेशी हलिनी तथा । जर्जिता च तथा श्यामा दरी स्यात्क्षादशक्तयः । केवलं मातृकां न्य
स्य चंडाभक्तो भवेद्यदि । चामुंडाशक्तिसहितां मातृकां विन्यसेद्बुधः ॥ ४५० ॥ ॥ इति चामुंडामातृका ॥ अथ परामातृका ॥ परापरा च णा सूक्ष्मा निश्चादा सायणी
जया । विजया मानदा दक्षा योगिनी मानदा रतिः । कौमारी पार्वती दुर्गा मानिनी स्वरशक्तयः । कलावती चकेरुला कामिनी कांतिदायिनी । खातीता खेचरी गामा
मूर्त्तिः पंक्तिश्छंदो [illegible] हृतं। तथा वर्णमयी वाग्देवता परिकीर्तिता। वाग्भवं बीजं [illegible] राजं कीलकं स्यात् श्रीविद्यांगतया प्रयुज्यते न्यासे तु विनियोगः स्यात् बालाबी

© Dharmartha Trust J&K. Digitized by eGangotri

वे धार्णव
५०

तत्र येण मु। द्विरावृत्त्या क्रमेणैव षडंगन्यासमाचरेत्॥ मुक्ताशेखरकुंडलांगदमणिग्रैवेयहारोर्मिकां विद्योतद्वलयादिकं कणकटिसूत्रां स्फुरन्नूपुरां। माणिक्योदरब
न्धुरस्तनभरामिंदोः कलां बिभ्रतीं पाशं सांकुशपुस्तकाक्षवलयं दक्षोर्ध्वबाह्वादितः पूर्णेंदुप्रतिमप्रसन्नवदनां नेत्रत्रयोद्भासितां मिंदुक्षीरयलक्ष्मात्रविलसन्माल्यानुलेपांबरां
पंचाशल्लिपिनिर्मिताखिलजगद्धा देवतादेवतां मूलाधारसमाहतां भगवतीं वर्णांबुजे चिंतयेत्॥ आं ऐं क्लीं श्रीं ऐं क्लीं सौः अं सौः क्लीं ऐं इत्यादि न्यसेदिति बाला संपुटितमातृकान्यासः॥
अथ परासंपुटितमातृकान्यासः॥ ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रं छंद ईरितं। परा सरस्वती देवी मातृकादेवता स्मृता। षड्दीर्घभाजा बीजेन षडंगानि समाचरेत्॥ अलं कृ शरीरं का मां अक्षस्रजं
वं दधत्कलावतीं मुद्रापुस्तकलसद्धस्तां प्रणमामि परां कलां॥ ५॥ सौः अं सौः इत्यादि न्यसेदिति परामातृका॥ ॥ अथ श्रीविद्यामातृकान्यासः॥ ऋषिस्तु दक्षिणामूर्तिः पंक्तिश्छंद उदा
हृता। देवता मातृकारूपा महात्रिपुरसुंदरी। कूटत्रयद्विरावृत्त्या षडंगानि समाचरेत्। आरक्ताभां त्रिनेत्रामरुणिममुकुटां रत्नताटंकरम्यां हस्तांभोजैः सपाशांकुशमदनधनुःसायकैर्विस्फु
रंतीं। आपीनोत्तुंगवक्षोरुहलुठद्विलुठत्तारहारोज्ज्वलांगीं ध्यायेदंभोरुहस्थामरुणनिवसनामीश्वरीमाश्रयामि॥ ६॥ मूलं अं नमः शिरसीत्यादि न्यसेदिति श्रीविद्यामातृका॥ ॥ अथ हंस
मातृका॥ ऋषिस्तु दक्षिणामूर्तिश्छंदो गायत्रमुच्यते। हंसगौरी महादेवी मातृकादेवता स्मृता। हंसा षड्दीर्घयुक्तेन षडंगन्यासमाचरेत्॥ उद्यद्भानुस्फुरिततडिदाकारमर्धांबिकेशं पाशाभी
तीवरपरशुं संदधानं कराब्जैः। दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं सौम्याग्नेयं वपुरवतु वश्चंद्रचूडं त्रिनेत्रं॥ ७॥ हंसः अं नमः शिरसीत्यादि न्यसेदिति हंसमातृका॥ ॥ अथ परमहंसमा
तृका॥ ऋषिः परमहंसः स्याद्विराट् छंद उदाहृतं। चिन्मयी देवता प्रोक्ता परमात्मस्वरूपिणी। प्रणवद्वयमध्यस्थवर्णैः कुर्यात् षडंगकं। श्रीमत्परात्ममनुतं मितवर्णरूपं सांबं शरासरदर्भगरि
नीयमार्गं। विद्याक्षसूत्रकलशं दधतीं वमुक्तां ध्यायेत्समस्तजननीं विशदां त्रिनेत्रां॥ ८॥ सोहं अं नमः इत्यादि विलोमेन तत्तत्स्थानेषु न्यसेदिति परमहंसमातृका॥ ॥ अथ कलान्यासः॥
स तु त्रिपंचविधः॥ तारोत्थकला। कामकला। सोमकला। त्रिमूर्तिकला। अष्टत्रिंशत्कलाचेति। अष्टत्रिंशत्कलान्यासोपि द्विविधः। ज्योतिरष्टत्रिंशत्कला। ह्रीं माष्टत्रिंशत्कलाचेति। अष्ट
स्वरात्मककलान्यासस्तु प्रागेवोक्तः। विशेषस्तु। तारस्य वर्णसंयुक्ता न्यस्तव्यास्ता नमोन्विताः। स्थानेष्वेतेषु पुनर्मातृकायाः कलान्यसेत्। तारस्य पंच भेदास्तु पंचाशद्वर्णगाः के॥
स्वरकलान्यासोनंतरं। सदाशिवेन संजाता नाददेताः सितत्विषः। अक्षस्रक्पुस्तककराः कपालाब्जकरा बुधाः इति ध्येयाः। कचवर्गकलान्यासोनंतरं। [illegible] न्यासस्तु चामीक
राभाः प्रभाः। करांबुजधृताक्षस्रक्पंकजाभयकुंडिकाः इति ध्येयाः। टतवर्गकलान्यासोनंतरं। उकाराद्विष्णुनोत्पन्नाः समालदलसन्निभाः। अभीति वरद [illegible] चक्रकौमोदकीहस्ताः इति
ध्येयाः। पयवर्गकलान्यासोनंतरं। रुद्रेणमाद्या उत्पन्नाः शरच्चंद्रनिभप्रभाः। उद्दहत्तोमयं [illegible] कपालके [illegible] वरदं इति ध्येयाः। शवर्गकलान्यासोनंतरं। द्विभावे [illegible] विधिर्जपाकुसु

श्री
५०

© Dharmartha Trust J&K. Digitized by eGangotri

मसंज्ञिभाः॥ अभयं हरिणं टंकं दधानाबाकुभिर्वरे। इति ध्यात्वा॥ इति विशेषः॥ अथ तत्पादप्रसादनमुकरणे बोद्धव्याः॥ अथ ज्योतिरष्टत्रिंशत्कलान्यासः॥ ५ ॐ अं नमस्तारायै नमः शिरसि। इत्या
दिस्वरकलाः क्रमेण विन्यसेत्। ततो दक्षहस्तसंध्यग्रेषु ४ कं भं तपिन्यै नमः इत्यादि दं। जं ज्वालिन्यै नमः इत्यंतं विन्यस्य वामहस्तसंध्यग्रेषु ४ धं धूम्रायै नमः इत्यादि नं एं [illegible] इत्यंतं विन्यसेद्दक्षि
पादसंध्यग्रेषु ४ टं ठं धारिण्यै नमः इत्यादि ४ डं ज्वालिन्यै नमः इत्यंतं विन्यसेत्। ततो वामपादसंध्यग्रेषु ४ वं ज्वालिन्यै नमः इत्यादि ४ हं कपिलायै नमः इत्यंतं विन्यस्य [illegible]। इमं मस्तके व्यापकं
व कुर्यादित्यष्टत्रिंशत्कलाः कलान्यासः॥ अन्ये कलान्यासाः अग्रे वक्ष्यंते॥ एतदुक्तं प्रपंचयागः इति श्रीमदाचार्यमते सततमनुकरिष्यामः वर्गतः॥ तस्य फलं। एवं वर्णमयं होमं कलादि यतनुर्नरम
जपेत्सकलान्मंत्रान् ततः सिद्धिमवाप्नुयात्। प्रपंचयागस्य विधिर्विधाता भवेत्समं स्त्रीकृतकल्पएव। सर्वे स्फुरंतः प्रभवंति मंत्राः सदा प्रयागीति निगद्यते सः। एतस्य होमस्य न कोटिभागोप्येते
न तुल्यं क्रतुभिस्त्रिहोत्रं। एवंविधातुः खलु यत्र तत्र शरीरपातोपि भवेद्धि मुक्तिः॥ तथा च प्रपंचसारः॥ शुद्धस्थापि सबिंदुकस्य ककारादि [illegible] शक्तिक्रमलामारे [illegible] ककार
शः॥ न्यासास्ते दश धाप्यष्टङ्गादितः स्युर्ब्रह्मयागांतिकाः सर्वसाधकसिद्धिसाधनविधौ संकल्पकस्य द्रुमाः॥ प्रपंचयागस्तु विशेषतो विपत्प्रपंचसंसारविशेषपावकः। परं च निर्लेपमजं तमव्ययं तमा
परस्य वार्थस्य निवेदकः सदा। न्यस्य मंत्री यथान्यायं देहे विन्यस्य मातरं। जपेन्मंत्रान्भजेद्देवान्यजेद्देवमनन्यधीः। देवो भूत्वा यजेद्देवान्नादेवो देवमर्चयेत्। एवमाह श्रुतिः साक्षात्त्रैलोक्यं वि
न्यसेद्बुधः। यो न्यासकवचच्छन्नो मंत्रं जपति तं प्रिये। विघ्ना दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजाः। अकृत्वा न्यासजालं यो मूढात्मा प्रजपेन्मनुं। बाध्यते सर्वविघ्नैश्च व्याघ्रैर्मृगशिशुर्यथा।
॥ ॥इति सर्वमातृकान्यासः॥ ॥अथ षट्त्रिंशत्तत्त्वन्यासः॥ ५ लं पृथिवीतत्त्वव्यापिकायै श्रीमहात्रिपुरसुंदर्यै नमः पादयोः। एवं वं अप्तत्त्व० लिंगे। विलोमक्रमेण तेज० हृदि। वायु०
मुखे। आकाश० शिरसि। गंध० पादयोः। रस० लिंगे। रूप० हृदि। स्पर्श० मुखे। शब्द० शिरसि। उपस्थ० लिंगे। पायु० पायौ। पाद० पादयोः। पाणि० पाण्योः। वाक्० मुखे। घ्राण० घ्राणयोः। जि
ह्वा० जिह्वायां। चक्षु० चक्षुषोः। त्वक्० सर्वांगे। श्रोत्र० श्रोत्रयोः। मनः हृदि। अहंकार० हृदि। बुद्धि० हृदि। प्रकृति० सर्वगात्रे। पुरुष० सर्वगात्रे। राग० हृदि। शुद्धविद्या० हृदि। कला० हृदि।
नियति० सर्वगात्रे। कालतत्त्व० सर्वगात्रे। माया० हृदि। विद्या० हृदि। ईश्वर० हृदि। सदाशिव० ग्रीवायां। शक्ति० मूलाधारे। शिव० सहस्रारे॥ ॥इति षट्त्रिंशत्तत्त्वन्यासः॥ अथ प्राणा
यामः॥ इति कृतो धिकृतो भवति शिवे परमदेवतमंत्रजपादिषु पवनसंयमनं त्वमुनाचरेद्यमिहजन्मसमो मनुमिच्छति। इति वचनात्। प्राणायामं विधायैव योगपीठं न्यसेत्ततो।
इति वचनाच्च मूलविद्यया प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात्॥ तत्र प्राणायामविधिर्विविच्यते। तत्र प्राणानां शरीरादपि द्वादशांगुलाधिकानां आयामः आपूरणमापा
नः॥ संकुचितभावः शरीरसाम्यं शरीरान्न्यूनभावापादनं चेति प्राणायामशब्दार्थः॥ अत्र तएव पवनसंयमनामित्युक्तं। त्रिपुरासारसमुच्चये। अथो देहशरीरं [illegible] कीयांगुलीभिर्बुधैः प्रमा

© Dharmartha Trust J&K. Digitized by eGangotri

वत्यंगुलायामस्तु कं। दिनेशांगुलीभिः शरीरात्सभी रोधिकः प्राणसंज्ञो मतो यथिक्तिः॥ इति प्राणवायुं सदाभ्यासतो यो नरो न्यूनभावेन यत्नेन भंगात्॥ समस्तं शरीरेणवाभ्य
तलेस्मिन् संप्रज्ञोवुधैरुक्तमेषो योगविद्भ्यः॥ इति स स पूरकाद्यंगत्रयात्मकः। तथाव। अष्टांगत्रयात्मकः प्रोक्तः पूरकुंभकरेचकैरिति। तत्र कुंभक एव प्राणायामशब्दे मुख्यः।
६१ इतरयोस्तु उपकारकत्वात्। ज्ञानार्णवे॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं। प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना॥ इति। स पुनर्द्विविधः सहितः केवलश्च। तत्र
सहितोपि द्विविधः रेचकादिक्रमः पूरकादिक्रमश्चेति। तत्र रेचकादिक्रममाह योगशास्त्रे। प्राणायामस्त्रिधा प्रोक्तो रेचकपूरककुंभकैः। सहितः केवलश्चेति कुंभको द्वि
विधो मतः। विरेच्य पूरकं कार्यं शनैः सहितकुंभकैः। यावत्केवलसिद्धिः स्यात् तावत्सहितमभ्यसेत्। तत्क्रममाह प्रपंचसारे। रेचकपूरककुंभकभेदात्त्रिविधः प्रभंजनाया
मः। मुंचेद्दक्षिणयानिलमस्मात् पेत्तमयाम ध्यमया। संस्थापयेत्पवनाद्येवं प्रोक्तानि रेचकादीनि। षोडशद्विगुणचतुःषष्टिकमात्रा आलिलानिवक्रमशः इति ना ... तस्य दक्षिणाद्ये
स्मादिभिः संबंधः। तथाव। इडावामे तनोर्मध्ये सुषुम्णा पिंगला परे। द्विगुण इति षोडशानां द्विगुण इत्यर्थः। अथ पूरकादिक्रममाह॥ समुच्चये॥ शीतांशुमार्गेण शनैः समीरमा
पूरयेत् ह्वोदरमादरेण। विकारमात्राभिरयेत तं द्वः कालाग्निमूलार्पितचित्तवृत्तिः। ततो धारयेन्मारुतं धीरचेता श्चतुःषष्टिमात्रासमापूरितं तं। वहिर्भास्वतारेचयेन्मंदमंदं ततः मध्य
भिरतर्जितकंद्धताभिः। तथा वामकेश्वरे॥ पूरकं कुंभकं चैव रेचकं च विचिंतयेत्। मूलाधारलयं कृत्वा पीत्वा वायुं शनैः शनैः। यथेष्टं पूरयेद्देहं तत्ववित् विजितेंद्रियः। ततस्तत्स्तंभ
यद्वायुं प्रकाशगतमानसः। कुंभकेविंतयेद्दिव्यां विद्यां मुक्तिकरीं शुभां। तदा तु रेचयेद्वायुं गम्यते यस्य चैभावतः। देहान्तेन्सार्य मंत्री स्वदेहस्थं तमोगुलं वामेन पूरयेद्वायुं
दक्षिणेन विरेचयेत्। मोहे क्षणसमे नैव मंत्री कुंभकमभ्यसेत्। सदा कुंभकयोगेन लभ्यते सिद्धिरुत्तमा। अभ्यासीकारयेन्मात्रां यथेष्टं तत्वदर्शिनां। यथाशक्त्यापि वेद्वायुं यथा
शक्त्या च कुंभयेत्। स्वभावं च त्यजेद्वायुस्ततः सिद्धिरजायत इति। तस्यापि विद्यार्यां पूरकादिक्रम एव नित्यात् त्रोक्ताः रेचकादिक्रमस्तु साधारणतया प्रामः शुल्यनुसारेण प्रपं
चसारादौ वैष्णवादिसामान्यतया प्रोक्तत्वात्। तथा च श्रुतिः॥ प्राणायामस्त्रयः प्रोक्ता रेचकपूरककुंभका इति। सुसाधितप्राणः प्रोरेचकादिक्रमं इति कश्चित् उभयथापि सा
मान्यत्वं। तत्रांतरेण पूरकादिक्रमोपि सामान्यतया वैष्णवादौ युज्यते। तस्मादस्मिन्नपि प्रकरणे सामान्यत्वेनोभयोः प्राप्तौ विशेषत्वेन पूरकादिक्रमस्यैव मुख्यत्वमाह मते श्री
श्वरः॥ पूरकं कुंभकं चेत्यादि। तत्र वायोराद्रानकाले पूरकनाम प्राणायामः। धारणं कुंभकनामा। त्यागकाले रेचकनामा। तदुक्तं वाह्यादापूरणं पूरणा वायोरुदरे पूरको हि सः। ५१
संपूर्णकुंभवद्वायोर्धारणं कुंभको मतः। वहिर्यद्रेचनं वायोरुदराद्रेचकः स्मृतः। तथा वदि लामृतैः॥ मूलमंत्रेण देवेशि वामेनापूर्य वायुदरं। कुंभके नवित्रि राव्रत्त्या दक्षिणेना

© Dharmartha Trust J&K. Digitized by eGangotri

पसारयेदिति। ज्ञानार्णवे। आसने सम्यगासीनो वामेनापूर्य चोदरं। तं त्वरात्तेपि॥ वामेनवासारंध्रेण पूरयेदमतात्मना। स्मरन्तं कुम्भकं गतः। समकं [illegible] वाभ
तत्र क्रममाह। मूलाधार इत्यादि लयमिति मनसो लयमित्यर्थः। तेनैव वायोरपि लयभावित्यात्। तत्र राजे॥ मूलाधारे मनः कृत्वा वायुमापूर्य मूल [illegible] को
निवारयेत्। यथेष्टमिति सहजालागतशीलं वायुं यथाशक्यमाकर्षयेदित्यर्थः। प्रकाशपरमात्मनिगतं लीनं मानसं यस्य सः प्रकाशगतमानसः। तेन रच प्रकाशे सविदानंदपरमात्म
निवारयेत्। यथेष्टमिति... स्वरूपः सन् कुंभयेदित्यर्थः। अथांगत्रयात्मके प्राणायामे काचिद्विद्याभ्यानं भवति। न वेत्यत आह कुंभके विंतयेदित्यादि। विद्यामोक्षोपयोगित्वान्न विद्यातां साच श्रीविद्येत्यत आह मू
क्ति करीशु भामिति। तत्र कुंभककाले मूलादिब्रह्मरंध्रांतं मूलविभावयेदित्युक्तं। श्रीविद्यायाः सम्यग्ध्यानं कुर्यादिति तु सगर्भपक्षे पूरकादिषु प्रत्येकमशक्तौ केवलकुंभके वेति शेषः। रव
कप्रकारमाह। तदेत्यादि। शोम्य लेव हि रितिशेषः। स्वभावतः नतु न्यूनाधिक्यात्। अन्यथा त्वयुक्ताभ्यासाद्दोषापत्तेः। तथा चोक्तं॥ युक्तं युक्तं पिबेद्वायुं युक्तं युक्तं च धारयेत्। यथा सिंहो गजो
व्याघ्रो भवेद्वश्यः शनैः शनैः। तथैव सेवितो वायुरन्यथा हन्ति साधकं। प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः। हिक्का श्वासश्च कासश्च शिरःकर्णा
दिवेदनाः। भवन्ति विविधा रोगाः प्राणायामव्यतिक्रमात्। ततः शास्त्रोक्तमार्गेण प्राणायामान्समाचरेदिति। देहाग्निः सारयेदिति रेचकयोगवायुना सह देहस्थमलमग्नुणो वह्निनिःसरतइति
मावयेदित्यर्थः। अथ पूरकादेर्नाडीनियममाह। वामेनेत्यादि। इत्येक प्राणायामे प्रथमे द्वितीयादिषु मेतु दक्षिणेनैव पूरयेत्। तदुक्तं। येनैव संत्यजेत्तेन पूरयेच्च रेचयेत्ततः। रेवयेत्ततोन्य
न शनैरेवं पुनः पुनः। योगयाज्ञवल्क्ये॥ अथासने दृढे योगी वशी हितमिताशनः। गुरूपदिष्टमार्गेण प्राणायामान्समभ्यसेत्। वले गते बलं चित्तं निश्चले दृढबंधनं। योगी स्थाणुत्वमाप्नोति ततो वा
युं निरोधयेत्। यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते। मरणं तस्य निष्क्रांतिस्ततो वायुं निरोधयेत्। मलाकुलासु नाडीषु मारुतो नैव मध्यगः। कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवे
त्। शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलं। तदैव जायते योगी प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्यान्नित्यं सात्विकया धिया। यथा सुषुम्णानाडीस्था मलाः शोषं प्रयान्ति च। बद्धप
द्मासनो योगी प्राणं चंद्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत्कुंभकं कृत्वा पुनश्चंद्रेण रेचयेत्। येन त्यजेत्तेन पीत्वा धा
रयेदतिरोधतः। रेचयेच्च ततोन्येन शनैरेवं न वेगतः। प्राणं चेदिडया पिबेन्नियमितं भूयोन्यथा रेचयेत् पीत्वा पिंगलया समीरणमथो बद्ध्वा त्यजेद्वामया। सूर्याचंद्रमसावनेन विधिनाभ्यासं स
दा तन्वतां शुद्धा नाडीगणा भवंति यमिनां मासत्रयादूर्ध्वतः। इति तथा त्रिपुरासारे॥ विपरीतमतोन्यदधीत पुनः पुनरप्यथ तद्विपरीतमिति। अमुना विधिना सततं मरुतो वि
दधीत सुसंयमनं॥ अथ कुंभकफलमाह॥ सदेत्यादि। केवलकुंभकयोगेनेत्यर्थः। सुसाधितेन यो योमात्री संख्यातमुक्तौ प्रथमाभ्यासे तत्राप्यपर्यंकामवारमाह। अभ्यासीत्यादि। अभ्या

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
५२

सीप्रथमाभ्यासी तत्वदर्शिनां मात्रां अथ षट्पञ्चकेछं कारयेदित्यर्थः। एतदेव स्पष्टयति यथाशक्त्येत्यादि। तथा च सति प्रथमाभ्यासी यथोक्तसंख्यामात्राया न्यूनमपि कुर्यात्॥
मध्यमाभ्यासी यथोक्तसंख्यामेवा उत्तमाभ्यासी ततोधिकसंख्यामपि कुर्यादिति यथेष्टपदतात्पर्यं॥ अथ मात्रालक्षणमाह रुद्रः। कालेन यावता स्वीयो हस्तः स्वं जानुमंडलं। पर्येति मात्रा
स्यात्तुल्यास्वपि एकश्वासमात्रयापि फेत्कारीतंत्रे॥ जानुं प्रदक्षिणीकृत्य न द्रुतं न विलंबितं। क्रियते यांगुलीस्फोटः सा मात्रा परिकीर्तितेति॥ अपि वकाख्यायनीतंत्रे॥ मध्यामूलं याव
दग्रमंगुष्ठेन च पीड्यते मात्रा सा प्रोच्यते सद्भिर्योगिभिः षट्प्रयत्नतः। वस्तुतस्तु तत्तन्मन्त्रोच्चारणमेव मात्रा। तथा च गौतमीये॥ रेचयेद्दक्षिणे वायुं पूरयेद्वामतस्ततः गद्वात्रिंशदभ्यसेन्मंत्र
प्राणायामः स उच्यत इति। ततः पूरकानंतरं कुंभकं अभ्यसेदित्यर्थः। एतच्च रेचकादिपक्षे। अत एव कुंभक एव जपादिकं न तु रेचयोः दक्षिणामूर्तिकल्पे॥ प्राणापानौ समौ कृत्वा सुविधायव कुं
भकं। हृत्पंकजे समासीनं मां ध्यायेद्वर्तमानसः। अगस्त्यसंहितायां॥ यावदुक्तं त्रियम्यामन्नमन्नसे च जपेन्मनुं। रामं मुकुंदं कुर्यात्पूर्वोक्तविधिना सुधीः। अत्र सर्वत्र पक्ष कुंभकं क
लारामं ध्यायन् यावदुक्तं मनुं जपेदिति संबंधः। एतेन यत्र विशेषोनोक्तस्तत्र यथाशक्ति मंत्रं जपेदिति वेदितव्यागतः पैव शैवैकत्र दृष्टन्यायेन सर्वत्रवायं प्रकारः॥ अत एव श्रीविद्यायां
वामकेश्वरतंत्रे॥ कुंभये चिंतयेद्विद्यां तृविद्यां मुक्तिकरीं शुभामिति युक्तमिति वदंति। वस्तुतस्तु सगर्भके प्राणायामे केवलकुंभके कुंभक एव सहितकुंभके शक्तावगम्यत्रये प्यशक्तौ कुंभके त्वाव
श्यकं जपध्यानमिति तु तेषां वचनानां निर्गलितार्थः। स च मूलपावालयावत् दशकौ प्रणवेन वा कार्यः। तदुक्तं फेत्कारीये॥ प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वेति। त्रिविद्ध प्रणवोच्चा
रणं प्रणवस्थाने सार्धत्रिमात्रिकमोंकारो हेयः। कालिकापुराणे॥ चतुर्दशस्वरो यस्तु सार्धत्रिमात्र संतकः। नादबिंदुसमायुक्तः [illegible] प्रणवं सेतुरुच्यत इति। अत्र च [illegible] प्राण
नो पूरकादौ त्रिपुरासारोक्तैव संख्या जपादौ। तंत्रराजे तदन्यथा यदुक्तं तंत्रराजे॥ एवं सुसाधिले पश्चाद्द्वात्रिंशन्मात्रयाहरेत्। धारयेत्तच्चतुःषष्ट्या रेचयेत्तत्तु [illegible]॥ इति तु श्रीकादिमतं॥
तदेतयामेतयोर्विकल्पः। तत्राशक्तौ सामान्यपटले फेत्कारीतंत्रोक्तो कार्यः। तद्यथा। तथा द्वाभ्यां मात्राभिः कुंभकः क्रियते सदा। तस्माद्द्विगुणमात्राभिरेचकः क्रियते तथा। प्राणाया
मत्रयं स्वेच्छमेकैकं चितयात्मकमिति। अत्राप्यशक्तौ सुभगोदयोक्तो कार्यः। प्राणायामत्रयं कुर्यात्स्मरन्विद्यां हृदा पुनरिति। तद्वचनं तत्कृतो व्याख्याता दक्षिणनासापुटेन वारं [illegible] मु
चरन्वायुमाकर्ष्य चतुर्वारं कुंभकं कृत्वा वामनासाद्द्विवारं रेचयेदिति प्राणायामत्रयं कुर्यादित्यर्थः। अत्र दक्षिणेन पूरणं युग्मे वा कृत्वा मनुना [illegible] यवा
तन्मतमेवेदमिति वयं न विद्मः। तत्राप्यशक्तौ ज्ञानार्णवे दक्षिणामूर्तिभ्यामुक्तस्य कुंभके त्रिरावृत्ते त्यस्ये [illegible] मिति संक्षेपः॥ इति सहितकुंभकः [illegible] कुंभ [illegible] हिता
शास्त्रे॥ रेचकं पूरकं मुक्त्वा सुखं यद्वायुधारणं। प्राणायामोयमित्युक्तः स वै केवलकुंभकः॥ केवले कुंभके [illegible] रेचपूरविवर्जिते। न तस्य दुर्लभं किंचित् कुंभके त्रिराव [illegible]

श्री
५१

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible] आ द्वा क्षण न [illegible] सेत्। कुं [illegible]

केवलकुंभके नृपथे षंवायुधारणे। राजयोगपदं चैव लभते नात्र संशयः। हठं विना राजयोगो राजयोगं विना हठः। न सिध्यति ततो युग्म मा [illegible]
प्राणरेचनं ते कुर्याच्चित्तं निराश्रयं। एवमभ्यासयोगेन राजयोगपदं व्रजेत्। कुंभकात्कुंडलीबोधः कुंडलीबोधतो भवेत्। अनर्गला सुषुम्ना [illegible] ः भूर्य [illegible]
स्ताभ्यां सूर्यचंद्राभ्यां दक्षिणवामाभ्यां पिंगलेडाभ्यां प्राणवायोर्मूलाधारादौ योगः हठयोगः इत्यर्थः। स च प्राणायामः राजयोगः। स च सुषुम्नामार्गेण षट्चक्रभेदक्रमेण शिवश[illegible]सा
मस्य लक्षणमाह। तंत्रराजे॥ कंपश्च पुलकानंदौ वैमनस्यं स्थैर्यलाघवाः। तद्वत्कीर्तिप्रकाशश्च योगसिद्धस्य लक्षणमिति। योगशास्त्रे॥ वपुः कृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सु
निर्मले। अरोगिता बिंदुजयोग्निदीपनं नाडीविशुद्धिर्हठसिद्धिलक्षणं। इति केवलकुंभकः। इत्युक्तः प्राणायामः सगर्भो विगर्भश्चेति द्विविधः स्यात्॥ नंदिकेरुद्रयामले॥ सगर्भश्च विग
र्भश्च प्राणायामो द्विधा मत इति। तथा योगिनीतंत्रे॥ अयं प्राणायामः सकलदुरितध्वंसनकरो विगर्भः प्रोक्तोसौ शतगुणफलो गर्भकलितः। जपध्यानाद्येतैः सगुणनिगदितो गर्भरहि
तः सगर्भस्तद्युक्तो मुनिपरिवृढैर्योगनिरतैरिति। स पुनस्त्रिविधः। उत्तमाधममध्यमभेदात्। तथा च तंत्रराजे॥ प्राणायामस्त्रिधा प्रोक्त उत्तमाधममध्यतः। लाघवो [illegible]
उत्तमो वित्तनिर्वृत्तिः सर्वांगस्वेदसंवृद्धिरधमो मध्यमस्तथा। सर्वांगकंपनं प्रोक्तमभ्यासकालसंयुतात्। तेषु समगुणाभ्युदभ्यासकाले योगतः। तस्मात्समभ्यसेत्प्रातः सायं
च नियमेन वै। तथा त्रिपुरासारे॥ शुचिः प्राणायामान्प्रणवसहितान् षोडश वशी प्रभाते सायं च प्रतिदिवसमेवं विलनुते। द्विजो यस्तं भ्रूणप्रहरणकृतां होमिक लितं पुनं स्वे तमासादि
हदुरिततूलौघदहनाः। अयं त्यमीषद्भिरपि हमासे जन्मांतरोपार्जितपापपुंजात्। संवत्सराद्कुलपदं तदेकं प्रकाशयत्येव पदच्युतारव्यं॥ योगशास्त्रे तु प्रातर्मध्यंदिने सायमर्धरात्रे
च कुंभकान्। शनैरशीतिपर्यंतं चतुर्वारं समभ्यसेत्। कनीयसी भवेत्स्वेदः कंपो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासने मुहुः। जले न भ्रमजाते न गात्रमर्दनमाचरेत्। दृढतां
युता चैव तेन गात्रस्य जायते। अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनं। ततोभ्यासे दृढीभूते न तादृङ्नियमग्रहः। तत्र क्रमः॥ विहितपद्मासनः संनिमीलितनयनयुगलो मूलाधारांबि
तचित्तवृत्तिर्मूलमंत्रादिकमुच्चरन् इडया वामनाड्या षोडशमात्रया वायुमापूर्य मूलाधारं प्रापय्य अंगुष्ठकनिष्ठानामाभिर्नासापुटौ विधृत्य चतुःषष्टिमात्रया तं वायुं स्तंभयित्वा [illegible]
मात्रया पिंगलया दक्षिणनाड्या शनैः शनैः तं वायुं रेचयेदिति एकः प्राणायामः। पुनस्तं पिंगलया वायुं शनैः शनैः समाकृष्य तथैवेडया रेचयेदित्यन्यः। एवं वैपरीत्येन
विंशतिवारं षोडशवारं द्वादश षट् त्रीन्वा द्वौ वा यथाशक्ति कुर्यात्। तथा [illegible] शारदातिलके॥ मात्रावृद्धिक्रमेणैव सम्यग्द्वादश षोडश इति संक्षेपः॥ अत्र स

©Dharmartha Trust J&K. Digitized by eGangotri

वि०आर्णव० ५३

53

वं त्र प्राणायामेनैव सर्वेषां कर्माधिकारः। अकरणे निंदाश्रवणात्। आगरूपसंहितायां॥ प्राणायामैर्विनायद्यत्कृतं कर्म निरर्थकं। अतोयत्नेन कर्त्तव्याः प्राणायामः शुभार्थिभिरि
ति॥ अत एवा[illegible]वश्यकोयं भूतशुद्धिरिव पूजायामिति॥ ॥इति प्राणायामविधिः मतद्वयसाधारणः॥ ॥अथ योगपीठन्यासः॥ तत्रांसयोरुद्वये कल्पितपादचतुष्टयं मुखनाभिपार्श्व
यमध्योपकल्पितगात्रचतुष्टयं योगपीठं निजदेहे ध्यात्वा न्यसेत्॥ मूलाधारे ४ महाकालाय रक्तवर्णाय मंडूकाय नमः। तदुपरि स्वाधिष्ठानपर्यंतं। ४ पंचदशादशवक्त्रदशभुजरक्तकृ
वामदक्षिणपार्श्वाय कालाग्निरुद्राय नमः। तदुपरि नाभिपर्यंतं वं धृकृतविरायै मूलप्रकृत्यै नमः। तदुपरि हृदयपर्यंतं शरच्चंद्रप्रभायै पंकजद्वयधारिण्यै आधारशक्त्यै नमः। तदुपरि हृद
यएव। ४ कूर्माय। ४ अनंताय। ४ वराहाय। ४ पृथिव्यै। ४ अमृतार्णवाय। ४ समस्तमातृकामुद्रार्णनवखंडविराजिताय नवरत्नमयद्वीपाय। तत्रैव नवखंडेषु भूम्यादि मध्यांतं ४ अं १ इ पुष्प
रागरत्नाय। ४ कं ५ नीलरत्नाय। ४ चं ५ वैडूर्यरत्नाय। ४ टं ५ विद्रुमरत्नाय। ४ तं ५ मौक्तिकरत्नाय। ४ पं ५ मरकतरत्नाय। ४ यं ४ वज्ररत्नाय। ४ शं ४ गोमेदरत्नाय। ४ लं क्षं पद्मरागरत्नाय न
मः। तन्मध्ये स्वर्णपर्वताय। तदुपरि नंदनोद्यानाय। तन्मध्ये ४ कल्पवृक्षोद्यानाय। ४ वसंतादिऋतुभ्यः पश्चिमे ४ इं इंद्रियाश्वेभ्यः। पूर्वे ४ इं इंद्रियार्थगजेभ्यः। ४ चिंतारत्नभूमिकायै। तत्र
पश्चिमादिमध्यांतं विलोमेन ४ कालचक्रेश्वरीश्रीपा०। ४ मुद्राचक्रेश्वरीश्रीपा०। ४ मातृकाचक्रेश्वरीश्रीपा०। रत्नचक्रेश्वरीश्री। ४ देशचक्रेश्वरीश्री। ४ गुरुचक्रेश्वरीश्री। ४ रत्नच
क्रेश्वरीश्री। ४ ग्रहचक्रेश्वरीश्री। ४ मूर्तिचक्रेश्वरीश्री। ४ करुणातोयपरिधये। ४ मालिकामंडपाय। तस्यांतः कल्पादिकोणेषु मध्ये च। ४ देशरूपिणीशक्ति। ४ कालरूपिणीशक्ति। ४
आकाररूपिणीशक्तिश्री। ४ शब्दरूपिणीशक्तिश्री। मध्ये। संगीतयोगिनीरूपिणीशक्तिश्री। ४ तन्मध्ये समस्तगुप्तप्रकटयोगिनीचक्ररूपिणीशक्तिश्री। ततस्तन्मध्ये ४ कल्पत
रुभ्यो। ४ तेषामधस्तात् रत्नवेदिकायै नमः। तदुपरि ४ श्वेतच्छत्राय। ४ तस्याधः ४ रत्नसिंहासनाय। इत्येतत्सर्वमानसपंकजे विन्यस्य यथायथं तत्रेत्स्थानान्यवध्य वस्वरत्नसिंहा
सनं देवीनात्मदेहे ध्यायेत्॥ तत्रासिंहासनदेवता न्यसेत्। ४ रक्तवर्णाय वृषभध्वजाय धर्माय। ४ वामांसे ४ श्यामवर्णाय सिंहरूपाय ज्ञानाय। वामोरौ ४ पीतवर्णाय भूताकाराय वै
राग्याय। दक्षोरौ ४ इंद्रनीलप्रभाय गजरूपायैश्वर्याय। श्वेतसिंहासनपादरूपिणः। मुखे ४ अधर्माय। वामपार्श्वे ४ अज्ञानाय। नाभौ ४ अवैराग्याय। दक्षपार्श्वे ४ अनैश्वर्याय। ४ वि
द्यायै। ४ तदुपरि ४ आनंदकंदाय। ४ संविन्नालाय। ४ प्रकृतिमयपत्रेभ्यः। ४ विकारमयकेसरेभ्यः। ४ पंचाशद्वर्णबीजाढ्यसर्वतत्वरूपायै कर्णिकायै। [illegible] ४ अं सूर्यमंडलाय। ४ श्री
उं सोममंडलाय। ४ मं वह्निमंडलाय। ४ सं सत्वाय। ४ रं रजसे। ४ तं तमसे। ४ आं आत्मने। ४ अं अंतरात्मने। ४ पं परमात्मने। ४ ह्रीं ज्ञानात्मने। तदुपरि पूर्वादिचतुर्दिक्षु मध्ये च। ५३

© Dharmartha Trust J&K. Digitized by eGangotri

४ ज्ञानतत्त्वात्मने · ४ मायातत्त्वात्मने · ४ मलतत्त्वात्मने · ४ विद्यातत्त्वात्मने · ४ परतत्त्वात्मने । ततः केसरे पूर्वादिषु दिक्षु मध्ये च श्रीचक्राधारपीठस्य नवशक्तीर्न्यसेत् ।
४ हृत्यर्यम्बाश्री · ४ सुंदर्यम्बाश्री · ४ सुमुखर्यम्बाश्री · ४ विरूपांबाश्री · ४ विमलांबाश्री · ४ अनंतर्यम्बाश्री · ४ वदर्यम्बाश्री · ४ पुरंदर्यम्बाश्री · मध्ये च कर्णिकायां ४ पुष्पमर्दन्यम्बाश्री · एता
वराभयधारिण्यो रक्तवर्णा ध्येयाः । तदुपरि ४ ऐं क्लीं सर्वशक्तिकमलासनाय नमः · इति सिंहासनमंत्रं विन्यस्य तदुपरि श्रीचक्रं ध्यात्वा ४ मूले समस्तप्रकटगुप्तगुप्ततरसंप्रदा
यकुलकौलनिगर्भरहस्यपरापररहस्यातिरहस्ययोगिनीसिद्धचक्रपादुकाभ्यो नमः इति व्यापकत्वेन विन्यस्य हृदादि त्रिकोणं विभाव्य तन्मध्ये मूले ऐं क्लीं भगवति ह्रूं त्रिलोक्या
मध्यरीश्री सर्वसत्त्ववशंकरि सन्निपुरभैरवि ऐं ... श्री महात्रिपुरसुंदर्यम्बाश्री · इति विन्यस्य प्रणवादि नमोन्तं मूलविद्यां च विन्यस्य श्रीचक्रं पुरत्रयात्मकं ध्यात्वा तत्रारोहण
क्रमेण ४ वाग्भवमुच्चार्य चतुरस्रषोडशदलाष्टदलात्मने शरीरात्मकाय प्रथमपुराय नमः इति व्यापकं न्यसेत् । ततः ४ कामराजमुच्चार्य चतुर्दशारद्विदशारात्मने बुध्यात्मकाय
द्वितीयपुराय नमः इत्यपि व्यापकं ४ शक्तिकूटमुच्चार्याष्टारत्रिकोणबिंदुचक्रात्मने प्राणात्मकाय तृतीयपुराय नमः इत्यपि व्यापकं विन्यस्य इच्छाशक्ति ज्ञानशक्ति क्रिया
शक्त्यादिसमस्तत्रितयात्मने श्रीचक्रस्य पुरत्रयाय नमः इत्यपि व्यापकं । ततो हृदयात्रिकोणस्याग्रादिकोणत्रये पि पुरत्रयात्मकं वाग्भवादिपुरत्रयात्मकं आत्मानं त्रयेणादि
नमोन्तं वाग्भवादिकूटत्रयं न्यसेत् । ततः नादबिंदुकलाप्रेष्ठारे श्रीवामा विषघ्नी इतरी सर्वानंदाभ्यः श्रीचक्रस्य त्रैलोक्यमोहनादि नवचक्रशक्तिभ्यो नमः इत्यनेन व्यापकं
कुर्यात् । ततो हृदयकमलकेसरेषु कामेश्वरीपीठस्य नवशक्तीर्न्यसेत् । ४ मोहिन्यै · ४ क्षोभिण्यै · ४ वशिन्यै · ४ स्तंभिन्यै · ४ आकर्षिण्यै · ४ द्राविण्यै · ४ आह्लादिन्यै · ४ क्लिन्नायै ·
मध्ये ४ क्लेदिन्यै · इति विन्यस्य त्रिकोणमध्ये ४ बाला मूलं पंचदशीं वोच्चार्य त्रिकोणे रक्तवर्णा उड्डियाणपीठश्री · त्रिकोणाग्रे ४ बालामूलयोर्वाग्भवद्वयमुच्चार्य चतुरस्रपी
तवर्णा कामरूपपीठश्री · दक्षकोणे ४ कामराजद्वयं श्वेतवर्णा जालंधरपीठश्री · वामकोणे ४ शक्तिकूटद्वयं धूम्रवर्णा पूर्णगिरिपीठश्री · इति पी
ठचतुष्टयं विन्यस्य पुनर्बैंदवे आग्नेयादिकोणेषु ४ लां ह्रां ब्रह्मणे पृथिव्याधिपतये नमो ब्रह्मप्रेतासनश्री · ४ वां ह्रीं विष्णवे अपामधिपतये नमो विष्णुप्रेतासनश्री · ४ रां
ह्रूं रुद्राय तेजोधिपतये नमो रुद्रप्रेतासनश्री · ४ यां ह्रैं ईश्वराय वाय्वधिपतये नम ईश्वरप्रेतासनश्री · मध्ये ४ ह्सौं वियदधिपतये पंचवक्त्राय सदाशिवाय प्रे
तपद्मासनाय नमः सदाशिवमहाप्रेतपद्मासनश्री · इति पंचप्रेतासनं न्यस्य तदुपरि रक्तपद्मं कर्णिकायां चतुरस्रगर्भितषट्कोणपीठे षडासनानि विन्यसेत् । ४ ...

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि याली प.
५४

54

सौः त्रिपुरासुधार्णवासनाय नमः ४ ऐं क्लीं सौः त्रिपुरेश्वरी पोतांबुजासनाय नमः ४ क्रीं क्लीं सौः त्रिपुरसुंदरी देव्यात्मासनाय नमः ४ हैं ह क्लीं ह्सौः त्रिपुरवासिनी सर्व
चक्रासनाय नमः ४ ह्सैं ह स क्लीं ह्सौः त्रिपुराश्री सर्वमंत्रासनाय नमः ४ क्रीं क्लीं क्लें त्रिपुरमालिनी साध्यसिद्धासनाय॰ इति विंन्यस्य मध्ये चतुरस्रे चतुःपीठ चतुरासनं न्यसेत् ऐं श्री
न्ये ४ वाग्भवकूयमुद्रायाग्निचक्रे कामगिर्यालयमिश्रीशानाथात्मिकजाग्रद्दशाधिष्ठायिके इच्छाशक्त्यात्मक रुद्रात्म शक्ति कामेश्वरी देवी क्रीं क्लीं सौः त्रिपुरसुंदरी देव्यात्मासनाय॰
वाय व्यकोणे ४ कामराजकूयं सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मिके स्वप्नदशाधिष्ठायिके ज्ञानशक्त्यात्मविष्ण्वात्मक शक्ति श्रीवज्रेश्वरी देवी हैं ह क्लीं ह्सौः त्रिपुरवासिनी सर्व
चक्रासनाय नमः नैर्ऋत्ये ४ शक्तिकूयमुद्राय सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायिके क्रियाशक्त्यात्मक ब्रह्मात्मशक्ति श्रीभगमालिनी देवी ह्सैं ह स क्लीं ह्सौः
त्रिपुराश्री सर्वमंत्रासनाय नमः आग्नेये। समस्त कूय मुद्रायं ब्रह्मचक्रे महोड्याणपीठे श्रीचर्यानाथात्मके तुर्यतुर्यातीत दशाधिष्ठायिके परब्रह्मशक्त्यात्मक श्रीमहात्रिपुरसुंदरी देवी क्रीं
क्लीं क्लें त्रिपुरमालिनी साध्यसिद्धासनाय नमः ४ ऐं क्लीं सौः क ५ श्रीमहात्रिपुरसुंदरी सर्वमंत्रासनाय नमः इति विंन्यस्य ईशं पञ्चशिवशक्ति सदाशिवेश्वर शुद्धविद्यामायाकालनिय
ति कला शुद्धाशुद्ध विद्या राग पुरुष प्रकृति बुध्यहंकार मन त्वक् चक्षुश्रोत्र जिह्वा घ्राण वाक्पाणिपाद पायूपस्थ शब्द स्पर्श रूप रस गंधाकाश वायु वह्नि सलिल पृथिव्यात्मने श्रीम
हात्रिपुरसुंदर्या योगपीठासनाय नमः इति व्यापकं कुर्यात्। ततो मूल मुद्राय श्रीमन्महात्रिपुरसुंदरी श्री॰ इति षट्त्रिंशत्तत्त्वात्मिके देहमये महायोगपीठे निजेष्टदेवतां हृदि न्यसेत् त
इति देहमययोगपीठे चिंतयेत्परदेवतामिति योगपीठन्यासः॥ ॥अथ मंत्रन्यासगा संहारसृष्टिमार्गेण मातृकान्यस्तविग्रहः मंत्रन्यासं ततः कुर्याद्देवताभावसिद्धये तत इति मं
त्रन्यासानंतरमित्यर्थः। मंत्रन्यासउपास्यमंत्रसंबंधी न्यासः। वैशंपायनसंहितायां। ततउपास्यमंत्रस्य न्यासानृष्यादिकांश्चरेत् तायस्य मंत्रस्य ये न्यासाः कर्तव्याः सिद्धि
मिच्छता। जपतर्पणहोमार्चाः सिद्धमंत्रकृताअपि। अंगन्यासादिभिर्हीना नदास्यंति फलान्यमी। न्यासानशेषान्न्यसतः स्वदेहे त्रैलोक्यमेतद्वशमेति पुंसः। पापानि सद्यः अशे
षयांति त्रस्यंति रक्षांसि सपन्नगानि। आदावृष्यादिविंन्यस्य करांगन्यसनं ततः। ततो मंत्राक्षरन्यासः पदन्यासस्ततः परं। तत्तत्कल्पोक्तविशेषोक्तान्यासान्न्यासमाचरेत्। त श्री ५४
तो मंत्रपुटे वर्णैर्मातृकायाः स्वविंदुकैः। विन्यसेन्मंत्रवित् सम्यक् शास्त्र दृष्टेन वर्त्मना। अथ षडंगकरन्यासस्ततो मुद्राः प्रदर्शयेदिति क्रमः [illegible]
शुद्धावसृष्टिस्थितिविलयमयीतारजाभिः कलाभिः श्रीकंठाद्यैश्च विष्णुप्रमुदिततनुभिः शक्तिलक्ष्मीमुखैस्तैः। श्रीकंठाद्यैः समस्तैः कलितकलिविधिपायसैर्वागभूमौ तीर्णाकाले

न्म

© Dharmartha Trust J&K. Digitized by eGangotri

श्च षोढा नवविधभवनामंत्र्युपूर्वमंत्राः। स पुनरस्यां विद्यायां त्रिविधः षोढा श्रीचक्र करशुद्ध्यादिभेदात्। [illegible] षोढादि द्विविधः पूर्वोत्तरभेदात्। [illegible] षोढान्यासः सर्वो[illegible]
विषयः। उत्तरषोढान्यास ऊर्ध्वाम्नायविषयः। श्रीचक्रन्यासस्त्रिविधः संहारसृष्टिस्थितिभेदात्। करशुद्ध्यादिन्यासस्तु बहुतरः। श्री[illegible] [illegible]ः श्रादीनामपि। श्रवी
तर्भावात्। तत्र षोढान्यासः संहारश्रीचक्रन्यासः सृष्टिश्रीचक्रन्यासः करशुद्ध्यादिन्यासश्चेति जपकाले स्थितिचक्रन्यासस्य करशुद्ध्यादावंतर्भावात्। पूजाकाले संहारचक्रन्यासस्या
पलक्षणत्वेन तदंतर्भावाच्च चतुर्विधो न्यासस्तद्वत्सरे संक्षेपादावश्यक इति योगिनीहृदयमतं।। योगिनीहृदये। एवं चतुर्विधो न्यासः कर्त्तव्यो वीरवंदिते। षोढान्यासो ह्ययमा
श्यमलदेव्यादिकः क्रिया। करशुद्ध्यादिकं चैव साधकेनात्मसिद्धये। प्रातःकाले ऽथवा पूजासमये होमकर्मणि। जपकाले ऽथवा तेषां विनियोगः पृथक्पृथक्। पूजाकाले समस्तं वा
कुर्यात्साधकसत्तमः। तत्रादौ पूर्वषोढान्यासः।। योगिनीहृदये।। न्यासान्निवर्तयेद्देवि षोढान्यासपुरःसरं। गणेशैः प्रथमो न्यासो द्वितीयश्च ग्रहैर्मतः। नक्षत्रैश्च तृतीयः स्याद्योगि
नीभिश्चतुर्थकः। राशिभिः पंचमो न्यासः षष्ठः पीठैर्निगद्यते। षोढान्यासस्त्वयं प्रोक्तः सर्वत्रैवापराजितः। एवं यो न्यसते गात्रे स पूज्यः सर्वयोगिभिः। नास्य स्यात्परलोकेषु पि
त्मात्सुखोत्तमः। स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः। षोढान्यासविहीनं यं प्रणमेद्देवपार्वति। सो ऽचिरान्मृत्युमाप्नोति नरकं च प्रपद्यते।। ज्ञानार्णवे। षोढान्यासं ततः कु
र्याद्येन ब्रह्माण्डरूपकः। विराड्रूपस्वरूपो वर्णी तत्र शिवः साक्षान्न संशयः। गणेशः प्रथमो न्यासः सर्वविघ्नविनाशकः। तरुणादित्यसंकाशान् गजवक्त्रांस्त्रिलोचनान्। पाशांकुश
वराभीतिकरान् शक्तिसमन्वितान्। एतांस्तु विन्यसेद्देवि मातृकान्यासवत्प्रिये। अत्र ४ श्रीविघ्नेश्वरश्रीभ्यां नम इत्यन्ये।। विघ्नेश्वराय विघ्नेन नम इत्यपरे। विघ्नेश्वरश्रीभ्यां न
मः इति केचित्। गणेशाः शक्तयश्च मातृकान्यासे बोद्धव्याः।। ।।इति गणेशन्यासः।। ।।अथ ग्रहन्यासः ज्ञानार्णवे।। ग्रहन्यासं ततो न्यस्येद्दिति। आरक्तं भास्करं तथा रक्तं श्यामं
पीतं च पाण्डुरं। धूम्रं कृष्णं कृष्णधूम्रं धूम्रधूम्रं विचिंतयेत्। रविमुख्यान्कामरूपान्सर्वाभरणभूषितान्। स्वरै रविं हृदि न्यस्य यवर्गेण शशिनं ततः। [illegible] केतुं कवर्गेण
सोमं नेत्रत्रये न्यसेत्। रवर्गेण बुधं हृदि लवर्गेण बृहस्पतिं। हृदयोपरि देवेशि वर्गेणाग्रके भृगुं। पवर्गेण शनिं नाभौ राहुं वक्त्रे शवर्गतः। लक्षाभ्यां पादयोः केतुं न्यसेद्देवि वरानने।
सूर्यश्च रेणुकाचैव सोमश्चैवाम्बिका तथा। मंगलो धामया युक्तो बुधश्च ज्ञानरूपया। गुरुर्येशाश्विनीयुक्तः शुक्रः करीसहितो भृगुः। शनिः शक्तिसमायुक्तो राहुः कुस्तासमन्वितः। धूम्रया
सहितः केतुः शक्तयो वांतिकाः स्मृताः।। इति पूर्ववत्प्रयोगः।। अथ नक्षत्रन्यासः।। अथ नक्षत्रवृंदस्य न्यासं कुर्यात्सुखप्रदं। ज्वलत्कालाग्निसंकाशाः सर्वाभरणभूषिताः। नतिषा

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव. ५५

55

एयो श्रिनी पूर्वा वरदाभयपाणयः ॥ युग्मायुग्मे तथा युग्मे युग्मयुग्मे नरो हिली । एकमेकं तथा द्वंद्वमेकं पुष्ठां तमुच्यते । ललाटे लोचने पश्चाद्वाम दक्षिण कर्णयोः । नासा ह्येव वदेवे
श्रित थाकं टे न्यसेत्क्रमात् । पुष्ठां तं वप्रचि न्यस्य खगाभ्यां चैव सर्पिकं । दक्षस्कंधे छग ॥ डाभ्यां च मघां स्कंधे दितीयके । वपूर्वफाल्गुनी दक्षकूर्परे । छजसंस्थितो उत्तराफाल्गुनी
वामकूर्परे विन्यसेत्प्रिये । हस्तं त्रयवर्णे स्थितो झ हस्तं मणिबंधे न्यसेत्प्रिये । टवर्गेण युतो चित्रां वामे तु मणिबंधके । डकारेण युतो स्वाती दक्षहस्ते च विन्यसेत् । ठाम युक्तो विशाखा च वाम
हस्ते च विन्यसेत् । तथ दस्तानुराधां च नाभौ न्यस्येत्तु पार्वति । धकारेण युतो ज्येष्ठां न्यस्ये दक्षकटौ प्रिये । पूर्वाषाढां वरारोहे दक्षोरौ विन्यसेत्ततः । भकारेणोत्तराषाढां वामोरौ तदनंतरं ।
मकारयुक्तां श्रवणां दक्षजानुनि विन्यसेत् । यकारान्वितो धनिष्ठां च वाम जानुनि विन्यसेत् । लकारेण युतो देवि शतभिषां न्यसेत्प्रिये । दक्षजंघागतां पश्चात् पूर्वाभाद्रपदां ततः । वषावर्णा
त्मिकां न्यस्येद्वामजंघागतां क्रमात् । षसहस्थोत्तराभाद्रपदं दक्षिणपादके । क्षकारेण तथा विंदुविसर्गाभ्यां वरे वती वामपादतले न्यस्य योगिनीन्यासमारभेत् ॥ ध्यानमाह ॥ न्व
लादि सादि पूर्ववत् ॥ इति नक्षत्रन्यासः ॥ अथ योगिनीन्यासः ॥ तत्रोत्तरे ॥ विशुद्धौ षोडशारे तु डाकिनीं भावयेत्सुधीः ॥ त्वग्धातुदेवतां कंठे सर्वकामार्थसिद्धये ॥ रक्तां रक्तत्रिने
त्रां पशुजनभयकृत् कूलखट्वांगहस्तां वामे खेटं दधानां चषकमपि सुरापूरितं चैकवक्त्रां ॥ असृग्मांसुग्य दंष्ट्रा मारिकुलमथिनीं पायसान्नप्रसक्तां कंठस्थाने मदांधेः परिवृत वपु
र्भावयेड्डाकिनीं तां ॥ डां डीं डूं डैं तातो डौं डः डमलेति वरे तिवा । यूं डाकिनीपदं प्रोक्ता मां रक्षां द्विलयं वदेत् । सर्वसत्ववशं प्रोक्ता कारे देवि ततः परं । आगच्छितयं प्रोक्ता इमां पूजां तथै
व वाग हल्ल हृयं वाग्भवं च घोरे देवि ततः परं । माया बीजं भृशुः सर्गा परमेति ततः परं । घोरे हूं घोररूपे वएह्येहीति नमः पदं । चामुंडे [illegible] रलां तेच कमहे हैं श्रीं महात्रिपुरा [illegible] सुंदरी देवीति
विद्येते परदं पदं । स्वरान्वि विशुद्धपीठस्थे विशुद्धां ते तु डाकिनि । विशुद्धनाथदेवश्रीपादुकां पूजयामि च । अंगुष्ठानामिकाभ्यां च कर्णिकायामिमं न्यसेत् । ततः षोडशपत्रेषु पूर्वादिषु पत्र
केषु । अमृतादिकशक्तीस्तु विन्यसेत्तु यथाक्रमं । अमृता कर्षिणी [illegible] सुमा चोर्ध्वकेशिनी । ऋद्धिदा च ततो [illegible] कारा च ततः परं [illegible] लिकां
रिणीं ततः ॥ तथो घधां त्मिकां चैवं विकावाप्यक्षरात्मिका । अमलादिकशक्तीनो डाकिनी स दशां वपुः । तत्समानायुधादीनि न्यासपूजनचिंतने । [illegible] दशारे रा [illegible]
धानुगां ध्यायेत् ॥ कर्णिकामध्ये साधकः सर्वसिद्धये । श्यामां श्मश्रू लाकुहस्तां डमरुकसहितां तीक्ष्णवक्रं वहंती घोरास्यां रक्तत्रिनेत्रां भ्रकुटितकुटिलसद्दष्टदंतप्रभाभिः गदीप्तां तां श्री
देवदेवीं हृदयकमलगां रक्तधात्वेकनाथां शुद्धान्नेषु प्रसक्तां मधुमदमुदितां भावयेड्डाकिनीं तां ॥ ततदक्षरस्थान तदेतु पदयोजनात् । पूर्ववं मंत्र [illegible] कर्णिकायां न्यसेद्बुध ५५

© Dharmartha Trust J&K. Digitized by eGangotri

परितः कालरात्र्यादिशक्तीः स्वदले पूर्वकाः न्यसेद्वादशपत्रेषु पूर्वादिषु यथाक्रमं। कालरात्रिश्च खतीता गायत्री च ततः परं। घंटाधारिणिका चैव ततो डाकिणीत्रिकापु
नः। चामुंडा च जयाख्या कारिणी नारायणी त्रिका पुनः। टंकहस्ता च ठंकारिण्येताः पूर्वादि विन्यसेत्। कालरात्र्यादिशक्तीनां राकिनीसदृशं वपुः। तत्समानायुधादीनि न्यासपूजनचिंतने।
मणिपूरे दशदले लाकिनीं मांसधातुगां। ध्यायेत्तत्कर्णिकामध्ये साधकः सर्वसिद्धये। कंठे देवी त्रिवक्त्रां त्रिनयनसहितां दंष्ट्रिणीमुग्ररूपां वज्रं शक्तिं च दंडाभयवरदद्दरां दक्षव
मे दधानां। ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां मांसस्थां गौडभक्त्या सुकहृदयवतीं चिंतयेत्साधकेंद्रः। चित्रं प्राग्वल्लाविन्यस्य डामर्यादीश्च विन्यसेत्। डामरी
कारिणी च रणकारी एवमेव थलामस्त्री स्तानदेवी च दक्षायण्यथ धात्री तथैव च। नंदा च पार्वती फट्कारिण्येता दशपत्रगाः। डामर्यादिकशक्तीनां लाकिनीसदृशं वपुः। तत्समानायुधा
दीनि न्यासपूजनचिंतने। स्वाधिष्ठाने रसदले काकिनीं भावयेत्सुधीः। मेदोधातुस्थदेवेशीं परिवारसमन्वितां। स्वाधिष्ठानाख्यपत्रे रसदलकलिते वेदवक्त्रां त्रिनेत्रां पीताभां धा
रयंतीं त्रिशिखगुणकपालाभयान्यातगर्वा। मेदोधातुप्रतिष्ठामलिमदमुदितां बंधिनीसादिवी दध्यन्नेसक्तचित्तां मभिमतफलदां काकिनीं भावयेत्तां। बंधिनी भद्रकाली च
महामाया यशस्विनी। रमा लंबा च लंबोष्ठी षट्दले पूर्ववन्न्यसेत्। बंधिन्यादिकशक्तीनां काकिनीसदृशं वपुः। तत्समानायुधादीनि न्यासपूजनचिंतने। मूलाधारे वेददले साकिनीं
मस्थिधातुगां। परिवारयुतां देवीं कर्णिकायां तु भावयेत्। देवीं ज्योतिरूपां त्रिनयनविलसत्पंचवक्त्रां सुदंष्ट्रां हस्तांभोजे पुस्तकं सृणिमपि दधतीं पुस्तकं ज्ञानमुद्रां। मूलाधारस्थपद्मे ति
खिलपशुजनोन्मादिनी मस्थिसंस्थां मुक्तान्ने प्रीतियुक्तां मधुमदमुदितां चिंतयेत्तां प्रसन्नां। वरदा श्री शिनी पंडा वज्रयोगी साहसरस्वती। चतुर्दलेषु पूर्वादि न्यसेदेताः सुसाधकः। वरदादि
कशक्तीनां साकिनीसदृशं वपुः। तत्समानायुधादीनि न्यासपूजनचिंतने। आज्ञाख्ये द्विदले पद्मे यामज्जाधातुदेवतां। ध्यात्वा तां कर्णिकामध्ये तत्र तां न्यसेत्। भ्रूमध्ये बिंदुप
द्मे द्विदलसुललिते शुक्लवर्णां करांभोजैर्बिभ्राणां ज्ञानमुद्रां डमरुकसहितां मक्षमालां कपालं। षड्वक्त्रां मज्जसंस्थां त्रिनयनललितां हंसवत्यादियुक्तां हारिकान्नप्रसक्तां स
कलसुरनुतां हाकिनीं भावयेत्तां। हंसवती क्षमावत्येन मद्दलपि विन्यसेत्। दलद्वये क्रमाद्देवि तत्तदक्षरपूर्वकं। हंसवत्यादिशक्त्योस्तु हाकिनीसदृशं वपुः। तत्समानायुधादी
नि न्यासपूजनचिंतने। ब्रह्मरंध्रे सहस्रारकर्णिकायां तु याकिनीं। तां शुक्रधातुगां देवीं ध्यायेत्साधकोत्तमः। मुंडव्योमस्थपद्मे सकलदलयुतं याकिनीं भैरवीं तां पक्षिण्याद्यौः स
मस्तायुधफलितकरां सर्ववर्णां समाश्रितां। डादीनां सर्ववक्त्रां सकलसुरवरां सर्वधातुस्वरूपां सर्वान्नेसक्तचित्तां परशिवरसिकां भावयेत्सर्वरूपां। तन्त्रं पूर्ववन्न्यस्य परितोष्य

श्री ५५

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ पा॰ लं॰ व॰
५६

मलादिकाः॥ अमृतादिकशक्तीनां याकिनीसदृशं वपुः॥ तत्समानायुधादीनि न्यासप्रज्ञनचिंतने॥ इति योगिनीन्यासः॥ अथ राशिन्यासः॥ प्राणानायम्य मूलेन राशीनां ध्या
नमाचरेत्॥ रक्तं श्वेतं हरि धूम्रं पांडु चित्रं सितं स्मरेत्। पिशंगं पिंगलौ कद्रु कर्बुरारुणधूम्रवान्॥ अकारादिचतुष्केन विं न्यसेत्सुरवंदिते। मेषं दक्षिणपत्कुल्फे ततो द्वेद्वे तवेद्वषी। न्यसे
ऽआनुजिवेदे मिथुनं च घ्राणे ततः॥ द्वाभ्यां कर्कटकं कुक्षौ द्वाभ्यां स्कंधे च सिंहकं॥ अनुस्वारविसर्गाभ्यां शवर्गेण च कन्यकां॥ दक्षिणेतु शिरोभागे विन्यसेद्वीरवंदिते। तथा वामशिरोभा
गे कवर्गेण तुलामृते। चवर्गेणस्तथा स्कंधे वृश्चिकं विन्यसेत्प्रिये। टवर्गेण तथा कुक्षौ धन्विनं विन्यसेत्प्रिये। पवर्गेण तथा कुंभं वामजानुनि विन्यसेत्। यवर्गेणाक्षकारेण मीनं गुल्फे
तु वामके॥ तथा प्राणापानोदानव्यानसमानाः पंचवायवः॥ मे घाद्याराशयो ज्ञेयाः पंच सिंहावसानकाः॥ तथा नागश्च कूर्मश्च ककलो देवदत्तकः॥ धनंजय इति प्रोक्ताः कन्याद्याः पंचराश
यः॥ जीवात्मपरमात्मानौ कुंभमीनौ प्रकीर्तितौ॥ न्यसेत्स्थाने त्रिभिः सिध्येत्तदर्थ्यार्थविताशयः॥ इति राशिन्यासः॥ अथ पीठन्यासः॥ अथ पीठानि विधिना न्यसेत्सर्वमयानि हि।
सितासितारुणश्यामहरित्पीतान्यनुक्रमात्। पुनः पुनः क्रमाद्द्विपंचाशत्स्थानसंचये। पीठानि संस्मरेद्धीमान्सर्वकामार्थसिद्धये। कामरूपं महापीठमित्यादि पीठमातृकोक्तक्रमो
वोद्धव्यः॥ इति पीठन्यासः॥ ॥इति पूर्वषोढान्यासः॥ ॥अथ कामरतिन्यासः॥ केवलं मातृकान्यस्य कामभक्तो भवेद्यदि॥ कामशक्तिसमायुक्तां मातृकां विन्यसेत्सुधीः॥ संमोह
न ऋषिश्चैव जगतीछंद उच्यते॥ श्रीकामशक्तयो देव्यदेवताः परिकीर्तिताः॥ क्लीं बीजं च नमः शक्तिः मातृकाकीलकं स्मृतं॥ षड्दीर्घकामबीजेन तु षडंगानि प्रविन्यसेत्॥ अथ कामावरा
रोहडाडिमीकुसुमप्रभाः वामांगशक्तिसहिताः पुष्पबाणेक्षुकार्मुकाः॥ शक्तयः कुंकुमनिभाः सर्वाभरणभूषिताः॥ नीलोत्पलकरा ध्येयास्त्रैलोक्याकर्षणक्षमाः॥ इति ध्यात्वा॥ अं का
मायरत्यै नमः इत्यादि कामरतिमातृकोक्तक्रमेण न्यसेदिति कामरतिमातृकान्यासः॥ अथ श्रीचक्रन्यासः॥ तदुक्तं तंत्रे॥ एवं षोढापुटं कृत्वा कामरत्यादिकं न्यसेत्॥ ततः
श्रीचक्रविन्यासः कर्तव्यः शिवतामये। श्रीमत्त्रिपुरसुंदर्याश्चक्रन्यासं शृणु प्रिये। यन्न कस्यचिदाख्यातं तनुशुद्धिकरं परं॥ श्रीरुद्रयामले॥ शरीरं चिंतयेदादौ निजं श्रीचक्ररूपकं।
त्रिगुणाकारनिर्मुक्तं ज्वलत्कालाग्निसप्रभमिति। ऋषिश्छंदो देवतादि स्मृत्वा न्यासं समाचरेत्। अनुलोमविलोमस्थ बालपाद्यात् षडंगकं। द्वादशांते विदाकारे शिवशक्त्यात्मकं गुरुं श्री
परं तेजोमयं ध्यायेत् भोगमोक्षफलप्रदं। आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तं। योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं न [illegible] मजा [illegible] पालं ५६
के। योगिनी दक्षिणे जानौ स्कंधे चटुकभैरवं। न्यसेद्दक्षपादांगुष्ठाग्रे [illegible] नाथ कुलाशनं। दक्षजानौ यमं पश्चाद्दक्षपार्श्वे न्यसेद्बुधः। दक्षांसे निर्ऋतिं [illegible] वामांसे वरुणं ततः। वामपार्श्वे स

© Dharmartha Trust J&K. Digitized by eGangotri

विंदुचक्रं न्यस्य पश्चात्त्रिकोणादीन्विन्यसेदिति भावः॥ तत्र हि विंदुचक्रन्यासः कथं प्रथमं नेत्रम् इति चेन्न तत्स्थान के दकस्याङ्कि कोणस्य त्रिकोण मध्यं हि विंदुचक्रं तेनाविनाक
र्थंत इयुपपद्यते। तेनायं कलितार्थः परिपाटी विशेषः प्रथमं शिरस्सि त्रिकोणे चि विंदुन्यस्य तन्मध्ये सर्वानंदचक्राय नमः इति कस्या मायकं कलानत ... वचिमात्र यथाविधि मूलदे वी
न्यसेत्। ततस्त्रिकोणादेन्यासः। अतः शिरस्त्रिकोण इति सिद्धविभक्ति निर्देशः केचित्तु तरक्रमेण प्रथमं विंदुचक्रं विभाव्य विंन्यस्य तद्वाह्ये त्रिकोणचक्रं विभाव्य विंन्यसेदित्येक्रम
मादुः। सवनो योगिनी हृदयसंत मह इति विंत्सं। अथांतर्दशारचक्रस्य न्यासस्थानान्याह। नेत्रमूल इत्यादि। नेत्रस्य दक्षिणनेत्रस्य मूले पूर्वकं ठे नासिकोपकंठ इतियावत्। कर्णस्य दक्षिण
तस्य वामांगे अवलेकणोपकंठ इतियावत्। कर्णस्य दक्षिणस्य पूर्वोत्तर पूर्वमध्ये उत्तरे पृष्ठे। चूलिकायाश्चूडाया निम्नार्धे पश्चाद्धे शेषार्धे पूर्वार्धे शिरः पृष्ठार्धभागयोरित्यर्थः।
इति कश्चित्। चूलिकाया निम्नार्धे चूलिकाया अधस्ताद्यन्निम्नस्थलं घाटासीवती तस्यार्धे दक्षिणार्धे शेषार्धे वामार्धे तेन तस्के यसीत्र न्यादक्षवाम भागयोरित्यर्थ इति कश्चित्।
लंष्टके अत्र प्रथमभंगप्रसंग इति दिक्। कर्णपृष्ठे वामकर्णपृष्ठे कर्णमूले वामकर्णमध्ये। अपांगे वामनेत्रापांगे तस्य वामनेत्रमूले पूर्वकंठे चेति दशस्थानेषु चक्रमेतन्न्यसे
त्। सर्वोन्मादायादयः शक्तीरिति शेषः। अथ वाह्यदशारन्यासमाह। सर्वसिद्धादिकमित्यादि। कंठे विशुद्धिचक्रे अकारादिविसर्गांत षोडशदले सर्वसिद्धादिकं देवीदशकं पूर्वदलादिप्रा
दक्षिण्येन न्यसेदित्यर्थः। पद्मस्योर्ध्वमुखत्वभावनया पूर्वकमिति भावः। तदा कंठकूप एव पूर्वदलमत एवांतः कंठवेष्टनरूपएवायं न्यासः। वहिः कंठवेष्टनत्वेन न्यसेत्। अथ चतुर्दशार
न्यासमाह। हृदय इत्यादि। अनाहतचक्रे कंठांत द्वादशदलमनुकोणस्थाश्चतुर्दशारस्थाः सर्वसंक्षोभिण्यादि चतुर्दशशक्तयोपि पूर्ववत्पूर्वदलादि प्रादक्षिण्येन न्यस्तव्या इत्यर्थः। अ
थाष्टदलन्यासमाह। नाभावित्यादि। नाभिप्रक्रमेणाष्टदलपद्मं नाभौ न्यसेत्। ततो वाह्यांगवेष्टनत्वेन पूर्ववद्दलवेष्टनेत्यर्थः। अतो न्यासस्थानविशेषमष्टदलात्मकमाह। वंशेष्व
तदक्षिणमेवं इत्यर्थः। तेन पृष्ठे पश्चिमदले वामपार्श्वे उत्तरदले उत्तरे पूर्वदले दक्षिणपार्श्वे दक्षिणदलमिति दिग्दलचतुष्टये अनंगकुसुमादिचतुष्टयं प्रादक्षि
दक्षिणं विन्यसेदित्यर्थः। दिग्दलमाह। वंशेति। वामो वामपार्श्वः वंशश्च वामश्चेति वंशवामौ तयोरंतरालं वंशवामांतराले वंशवामांतरालं वंशवामपार्श्वांतरालमित्यर्थः।
तेन वामपार्श्वदलं नातं तदेवादिर्यत्र न्यासक्रिया पंचांग प्रादि विशेषणं। तेन वंशवामांतरालादि यथा स्यात्तथा अन्यदलं गेरवादिचतुष्टयं न्यसेदित्यर्थः। अ

© Dharmartha Trust J&K. Digitized by eGangotri

दिग्पदे तथा मध्यपार्श्वोदरांतराले। उदरदक्षपार्श्वांतराले दक्षपार्श्ववंशांतराल मिति क्रमेण वायव्येशानाग्नेयनैर्ऋत्यविदिग्दलचतुष्टयं जातमित्यष्टदलेष्वेवं न्यासः। अथ जो
ऽष्टादलचक्रन्यासमाह। स्वाधिष्ठानमिति। स्वाधिष्ठानं लिंगमूले षट्दले च स्यात्मनो देहस्य पूर्वभागदक्षादारभ्याग्नेयदलपर्यंतं कामाकर्षिण्यादि पंचदशोक्तांश्चिन्यस्य च षड्दले श
रीराकर्षिणीमो ऽष्टशीशक्तिं न्यसेदिति लिंगवेष्टनलेन न्यासक्रमः। अयं तन्त्रेषु कोकमोहनचक्रस्यांतश्चतुरस्त्रे रवायां न्यासमाह मूलाधार इत्यादि। मूलाधारे चतुर्दले। तत्र प्रकारमा
पुरइत्यादि पुरः पूर्वदेहस्येति शेषः। स च स्य तिवानुवर्तते। स च दक्षिणे सव्ये स्यात् दक्षवामयोरिति अभिधानात्। वंशे पृष्ठवंशे। वामे वामदले। एतद्दलचतुष्टये सर्वसंक्षोभिण्यादिमुद्रा
चतुष्टयं प्रादक्षिण्येन विन्यस्यांतराले च आग्नेयनैर्ऋत्यवायव्येशाने इति दलसंधिचतुष्टये ऽस्मत्प्रतिबिम्बादित्वेन न्यादादिमुद्राचतुष्टयं च विन्यस्याधोभिं देशान्तयोर्मध्ये निर्ऋतिवस
णयोर्मध्ये ऽधः तयोर्यथाक्रमं खेचरीमोहनिमुद्रे न्यसेदिति दशमुद्राश्चेति। अथ मध्यचतुरस्त्रे रखायां न्यासमाह। ऊर्ध्वाधो वर्जितं पुनरित्यादि पूर्ववन्मूलाधार इव पूर्वादिप्रादक्षिण्येन
चतुर्दिक्षु चतुर्मात्रा विन्यस्याग्नेयादि चतुरंतराले वाराह्यादि चतुर्मात्रा न्यसेदित्यर्थः। अत एवोर्ध्वाधो वर्जितमिति मात्र एण मष्टत्वात्। अथ बाह्य चतुरस्त्रे रखा न्यासमाह। वामजंघामिहा
दिवामादि क्रमतः प्रादक्षिण्येनेत्यर्थः। तेन पूर्वादिदिग्दलेषु चतुष्टये न्यस्याग्नेयादिविदिग्दलेषु चतुष्टयमिति सिद्ध्याद्यष्टके न्यसेत्। ततो वशिष्ठ सिद्धिं द्वयं पादतलेवामपादतले च
ति न्यसेदित्यर्थः। सृष्टित्वमस्य प्रतिपादयन्नाह कारणादिति। कारणात् स्तंभमप्यादित्यर्थः। एवमिति स्वात्मभेदेन ध्यानं कुर्यादित्यर्थः। अमध्ये हृदये नाभौ स्वाधिष्ठाने ततः परं मूलाधारे
तथैवोरुयुगले जानुनोरपि पादयोर्जंघयोश्चैव क्रमाद्धृदादिकेश्वरीः। विन्यसेत्साधकश्रेष्ठस्त्रिपुरांताः समाहिताः। ततस्तु व्यापकं कुर्यात्तत्तच्चक्रोणेनु ना। इति सृष्टि श्रीचक्रन्या
सनिरूपणं॥ ॥अथ स्थितिश्रीचक्रन्यासो निरूप्यते॥ ॥योगिनीहृदये। ततस्तु करशुद्ध्यादि न्यासं कुर्याद्विचक्षणः। मूर्ध्नि गुह्ये च हृदये नेत्रत्रितयश्रवः श्रोत्रयोर्युगले देवि मुखे
च भुजयोः पुनः। पृष्ठे जानौ च नाभौ च विद्यान्यासं विधाय च। इति मूर्धादिषु विद्यान्यासं विधाय करशुद्ध्यादि विद्यान्यासं कुर्यादित्यर्थः। तत्राधाराद्येयमावश्च त्रिचक्रेश्वराणामपि
न्यासोगतव्यः। प्रथमचक्रेश्वरीविद्यादि न्यासं कुर्यादित्यर्थः। ते नास्ति लितमायातो। तथा च। सृष्टिः स्यान्नवयोन्यादि पश्चात्तत्संहृतिः पुनः। पश्चादि नवयोन्यं तामितिस्थितिस्तत्रस्य निश्च
य इति तन्त्रेवोक्तत्वात्। तथा। करशुद्धिकरीत्याद्या द्वितीया च स्मरक्षिका। आत्मासन गतादेवीत तीया तदनंतरं। चक्रासनगता पश्चात् सर्वमंत्रासनस्थिता। साध्यसिद्धासनात्

© Dharmartha Trust J&K. Digitized by eGangotri

नंद

कराद्यादिशक्तिभिश्च समावृतां मध्यस्थं सूर्यबिंबे तु नादोद्भवाणरूपीककं। तस्मादेकांगुलादूर्ध्वे विशुद्धे ओंकारकं मध्यगं डाकिनी वा स्वपत्रेषु परमेश्वरि। अमृताद्यक्ष
रांतलेखाभिः द्रविं बंतदूर्ध्वतः। कंठोर्ध्वे परमेशानि लंबिकाबलुरंगुले। तस्मादष्टदलं पद्मं नरसिकादिभिरावृतं। आज्ञाधारे द्विपत्राब्जे हक्षद्विदलसंयुतां हंसवतीसमापार्श्वयोर्भिधे
गुहाकिनी। ततो ललाटगं चक्रं बिंदुचक्रं पूर्वरणमूर्ध्वतः। सूर्यकोटिप्रतीकाशमतिदीप्तं महत्पुरं। तत्र च द्वादशाकोटीनां सैख्यायोजनपंकजं। तत्कर्णिकासमासीनः शांत्यतीतेश्वरः प्रभुः।
पंचवक्त्रो दशभुजो विशुद्धस्फटिकाकृतिः। निवृत्तिश्च प्रतिष्ठा च विद्याशांतिरनुक्रमात्। परिवार्यस्थिता वेलाः शांत्यतीतस्य सुंदरि। वामभागसमासीना शांत्यतीता मनोन्मनी पंचव
क्त्रा दशभुजा सर्वाभरणभूषिता। चिंतुतत्वसमारभ्य लेको [illegible] दशांते [illegible] तमिति॥ ॥इति स्थितिश्रीचक्रन्यासनिरूपणं॥५०॥ इति विद्यार्णवे [illegible]॥ ॥अथ पूर्वस्थि
तिश्रीचक्रन्यासस्तु विद्या च क्रचक्रेश्वरीयोगत्रयात्मक इति सिद्धं। तत्र प्रथमं संप्रदायाकारशुद्धिविद्याकरशुद्धिविधायात्मरक्षाविद्यात्मरक्षाकलास्थानभेदनविभाव
येत्। अरुणकरुणातरंगिताक्षीं धृतपाशांकुशपुष्पबाणचापां। अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीं॥ इति विभाव्य श्रीचक्रन्यासमारभेत्। तत्र विद्यान्यासस्तु आदौ
कूटाक्षरभेदेन त्रयस्त्रयस्ततो मूलविद्यां न्यसेत्। यथाक्रमेण मूर्ध्नि गुह्ये हृदये नेत्रे च गुदकक्षयामब्धयोः श्रोत्रयोर्भुजयोः पृष्ठजान्वोर्नाभौ च विन्यसेत्॥ इति कूटन्यासः॥ अथाक्षरन्यासः
मूर्ध्नि गुह्ये च हृदये नेत्रे [illegible] मुखे भुजयोः पृष्ठके जान्वोः नाभौ पंचदश न्यसेत्। इत्यक्षरन्यासः॥ अथ सप्तस्तविद्यान्यासः॥ स्थानेषु पंचदशसु मूर्ध्नादि विवक्षणः॥ मूलविद्यां प
चकू न्यसेत् त्रितारादि यथाक्रमं॥ इति विद्यान्यासः॥ अथ नवचक्रेश्वरीन्यासः॥ पादयोर्जंघयोर्जान्वोरूरुयोश्च गुदपार्श्वयोः। [illegible] धारे मूलाधारे च विन्यसेत्। नवच
नवचक्रेश्वरीविद्यान्यासो यं परिकीर्तितः॥ इति नवचक्रेश्वरीविद्यान्यासः॥ अथ नवचक्रन्यासः॥ कूलरंध्रे तथाधारे स्वाधिष्ठाने च नाभिके। अनाहते विशुद्धे च लंबिके भ्रूयुगांतरा चि
दुस्थाने क्रमेणैव नवचक्राणि विन्यसेत्॥ इति नवचक्रन्यासः॥ अथ चक्रेश्वरीन्यासः॥ तत्र विद्याः समुद्धार्य त्रिपुरा त्रिपुरेश्वरी॥ सुंदरी त्रिपुरावासिनी तथा त्रिपुरवासिनी। त्रिपुराश्रीः पंचमी स्यात्
षष्ठी त्रिपुरमालिनी सप्तमी त्रिपुरासिद्धा त्रिपुरांबाष्टमी भवेत्। नवमी तु महादेवी महात्रिपुरसुंदरी। नवचक्रेषु विन्यस्येदिति न्यासः समीरितः॥ इति चक्रेश्वरीन्यासः॥ इति स्थितिश्रीच
क्रन्यासोद्धारः॥ अथ रक्षाषडंगन्यासः॥ तत्र त्रयं ततो बालानाम त्रिपुरसुंदरी आत्मरक्षा युगलं प्रोक्ता षडंगानि च विन्यसेत्॥ इति रक्षाषडंगं॥ बालाबीजत्रयेणैव द्विरावृत्त्या षडंगकं। कूटत्रयसा
धकाबीजषडंगन्यास ईरितः। कूटत्रयं द्विरावृत्त्या षडंगानि समाचरेत्। विद्या पंचदशी मूलषडंगन्यास ईरितः। पंच [illegible] कैकेकेषु पंचबीजैः षडंगकं। श्रीविद्याषोडशार्णो या [illegible] षडंगो
यमुदाहृतः। सर्वं तत्तान्नित्यं तत्सात तथैव नादिबोधिनी। एतं त्वाबनले विद्या [illegible] तु शक्ति [illegible] ताभ्यः बालाबीजैकपूर्विकाः। षडंगयुवती न्यासः प्रोक्तः सर्वेषीसिद्धः

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिपुरार्चन ६१

61

ये ए ऐकैकं कूटमादौ श्रीमहात्रिपुरसुंदरी। सर्वं तत्ताशक्ति धाम्नेद्यादि प्राग्वदीरितः षडंगयुवतीन्यासो मूलविद्याप्रदीपकः॥ इति मूलषडंगयुवतीन्यासः॥ मायाबिंदुर्धकाद्यादिप्रकारां
तरमितिरिष्यते॥ अथ षडंगयुवतीनां ध्यानं॥ कुंदेंदुनीलासितपीतरक्तप्रभाभावराभीतिकराः परांगः। लावण्यलीलाखिलयौवनाढ्याः श्रीदेवदेव्यास्तनवो भवंत्यः॥ इति ध्यानं॥ अथ श्रीविद्यापूर्ण
न्यासः॥ ज्ञानार्णवे॥ अथ वक्ष्ये महेशानि श्रीविद्यान्यासमुत्तमं। संपूर्णां चिंतयेद्देवीं ब्रह्मरंध्रे कृतप्रभां। स्ववस्तुधा षोडशार्णां महासौभाग्यदा[...]वामसदे[...] सौभाग्यदांगुलीमात्र्ये न्य
ततः रिपुजित्करं हं मुद्राकारं मूले प्रविन्यसेत्। पुनः संपूर्णां यादेविकालोर्ध्वे विन्यसेत्ततः। ललाटे नाभिकं कुर्यात् षोडशार्णां स्मरेद्बुधः। संप[...]खादेवेशि न्यासोयं क्षोभकारकेऽन्वेलो
४ पुनः संपूर्णां यादेवि व्यापकत्वेन विन्यसेत्। व्यापकं तेयोनिमुद्रां मुखे क्षिप्त्वाभिवंद्य च। श्रीविद्यापूर्णरूपोयं न्यासः सौभाग्यवर्द्धनः। ब्रह्म[...]सद्विभालेव धे न्यसेत्ततः॥ क्रम
रूपं ध्यायन् श्रीविद्यां मनसि स्मरेत्। पादयोर्जंघयोर्जान्वोः कट्योरंधुत्रिपृष्ठके। नाभौ च पार्श्वयोर्वक्षस्तनयोरंसयोस्तथा। कर्णयो[...]नेच च दैवपार्वति। ततः कर्णप्रदेशेषु
करे चैतद्गुरुक्रमात्। संहारोयं महान्यासो बीजैः षोडशभिः क्रमात्। श्रीविद्यायाः षोडशार्णन्यासे शिवो भवेत्। स्वरूपं चिंत्यते दृशि[...]पूर्वं ज्ञात्वा येष्ठ। इति॥ अत्र बो[...] सारामाव
कुंभेरालेन भेदेनयो दीक्षितस्तत्स्वर्णेन वन्यसेत्॥ अथ षोडशार्णनामुद्धारक्रमः प्रदर्श्यते। तत्र श्रीज्ञानार्णवे॥ श्रीदेव्युवाच॥ [...]राविविधादेवभवतापक[...] सूत्रात्रिवि
द्योतियदुत्तमं तु प्रकटीकुरु शंकर॥ ईश्वर उवाच॥ परं ब्रह्मस्वरूपं च नादबिंदुकलान्वितं। शिवशक्तिमयं तत्तु कथयामि तवानघे। आद्य[...]तिष्ठति वै विश्वं स शिवः परमेश्वरि। पूर्वं तु
सेविनु कथिता शिवशक्त्यनंतांभवत्तु। अकारादिसकारांता मातृका शक्तिरव्यया। हकारः परमेशानि केवलं शिव उच्यते। आद्यंताक्षरभावेन तदाहं सकलार्थदः। यदुच्यते मा
त्कार्लं सलत्स्वं वै महमीश्वरः। हकारः परमेशानि शून्यरूपः सदाव्ययः। सकारः शक्तिरूपत्वात्परवाचीव सर्गवान् उच्यते। तेः कारणं यस्माच्छक्तिरित्यभिधीयते। आत्मानं दर्शयेद्यो
गः सोहं भावेनेसुंदरि। बिंदुत्रयसमायोगान्महात्रिपुरसुंदरी। नादरूपेणसा देवी हकारार्धस्वरूपिणी। हकारः परमेशानि शिवरूपी यतस्तदा। त[...]र्धांगं महाशक्तिर्हकारार्धस्य
रूपिणी। अतएव महाविद्या महात्रिपुरसुंदरी। नित्येति कथ्यते देवि चित्कला परदेवता। श्रीगुरोः कृपया भद्रे संप्रदायकुलान्विता। प्रातरुत्थाय[...]श्रीगुरुं स्मृत्वास्तु आत्मभित
संध्यास्नानादिकं देवि विधाय मनुवित्तमः। सर्वश्र्यगारवेषाढ्यः कर्पूरकुसुमादिभिः। महामृगमदोद्दामलिप्तांगः कुंकुमारुणः। नवरत्नविभूषाढ्यो रक्तांबरविराजितः।
तां कलरागवृंदामोमादनानंदमानसः। यागमंडपमासाद्य लाक्षाचित्रविचित्रितं। अनेकधूपबहुलं पुष्पप्रकरशोभितं। गोमयेन सलिलसंचारं पुष्पवितानितं। मनो श्री
हरे मृदौ सूक्ष्मे आसने चोपविश्य वामंतो द्वारं प्रकुर्वीत सर्वकार्यार्थसिद्धये। आद्यो वाग्भवमुच्चार्य कामबीजं द्वितीयकं। कुमार्यास्तु तृतीयं तु त्रिपुरा परमेश्वरि। करस्थ ६१

© Dharmartha Trust J&K. Digitized by eGangotri

ह्र करी विद्या प्रथमा परमेश्वरि। ऐं ऐं सौः इति। कुमारी तु द्वितीया सा त्रिपुरेशी महेश्वरि। ऐं क्लीं सौः इति। त्रिपुरस्यादि मंत्रस्य भुवनेशी परिस्मृता। ह्रीं क्लीं सौः इति। अनया
नामनविद्या त्रिपुरेश्याः षडंगकं। त्रिपुरेशी महेशानि चिंचिणीह्रस्थिता सदा। चक्रासनगता वह्निदेवि त्रिपुरवासिनी। ह्रैं ह्क्लीं ह्सौः इति। आत्मासनमता यास्तु हि दाता नीयमद्वितीय व
लेमा मकुमारी प्रसाध्य सिद्धासनस्थिता। ह्रीं क्लीं ब्लें इति। संपत्प्रदा भैरवीयातल स्तातीय बीजके विंदुं हित्वा तत्र सर्गं निक्षिपेत्सुर सुंदरि। ह्सैं हसकरीं ह्सौः इति। मूलविद्योत्र पुष्पे
ऽष्टसकलागमसेवितं। सर्वदर्शन वेद्यां चैव विकलामप्ययेशिवे। भूमिश्चंद्रः शिवो माया शक्तिः कृष्णाध्वमादनं। अर्धचंद्रश्च बिंदुश्च नवार्णो मेरुरुच्यते। ... लसहईएरक • इति। महात्रि
पुरसुंदर्या मंत्रा मेरुसमुद्भवाः। लकारात्पृथिवी देवी सशैलवनकानना। पंचाशत्पीठसंपन्ना सर्वतीर्थमयी परा। सकाराद्ध्रुवतारादि ग्रहराशि स्वरूपिणी। हकाराच्छिव संयोगा
द्व्योममंडलसंस्थिता। ईकाराद्विश्वमर्तियों महत्तुर्यालिकाद्रिये। एकाराद्विष्णुबीजाक्रि विश्वपालनतत्परा। रकारात्तेजसायुक्ता परंज्योतिः स्वरूपिणी। ककारात्कोरा कामद
कामरूपिणी स्फुरद्गया। अर्धचंद्रेण देवेशि विश्वयोनिरितीरिता। बिंदुना शिवरूपेण अन्यरूपेण सा क्षिणी। अनया सह सर्वत्र व्याप्तिनिश्चलता मता। एवं परब्रह्मरूपमेरुणा
नेन सुव्रते। एवं चन वमिवर्णैर्जायते त्रिपुरामनुः। अन्यथा नैव निष्पत्तिर्नास्ति श्रीत्रिपुरामनोः। श्रीचक्रमपि देवेशि मेरुरूपेण संशयः। लकारः पृथिवीबीजं तेन तेनोच्यते। सका
रश्चंद्रमा भद्रे कलाषोडशकात्मकं। तस्मात्षोडशपत्रं तु हकारः शिव उच्यते। अष्टमूर्तिः सदा भद्रे तस्मादष्टदलं भवेत्। ईकारस्तु ... मायाभुवनानि चतुर्दश। पालनी ... तस्मा
च्चक्रकोणे भवत्प्रिये। शक्तिरेकादशस्थाने स्थित्वा सकलेजगत्त्रयं। विश्वयोनिरिति ख्याता तस्मात्त्वि कोदशरूपकं। सकारात्परमेशानि ... पाप्यभवेत्। दशधेरो कोणे तस्मात्ककारा
ज्योतिरव्ययः। कला दशान्वितो वह्निर्दश कोण प्रवर्तकः। ककारात्कामदनं देवि शिवं चाष्टस्वरूपकं। योनिरस्यतदा चक्रे वसुयोन्यंविवि ... । अर्धमात्रागणाहस्ते भेदरूपा यतस्त
तस्त्रिकोणरूपा योनिस्तु बिंदुनाभैरवी भवेत्। कामेश्वरस्वरूपं तद्विश्वाधारस्वरूपिणं। श्रीचक्रे तु वरारोहे श्रीविद्यावर्णसंभवमि ... तरे। मनुश्चंद्रः कुबेरश्च लोपामुद्रा च का
मराजः। अगस्त्यो नंदिसूर्यश्च शिवोस्कंद शिवास्तथा। दूर्वासाश्च महादेव्या द्वादशोपासकाः स्मृताः। शक्रः श्वानमीवेगतथा च वरुण ... धर्मराज ... नागराजो वायुर्बुधस्तथा।
ईशानश्चरतिश्चैव तथा नारायणस्तथा। कमलालीवोमहादेव्याः स्मृताः ये दशउपासकाः। पंचविंशतिसंख्याको पासका नो महेश्वरि। उपासनीमभेदं ... क्ष्यामि ... समासतः इति। हा
नाऽर्णेवा। शृणु देवि प्रवक्ष्यामि बीजं कामेश्वरी मंत्रं। सकला भुवनेशानी कामेशी बीजमुत्तमं। सकल ह्रीं इति। अनेन सकला विद्याः ... ताभिर्विशेषतः। शक्ततस्तुर्यवर्णो यं क

© Dharmartha Trust J&K. Digitized by eGangotri

३

लम ध्येसुलोव ने। वाग्भवं पंचवर्णाढ्यं कएईल ह्रीं इति। कामराजम थोच्यते। मादनं शिवचं द्राढ्यं शिवांतमीन लोचने। कामराजमिदं भद्रे षट्कूटं सर्वमोहनं। हसकहल ह्रीं इति। शक्ति बीज
वरारोहे चंद्राढ्यं सर्वसिद्धिदं। चतुरक्षररूपं तु त्र्यक्षरात्रिपुरापरा। अत्र शक्तिकूटं त्रागुप्ततकामेश्वरी बीजरूपमित्यर्थः। सर्वतीर्थमयी देवी सर्वतीर्थस्वरूपिणी। सर्वसाक्षीमयी नित्या सर्व
योनिमयी परा। सर्वज्ञानमयी संभ्यक्ष्यति सर्वप्रज्ञानरूपिणी। सर्वदेवमयी साक्षात्सर्वसौभाग्यसुंदरी। एतामुपास्य देवेशि कामः सर्वांगसुंदरः। इयं कामराजोपासिता श्रीविद्या। तथा।
देमुवाच। एतस्या देवदेवेशभेदान्कथय सुंदर। केन केनोपासितेयं विशदीकुरु शंकर। तल्लमः। ईश्वर उवाच। शृणु देवि प्रवक्ष्यामि लोपामुद्राभिधां परां। कामराजाख्यद्वितीयायाः शक्ति
गुर्यं च सुंदरी। हित्वा मुख्यशिवं द्वन्द्वं लोपामुद्राप्रकाशिता। कामराजविद्यायां वाग्भवे एकारं ईकारं हित्वा आदौ हकारं सकारं च सकारं च दद्यात् दन्यत्समानं। तथा। अगस्त्योपासिता विद्या लोकाक्षो
भकारिणी। एवा विद्या कामराज इति तेन न संशयः। हसकल ह्रीं हसकहल ह्रीं सकल ह्रीं इति लोपामुद्रोपासिता श्रीविद्या। अनन्तोमे इदमग्रे वक्ष्यामि गविद्या इयमिदं भद्रे दुर्लभं भुवनत्रे
ये। कामराजाख्यविद्याया वाग्भवे नव रानते विद्यो कारं प्रवक्ष्यामि शक्तिमादनमध्यगां। शिवं कुर्यात्वाग्भवे तु शिवाद्यं कामराजके त्वं द्राद्यं तु तती यं स्याद्विद्येयं मनुपूजिता। कहएईलह्रीं
हकएईल ह्रीं सकहएईल ह्रीं। इति मनूपासिता श्रीविद्या। सहाद्यं वाग्भवे देवि। अंद्राद्यं शिवमध्यगं। मादनं कामबीजं तु शक्तिबीजे हसान्नतो। चंद्राराधितविद्येयं भोगमोक्षफलप्रदा।
सहकएईल ह्रीं। सहकएईल ह्रीं हसकहएईल ह्रीं इति चंद्रोपासिता श्रीविद्या। तथा। हसाद्यं वाग्भवं विद्धि शिवाद्यं सहमध्यगं। मादकनं कामबीजं तु तार्तीयं शृणु पार्वति। हसाद्यं श
नायां देव्यासंमेलनेन वानेन प्रीता महादेवी सर्वसिद्धिं ददाति वा। अन्यानि सिद्धद्रव्याणि प्रसह्य शोधयेत्तु धनः एकस्मिन्दिवसे सुद्रमन्यस्मिन्नर्हितं भवतो
रति। एतेन कुलसिद्धद्रव्याणि स्वयंभूकुसुमरहितानि प्रसह्य पूजायां नवीनान्येव प्रशस्तानीत्यर्थः। अथ पंचलिखनद्रव्यस्य शोधनं। तत्र [illegible]नीत्र
गरुकर्पूरकुंकुमगोरोचनद्रव्यकेसरगुग्गुलुचंदनस्वयंभूकुसुमालकाघद्रव्याण्येकस्मिन्पात्रे संस्थाप्यामृतेश्वरीदीपिनीविद्याभ्यां सप्तवारमभिमंत्रयेत्। इत्यु
क्तं भैरवीतंत्रे। अगरुकस्तूरीगुरुकर्पूरगोलोचनं जांगलं गुग्गुलं मलयोद्भवं महादेवि स्वयंभूकुसुमं तथा। सर्वमेकत्र संयोज्य दीपिन्याऽमृतविद्यया। एषकूप

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
९४

95

प्रकं सप्तवारं हस्तं दत्वाभिमंत्रयेत्। तेन भुङ्क्ते भवेद्द्रव्यं तेन द्रव्येणैव लिखेदिति। अत्र ९ गोलोकोर्ध्वं स्थापयेत्स्वर्णं भ कुसुमं च प्राग्वत्पात्रं तत्र शोधितमेव यथा
स्थं॥ अथ कालीमतरीत्या कलशादिस्थापनं॥ तत्र स्ववामाग्रे वक्ष्यमाणविशेषार्घ्यमंडलवन्मंडलं विरच्य तत्र वसंपूज्य तत्र वक्ष्यमाणविधिना क्षालितमाधा
रं संस्थाप्य तत्रैव संपूज्य सुवर्णादिरचितं कलशं धूपवासितं हुं हुं क्रूं छ्रां ड्वयघ काय स्वाहा। इति वामकरेण प्रक्षालितं। ऐं सं दीपिनि ज्वालामालिनि क्रौं हूं सं दी
पिनि विदयायायोन्निमुद्रया दीपितं कवचेनावगुंठितं ॐ नमः क्रीं नमः क्षं नमः हं नमः सः नमः इति बिंदुस्पर्शनं मंत्रं ॐ ३ श्रीमहात्रिपुरसुंदर्या महाकलशं
स्थापयामीति तत्र कलशं संस्थाप्य तत्र वक्ष्यमाणविशेषार्घ्यपात्रवत्सूर्यकलां तं संपूज्य तत्र वक्ष्यमाणविधिनैव कर्पूरादिसुवासितां पयुषितपरिस्रुतं पयः
समापूर्य तत्राकारादिकान्निक्षिपेत् अर्घ्यविशेषार्घ्ये वक्ष्यमाणं मंडलं विभाव्य वक्ष्यमाणविधिना सोमकलां तं संपूज्य तद्यंत्रेतुरस्रपरितः ॐ ३ हसरव्क्रें पार्थिक
देवताभ्यो हुं फट् स्वाहा नमः ॐ ३ हसरव्क्रें आमचांडालिनि हुं फट् स्वाहा नमः ॐ ३ हसरव्क्रें क्रोधचांडालिनी हुं फट् स्वाहा नमः ॐ ३ हसरव्क्रें द्रवां० ॐ ३
हसरव्क्रें स्पर्श वं० ॐ ३ हसरव्क्रें स्रावि वं० ॐ ३ हसरव्क्रें घट वं० ॐ ३ हसरव्क्रें तपनवेध वं० ॐ ३ हसरव्क्रें नेत्रीव वं० ॐ ३ हसरव्क्रें सर्वजनदृष्टि
स्पर्शदोष वं० ॐ ३ हसरव्क्रें पशुपाश वं० स्वाप्यादिप्रादक्षिण्येन पूजयेदित्येवं दशदोषान्निरस्य ॐ ३ क्रां क्रीं क्रूं क्रैं क्रौं क्रः विकारशोधिनि अस्य विकारान् ह
न हन स्वाहा इति हुं मध्ये संपूज्य स्वादिष्ठयादिभिः पूर्वमंत्रैः पंचभिरापतः। विष्णुर्योनिं त्र्यंबकं त्रिभिः स्वादिदत्वेयतां॥ इमं मे इति च द्वाभ्यां। नामदे त्वेकया
तयाम्रोणामेकतिचेकेनस्थु शुक्रशापं विमोचयेत्। इति कुलार्णववचनात्। उक्तरूपं च दशमंत्रैः सकृत्सकृदभिमंत्रयेत्। मंत्रास्तु ऋग्वेदे यथा॥ स्वादिष्ठया
दिष्ठया पवस्व सोम धारया। इंद्राय पातवे सुतः॥१॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहतं। द्रुणा सधस्थमासदत्॥२॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः पर्षि
राधो मघोनां॥३॥ अभ्यर्ष महानां देवानां वीतिमंधसा। अभि वाजमुत श्रवः॥४॥ त्वामच्छा चरामसि तदिदर्थं दिवेदिवे। इंदो त्वे न आशसः॥५॥ विष्णुर्योनिं कल्पया
तु त्वष्टा रूपाणि पिंशतु॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते॥१॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा॥

श्री
९४

© Dharmartha Trust J&K. Digitized by eGangotri

हिरण्ययी अरणी यन्निर्मथतो अश्विना । तं ते गर्भं हवामहे दशमे मासि सूतवे ।३। त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोमधामभिः । अग्ने दक्षैः पुनीहि नः ।४।
पुनन्तु मां देवजनाः पुनन्तु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ।५। आप्यायस्व प्रस्यंदस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ।६।
इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया । सितासिते सरिते यत्र संगते तत्रा
प्लुतासो दिवमुत्पतन्ति । ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ।८। तामंदसानां मनुषो दुरोण आ धत्तं रयिं सहतीर्थं वचस्यवाकृते
तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतं ।९। ओं णामेकुडदकं गामवान्तिभ्यां समेकः पिंशति सूतयाभ्रतोंतानि भुवः शकृदको
आपारांकिं सिंचन्तु त्रेभ्यः पितराउपावतु ।१०। इत्यभिमंत्र्य ओं ३ कों कीं कूं कैं कौं कः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतस्वरूपि
णि अमृतं स्रावय २ सं कुशपाल्लु धां मोचय मोचय मोविकायै नमः ओं ३ जूं सः स्वाहा इति विधाय षट्कारमभिमंत्र्य ओं ३ सिद्धायै नमः ओं ३ रक्ता
यै नमः ओं ३ शुक्लायै ओं ३ उत्पलायै नमः इति चतुरस्रस्य चतुर्दिक्षु प्रादक्षिण्येन स्वाम्यादितः संपूज्य मध्ये त्रिकोणं विशेषार्घ्ये वक्ष्यमाणरूपं
विभाव्य ओं ३ हसक्षमलवरयूं आनंदभैरवाय वौषट् आनंदभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ओं ३ सहक्षमलवरयीं आनंदभैरव्यै वषट्
आनंदभैरवीश्रीपादुकां पूजयामि तर्पयामि नमः एवं सर्वत्र । ओं ३ सुरानंदभैरवाय वौषट् । ओं ३ असुरानंदभैरव्यै वषट् सुरानंदभैरवीश्री । ओं ३
अमृतानंदभै० ओं ३ अमृतानंदभैरव्यै वषट् ओं ३ तरुणानंदभैरवाय० ओं ३ तरुणानंदभैरव्यै० ओं ३ उन्मत्तानंदभैरवाय० ओं ३ उन्मत्तानंदभैरव्यै०
ओं ३ ज्ञानानंदभैरवाय० ओं ३ ज्ञानानंदभैरव्यै० ओं मुक्तानंदभैरवाय० ओं ३ मुक्तानंदभैरव्यै० ओं ३ परमानंदभैरवाय० ओं ३ परमानंदभैरव्यै०
ओं ३ कालभैरवाय० ओं कालभैरव्यै० इति भैरवमिथुननवकं मध्ये दिक्षु च संपूज्य संतर्प्य मलविद्यया वीक्षणमुद्रया संवीक्ष्य अस्त्रमंत्रेण प्रोक्ष्य अ
स्त्रमंत्रेण कुशैस्त्रिः संताड्य कवचमंत्रेणाभ्युक्ष्य आघ्राय वामनासारंध्रेण प्रविश्य ब्रह्मरंध्रे गलात्तत्र स्थितं चंद्रमंडलमध्यगतपरमामृतमा

© Dharmartha Trust J&K. Digitized by eGangotri

धौतमिलितात्मये नराजदंतविवरान्तेऽमाणेर्गलविनिर्गतं तज्जलं विभाव्य संरोधनमुद्रया संरुध्य कवचमंत्रेणावगुंठनमुद्रयावगुंठ्य वमि
ति धेनुमुद्रयामृतीकृत्य परमीकरणमुद्रया परमीकृत्य तत्र देवीं ध्यात्वा गंधपुष्पादिभिः संपूज्य मूलविद्ययाष्टवारमभिमंत्र्य ओं ३ नमो भगव
ति ज्वालेश्वरि वारुणीजलमृतेय ऊर्ध्वे बिंदु स्वाहा इति महालक्ष्मीश्वरी परमधाम्नि परमाकाशाता सुरि सोमसूर्याग्निभक्षिणि आगच्छागच्छ वि
शविशस्व भोगद्रव्यं गृह्ण रसं गृह्ण स्वाहा इति तत्कलशाद्बिंदुं वामांगुष्ठानामिकाभ्यां धृतं द्वितीयाखंडे नादयोर्ध्वे मुक्षिपेत् ततः कलशवद्वंतपात्रां
तरेणाच्छाद्योद्धरणपात्रमादाय वामकरे निधाय ओं ३ अमोघायै ओं ३ सूक्ष्मायै ओं ३ आनंदायै ओं ३ शांत्यै इति शक्तिचतुष्टयं वामक
रस्थपात्रे संपूज्य कुंभस्याच्छादनपात्रस्योपरि स्थापयेदिति कलशस्थापनं विधाय ततः कलशदक्षिणभागे भूप्रदेशे चतुरस्रवृत्तत्रिकोणा
त्मकं मंडलं चंदनादिलिप्तभूमौ वह्न्याशाकराङ्गुष्ठाभ्यां त्रितारमुच्चरन् निर्माय प्रणवं त्रितारादि नमोंतयामलं लिख्य विद्यया त्रिकोणमध्यं संपू
ज्य कूटत्रयेण त्रिषु कोणेषु स्वाद्यादिना दक्षिणेन संपूज्य चतुरस्रे अग्नीशासुरवायव्यकोणेषु हृदयादिअंगचतुष्टयं मध्ये नेत्रं प्रागादिच
तुर्दिक्षु अस्त्रमिति षडंगमंत्रैः संपूज्य तत्र मूलेन क्षालितमाधारं संस्थाप्य ओं ऐं क्लीं श्रीं प्रथमकूटमुच्चार्य वह्निमंडलाय धर्मप्रद दशकलात्मने
श्रीपरदेवतायाः सामान्यार्घ्याधाराय नम इति संपूज्य तत्र वक्ष्यमाणप्रकारेण सूर्यस्य द्वादशकलाः संपूज्य गंधादिसुवासितशुद्धतोयेन प्रणव
त्रितारमूलविद्यांते विलोममातृकामुच्चरन् तत्पात्रमापूर्य तृतीयकूटं ओं ३ सोम [illegible] मंडलाय कामप्रद षोडशकलात्मने श्रीपरदेवतायाः
सामान्यार्घ्यामृताय नमः इति जलं संपूज्य वक्ष्यमाणप्रकारेण सोमस्य षोडशकलाः संपूज्य तत्र प्राग्वत्स्वविलमंडलात्तीर्थमावाह्य कलशामृ
तबिंदुं दत्वा तत्र मूलेन गंधपुष्पादिकं निक्षिप्य प्राग्वत् षडंगमंत्रैः संपूज्य हसक्षमलवरयूं सहक्षमलवरयीं इति स्वात्मकमिथुनमंत्रेणाभिर
भिमंत्र्य ह्सौं वरुणाय ह्स्क्ष्फ्रें वारुणीदेव्यै नम इति वरुणमिथुनमंत्रेणाभिरभिमंत्र्य मूलेनाष्टधाभिमंत्र्य धेनुयोनिमुद्रा प्रदर्शयेदिति सामा

© Dharmartha Trust J&K. Digitized by eGangotri

न्यार्घ्यं विधाय तत्समीपे सामान्यार्घ्यजलेन यक्षकर्दमादिगंधद्रव्यमिश्रितेन भूमिं लिप्य तत्र वह्न्यासोर्द्ध्वपुटहस्तोर्ध्वं चतुरस्रं तन्न षट्को-
णत्रिकोणात्मकं मंडलं विधाय तन्मंडले शंखमुद्रामुद्रितवामकरेणाबद्धभ्रात तन्मध्ये त्रिकोणमध्ये सबिंदुतुर्यस्वररूपां कामकलां विलिख्य ओं ऐं
क्लीं श्रीं श्रीपरदेवताया विशेषार्घ्याधारमंडलाय नमः इति मंडलं संपूज्य ४ नमो तन्मूलेन त्रिकोणमध्यं संपूज्य त्रिकोणाग्रकोणे ४ प्रथमकूटं
नमः ४ वामे ४ द्वितीयकूटं नमः दक्षिणे ४ तृतीयकूटं नमः इति त्रिकोणं प्रादक्षिण्येन संपूज्य षट्कोणकोणेषु प्रादक्षिण्येन स्वाग्रमारभ्य
मूलकूटद्वयस्य द्विरावृत्त्या पूजयित्वा चतुरस्रे प्रागवत्षडंगानि संपूज्य ततश्चतुरस्रे स्वाग्रमादिं चतुर्दिक्षु मध्ये च प्रादक्षिण्येन ४ ग्लूं गगनरत्नाय·
४ स्लूं स्वर्गरत्नाय· ४ म्लूं मर्त्यरत्नाय· ४ प्लूं पातालरत्नाय· ४ न्लूं नागरत्नाय॰ इति पंचरत्नानि संपूज्य पुनः षट्कोणेषु स्वाग्रमादि प्रादक्षिण्येन न्या-
सोक्तषडासनानि संपूज्य चतुरस्रे च ४ तत षट्कोणत्रिकोणेषु ४ कामरूपपीठाय॰ ४ जालंधरपीठाय· ४ पूर्णगिरिपीठाय· ४ उड्याणपीठाय· इति
पीठचतुष्टयं संपूज्य शांभवदीक्षावांश्चेत् चतुरस्रे स्वाग्रमादि चतुर्दिक्षु मध्ये च पंचप्रणवपुटितैः प्रणवपंचकैः पूजयेत् तद्यथा ऐं क्लीं श्रीं ह्स्ख्फ्रें ह्सौः
ऐं ह्सौः ह्स्ख्फ्रें श्रीं क्लीं ऐं नमः ५ ऐं ५ क्लीं ५ नमः ५ श्रीं ५ नमः ५ ह्स्ख्फ्रें ५ नमः ५ ह्सौः ५ नमः इति संपूजयेत् ततः मूलं सर्वशक्तिमयी श्रीपरदेवता-
याः पीठचतुष्टयात्मकार्घमंडलाय नमः इति समस्तं मंडलं संपूज्य तन्मूलेन प्रक्षालितमाधारं गृहीत्वा ४ श्रीपरदेवताया विशेषार्घ्याधारं स्थाप-
यामीति मंडलोपरि संस्थाप्य ४ प्रथमकूटमुच्चार्य मं वह्निमंडलाय धर्मप्रददशकलात्मने श्रीपरदेवताया विशेषार्घ्यपात्राधाराय नमः इत्याधा-
रं संपूज्य तदुपरि धूम्रार्चिरादिदशकला इहागच्छतागच्छतेति वह्नेर्दशकलाः समावाहयेत्तासां प्राणप्रतिष्ठां कुर्यात् तत्र पूर्वोक्तप्राणप्रतिष्ठामंत्रे-
ण मम पदस्थाने धूम्रार्चिरादीनामिति पदं निक्षिप्य प्राणप्रतिष्ठामंत्रमाधारं स्पृशन् पठेदिति प्राणप्रतिष्ठां विधाय ४ धूम्रार्चिषे नमः ४ रं ऊ-
ष्मायै· ४ लं ज्वलिन्यै· ४ वं ज्वालिन्यै· ४ शं विस्फुलिंगिन्यै· ४ षं सुश्रियै· ४ सं सुरूपायै· ४ हं कपिलायै· ४ ळं हव्यवाहायै· ४ क्षं कव्यवाहायै नमः

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्ण
९६

इति ताः संपूज्य स्वर्णमंदिरविन्तं पात्रमस्त्रेण प्रक्षाल्य ५ श्री परदेवताया विशेषार्घ्यपात्रं स्थापयामीति तत्र संस्थाप्य ५ द्वितीयकूटमुच्चार्य अर्के मं
डलाय अर्थप्रद द्वादशकलात्मने श्री विशेषार्घ्यपात्राय नमः इति पात्रमध्ये संपूज्य तत्र पूर्वोक्त क्रमं मंडलं विभाव्य पूर्ववत् पंचरत्नानि तं संपूज्य तथैव पंचप्राणैः
तमभ्यर्च्य तत्र सूर्यस्य द्वादश कलाः प्राग्वत् समावाह्य प्राग्वत् तन्नाम पुरःसरं तासां प्राणप्रतिष्ठां विधाय वक्ष्यमाण कारणेन आदक्षिणेन ततः पूजयेत् तद्यथा॥
96 ५ कं भं तपिन्यै ५ खं बं तापिन्यै ५ गं फं धूम्रायै ५ घं पं मरीच्यै ५ ङं नं ज्वालिन्यै ५ चं धं रुच्यै ५ छं दं सुषुम्णायै ५ जं थं भोगदायै ५ झं तं विश्वायै
५ ञं णं बोधिन्यै ५ टं ढं धारिण्यै ५ ठं डं क्षमायै इति संपूज्य कलशस्थजलं मुद्राकरणपात्रेणोद्धृत्य मूलविद्यां त्रिविलोमं मातृकामुच्चरन् तत्पात्रमा
पूर्य तत्राङ्कुशादिकं निक्षिप्य ऐं मित्यंकुशानामिकाभ्यां पुष्पेण तत्पात्रस्थं जलमुद्धृत्य सम्पादयेत् मालोऽमृत पुष्पं शिरस्य क्लीमिति चंदनागरु कर्पूर रवीर कुं
कुमरोचना जटामांसी शिलारसात्मकं गंधाष्टकं पंकलोलितं चंदनादिपंकलोलितं वा पुष्पं निक्षिप्य सौः इति गालिनीमुद्रया निरीक्ष्य ५ तृतीयकू
टं उ सोममंडलाय कामप्रद षोडशकलात्मने श्री परदेवताया विशेषार्घ्यामृताय नमः इति पात्रस्थजलमध्ये संपूज्य तत्र पूर्वोक्त क्रमं मंडलं विभाव्य पू
र्ववत् पंचरत्नानि तं संपूज्य शांभवदीक्षायुक्तश्चेत् तथैव पंचप्राणैः पूजयेत् ततस्तत्र सोमस्य षोडश कलाः प्राग्वत् समावाह्य प्राग्वत् तन्नामपुरःसरं तासां
प्राणप्रतिष्ठां विधाय वक्ष्यमाण कारणस्यादि आदक्षिणेन ततः पूजयेत् तद्यथा ५ अं अमृतायै ५ आं मानदायै ५ इं पूषायै ५ ईं तुष्ट्यै ५ उं पुष्ट्यै ५ ऊं
रत्यै ५ ऋं धृत्यै ५ ॠं शशिन्यै ५ लृं चंद्रिकायै ५ लॄं कान्त्यै ५ एं ज्योत्स्नायै ५ ऐं श्रियै ५ ओं प्रीत्यै ५ औं अंगदायै ५ अं पूर्णायै ५ अः पूर्णामृतायै नमः
इति संपूज्य पूजितमंडलमध्ये त्रिकोणमकथादि त्रिरेखं विभाव्य तत्कोणत्रये मूलविद्यायाः कूटत्रयं मध्यस्थाने कामकलां [illegible] सविंदु ह श्री
सौः तत्पृष्ठे लकारं तत्पार्श्वयोः हं सः च तौ विभाव्य पुष्पाक्षतगर्भितां योनिमुद्रां बध्वा गुरूपदिष्टप्रकारेण मूलाधारात् कुंडलिनीमु[illegible] क्रमभेदक ९६
मेण सुषुम्णावर्त्मना ब्रह्मरंध्रस्थ विधुचंद्रमंडलसंभूतमशेषरससंभृतां आपूरितं महापात्रं पीयूषरसमावहाएं ह्रीं [illegible] सुधा[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा इति तस्मिन्नर्घ्ये ओं मते पुष्पा... क्षिपेण तदमृतधा
रां संयोजयामीति धेनुमुद्रां प्रदर्श्य ओं ह्रीं हंसः सोहं स्वाहा इत्यात्माष्टाक्षरमंत्रेण त्रिरभिमंत्र्य पुनरुच्चार्य अमृतमयं... श्रीपादुकां पूजयामी
ति जलमध्ये संपूज्य पुनः प्रणवेन त्रिरभिमंत्र्य हं सः ओं अपाशक्ति श्री० इति संपूज्य मातृकया बिंदुरहितया त्रिरभिमंत्र्य पुनस्तामुच्चार्य मात
कासरस्वती श्री० इति जलमध्ये संपूज्य मूलतार्तीयकूटेन दशधाभिमंत्र्य पुनस्तार्तीयकूटमुच्चार्य त्रिपुराभैरवी श्री० इति जलमध्ये संपू
ज्य ४ हसक्षमलवरयूं सहक्षमलवरयीं इत्यानंदभैरवमिथुनविद्याभ्यां त्रिरभिमंत्र्य ५ ... हसक्षमलवरयूं आनंदभैरवाय वौषट् आनंद
भैरवश्रीपादुकां पूजयामि तर्पयामि नमः इति त्रिः संपूज्य संतर्प्य ४ सहक्षमलवरयीं सुधादेव्यै वौषट् सुधादेवी श्री० इति संपूज्य संतर्प्य ह्सौं वरुणाय
नमः स्हौं वारुणी देव्यै नमः इति वरुणमिथुनविद्याभ्यां त्रिरभिमंत्र्य ४ पुनः पृथगुच्चार्य वरुण श्री० वारुणी देवी श्री० इति संपूज्य संतर्प्य ततो वा
लया वक्ष्यमाण षोडशनित्यामंत्रैः ... सकृत्सकृदभिमंत्र्य तद्दिनतिथिनित्याविद्यया तत्तिथिनित्याविद्यया च पृथक्पृथक् त्रिरभिमंत्र्य पराप्रासाद
परामंत्राभ्यां मूर्धाम्नाय दीक्षितश्चेत् ह्सौः स्हौः इति मंत्राभ्यां त्रिरभिमंत्र्य ततश्चरणादि दीक्षितश्चेत् चरणकुशलयोगिनी विद्याभ्यां त्रिस्त्रिरभिमं
त्र्य ततः सौरित्यनुत्तरपराविद्यया दीक्षितश्चेत्तया त्रिरभिमंत्र्य पूर्णाभिषिक्तश्चेत् कामकलाविद्यया त्रिरभिमंत्र्य षडन्वयशांभवदीक्षायुक्तश्चेत् तत्त
द्विद्याभिस्त्रिरभिमंत्र्य ततो वक्ष्यमाणपांचभौतिकमंत्रैस्त्रिस्त्रिरभिमंत्र्य सषष्ट्यादिदशकला जलमध्ये समावाह्य प्रागवतन्नाम पुरःसरं तासां प्राण
प्रतिष्ठां विधाय वामदेव ऋषिर्जगती छंदः सूर्यो देवता ओं हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्यो
मसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । इत्यनया ऋचा सकृदभिमंत्र्य पुनरुच्चार्य ब्रह्मणे नमः इति जलमध्ये संपूज्य कं सृष्ट्यै नमः इत्या

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णे
९७
97

दिप्रागुक्तकलामातृकान्यासोक्तप्रकारेण कचवर्गो[illegible]कलाः संपूज्य ततः टतवर्गोत्थजरादिदशकलाः समावाह्य प्राग्वत्तासां प्राणप्रतिष्ठां वि-
धाय। प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा। इत्यनेन या-त्वा सकृदभिमंत्र्य
पुनरुच्चार्य विष्णवे नम इति संपूज्य रं जरायै नम इत्यादिताः संपूज्य पुनः पयवर्गोत्थकलास्तीक्ष्णाद्याः समावाह्य प्राग्वत्तासां प्राणप्रतिष्ठां विधाय
त्र्यंबकमित्यस्य वसिष्ठ ऋषिः अनुष्टुप् छंदः त्र्यंबकरुद्रो देवता। त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृ-
तात्। इत्यभिमंत्र्य पुनरुच्चार्य रुद्राय नमः इति संपूज्य पं तीक्ष्णायै नम इत्यादिभिः संपूज्य पुनः षकारादिक्षकारांतपंचवर्णोत्था पीतादिपंचकलाः समा-
वाह्य प्राग्वत्तासां प्राणप्रतिष्ठां विधाय गायत्र्याभिमंत्र्य पुनरुच्चार्य ईश्वराय नम इति संपूज्य षं पीतायै नम इत्यादिताः संपूज्य ततः स्वरोत्थानि-
वृत्त्यादिकलाः समावाह्य प्राग्वत्तासां प्राणप्रतिष्ठां विधाय विष्णुर्योनिं कल्पयत्विति मंत्रस्य त्वष्टा गर्भकर्त्ता ऋषिः अनुष्टुप् छंदः श्रीविष्णुर्देव-
ता। सदाशिवप्रीत्यर्थे जपे विनियोगः। विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते। इत्यभिमंत्र्य पुनरुच्चार्य
सदाशिवाय नम इति जलमध्ये संपूज्य अं निवृत्त्यै नमः इत्यादिना संपूज्य मातृकया त्रिरभिमंत्र्य पुनरुच्चार्य मातृका सरस्वती श्री० इति संपूज्य ऐं अ-
खंडैकरसानंदकरे परसुधात्मनि। स्वच्छंदस्फुरणामत्र निधेहि कुलरूपिणि। इत्यनेन त्रिरभिमंत्र्य ह्रौं अकुलस्थामृताकारे सिद्धिज्ञानकरे परे।
अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणि। इति च त्रिरभिमंत्र्य सौः तद्रूपेणैकरस्यं च कृत्वार्घ्यं तत्स्वरूपिणि। भूत्वा परामृताकारं मयि चित्स्फु-
रणं कुरु। इति च त्रिरभिमंत्र्य ऐं प्लूं झ्रौं जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा। इत्यमृतेश्वरीविद्यया
चतुर्वारमभिमंत्र्य पुनरस्तामुच्चार्य अमृतेश्वरी श्री० इति सकृत्संपूज्य ततः ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु

श्री
९७

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ सौः मोक्षं कुरु २ सौः ह्सौः इति दीपिनीविद्यया पञ्चवारमभिमंत्र्य लतत्स्तत्र मूलविद्यामष्टधा जपित्वा तन्मध्ये चतुरस्रं पश्चिमद्वारं विभि-
न्यतद्द्वारपार्श्वयोः कुलवटुकनाथतद्धूल्लिं मां श्री० इति दक्षिणवामयोः संपूज्य तदंतः प्राग्वत्खडासनानि संपूज्य तन्मध्य त्रिकोणमध्यस्थविंदुम-
ध्ये कामकलायां वक्ष्यमाणप्रकारेण देवीमावाह्य ध्यात्वा षडंगन्यासयोगेन सकलीकृत्य गंधादिभिः संपूज्य वक्ष्यमाणविधिना देवांगेलयांगं
संपूज्य तिथिनित्याः षोडशनित्या गुरुपंक्तित्रयषडंगयुवतीश्च संपूज्य वक्ष्यमाणसमष्टियोगिनीमंत्रेण त्रिः सकृद्वा पुष्पांजलिं दत्वा धूपदीपौ निवे-
द्य योनिधेनुमहायोनित्रिशिखापद्मसंक्षोभद्राविणाकर्षवश्योन्मादमहांकुशाः खेचरी वीजयोनिपाशांकुशधनुर्बाणाख्याः अष्टादशमुद्राः
प्रदर्श्य नमस्कारमुद्रया प्रणमेत्। अत्र एतावत्कर्तुमशक्तश्चेत् अभिमंत्रणपूजनयोरन्यतरत्कुर्यात्। अत्राप्यशक्तश्चेत् आत्माष्टाक्षरपूजांतक-
लान्यानंदभैरवमिथुने संपूज्य संतर्प्य सध्यादिकलापूजामारभ्य शेषं प्राग्वत्समापयेत्॥ ॥इति विशेषार्घ्यस्थापनविधिः॥ ॥ततस्तत्परतस्ते-
नैव विधिना श्रीपात्राख्यपात्रांतरं स्थापयेत्। तेन मूलदेव्यतिरिक्तावरणदेवतास्तर्पयेत्। पूजासमर्पणादिकं मूलदेव्यास्तर्पणं च विशेषार्घ्येणैवात
त्र अनंगकुसुमादिपर्यंतमावरणत्रयपूजासमर्पणं मध्ये दातव्यं च सामान्यार्घ्यजलेनैव कुर्यात्॥ ॥इति श्रीपात्रस्थापनविधिः॥ ततस्तदुत्तरक्रमे-
णैव तदधः पंक्त्याकारेण पाद्याचमनीयमधुपर्कार्थं पात्रद्वयं शुद्धजलेनाचमनीयं तीयमधुपर्कार्थं पात्रद्वयं शुद्धजलेनापूर्य तत्तीयं
मधुपर्कद्रव्येणापूर्य तेषु विशेषार्घ्यजलं किंचित्किंचिद्दत्वा मूलविद्यया प्रत्येकं प्रत्येकं अष्टवारमभिमंत्रयेत्। मधुपर्के तु कांस्यपात्रं प्रशस्तं
ताम्रवर्जमन्यद्वा पात्रांतरेणाच्छादितं कुर्यात्। गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वाः सामान्यार्घ्ये निक्षिपेत्। पाद्यपात्रे श्यामाकतंडु-
लदूर्वाकमलापराजितापुष्पाणि शीररोचना द्रव्याष्टकं निक्षिपेत्। आचमनीयपात्रे जातीफललवंगकक्कोलचूर्णानि निक्षिपेत्। ऊर्ध्वद्रव्या

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धा॰ दीव
९८
98

भावेतत्तत्त्वभावनया तंडुलान्निक्षिपेत्। मधुपर्कपात्रे दधिमधुघृतानि निक्षिप्य विशेषार्घ्यबिंदुना संस्कुर्यात्। दध्याद्यलाभे जलेनैव तद्भाव
नयापूरयेत्॥ ततः स्वदक्षिणाग्रे पाद्यादिपात्रविधानेनैव पुनराचमनीयपात्रमपि स्थापयेत्। अत्राप्यशक्तौ पाद्यादित्रयमेकस्मिन्नेव पात्रे दद्या
त्। ततः स्वगुरुमुखादवगतविनियोगविधौ पात्रचतुष्टयं सामान्यार्घ्यविधिना प्रोक्षणीपात्रात् पुरतः स्थापयेत्। तेषां नामानि तु गुरुपात्रं शक्तिपा
त्रं वटुकपात्रं आत्मपात्रं चेति गुरुपादुकाविद्यया गुरुपात्रं बालया शक्तिपात्रं वटुकपात्रं तन्मंत्रेण आत्मपात्रं मातृकाष्टाक्षरमंत्रेणच्चेति तत्तन्मंत्रेण
तत्तत्पात्रमष्टधाभिमंत्रयेत्। ततः प्रोक्षणीपात्रोदकेन पात्रांतरोद्धृतेन ॐ ऐं ह्रीं श्रीं ऐं प्रथमकूटमुच्चार्य आत्मतत्त्वात्मने नमः ४ क्लीं द्वितीयं वि
द्यातत्त्वात्मने नमः सौः तृतीयं शिवतत्त्वात्मने नमः ४ ऐं क्लीं सौः समस्तमूलमुच्चार्य सर्वतत्त्वात्मने नमः इति स्वात्मानं प्रोक्ष्य पुनर्मूलेन यागभूमिं
यागोपकरणानि च श्रीचक्रं च प्रोक्ष्य सर्ववस्तुषु धेनुमुद्रां प्रदर्शयेत्॥ ॥इत्यर्घ्यादिपात्रस्थापनविधिः॥ अत्र श्रीपात्रस्थापनाशक्तौ विशेषार्घ्येणै
व प्रोक्तपूजादिकं कुर्यात्॥ अथ संक्षेपतः पात्रासादनप्रयोगः॥ तत्र स्ववामभागे वंदनादिना त्रिकोणषट्कोणवृत्तचतुरस्रात्मकं मंडलं विलिख्य तत्र पीठ
चतुष्टयात्मकं श्रीपरदेवतायाः कलशाधारमंडलाय नमः इति संपूज्य तत्रास्त्रक्षालितमाधारं संस्थाप्य तस्मिन्नाधारे ४ मं धर्मप्रद दशकलात्मने अग्नि
मंडलाय श्रीपरदेवतायाः कलशाधाराय नमः इति संपूज्य तदुपरि आग्नेयादि प्रादक्षिण्येन प्रागग्रधूम्रार्चिरादि दशकलाः संपूज्य तत्रास्त्रक्षालितं सुधूपितं क
लशं संस्थाप्य ४ अं सूर्यमंडलाय धर्मप्रद द्वादशकलात्मने सूर्यमंडलाय श्रीपरदेवतायाः कलशपात्राय नमः इति संपूज्य कलशोपरि प्रागादि प्रादक्षि
ण्येन तपिन्यादि द्वादशकलाः संपूज्य तस्मिन्नधिकारभेदेन विहितं क्षीराद्यमद्यासवान्यतमं सांगं पृथक्पात्रेषु प्राक्संस्कृतं द्रव्यं मूलविद्यासहि श्री
तविलोमानुलोममातृकामुच्चरन्नासमापूर्य तत्र षडंगयुवतीगुरुपंक्तित्रयषोडशनित्यास्तद्दिननित्यारत्नेश्वरीः संपूज्य संक्षेपकामप्रद षोडशक ९८

© Dharmartha Trust J&K. Digitized by eGangotri

लात्मने सोममंडलाय श्रीपरदेवतायाः कलशामृताय नमः इति वसं पूज्य प्रागादिषु दक्षिणेपेन अमृतादिषोडशकलाः संपूज्य तदमृतं परब्रह्ममयं सं
चिंत्य ऊरणीपात्र सहितपिधानपात्रेण च्छाद्य सूक्ष्मवस्त्रेण समाच्छादयेदिति कलशस्थापनविधिः ॥ अन्यानि पात्राणि एतद्रुकुरीत्या तत्तन्मैत्रे
स्थापयेदिति संक्षेपः ॥ ॥ इति श्रीविद्यार्णवे नवमश्वासः ॥ ॥ अथात्मपूजा ॥ तत्र स्वपुरतः त्रिकोणमंडले साधारं पात्रे संस्थाप्य कलशोदकेना
पूर्य विशेषार्घ्यबिंदुं दत्वा स्वदेहं वंदनादिभिरलंकृत्यात्मानमिष्टदेवतारूपं ध्यायन् गुरुगणपतिपरदेवताः प्रणम्य मूलाधारादिब्रह्मरंध्रपर्यंतं प्राग्व
कुंडलिनीध्यानात् दुकूपिलीमूलविद्यां विभाव्य तत्तेजसा परिणतां स्वेष्टदेवतारूपं स्वदेहं भावयन्नात्मपूजां कुर्यात् । आगुरुयोगपीठन्यासरीत्या स्वदे
हं योगपीठत्वेन विभाव्य हृत्कमलकर्णिकायां श्रीचक्राधिरूढां श्रीपरदेवतां विभाव्य वक्ष्यमाणक्रमेण षोडशोपचारैरार्घ्यपुष्पांजलिपंचकं स्वदेहे समर्प्य
धूपदीपौ निवेद्यांतर्हवनं कुर्यात् । तत्र मूलाधारे त्र्यस्रं कुंडं विभाव्य तन्मध्ये कालाग्निमेव कामाग्निं वासनारूपं घनप्रज्वलितं प्राणादिपंचवायुभिः सं
धुक्षितं कुंडलिनीरूपपरदेवताधिष्ठितं चिदग्निमंडले विभाव्य प्रणवत्रितारादिमूलविद्यांते धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा सुषुम्नावर्त्मना
नित्यमक्षवृत्तीर्जुहोम्यहं इदं जुहोमि स्वाहा । इति पुण्यपापकृत्याकृत्यसंकल्पविकल्पधर्माधर्मकं हविः सप्तकं सम्पाद्य हुत्वा ततः प्रणवत्रितारादिमूलविद्यां
ते प्रकाशामर्शहस्ताभ्याम् अवलंब्योन्मनी स्रुचा । धर्माधर्मकलास्नेहं पूर्णे वह्नौ जुहोम्यहं । अत्र धर्मं जुहोमि स्वाहा इति पूर्णाहुतिं हुत्वा निरस्तनिखिलप्रपंचो नि
ष्कलं ब्रह्मरूपं साधकः कियत्क्षणं तिष्ठेत् । ततो देवीरूपमात्मानं ध्यात्वा श्रीगुरुपादुकां प्रणम्य शिरस्यन्तःपूर्णां ध्यात्वा तद्विद्यां यथाशक्ति जपित्वा सम
र्प्य प्राणायामऋष्यादिकरषडंगन्यासपूर्वकं मूलविद्यामष्टोत्तरशतवारं जपित्वा जपं समर्प्य स्तुत्वा प्रणमेदित्यात्मपूजा ॥ अथ यशक्तिग्राघटनं ॥ तदु
क्तं भावचूडामणौ ॥ अदीक्षितकुलासंगाद्विहीना निःप्रजायते । बलात्क्रियते चापि अभिषेकं समाचरेत् । आदौ बालां समुच्चार्य त्रिपुरायै समुच्चरेत् ।

© Dharmartha Trust J&K. Digitized by eGangotri

नमः समुद्धार्य इमां शक्तिं ततो वदेत्। पवित्रं कुरु शब्दांते मम शक्तिं कुरु प्रिये। वह्निजायां समुच्चार्य शुद्धिमंत्रः सुरेश्वरि। तस्याः कर्णे मे देवि मायामायाबी
जं समुच्चरेत्॥ इति शक्तिशोधनं॥ ततः शोधितद्रव्यं तु अर्घ्ये निःक्षिपेत्। तथा श्रीक्रमे गपूर्वं शोधितद्रव्यं तु गुप्तेनैव च संक्षिपेत्। स्वतंत्रे। अर्घ्यद्रव्यमध्य
पात्रे निःक्षिप्य प्रयतः सुधीः। कुंडगोलोद्भवं द्रव्यं स्वयंभूकुसुमं तथा। अर्घ्ये दत्वा महेशानि सर्वसिद्धीश्वरो भवेत्। सुधया वा अर्घ्यदानेन योगिनीनां भवे
त्प्रिया महायोगी भवेद्धि विपीठप्रक्षालितैर्जलैः॥ भैरवतंत्रे॥ पंचमीतु परं नास्ति शाक्तानां सुखमोक्षयोः। केवलैः पंचमैर्गोपि सिद्धो भवति साधकः॥ इति॥
तथा पूजयेदथ पर्यंकमध्ये मंडूकमध्यतः। कालाग्निरुद्रमाधारशक्तिं कूर्ममनंतरं। वाराहं पृथिवीं कंदं सुनाले केसराण्यपि। पद्मं च कर्णिकां चैव मंड
लं च समर्चयेत्। धर्मं वैराग्यमैश्वर्यं ज्ञानमहान्नमेव च। अनैश्वर्यमवैराग्यमधर्ममपि पूजयेत्। ज्ञानं विद्यात्मकं चैव मात्मनश्चापि पूजयेत्। गंधपु
ष्पाक्षताद्यैस्त्रिदलं तत्र निधापयेत्। तस्योपरि कुलेशान्य पूजानुष्ठानमेव च। पूजयेच्च ततस्तस्यां पंचकामान्समाहितः। ओंकारादिनमोंतैश्च कुसुमै
र्गंधसंयुतैः। अर्चयित्वा चतुर्दिक्षु पूजयेत्कुलनायकं। वाग्भवं कामराजं च स्त्रीबीजं कामराजकं। मात्मकं ततो दत्वा आधारशक्तिमुच्चरेत्। श्रीपा
दुकां ततो दत्वा पूजयामि पदं ततः। अनेन मनुना तस्याः ललाटे तु मनोहरं। त्रिकोणं तत्र संलिख्य सिंदूराद्यैर्वरानने॥ उत्तरतंत्रे। तस्या मूर्ध्नि त्रिकोणे
च मंत्रमालिख्य साधकः। महाप्रेतासनेमध्ये बालां च पूजयेत्ततः। ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः इति पूजयेत्। कुलार्णवे॥ गणेशं च कु
लाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीं। त्रिकोणे धनुसंपूज्य वसंतं मदनं प्रिये। स्तनयोः पूजयेत्पश्चान्मुखे तस्याः सुधाकरं। उत्तरतंत्रे॥ मौलौ गणेशं केशाग्रे
कुलाध्यक्षं ललाटके। दुर्गां भ्रुवोस्तथा लक्ष्मीं रसनायां सरस्वतीमिति॥ ज्ञानार्णवे। दक्षपादादि मूर्धांतं वाममूर्धादि सुंदरि। पादांतं पूजयेत्सर्वं कु
लाचकामसोमयोः। अक्षान्प्रीति रतिश्चैव त्यादिमातृकान्यासे द्रष्टव्याः। उत्तरतंत्रे॥ स्वरैरेव प्रपूज्या हि सर्वकार्यार्थसिद्धये॥ ललितातंत्रे॥ भगे तद

© Dharmartha Trust J&K. Digitized by eGangotri

ये विहे यानास्त्रासिस्व: प्रवाहिकाः एकातुवाहिका चांडीसोरी चास्तीतु वाहिका। आग्नेयीचापरा ह्येया पूजयेत्तां सुसाधकः। अंबुस्रवति चांडीसापु
ष्पं स्रवति भानवी। वीर्यं स्रवति चाग्नेयी तास्तु नामभिरर्चयेत्। वामभवाद्यैर्नेमायुक्तैः पूजयेत्तु प्रसन्नधीः। उत्तरतंत्रे। पूजयेन्मदनागारं रक्तचंदनव
र्तितं। भगमालामनुं प्रोच्य त्रितारानंतरं तथा। ऐं क्लीं सौः ऐं ब्लूं क्लिन्ने ततः परं। सर्वाणीति भगानीति वशमानयमेततः। स्त्रीं क्लीं क्लौं ब्लूं भगमालि
न्यै नमः। ऐं क्लीं श्रीं मितिमंत्रेण गंधाद्यैस्तां समर्पयेत्। इहाप्यावाहनं नास्ति जीवन्यासो महेश्वरि। अथैव च विधानेन तां षोडशोपचारकैः। इष्टदेवीं प्रपू
ज्याथ सर्वसिद्धीश्वरो भवेत्। अर्घ्यपाद्यपुष्पाद्यैः स्वाशिवं तदनंतरं। मूलमंत्रं ततः ओं नमः शिवाय ततः परं। यद्वा तत्पुरुषाघोरसद्योजातादिसंज्ञकैः।
तारं च शांत्यतीतं च तदंगे तदनंतरं। सम्यग्विद्यामुद्रार्घ्यत्रिकोणं चैव पूजयेत्। उत्तरतंत्रे। अथ धूलेश्वरी कुकुं कामाख्यां समयामपि। वज्रेश्वरीं कालि
कां च तथा दिक्करवासिनीं। महाचंडेश्वरीं तारां पूजयेदत्र साधकः। तदनु हां ततो लब्ध्वा दत्वा तां कुलमेव च। शिवं च तत्र निःक्षिप्य गजकुंडाख्यमुद्रया।
धर्माधर्मौ हविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं। स्वाहांतोयं महामंत्र आरंभे परिकीर्तितः। ततो जपेत् स्त्रियो
गकुरूपि ध्यात्त्रिभुवनेश्वरीं। प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुचा। धर्माधर्मकलास्नेहं पूर्णमग्नौ जुहोम्यहं। स्वाहांतोयं महामंत्रः श्रुकृत्यागे
प्रकीर्तितः। ज्ञानार्णवे॥ शिवशक्तिसमायोगो योग एव न संशयः। सीत्कारो मंत्ररूपं च वचनं स्तवनं भवेत्। आलिंगनं तु कस्तूरी कर्पूरं चुंबनं भवेत्।
नखदंष्ट्रक्षतादीनि पुष्पाणि विविधानि च। मैथुनं तर्पणं विद्धि वीर्यपातो विसर्जनं। कुलार्णवे॥ आलिंगनं चुंबनं च स्तनयोर्मर्दनं तथा। दर्शनस्पर्श
नं योनिविकारं लिंगघर्षणं। प्रवेशस्थापनं शक्तेर्नवपुष्पाणि पूजयेत्। यामले। संयोगाज्जायते सौख्यं परमानंदलक्षणं। कुलामृतं प्रयत्नेन गृह्णीया
द्दुर्लभं नराः। तेनामृतेन दिव्येन सर्वे तुष्टा भवंति हि। यत्कामं कुरुते मंत्री तत्क्षणादेव सिध्यति। ज्ञानार्णवे॥ कुलद्रव्यं च संशोध्य शिवशक्तिमयं प्रिये।

© Dharmartha Trust J&K. Digitized by eGangotri

वीजामृतं परं ब्रह्म जपंति क्षिप्रसुंदरि। अर्घ्यपात्रामृतैर्यस्तु प्राप्तो निर्विकल्पः सदानघः॥ श्री विद्याक्रममभ्यर्च्य परं ब्रह्ममयो भवेत्। इति ते कथितं ज्ञानं सा
रम्यं वरानने॥ सविकल्पस्तु सततं पापभृज्जायते नरः। विचिकित्सापरो मंत्री जायते शुक्लत्यागतः॥ अतएव वरारोहे निर्विकल्पः सदा भवेत्॥ कुलार्णवे॥ कुलामृतं स
मादाय तदर्घ्ये निःक्षिप्य बुधः। तदर्घ्येण समाराध्य पूजाशेषं समापयेत्॥ शोधितस्य कुलामृतस्य संज्ञा॥ शोधनमंत्रस्तु श्रीक्रमे। ॐ अमृते अमृतोद्भवे अमृतवर्षि
णि प्रियेयो देवि पदं संशुक्रशापं प्रमोचय पदद्वयं। अमृते स्रावय द्वंद्वं अमृतं कुरु युग्मकं। स्वाहापदं ततो देवि शुक्रवह्निर्भवेत् प्रिये॥ शुक्रैरक्षततंडुलैः सुगंधिकुसुमै
र्युतैः। अर्घ्यं द्रव्यैश्च देवेशि यो नो देवी प्रपूजयेत्॥ उत्तरतंत्रे॥ धूपदीपैश्च नैवेद्यैर्विविधैः कुलसाधकः। विधाय वेदितां चतदुच्छिष्टं स्वयं चरेत्॥ शिवागमेवा
अविचारश्च नस्तुच्छिष्टं पिबेच्च कपुरा यदि। घोरं स नरकं याति कुलमार्गो यतः स्मृतः। तस्माच्छिवाय यत्तेन शनस्तुच्छिष्टं पिबेत् सुधीः॥ आनंदं कारयेद्वीरस्तत्त्वानि भांति तः
पिबेत्॥ इति संक्षेपतः शक्तिशोधनं॥ विशेषस्त्वग्रे प्रयोगविधौ वक्ष्यते॥ अथ पीठपूजा॥ प्रयोगरूपा॥ तत्रार्घ्योदकेन श्रीचक्रमभ्युक्ष्य स्वमानतः पीठोपरि
ॐ गुरुपादुकां विद्यामुत्थाय श्री अमुकानंदनाथ श्रीपादुकां पूजयामीति संपूज्य दक्षिणे गं गणपतिं श्री० इति संपूज्य सर्वाधस्तादारभ्यातलादि सप्तपाताल
भावनयोपर्युपरि ॐ मंडूकाय नमः ॐ कालाग्निरुद्राय ॐ मूलप्रकृत्यै ॐ आधारशक्त्यै ॐ कूर्माय वराहाय अनंताय पृथिव्यै अमृताम्भोनिधये र
त्नद्वीपाय नानावृक्षमहोद्यानाय कल्पवृक्षवाटिकायै हरिचंदनवाटिकायै मंदारवाटिकायै पारिजातवाटिकायै पुष्परागरत्नप्राकाराय पद्मरागरत्न
प्राकाराय गोमेदरत्नप्राकाराय इंद्रनीलरत्नप्राकाराय वज्ररत्नप्राकाराय वैडूर्यरत्नप्राकाराय माणिक्यमंडपाय सहस्रस्तंभमंडपाय अमृतवा
पिकायै आनंदवापिकायै विमर्शवापिकायै बालातपोद्गाराय चंद्रिकोद्गाराय महाशृंगारपरिखायै महापद्माटव्यै चिंतामणिगृहराजाय पूर्वाम्नाय
पूर्वद्वाराय दक्षिणाम्नायदक्षिणद्वाराय पश्चिमाम्नायपश्चिमद्वाराय उत्तराम्नायउत्तरद्वाराय रत्नद्वीपवलयाय महासिंहासनाय ततो महासिंहा
सनं पंचप्रेतमयं ध्यात्वा तस्य वायव्यादिकोणचतुष्टयगतपादचतुष्टयत्वेन स्थितान् ब्रह्मविष्णुरुद्रेश्वरान् [illegible] सिंहासनाकं [illegible] तदुपरि [illegible] नाजुपवि

श्री
१००

© Dharmartha Trust J&K. Digitized by eGangotri

छं स्तेषां स्कंधेषु संलग्नं मुक्तानश्यायिनमुदकश्रीर्बसदाशिवमिंदुश्रमं ध्यात्वा पूजयेत् तद्यथा। ...येषु लं पृथिव्याधिपतये ब्रह्मणे नमः
ब्रह्मप्रेतनश्री· ईशाने ५ वं अपाधिपतये विष्णवे नमः विष्णुप्रेतासनश्री· आग्नेये ५ रं तेजोधिपतये रुद्राय नमः रुद्रप्रेतासनश्री· नैरृत्ये ५ यं
वाय्वधिपतये ईश्वराय नमः ईश्वरप्रेतासनश्री· ५ ह्लौः वियदधिपतये सदाशिवाय नमः सदाशिवप्रेतासनश्री· इति पंचप्रेतासनं संपूज्य तस्य
वायव्यादिकोणचतुष्टये धर्मादिचतुष्टयं तस्य पार्श्वे माद्यचतुर्दिक्षु अधर्मादिचतुष्टयं च प्रादक्षिण्येन संपूज्य तन्मध्ये मायाविद्ये संपूज्य तदुप
रि पंचदशफणविराजितायानंताय नमः इति संपूज्य तन्मध्ये मोलाष्टदलकमलं कामेश्वरीपीठं ध्यात्वा पद्माय नमः इत्यादि परतत्वांतं संपूज्याष्ट
दलकेसरेषु मध्ये च मोहिन्यादिनवशक्तीर्योगपीठन्यासोक्ताः संपूज्य न्यासोक्तपीठमंत्रेण समस्तं पीठं संपूज्य तदुपरि श्रीचक्रं विभाव्य सम
स्तप्रकटाद्यादि समस्तयोगिनीमंत्रेण समस्तचक्रं संपूज्य बिंदुचक्रे ५ म्रूं० श्रौं ह्रौं स्क्लीं ऐं भगवति ब्लूं नित्ये कामेश्वरि स्त्रीं सर्वसत्ववशंकरि स-
त्रिपुरभैरवि ऐं विच्चे क्लौं श्रीं श्रीमहात्रिपुरसुंदर्यै बाश्री० इति पूर्णविद्यया त्रिः संपूज्य पुनर्मूलेन त्रिः संपूज्य श्रीचक्रं पुरत्रयात्मकं ध्यात्वा चतु
रस्रत्रये षोडशाष्टदलाष्टदलात्मके प्रथमचक्रे ५ प्रथमकूटमुद्रायै शरीरात्मने नमः चतुर्दशारदशारद्वयात्मके मध्यचक्रे ५ द्वितीयं बुध्यात्म
पुन ने नमः अष्टारत्रिकोणबिंद्वात्मकांतश्चक्रे ५ तृतीयं प्राणात्मने नमः इति संपूज्य पंचबाह्यतृतीये वा हृमध्यांतरभेदेन प्रोक्तक्रमेण कूटत्रयेणैव सं
पूज्य तद्धामध्ये चक्रत्रये अभ्यंतरस्त्रये च संपूज्य त्रिकोणचक्रस्य कोणत्रये मध्ये च पीठचतुष्टयं संपूज्य बिंदुचक्रे महोड्याणपीठाह रोणिमयसहस्र
दलकमलाय नमः इति संपूज्य चतुरस्रपद्मत्रये चतुर्दशारदशारद्वयाष्टारसान्त्रिकोणबिंदुचक्रेषु षोडशस्वमात्रि संपूज्य चतुरस्रे ५ नादशक्तिश्री० षोडश
दले बिंदुशक्तिश्री० अष्टदले कलाशक्तिश्री· चतुर्दशारे ५ ज्येष्ठाशक्तिश्री· बाह्यदशारे ५ रौद्रीशक्तिश्री· अंतर्दशारे ५ वामाशक्तिश्री· अष्टकोणे वि
ष्णीशक्तिश्री· त्रिकोणे· ५ दूतारीशक्तिश्री· बिंदौ ५ सर्वानंदशक्तिश्री· इति नवशक्तीः संपूज्य षट्त्रिंशत्तत्वात्मकं श्रीचक्रं ध्यात्वा ५ अं ५० शिवतत्वस

© Dharmartha Trust J&K. Digitized by eGangotri

101

दाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थश
ब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने श्रीमहात्रिपुरसुंदर्योघपीठाय नमः इति समस्तं पीठं पुष्पांजलिना संपूज्य ततस्तदुपरि म
ध्ये प्रसूनतूलिकां कल्पयामीति पुष्पं निःक्षिप्य तदुपरि ४ ऐं ह्रीं श्रीं महात्रिपुरसुंदर्याः सकलैवतन्यानंदमयीं श्रीकामेश्वरीकामेश्वरमूर्त्तिं कल्प
यामीति पुष्पादिप्रक्षेपेण ध्यानोक्तां मूर्त्तिं भावयन् त्रिशक्त्युत्थापनमुद्रां प्रदर्श्य मूलमुच्चार्य परस्मै कामेश्वरकामेश्वरीमूर्त्तिं पूजयेदिति योगपीठपू
जा ॥ अथ श्रीचक्रपूजा ॥ तत्र प्रथमं स्वहृत्कमले श्रीचक्रे ध्यात्वा तत्र ध्येद्देवीं ध्यायेत ॥ ततो ध्यानं प्रवक्ष्यामि त्रिदशैः सेवनीयकं ॥ ततः प्रधानिभां
देवीं बालार्ककिरणारुणां ॥ जपाकुसुमसंकाशां दाडिमीकुसुमोपमां ॥ पद्मरागप्रतीकाशां कुंकुमोदरसन्निभां ॥ स्फुरन्मुकुटमाणिक्यकिंकिणी
जालमंडितां ॥ कालालिकुलसंकाशकुटिलालकपल्लवां ॥ प्रत्यग्रारुणसंकाशवदनांभोजमंडलां ॥ किंचिदर्धेन्दुकुटिलललाटमृदुपट्टिकां ॥ पि
नाकीधनुराकारभ्रूलतां परमेश्वरीं ॥ आनंदमुदितोल्लोललीलांदोलितलोचनां ॥ स्फुरन्मुकुरसंघातविलसद्धेमकुंडलां ॥ सुगंडमंडलाभोगजीवे
न्दुमतमंडलां ॥ विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकां ॥ तांबूलविद्रुमबिंबाभरक्तोष्ठीं वमतोपमां ॥ दाडिमीबीजवद्भाभदंतपंक्तिविराजितां ॥
स्मितमाधुर्यविजितमाधुर्यरससागरां ॥ अनौपम्यगुणोपेतचिबुकोद्देशशोभितां ॥ कंदग्रीवां महादेवीं कलाकलितैर्भुजैः मणिकेकणके
यूरभारान्वितैः प्रशोभितां ॥ रक्तोत्पलदलाकारसुकुमारकरांबुजां ॥ करांबुजनखज्योतिर्वितानितनभस्थलां ॥ मुक्ताहारलतोपेतसमुन्नतपयोध
रां ॥ त्रिवलीवलनायुक्तमध्यदेशसुशोभितां ॥ लावण्यकदलीतुल्यजंघायुगलमंडितां ॥ गूढगुल्फपदद्वंद्वप्रपदाजितकच्छपां ॥ ब्रह्मविष्णुशिरो श्री
रत्ननिघृष्टचरणांबुजां ॥ तनुदीर्घांगुलीभास्वन्नखचंद्रविराजितां ॥ शीतांशुशतसंकाशकांतिसंतानहासिनीं ॥ लौहित्यजितसिंदूरजपादाडिम
राजिकां ॥ रक्तवस्त्रपरीधानां पाशांकुशकरोद्यतां ॥ रक्तपुष्पविचित्रांगीं रक्ताभरणमंडितां ॥ चतुर्भुजां [illegible] पंचबाणधनुर्धरां ॥ कर्पूरशक १०३

© Dharmartha Trust J&K. Digitized by eGangotri

लोन्मिष्यन्तीं कलापूरितानननां महामृगमदोद्दाम कुंकुमारुणविग्रहां। सर्वशृंगारवेषाढ्यां सर्वाभरणभूषितां। जगदाह्लादजननीं जगद्रंज
नकारिणीं। जगदाकर्षणकरिं जगत्कारणरूपिणीं। सर्वमंत्रमयीं देवीं सर्वसौभाग्यसुंदरीं। सर्वलक्ष्मीमयीं नित्यां परमानंदनंदितां। एवं ध्या
येत्परेशानीं महात्रिपुरसुंदरीं। एवं स्वे कोस्मध्यात्वा मूलविद्यायाः शिरसि पुष्पांजलिं दत्वा पुनर्हृदयकमले यथोक्तरूपां भगवतीं सांगां सा
वरणां ध्यात्वा देवीमानसैरुपचारैः संपूज्य नैवेद्यं दत्वा भोजनावसरे तत्रैव देवं कुर्यात्तालत्रयात्तत्र मूलाधारे आत्मांतरात्मपरात्मज्ञानालेका
दिवत्तुषट्कोणवृत्तचतुरस्रं कुंडं लाग्निं समुज्ज्वलं कुंडं ध्यात्वा तत्र श्रीपरदेवतां ध्यात्वा तन्मुखे मूलविद्यांते अहं तां जुहोमि स्वाहा। इत्यादि स्मरं
तास्तत्पैशून्यकामक्रोधलोभमोहमदमात्सर्याणि सुषुम्णा स्रुग्युक्तमनः स्रुवेण प्रत्येकं कृत्वा पुनर्हृदयकमले मुक्तवती देवीं ध्यात्वा पु
ष्पासनादि सर्वोपचारैराराध्य मूलविद्यां यथाशक्ति जपित्वा जपं समर्प्य मूलविद्यया व्यापकं विन्यस्य कराभ्यां पुष्पांजलिमादाय मातृकां मो
नत्वेन कल्पयित्वा त्रिखंडामुद्रां बध्वा हृदि श्रीचक्रराजे देवीं यथोक्तरूपां सपरिवारां ध्यात्वा तेजोरूपतामापाद्यां तर्मुद्राप्रयोगेन मूलाधारा
त्कुंडलिनीमुत्थाप्य तया सह षट्चक्रभेदक्रमेण हृदयांतः स्फुरंतीं तां तेजोमयीं सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा परतेजः संगमे नाम्नृतमहां
बुधौ क्षणं विश्राम्य शक्तिं शिवशक्तिसामरस्यसुखमनुभूय ५ ह सैं ह स क ल क्लीं ह्सौः नमः श्रीमहात्रिपुरसुंदरि महापद्मवनांतस्थे कारु
णानंदविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि। एह्येहि देवदेवेशि त्रिपुरे देवपूजिते। परामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे। देवि भ
क्तसुलभे परिवारसमन्विते। यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव। इत्यावाहनमंत्रमुच्चार्य वहन्नासापुटाध्वना त्रिखंडामुद्रामुद्रितकर
स्थपुष्पांजलौ तत्तेजः समानीय श्रीपीठे ततः कल्पितमुद्रः शिरसि ब्रह्मरंध्रस्थाने सन्निवेश्य कामेश्वरांकस्थां सावरणां श्रीमहात्रिपुरसुंदरीं सर्वा
वयवभविन्यस्य ५ मूलमुच्चार्य श्रीमहात्रिपुरसुंदरि इह तिष्ठ तिष्ठेति स्थापिन्यामुद्रया संस्थाप्य तथैव इह संनिधेहि सन्निधेहीति सन्निधा

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
१०२
102

पनीयमुद्रया सन्निधाप्य पुनस्तथैव सन्निरुध्यस्व इति सन्निरोधिन्या सन्निरुध्य तथैव सम्मुखी भव इति तन्मुद्रया संमुखी कृत्य तथैव
वगुंठिता भव इति तन्मुद्रयाऽवगुंठ्य देवांगे षडंगानि न्यासेन सकली कृत्य तथैव धेनुमुद्रयाऽमृत धारयाऽभिषिंचन्नमृती कृत्य तथैव महामुद्र
या परमी कृत्य तां गाहन्यादि नवमुद्राः प्रदर्श्य ततो मूलविद्यां पूर्वोक्त दीपिनी विद्या मकारादि क्षकारांतां मातृकां चोच्चार्य मूलेन देवीं त्रिः संप्रो
क्ष्य ४ श्रीं ह्रीं क्लीं हं ग णप कालिके सोः सकल ह्रीं क्लीं ह्रौं ऐं श्रीं इति जीवन्यास विद्यया देव्या हृदयकमले जीवं संस्थाप्य प्राणप्रतिष्ठां कुर्यात्।
तत्र पूर्वोक्त प्राणप्रतिष्ठामंत्रे देवी हृदयं स्पृशन् तन्मंत्रं त्रिः सकृद्वा पठेत्। इत्येवं प्राणप्रतिष्ठां विधाय ततः संक्षोभ द्रावणाकर्षवश्योन्मा
दमहांकुश खेचरी बीज योन्याख्यान् नवमुद्राः द्रां द्रीं क्लीं ब्लूं सः क्रों हसखफ्रें ह्सौः ऐं इति एकैकबीजोच्चारणपूर्वकमेकैकां मुद्रां प्रदर्श्य आं ह्रीं
क्रों इति पाशमुद्रां क्रों क्रों इत्यंकुशमुद्रां धं थं इति धनुर्मुद्रां द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां इति दशाभिर्बीजैर्बाणमुद्रां च प्रदर्श्य ४ मू० श्रीमहात्रि
पुरसुंदरीपादुकां पूजयामीति देवीं संपूज्य पुनः मू० श्रीमहात्रिपुरसुंदरीपादुकां तर्पयामीति स्वहस्ताऽनामिकांगुष्ठाभ्यां त्रिशो घार्ध बिंदुभिः
त्रिवारादन्यून मष्टोत्तरसहस्रावधि यथाशक्ति परदेवतामुखकमले तर्पयित्वा न्यासजातं षोडशोपचारान् कुर्यात्। तत्र मूलविद्यामुच्चा
र्य भगवति श्रीमहात्रिपुरसुंदरि तुभ्यमिदमासनं कल्पयाम्यत्रास्यतां भवत्येति वाक्यं चोच्चार्य वामे कोणे स्वसौवर्ण साध्यन्त भगासनं कल्पयि
त्वा देव्या वामभागे निसृष्टे वेश्य सिंहासनपद्ममुद्रां प्रदर्श्य प्राणम्य हे हे हृदामि दामि दंरहा णास्व हेति प्रार्थ्य नमुद्रयानिवेद्य मूलेन पुष्पांजलिं द
द्यात्। ततो मूलमुच्चार्य श्रीमहात्रिपुरसुंदरि स्वागतं इति कुशलप्रश्नं कृत्वा स्वागतकुशलमुद्रां प्रदर्श्य मूलेन पुष्पांजलिं दद्यात्। ततो मू०
श्रीमहात्रिपुरसुंदरिपादुकाभ्यां अर्घ्यं कल्पयामि स्वाहा इति देव्याः शिरसि सामान्यार्घ्याल्लिंगित्व मुकुले दद्यात्। ततो निवेदनमेतेनाते
काभ्य मुद्रां प्रदर्श्य पुष्पांजलिं दद्यात्। ततः पाद्यपात्राज्जलमुद्धृत्य ४ मू० श्रीमहात्रिपुरसुंदरीपादुकायै पाद्यं परिकल्पयामि नमः

श्री
१०२

© Dharmartha Trust J&K. Digitized by eGangotri

इति देव्याः पादयोः पाद्यं दत्वा आगच्छन्निवेद्य पाद्यमुद्रां प्रदर्श्य पुष्पांजलिं दद्यात् । एवमाचमनीयं परिकल्पयामि … धेति मुखे मधुपर्कं परिकल्पयामि । नमः स्वधेति मु
खे । इति दत्वा तन्मुद्रां प्रदर्शयेत् ततः पुनराचमनीयपात्रस्थशुद्धजलेन पूर्ववदाचमनीयं मुखे । ततो रत्नपादुके उपनीय पादुके परिधाय त्रिपुरे रत्ननिर्मिते । स्नानमं
डपमायाहि स्नानार्थं शक्रदिग्गतमिति प्रार्थ्य रत्नपादुके परिधाप्य स्नानमंडपं नीत्वा स्नानवस्त्रं परिधाप्य कनकासने समुपवेश्य आगच्छ … पाद्याद्याचमनीयान्तं द
त्वा … मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीपादुकायै स्नानीयं कल्पयामि नमः इति सुगंधितैलामलकादि स्नानीयद्रव्याणि परिकल्प्य प्रागानीये … महाराजोपचारवत् …
गोद्वर्तनकेशप्रसाधनानि विधाय … उदकेन निर्मलस्नानं कारयित्वा वैदिकपौराणिकमंत्रैः पंचगव्यैः पंचामृतेन च स्नापयित्वा पुनः शुद्धजलेन स्नापयित्वा इक्षुरस
नारिकेलसलिलपनसाम्रादिविविधफलरसैः कर्पूरादिसुवासितैः स्नापयित्वा पुनर्जलेनाभिषिच्य देवीं गन्धाभिः सुवर्णादिघटैर्नीतानि तीर्थोदकैः सलिलैः स्नापयित्वा
आगच्छ पुष्पांजलिं मूलेन दत्वा स्नानमुद्रां प्रदर्श्य आचमनीयं कल्पयित्वा केशांगमार्जनार्थं वस्त्रं दत्वा जलप्रच्यावनं कारयित्वा नानारत्नखचितं रक्तदुकूलद्वयं तुभ्यमिति प्रार्थ्य
मूलेनाभिमंत्र्य … स्याति देवताभ्यां वासोभ्यां नम इति संपूज्य मं० श्रीमहात्रिपुरसुंदरीपादुकायै वाससी परिकल्पयामि नमः इति परिधाप्य वस्त्रमुद्रां प्रदर्श्य पुनरा
चमनीयं निवेदनं च पुष्पांजलिदानं च कृत्वा पट्टसूत्रभवं स्वर्णादिरचितं वा कंठसूत्रं विष्णुदेवताय कंठसूत्राय नमः इति पूजितं देव्यै समर्प्योपवीतमुद्रां प्रदर्श्य मं० श्री
महात्रिपुरसुंदरीपादुके परिधायां बत्रिपुरे रत्नमिति । आगच्छ निर्मलया … अलंकारस्यमंडपं इति प्रार्थ्य अलंकारमंडपं नीत्वा सिंहासने समुपवेश्य अलंकारान् पुरतो निधाय
वमिश्रोक्ष्य मूलेनाभिमंत्र्य विष्णुदेवताभ्योऽलंकारेभ्यो नम इति संपूज्य मं० श्रीमहात्रिपुरसुंदरीपादुकायै मुकुटालंकरणानि परिकल्पयामि नमः इति सामान्यत उक्त्वा
ज्य विशेषतो मुकुटं परिकल्पयामि नमः इत्यादि मुकुटललाटाभरणकर्णपूरहारग्रैवेयकांगुलीयक … विकारत्नसत्राक्षरावली कर्णोत्तंस पार्श्वभूषणान खचितां
गुलीयद कूटं लंवर्षहार मंडु भाललंतिकांगदकेयूरवलयबाहुवेष्टनसीमंतिका … भूषण भ्रूभूषण नाभिभूषण रत्नमालामणिमेखला … खलादं तरलकर्णिकं …
वीरत्न जानुभूषण पादांगुलीयक नूपुर लघु कपादकंटक हंसक क्षुद्रघंटिका मुखपत्रकमिति चत्वारिंशद्भिरन्यैश्च स्तुरत्नताटंक नानाविधैस्सर्वालंकरणैरलंकृ

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ पा॰
१०२
103

त्यपूर्ववन्निवेदनमंत्रेण निवेद्य पुष्पांजलिं दत्वाभरणमुद्रां प्रदर्शयेत्तत्पादुके उपनीय ॐ मू॰ श्रीमहात्रिपुरसुंदरिपादुकायुग्ममारूह्य पंचवाद्यपुरःसरं यागमंडपमा
याहि परिवारगणैः सह इति प्रार्थ्य छत्रचामरादिनानोपकरणहस्ताभिः शक्तिभिः सह यागमंडपं नीलाकाममध्यरत्नके भगवतीं समुपवेश्य परिवारदेवताश्च यथास्थाने
समुपवेशयेत्ततः श्रीचक्रमारूढां ध्यायेत्त्रिपुरसुंदरीमित्यादि प्रागुक्तरीत्या ध्यात्वा मूलेन पुष्पांजलिं दत्वा चंदनागरुकर्पूरकस्तूर्यादिगंधं पंचवक्त्रं [illegible]
दाहजसंमर्दजे प्राप्य एवं गंधमिति गंधं चवि[illegible] धं नदन्यतमं वा प्राग्वल्लोस्याविष्णुदेवताय गंधाय नमः इति संपूज्य ॐ मू॰ श्रीमहात्रिपुरसुंदरीपादुकायै गंधं परिकल्प
यामीति गंधं समर्प्य प्राग्वन्निवेद्य गंधमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा सुगंधसुरूपाणि नानाविधपुष्पाण्यानीय प्रोक्ष्य वनस्पतिदेवताभ्यः पुष्पेभ्यो नम इति संपूज्य ॐ
मू॰ श्रीमहात्रिपुरसुंदरीपादुकायै पुष्पाणि परिकल्पयामि वौषडिति पुष्पाणि निवेद्य पुष्पमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा धूपमाहृत्य धूपमानीय प्रोक्ष्य धेनुमुद्रयाऽमृती
कृत्य ह्रीं सुरभितेनसे स्वाहेति दशांगं शर्कराघृतमिश्रितं गुग्गुलं वह्निः क्षिप्य ओं गं धर्वदेवताय धूपाय नम इति धूपं संपूज्य ॐ मू॰ वनस्पतिरसोत्थ ओं गंधाढ्यो गंधउत्तमः।
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां श्रीमहात्रिपुरसुंदरीपादुकायै धूपं परिकल्पयामि नम धूपमुत्सृज्य धूपमुद्रां प्रदर्श्य वामभागे घंटां संनिधाय अस्त्रेण प्रोक्ष्य धेनुमु
द्रयाऽमृतीकृत्य पुनरस्त्रेण गंधादिभिः संपूज्य ओं गजध्वनि मंत्रमातः स्वाहेति घंटां शमंत्रेणाभिमंत्र्य वामहस्तेन वादयन् दक्षिणहस्तेन धूपपात्रं चालयन् नीचैः [illegible] निवेद्य पात
त्रं देव्या वामभागे निधाय दीपपात्रे गोघृतेनापूर्य तस्मिन्कर्पूरगर्भितीवर्तिभिः क्षिप्य ह्रीमिति प्रज्वाल्य धेनुमुद्रयाऽमृतीकृत्य वह्निदेवताय दीपाय नम इति संपूज्य
ॐ मू॰ सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां श्रीमहात्रिपुरसुंदरीपादुकायै दीपं परिकल्पयामि नमः इति दीपमुत्सृज्य दीपमुद्रां
प्रदर्श्य प्राग्वन्निवेद्य घंटावादनपूर्वकं मुहुर्दीपं प्रदर्श्य तत्पात्रं देव्या दक्षिणभागे निवेश्य देव्यग्रे चतुरस्रमंडलं जलेन निर्माय स्वर्णादिपात्रं नानान्नं जलेन भरितं षड्रसोपे श्री
तं पंचविधं नैवेद्यं पातं तस्मिन्मंडले साधारं पात्रं निधाय मूलेन नीरीक्ष्यास्त्रेण संप्रोक्ष्य तेनैव कुशैस्त्रिः संताड्य कवचेनाभ्युक्ष्य ओं [illegible] षडिति तेन समस्तमभिमंत्र्य तेन १०२
जलेन पुनः प्रोक्ष्यास्त्रमंत्रेण चक्रमुद्रां प्रदर्श्य ओं रं वामकरेणानैवेद्यं स्पृशन् यमिति वीजेन समधान् तपनं तत्कृतदोषान् संशोष्य ओं रं दक्षकरेण स्पृशन् रं मिति

© Dharmartha Trust J&K. Digitized by eGangotri

वह्निबीजं समवारं जपन् तत्फलदोषान् संदह्य धेनुमुद्रया वामकरेण स्पृशन्नमृतमिति बीजेन ससप्तधाभिमंत्रणेन तदमृतीकृत्य मूलेन विशेषार्घ्यबिंदुभिः प्रोक्ष्य विसृजेद्देव
तायनैवेद्याय नम इति संपूज्यास्त्रेण संरक्ष्य मूलेन समवारमभिमंत्र्य ऐं क्लीं कामधुक् अमोघे वरदे विच्चे स्फुर स्फुर स्त्रीं श्रीं ह्रीं इति कामधेनुविद्यया धेनुमुद्रया
मृतीकृत्य देव्याग्रवस्त्रोपरि धारयेत् ... दत्वा मूलविद्यया देवीं संपूज्य पात्रांतरे जलममृतीकृत्य चुलुकेनादाय वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् मूलमुच्चार्य सांगायै सायुधा
यै सपरिवारायै सर्वात्मिकायै भगवत्यै श्रीमहात्रिपुरसुंदरीपादुकायै नैवेद्यं कल्पयामि नमः इति नैवेद्योपरि चुलुकोदकमर्पयेत् ततः कृतांजलिर्मूलमुच्चार्य श्रीमहात्रि
पुरसुंदरि हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृहाण परमेश्वरि। इत्यनेनानुक्रमेणानिवेद्य पात्रांतरे जलममृतीकृत्य देव्या दक्षिणहस्ते तज्जलं क्षि
प्त्वा अमृतोपस्तरणमसि स्वाहेति देवीं प्राशयित्वा वामकरेण ग्रासमुद्रां विकचोत्पलसन्निभां दर्शयन् दक्षिणहस्तेन प्राणादिपंचमुद्राः प्रदर्शयेत् तद्यथा ह्रीं ऐं प्रा
णाय स्वाहा इत्यंगुष्ठेन कनिष्ठानामिके स्पृशन् ४ क्लीं अपानाय स्वाहेति अंगुष्ठेन तर्जनीमध्यमे स्पृशेत् ४ सौः व्यानाय स्वाहेति अंगुष्ठेन नामिकामध्यमे स्पृशेत् ४ ऐं क्लीं
उदानाय स्वाहेत्यंगुष्ठेन नामिकामध्यमातर्जनीः स्पृशेत् ४ ऐं क्लीं सौः समानाय स्वाहेत्यंगुष्ठेन सर्वाः स्पृशेत् इति प्राणादिपंचमुद्राः प्रदर्शयन् पंचग्रासान् ग्राहयित्वा कृतांज
लिर्मूलविद्यामुच्चार्य ऐं आत्मतत्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु पुनः मू० क्लीं विद्यातत्व० ४ मू० सौः शिवतत्व० मू० ऐं क्लीं सौः सर्वतत्वे इति तत्वैर्ग्रासचतुष्टयं ग्राहयि
त्वा कृतांजलिर्मूलविद्यामुच्चार्य नैवेद्यमुद्रां करद्वयेन प्रदर्शयन् ४ मू० श्रीमहात्रिपुरसुंदरि चित्पात्रे सद्भाविः सौख्यविविधानेकभक्ष्ययुक्तं निवेदयामि ते देवि सा
नुगायै भुंक्ष्व गृहाण तत्। इत्यनेन मंत्रेण पुष्पांजलिं समर्प्य नैवेद्यं जातं तादात्म्येन सपरिवारायै देव्यै निवेदयेत् ततः स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं धेनुमुद्रया
मृतीकृत्य ४ मू० श्रीमहात्रिपुरसुंदरि नमस्ते देवदेवेशि सर्वतृप्तिकरं परं। अन्यान्निवेदितं शुद्धं प्रकृतिस्थं सुशीतलं। अमृतानंदसंपूर्णं गृहाण जलमुत्तमं। इति देव्यै
जलं निवेद्य अस्त्रमंत्रेण जवनिकया भोजनस्थलं संवेष्ट्य घंटां वादयन् भुंजानां परदेवतां ध्यायेत्। तद्यथा। ब्रह्मेशाद्यैः सरसमभितः सूपविष्टैः समेता सिंजद्वालव्यजन
निकरैर्वीज्यमाना सखीभिः नर्मक्रीडाप्रहसनपरा पंक्तिभोक्तॄन् हसंती भुंक्ते पात्रे कनकघटिते षड्रसोपेतदिव्यं ... सा। इति ध्यात्वा मूलविद्यां दशधा जपित्वा जपं समर्प

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
३०४
104

मुक्रमवती संतप्यां देवीं विभाव्य धेनुमुद्रया पात्रांतरे जलममृतीकृत्य ओं अमृतापिधानमसि स्वाहेति दद्यात् ततो ऽमृतापोशनं जलं दत्वा तत्पात्रम् ... तंवि
नाग्र्यग्रसारं नैवेद्यं समर्प्य नैवेद्यं दिशि स्थापयेत् । ततोऽस्मा ... णतत्स्थानं प्रोक्षणम् ... संशोध्य ... हस्तप्रक्षालनार्थं दद्यात् ... करोद्वर्तनार्थं गु
गंधचूर्णं च दत्वा ... निकारयित्वा ... कर्पूरयुक्तं दंतधावनं कारयित्वा पुनर्गंडूषादिकारयित्वा चरणप्रक्षालनमाचमनीयं च दत्वा कर्पूरादिना ... सुगंधि
शांतं जलमानीय प्रोक्ष्य वनस्पतिदेवत्यायतां वृक्षाय नम इति संपूज्य मं० श्री महात्रि० पादुकायै तां वृक्षं कल्पयामि नम इत्युत्सृज्य मं० श्री महात्रि० नमो ... दल
पूरपूर्णभारतरंगितं संशोधितं सुगंधं च तां ... लं परिगृह्य तामिसं ते ओं हं हं हं दमि दमि ... ग्रहाण स्वाहेति दद्यात् ... तांबूलं निवेद्य योनिमुद्रया प्रणम्य मं० श्री महात्रिपुर
सुंदरी श्री ... पादुकां पूजयामीति संपूज्य वक्ष्यमाणप्रकारेण प्रणामं विधाय ह्रीं इति नमस्कारमुद्रां बध्वा मूलेन प्रणम्य प्रदर्श्य ... इति ... दनुलोमविलो
मेन मूलविद्यया संपुटितैर्मातृकाक्षरैः शुद्धमातृकास्थानेषु देव्या देहे गंधपुष्पाक्षतैः संपूजयेत् । षडंगपूजामपि देव्या देहे कुर्यादिति लयांगपूजां विधाय संक्षोभण्यादि
मुद्राः प्रदर्श्य विशेषार्घ्यबिंदुभिस्त्रिर्वामहस्तेन संतर्प्यावरणपूजां कुर्यात् ॥ अत्र लयांगपूजा तु तंत्रांतरे ॥ सम्मूलैर्मातृकावर्णैरनुलोमविलोमगैः । न्यस्तस्थानेषु देव्यंगे
गंधपुष्पाक्षतैः ... पुष्पकैः । प्रणम्य ... भवतः षडंगैः पूजयेत्सुधीः । लयांगमेतत्संप्रोक्तं देवतामावृसिद्धिदा ॥ षडंगावरणं चक्रे कल्पोक्तविधिना यजेत् । भोगांगमेतत्समु
द्दिष्टं देवताप्रीतिकारकं । अत्र लयांगभोगांगपूजा तु आवश्यकी । लयांगं कल्पयेद्देहे देव्यास्तु परमेश्वरीति ज्ञानार्णवोक्तत्वात् । अत्र लयांगभोगांगमेतद्द्वयं संमतं ॥ दे
... देवशुद्धौ विशेषाचारः ॥ कुलार्णवे ॥ मूलमंत्रेण दीपिन्यामाद्विन्याद्यैर्दके न च । त्रिवारं प्रोक्षयेद्देवं देवशुद्धिरितीरिता । इदं तु कालीमते । कादिमते तु मूलमंत्रे
णादीपिन्याम धृत्वार्घ्यबिंदुभिः । त्रिवारं प्रोक्षयेद्देवं देवशुद्धिरितीरिता । त्रिपुरार्णवोक्तत्वात् । अत्र समष्टिपूजा व्यष्टिपूजा च कर्तव्या । तदुक्तं ... दर्शय्य हे ॥ समष्टिपूजा श्री
आरंभे व्यष्टिपूजावसानके । कर्तव्या सिद्धिमिच्छद्भिर्देवताप्रीतिकारिणी । रश्मिरूपा महादेव्याः सर्वावरणदेवताः । स्वच्छादर्शे यथा ... प्रतिबिंबिताः । प्रतिबिंबित ३०४
देवानां पूजा शास्त्रोक्तमार्गतः । समष्टिपूजा सा प्रोक्ता व्यष्टिपूजा तयोच्यते । रश्मिरूपा महादेव्या अत्र च पूजितदेवताः । श्री ... दर्पगलीनास्ताः सन्तु सर्वे सुखावह ... मुक्ता

© Dharmartha Trust J&K. Digitized by eGangotri

लुदेव्यंगेषिल्ही नायं च देवताः। चिंत्वीभूता विभाव्यैवं तत्तत्स्थानेषु देवेशि क्रमदेव्यंगेषु यजेत्सुधैर्य्यमेषि पूजासमीरितेति। आवरणपूजारंभे कुर्य्यात् मूलविद्यां पठेत् देवि परा
मृतवरूपिये। अनुज्ञां देहि देवेशि परिवारार्च्चनाय मे इति पुष्पांजलिं दत्वा आवरणपूजामारभेदिति संप्रदायः। तारत्रयं ध... नामा... सोऽहं ... त्रिपुरा सर्वसौभा
ग्यजननी पादुकां पूजयामि च। न संतमनुनादेव्यै दद्यात्पुष्पांजलित्रयं। प्रदर्शयेद्योनिमुद्रां ततः संप्रार्थयेद्गुरुः। सर्वमंत्रमये देवि सर्वदेव नमस्कृते। अनुज्ञां देहि
देवेशि परिवारार्च्चनाय मे इति संप्रार्थ्य देव्यंगात् क्रूर्मानि विस्फुलिंगवत्ता वक्रैः समस्तावरणदेवताः रश्मिरूपिणः। देव्या आह्वयास्थिताः स्वस्वस्थानेषु परिचिंतयेत्। अ
मनुष्यं द्रकुवेरश्च लोपामुद्रा च कामराट्। अगस्तिर्नन्दिसूर्यौ च विष्णुः स्कन्दः शिवास्तथा। दुर्वासाश्च तथा शक्रः उन्मनी वरुणस्तथा। धर्मराजो नलो नागराजो वा
युवुधस्तथा। ईशानश्च रतिश्चैव तथा नारायणस्तथा। ब्रह्माजी नाम महादेव्योपासकाः पंचविंशतिः। एते रूपासिता विद्या तासां च स्व स्व सुषुप्तिकाः तुरीया
विंदुवक्रेस्मिन् विशेषाद्यो मतेन च। पूजनीयाः प्रयत्नेन ततो रत्नत्रयपुरः क्रमात्। अमुकोपासिता श्रीविद्या श्रीपादुकां ततः। पूजयामि नमश्चोक्त्वा य
जेत्तं चोपचारकैः। पाशांकुशधनुर्बाणधारिण्यो रक्तविग्रहाः। चिंतनीयाः प्रयत्नेन सर्वसौभाग्यदायकाः। दर्शयेद्योनिमुद्रां च सर्वसौभाग्यवाकप्रदां अ
नेन क्रमयोगेन विद्यावृंदं प्रपूजयेत्। विद्यावृंदमयीं पूजां पुष्पांजलिविधानतः। निवेदयेन्महादेव्यै तर्पणादि समाचरेत्। एतस्मिन् समये देवि तिथिनित्याः
समर्चयेत्। विभाव्य च महान्यासं दक्षपूर्वोत्तरक्रमात्। रेखासु त्रिषु देवेशि पंचपंचविभागतः। प्रतिपत्तिथिमारभ्य पौर्णमास्यन्तमर्च्चितः। एकैकां पूजये
न्नित्यां महासौभाग्यभाग्भवेत्। कृष्णपक्षे चित्रितादिकामेश्वर्यंतमेव हि। एकैकवाच्याहान्याव दर्शांतं क्रमतो यजेत्। कामेश्वर्यादिकां नित्यां विचित्रांतां
क्रमात्यजेत्। पंचोपचारैर्गंधाद्यैः श्रीपात्रामृतविंदुभिः। तत्तद्दिमध्यांसमुच्चार्य ततः रात्रितयसंपुटां गुर्व्वाद्यां अमुकनित्याश्रीपादुकां पूजयामि च। नमः पदं म
हादेवि सर्वत्राय क्रमः स्मृतः। कामेश्वरी महानित्या ततो वै भगमालिनी। नित्यक्लिन्ना महानित्या भेरुंडा वह्निवासिनी। महाविद्येश्वरी नित्या शिवदूती त
थैव च। त्वरिता च महादेवि ततो वै कुलसुंदरी। नित्या नीलपताका च विजया सर्वमंगला। ज्वालामालिन्यथ ततो विचित्रा त्रिपुरसुंदरी। रक्तां रक्तांशु कूपवंत

मुक्ता

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धार्ण
१०५
105

लेपनां रक्तभूषणां॥ पाशांकुशौ धनुर्बाणान्पुस्तकं चाक्षमालिकां॥ वराभीतिं च दधतीं त्रैलोक्यवशकारिणीं॥ एवं कामेश्वरीं ध्यायेत्कुंकुमस्पर्धिभां सत्पत्न-
हां कदंबवनमध्यस्थामुद्यत्सूर्यसमद्युतिं॥ नानाभूषणसंपन्नां त्रैलोक्याकर्षणक्षमां॥ पाशांकुशौ पुस्तकं च तौलिकागतलेखिनीं॥ वदरेखाभयं चैव दधतीं
तीं विभ्रमातरां॥ एवं ध्यायेन्महादेवीं भगमालां विचक्षणः॥ रक्तां रक्तांगवसनां वंद्यवक्त्रां त्रिलोचनां॥ स्विद्यद्वक्त्रां मदाघूर्णलोचनां रत्नमूर्तिकां॥ पाशांकुशौ
कपालं च महाभीतिहरं तथा॥ दधतीं संस्मरेन्नित्यां क्लिन्नां पद्मासनस्थितां॥ चंद्रकोटिप्रतीकाशां स्रवंतीममृतद्रवैः॥ नीलकंठां त्रिनेत्रां च नानाभरणभूषि-
तां॥ इंद्रनीलस्फुरत्कांतिं शिखिवाहनशोभितां॥ पाशांकुशौ कपालं च छुरिकां वरदाभये॥ दधतीं चिंतयेद्देवीं भेरुंडां विषनाशिनीं॥ ध्यायेत्तप्तसुवर्णाभां ना-
नालंकारभूषितां॥ पाशांकुशौ स्वस्तिकं च शक्तिं च वरदाभये॥ दधतीं रत्नमुकुटां देवीं वह्निवासिनीं॥ ध्यायेत्तरुणसूर्याभां जपाकुसुमसंकाशां रक्तांशु-
कविराजितां॥ माणिक्यभूषणां निःसंख्यानानाभूषाविभूषितां॥ माणिक्यभूषणां त्रिसंख्यानानाभूषाविभूषितां॥ पाशांकुशौ कपालं च सुधापानविघूर्णितां॥
अभयं दधतीं ध्यायेन्महाविद्येश्वरीं परां॥ दूर्वावर्णां त्रिनेत्रां च महासिंहसमासनां॥ शंखचक्रचापबाणांश्च सृणिपाशौ वराभये॥ दधतीं चिंतयेन्नित्यां शिव-
दूतीं परां शिवां॥ श्यामांगीं रक्तसत्पाणिचरणांबुजशोभितां॥ वृषत्काहिंसुमंजीरां पद्मरागरत्नविभूषितां॥ पर्णांशुकां पल्लवभूषां वेश्याहिंदुद्रुमेखलां॥ तनुमध्यां
पीनवृत्तकुचयुग्मां वराभयौ॥ दधतीं शिखिपिच्छाभां वलयांगदशोभितां॥ गुंजाकंकणां न्यपोहीं कुंकुमकेयूरां रत्नभूषितां॥ द्विजनागस्फुरत्कर्णभूषां मत्तां सु-
लक्षणां॥ नीलकुंचितधम्मिल्लवरपुष्पां कपालिनीं॥ कैरातीं शिखिपिच्छाढ्यां निकेतनविराजितां॥ स्फुरत्सिंहासनप्रौढां संस्मरेत्त्वरितां शुभां॥ ध्या-
येद्देवीं महेशानीं कदंबवनमध्यगां॥ रत्नमंडपमध्ये तु महाकल्पवनांतरे॥ मुक्तातपत्रच्छायायां रत्नसिंहासनस्थितां॥ अनर्घ्यरत्नघटितमुकुटां रत्न-
कुंडलां॥ हारग्रैवेयसद्रत्नचित्रितां कंकणोज्ज्वलां॥ हीरमुक्तालसत्कूर्पां शुक्लक्षौमविराजितां॥ हीरमंजीरसुभगां रक्तोत्पललेपदां बुजां॥ श्वेतांग- श्री
रागसुभगां कर्पूरशकलोज्ज्वलां॥ पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकां॥ वरदानरतां नित्यं दिव्यां महासारस्वतप्रदां॥ एवं ध्यायेन्महानित्यां देवीं १०५

© Dharmartha Trust J&K. Digitized by eGangotri

कुलसुंदरी । एवं नित्यां महादेवीं चिंतयेद्देशिकोत्तमः ॥ शुभ्रवस्त्रासनां रम्यां चंद्रकुंदसमद्युतिं । सुप्रसन्नां शशिमुखीं नानारत्नविभूषितां ।
आनंदमुक्ताभरणां स्रवंतीममृतद्रवां वरदाभयशोभाढ्यां स्मेरन्नीलपताकिकां ॥ ध्यायेद्देवीं महानित्यां स्वर्णाभरणभूषितां । उद्यद्विद्युल्लता-
कांतिस्वर्णशृंगकविराजितां ॥ महासिंहासनप्रौढां ज्वालामालाकरालिनीं ॥ अरिशंखं खेटखड्गौ त्रिशूलं डमरुं तथा । पाशं च पात्रं च वरदं दधतीं
शत्रुनाशिनीं ॥ शुभ्रां लीलानंदां नित्यां विचित्रवसनां सदा । विचित्रतिलकां नित्यां विचित्रां कुंकुमोज्ज्वलां । वरदाभयशोभाढ्यां नानाशास्त्रधरां क्व-
चित् । बालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनां । पाशांकुशशरांश्चापं धारयंतीं शिवां भजे ॥ इति षोडशनित्याध्यानं ॥ एतस्मिन्समये देवि गुरून्
संपूजयेद्बुधः ॥ प्राग्दक्ष [illegible] ध्यायेन्मंत्रराले गुरुपंक्तित्रयं यजेत् । गुरुमंत्रेण नाम्नापि नित्यं संपूजयेत्क्रमात् ॥ अग्रे गुरुं मध्यमाभ्यां गुरुं सम्यक्स्वानघ यत्ने
आनंदनाथशब्दांताः अंबांताः शक्तयः क्रमात् । गुरुं संपूजयेद्देवि परमादिगुरुं तथा । परापरगुरुं चैव परमेष्ठिगुरुं तथा । गुरुशक्तीर्यजेद्देवि ततः
श्रीगुरुपादुका ॥ इति सामान्यतो देवि गुरुपात्रादिकैर्यजेत् । अथादिशिवनाथश्च ब्रह्मा नारायणः सदाशिवः । इच्छा वा ईश्वरश्चैव अघोरो विश्वरूप एव च । रौद्री श्री-
गुरुस्तथा ज्येष्ठा च सा वामा परानिधाना रुद्रसंज्ञश्चादिदेवौघाः । सनकश्च सनंदनः । सनातनश्चापि सनत्कुमारस्तथैव च । सनत्सुजातश्च विशुद्ध-
दत्तात्रेयः परे च नव वामदेवस्तथा व्यासः शुकः सिद्धौघसंज्ञकाः । परापराख्या गुरवो नृसिंहश्च महेश्वरः । भास्करश्च महादेवः त्रितत्त्वस्तुस्या महाचि-
वः सदाशिवौघा मानवौघाः । अपराख्या महेश्वरी । एतेषां मातृगुरवः श्रीनाथादीन्यजेत्ततः । परब्रह्माभिधश्च ततः परशिवस्तथा । परशक्तिश्च कौले-
शः शुक्लदेवी कुलेश्वरः कामेश्वरी च दिव्यौघाः । पराख्या गुरवः क्रमात् । भोगः क्लिन्नस्तु समयः सहजो वेदसंज्ञकाः । परापराख्याः सिद्धौघा-
गा नो विश्व एव च । विमलो मदनश्चैव भुवनो नील एव च । आत्मा प्रियाश्च मानवौघाः । अपराख्याः निजास्तथा । कामराजाख्यविद्यायां गुरवो न सं-
स्थितः । अज्ञानगुरुशिष्याणां कथ्यंते गुरवः क्रमात् । गुरुभ्यो नमः इत्युक्त्वा पादुकाभ्यो नमो वदेत् । तथैव परमेशानि परमाश्च परापराः । परमेष्ठि-

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
१०६
106

वाचयित्वे ज्ञालनैः स्वस्तिपूर्वकं। पंचवाद्यनिनादैश्च वेदघोषैः सुहृज्जनैः। गत्वा गुरुगृहं शिष्यः प्रणम्य गुरुपादुकां। दत्वा वरणसामग्रीं संकल्प्य वरयेद्गुरुं। उग्रायोमुकमंत्रग्रहणाय द्विजो
त्वमाणुरुदेवेनेति संभाष्य त्वामहं चततो वृणे। इत्युक्त्वा वरयेद्दिव्याव तोस्मीति ततो गुरुः। यथोचितं गुरोः कर्म कुरुष्वेति वदेच्छिशुः। करवाणीति वोचार्य पंचवाद्यपुरःसरं। ततः शिष्येण सहितो
यायाद्यागगृहं गुरुः। पुण्याहवाचनं कृत्वा शिष्यो भक्तिपरायणः। हारकुंडलकेयूरमुद्रिकांगदभूषणैः। हेमयज्ञोपवीतैश्च मधुपर्कैर्यथाविधि। महार्घवस्त्रतांबूलैः फलपुष्पसुगंधकैः।
अविनशाद्यमभ्यर्च्य यथावद्वरयाद्गुरुं। ऋत्विजोपि तथाभ्यर्च्य वरयाद्गुरुसंख्यकान्॥ मधुपर्कविधानमुक्तं डामरे॥ मधुपर्कविधाने तु यथावत्कथयाम्यहं। आपःपीठं क्षजीठानि महसा
मानानि माननतः। अर्घ्यं पाद्यजलसमुद्भूयसहितानि सम्मानि च। सप्तविंशतिदर्भाणां वेष्टयेद्ग्रंथिभूषिता। विष्टरे सर्वयत्नेषु लक्षणं परिकीर्तितं। सुरभ्यो शुद्धोदकसंपूर्णाः पात्रार्थे ताम्रग
उकानं शंखान्यर्घ्यप्रदानाय गंधपुष्पजलान्विताः। दूर्वोदकसमायुक्ताः स्नापनीयापथ कूर्चकं। कमंडलुः सलाक्षस्यन्माचम्योदकपूरिताः। संपुटा मधुपर्कार्थं कांस्यादध्यादिपूरिताः।
महालघोलि द्रव्याणि वस्त्राणि मुद्रिकाद्यं सुभूषणं। मयूरपत्रछत्राणि सोष्णीषाणि समाहरेत्। पादुकाभ्यां आहरेत्तत्र वर्मभूषणभूषिताः। अन्यत्र स्मार्तेऽपि दध्युक्तं मधुपर्कस्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिपाली
१३९
139

पूजने। तत्कृत्वा फलमाप्नोति महायज्ञार्हणोपमं। अन्ये स्योमधुपर्कस्य विप्रास्युः पूजनं स्मृतं। भक्त्या तद्विगुणं दद्यादाचार्याय सुभक्तिमान्। अन्यद्विजैः समं
यत्र देशिकस्य च पूजनं। तस्मिन्यज्ञे फलं स्वल्पमनावृष्टौ यथा क्षितिः। देशिके क्रोधिवात्तेन तस्मात्सान्ति वर्जिता द्विकः। मौनमास्थाय भक्ष्यापाद्योगच्छेद्योगमन्दि-
ति। आचार्यः पूर्वदिवसे उपवेश्य समासने। शिष्यं मूलेन संजप्तं दद्यात्तद्दन्तधावनं। दन्तान्विशोध्य पुरतः स्थण्डिले हस्तमात्रके। चतुरस्रे पूजयेत्तत्परीक्षेत ततो गुरुः। ऐशाना-
ग्रे ज्ञानलाभः प्रागग्रे भूतिरुत्तमा। आग्नेय्यग्रे मनस्तापो यो वे धुनाशश्च दक्षिणे। राक्षसाग्रे मृत्युभयं वारुणाग्रे मनःशुचं। वायव्याग्रे व्याघ्रता च कौबेराग्रे सुखावहं। अमंगले
स्थानपाते प्रायश्चित्तं समाचरेत्। प्रायश्चित्तमग्रे पुरश्चरणप्रकरणे वक्ष्यते। ततः स्वप्नपरीक्षां च कुर्याद्देशिकोत्तमः। क्रूरस्वप्नेऽप्यदीक्षा हि क्रूरे भयमामता। उत्त-
मस्वप्नफलो नु दीक्षा सर्वोत्तमामता। स्वप्नलक्षणानि तन्निवेदनप्रकारं दुःस्वप्ने प्रायश्चित्तं चाग्रे पुरश्चरणप्रकरणे वक्ष्यते। एवं विकार्यपुरतो गुरुः पूजां समाचरेत्। विधाया-
वमन्त्रं तत्र सामान्यार्घ्यं विधाय च। अर्घ्योदकेन संप्रोक्ष्य द्वारपूजां समाचरेत्॥ द्वारपूजा वक्ष्यते। ततश्च देशिको दिव्यान्दिव्यावलोकनेन वान्तरिक्षगतानस्त्रोदकेनोत्सारयेत्त-
तः पार्थिवान्पार्ष्णिघातैस्त्रिभिरुत्सारयेत्ततः। अंगं संकोच्य किंचित्तु शाखां वाममगतां स्पृशन्नुत्सारितानां भूतानां दद्द्देहलीं तु दक्षिणे। पादेन दक्षिणेनाथ प्रविशेद्यागमण्डपमिति। दक्षि-
णपादपुरःसरं प्रवेशः पुंदेवताविषयः। शाक्ते तु वामपादपुरःसरमेव। वामपादं पुरस्कृत्य प्रविशेद्यागमण्डपमिति त्रिपुरार्णववचनात्। तथा। ब्राह्मणं वास्तुधीशं च नैर्ऋत्यां दिशि पूजये-
त्। अत्रार्घ्यं पुनश्च गन्धेन यागस्थाने सुसिंचिते। वीक्षणाद्यैः स्मृतः शुद्धिं चतुर्धारं नमाचरेत्। संवीक्ष्य मूलमनुना हस्त्रेण प्रोक्षयेत्ततः। कुर्यात्ताडनमस्त्रेण कवचेनाथ सेचयेत्। श्रीखण्डा-
गरुचन्दनैश्च भूषिते स्तरणे सुधाज्ञानान्वंदनासि दूर्वा दूर्वाभस्माक्षतान्कुशान्। सजलान्विकिरेन्मंत्री प्रसून्हृद्यान्हि मण्डलं। मार्जयेदस्त्रमंत्रेण तां मंत्री कुदर्भमुष्टिना। आसनाय-
नुवह्न्याद्दिशान्ते स्थापयेत्तान्। पुण्याहं वाचयित्वाथ विप्रान्संतोष्य यत्नतः। वेदिकायां लिखेत्पश्चात्सर्वतोभद्रमण्डलं। तल्लक्षणमथो वक्ष्ये सर्वतंत्रानुसारतः। देशिको वेदिकामध्ये
गोमयेनोपलेपिते। पूर्वोक्तक्रमयोगेन चतुरस्रं प्रकल्पयेत्। चतुष्कोष्ठसमायुक्ते कर्णसूत्रविभूषिते। तत्र कोष्ठचतुष्कान्तः सूत्राणां स्याच्चतुष्टयं। कोणस्थकोष्ठमध्येषु दृश्यं तेन म-
त्स्यका यथा। एवं कृत्वा कर्णगं युग्मं सौम्ययाम्यगतद्वयं। मकरे द्वे पुनः सूत्राणि दद्याच्चत्वारि मंत्रवित्। पूर्वपश्चिमगं तद्वद्दक्षोत्तरगतं पुनः। मकरान्पूर्ववत्कुर्यात्तत्र सूत्राणि पातयेत्।

ध
श्री
१३९

© Dharmartha Trust J&K. Digitized by eGangotri

तत्सुग्मं च पर्वाशत्वद्रूपदाति यथा पुनः प्राहुर्भवंति रम्याणि सत्त्राण्येवं विकाशयेत्॥ षट्त्रिंशत्कोष्ठकैर्मध्ये सरोजं परिकल्पयेत्। तद्बहिः परितः पीठमेकपंक्त्या प्रकल्पयेत्। पंक्तिद्व
येन तद्बाह्ये वीथीकल्पनमीरितं। ततो सपंक्तियुग्मेन द्वाराणां भाविधानतः। उपशोभाश्च कोणानि मंत्रवत्परिकल्पयेत्। अथ वक्ष्ये विधानेन सरोजस्येह लक्षणं। सरोजस्थानं जंभा
गं द्वादशांशं तु परित्यजेत्। ततो वृत्तत्रयं मध्ये कुर्यात्सम्यग्यथाविधि। कर्णिकां मध्यवृत्ते तु द्वितीये तु केसरान्। अंत्यवृत्ते तु पत्राणि पत्राग्राण्यक्रमागतः। अंत्यवर्तुलमध्यस्य परिमाणं
वयवद्भवेत्। किंजल्काग्रेषु संस्थाप्य पार्श्वतः स्वधीर्द्वेद्वकान्। संलिप्य संधिसंबद्धसूत्रन्यासं विधाय वा। दलाग्रमानतो वृत्तं कुर्यात्सम्यग्विचक्षणः। वृत्तांत मध्यसूत्रस्य पार्श्वयोर्नृपयथा
विधि। वहिरेकेन कुर्वीत पात्राग्राणि विधानवित्। किंजल्काग्न्यत्र मूले तु द्विशः कुर्वीत देशिकः। सामान्यं कमलं ह्येतच्छास्त्रे सर्वत्र गीयते। त्रिभिः पदैस्तु पीठस्य पादान्कोणे
षु कल्पयेत्। अतिरिक्तैः पदैः पीठगात्राणि स्वयेत्ततः। वीथीपंक्तिद्वयं सम्यग्योगेकीकृत्य प्रमार्जयेत्। कोष्ठद्वयेन चैकेन प्रत्येकं द्वारपार्श्वयोः। शोभा भवंत्यतः को
ष्ठैरेकैकतस्त्रिभिरेव वा। उपशोभास्ततः कोष्ठैः षड्भिः कोणानि कल्पयेत्। रजोभिर्भूषयेत्पंचवर्णैरेतत्तु मंडलं। निशारजो भवेत्पीतं शुक्लं तंडुलजं स्मृतं। रक्तं कौसुंभमुद्दि
ष्टं कृष्णमाहुर्मनीषिणः। पुलाकदग्धसंभूतं श्यामं बिल्वच्छदोत्थितं। पंचवर्णाः समाख्याता दीक्षामंडलकर्मणि। उत्सेधतारतो रेखाः शुक्लाग्रांगुलमात्रतः ताराजि
ता रंगसर्वाः सीमायतः कार्याः शुभ्रा मंडलकर्मणि। पीतवर्णेन चूर्णेन कर्णिकां पूजयेत्ततः। किंजल्कानुक्तवर्णेन पत्राणि श्वेतवर्णतः। श्यामेन रजसा संधिमंत्रविद्धापि
पूरयेत्। अथवा कर्णिकां मंत्री पीतेनैव प्रपूरयेत्। किंजल्कान्पीतरक्तेन पीठगात्राणि कल्पयेत्। शुभ्रतः वीथीं चतुष्कमध्येषु कल्पवल्लीः प्रकल्पयेत्। पत्रमूलफला
कोरमंडिता हृदयंगमाः। नानावर्णैरजोभिस्तारं नये कृष्णली गुरुः। शुभ्रेण रजसा द्वारचतुष्कं पूजयेत्ततः। रक्तवर्णेन तच्छोभाः पीतेनैवोपशोभिकाः। कृष्णवर्णेन कोणा
नि बहीरेखात्रयं ततः। शुक्लारुणासितैर्व्यस्तै रजोभिर्भूषयेत्क्रमात्। सामान्यं सर्वतोभद्रं मंडलं ह्येतदुत्तमं। अन्यानि मंडलान्यत्र वक्ष्ये तेपि प्रसंगतः। पूर्वोक्ते चतुरस्रे
तु तावत्सूत्राणि पातयेत्। यावत्स्यात्कोष्ठशतकं चत्वारिंशत्समन्वितं। वेदान्वितं तु तन्मध्ये पद्मं षट्त्रिंशता शुभं। एकपंक्त्या भवेत्पीठं वीथ्याकारात्र दृश्यते। पूर्ववद्द्वारशो
भास्याः उपशोभात्र रतास्त्रिवे। षड्भिः कोष्ठैस्तथा कुर्यात्कोष्ठानि कोणवर्तनात्। अन्यत्सर्वं विधातव्यं प्रोक्तमंडलवच्छुभं। एतन्मंडलमन्यत्तु चतुरस्रे सुशोभते। पातये क्रम

© Dharmartha Trust J&K. Digitized by eGangotri

...विद्यार्णव
१४०
140

त्राः सत्रं यावत्कोष्ठानि सर्वतः। बहुष्केषु तु पद्मानि विदध्यान्मंत्रवित्तमः। चतुष्कानि विदिक्स्थानि चत्वारि विभजेत्सुधीः। यावत्षोडशकोष्ठानि भवंत्येतानि मार्जयेत्। तथा यस्व
स्तिकाभाकारः प्रकटी भवेत्। रजोभिः शुक्लहारिद्ररक्तनीलैः प्रपूरयेत्। स्वस्तिकानि शितं चान्यत्पूर्ववत्परिकल्पयेत्। उदितं मंडलं ह्येतन्नाम्ना सुशोभनं। एतदेवोक्तमार्गेण स्व
स्तिकाख्यमनुत्तमं। मंडलं स्यात्तु पंचाब्जं सर्वकामफलप्रदं। दीक्षायां वा महादाने देवपूजाव्रतादिषु। एतन्मंडलमध्ये तु कुर्याद्यत्नतमं बुधः। एवं मंडलमालिख्य प्रोक्तेष्वन्यतमं शुभं॥
विदिकायामासनस्थः प्राङ्मुखः सविशेषतः। बद्धपद्मासनो मौनी कृतकार्यो जितेन्द्रियः। देशिकः कृत्स्नं संस्थाप्य पूजोपकरणानि तु। दक्षिणे वामभागे तु स्थापयेत्कलशं शुभं। घि
लपूर्णं च हस्तप्रक्षालनाय च पश्चात्पात्रं विधायाथ दीपान्प्रज्वालयेच्छुभान्। व्यजनं मुकुरं छत्रं चामरं दिक्षु मंत्रवित्। संस्कुर्यात्तानि सर्वाणि वक्ष्यमाणविधानतः। करशुद्धिं विधायाथ कुर्या
त्तालेन यं बुधः। शरमंत्रेण दिग्बंधं कुर्यान्मंत्री समाहितः। महस्तु तत उत्पन्नं रक्षयेत्तं हि सर्वतः। भूतशुद्धिं ततः कृत्वा प्राणस्थापनमाचरेत्॥ न्यासादिकं ततः कुर्याद्देशिको यतमान
सः। ऋषिं न्यसेत्ततो मूर्ध्नि छंदो वक्त्रगतं न्यसेत्। देवतां हृदये न्यस्य मूलमंत्रस्य देशिकः। षडंगं विन्यसेन्मंत्री पंचांगं वा यथाविधि। यस्य मंत्रस्य पंचांगं नेत्रं तत्र विहीयते। त्र्यंगैर्वि
हीनस्य मंत्रस्यांगं तैरेव कल्प्यते। ततः संज्ञोक्तमार्गेण न्यासान्न्यासं समाचरेत्। शरीरस्थस्य मंत्रस्य योगपीठं प्रकल्पयेत्। देहात्मके ततः पीठे ध्यायेन्मंत्रस्य देवतां। दर्शयित्वा ततो मुद्राः स्था
पयेदर्घ्यमुत्तमं। जलेन पूरितां दक्षे प्रोक्षणीं स्थापयेत्ततः। तत्राल्पमल्पशंखांबु तत उत्तरतो न्यसेत्। पाद्यमाचमनीयं च मधुपर्कं च मंत्रवित्। ततो मूलाणुनाभ्यर्च्य प्रोक्षण्यद्भिः समा
हितः। स्थालानं मंडलं वान्यत्पूजोपकरणादिकं। प्रोक्षयेत्फ धपुष्पाद्यैर्देहिस्थे देशिकोत्तमः। योगपीठं समभ्यर्च्य न्यासमार्गेण मंत्रवित्। पीठं तं चन्तनस्तत्र पूजयेदिष्टदेवतां। देवतात्मा ततः पं
चकुर्यात्सुमनोञ्जलीन्। शीर्षे हृदि तथाधारे चरणे सर्वगात्रके। प्रलये च त्रिवेद्यैः नरहितैश्चंदनादिभिः। सर्वोपचारैस्तच्छेषं गुर्वोद्दिष्टनकर्मणा। समापयेदिदं सर्वं प्रोक्षण्यद्भिः समाचरेत्। पात्रा
यं प्रोक्षणीसंस्थं स्पर्शकासेर्प्यर्थमेव तत्। उपचारैश्चंदनाद्यैर्मंडले पूजयेद्गुरुः। पूरयेत्कर्णिकां पूर्वं शालिभिस्तंडुलैस्ततः। दर्भान्न्यसेदुपर्यत्र साक्षतं कूर्चकं ततः। सूत्रमूलाः कुशाद्याः समवि
शांतिसंख्यकाः। सूत्रग्रंथियुतास्त्याग्दशे कूर्चे इहोच्यते। यजेदाधारशक्त्यादिपीठमंत्रावसानकं। स्वर्णादिरचितं तत्र कलशं छिद्रवर्जितं। त्रिगुणात्मकसूत्रेणावेष्टितं सर्वतो बुधः। वं
नागरुकर्पूरैर्धूपयेत्सम्यक्प्रधूपितं। एवं जपविधानेन स्थापयेद्देशिकोत्तमः। तवरत्नानि निक्षिप्य कुंभे कूर्चं मथोपरि। दूर्वाचंदनसंयुक्तं विन्यसेदक्षतान्वितं। पुष्पं नीलं च वैदूर्यवि
द्रुमं मौक्तिकं तथा। ततो मरकतं वज्रं गोमेदं पद्मरागकं। मौक्तिकानि च रत्नानि देशिकेन्द्र विचक्षणः। क्षाद्यं तत्क्रमतो मंत्री मातृकां मनसा जपन्। मूलमंत्रं जपन्मंत्री तेन चिंतयेन्नौ

श्री
१४०

© Dharmartha Trust J&K. Digitized by eGangotri

नयमात्मनः। पठस्यपीठमेदं च चिंतयेत्साधकोत्तमः। पंचाशदोषधक्काथैः पूरयेत्तदनंतरं। कुधवक्षत्वचाक्काथैर्बिल्वभल्लातदूर्वाशुङ्गैः। गंधपंकमस्तमादित्याशितैर्योजं शुभैर्जलैः। काथादितोये
रापूर्य शंखं तस्मिन्विलोडयेत्। गंधाष्टकं शुभं मंत्री सर्वसंपत्प्रदायकं। कलाः स्वर्गाः समावाह्य पूजयेद्वयथाविधि। कलादिदेवतारूपं शंखनीरं घटं क्षिपेत्। चंदनागरुकर्पूरकाश्मीररो
शनान्वितैः। सशिलाह्वकजटामांसीसटीभिः शक्तिसंभवं। गंधाष्टकं शुभं वश्यं शक्तिमंत्रे प्रयोजयेत्। काश्मीरं कुंकुमं। सिल्हकं शिलारसः। सटी कचोरः। चंदनागरुकर्पूरचोरकुंकुमरोचनाः।
जटामांसीकपियुताः शक्तेर्गंधाष्टकं मतमितिशारदातिलकवचनात्। ह्रीवेरं चंदनं कुष्ठं मगनः कुंकुमं मुरा। सेव्यकं जटामांसी विष्णुवंतदुरीरितं। ह्रीवेरं वालकं। सव्य[illegible] उशीरं। मुरं मो
रहरीति प्रसिद्धं। मुरा गंधवती दैत्या गंधाढ्या गंधमादिनी। सुरभिर्बंधमेलायर्भे तगंधाच कुठीगंध कुठीसमताः। एकांगीतिनानार्थवचनात्। देकांगयेव मुरशब्देनोच्यते। एकांगीछकुरिति
लोके प्रसिद्धं। जलकाश्मीरकुष्ठैस्तु रक्तचंदनचंदनैः। तमालागरुकर्पूरैः शोभनं चाष्टगंधकं। गंधाष्टकस्य संयोगात्सामर्थ्याद्देशिकस्य च। सशक्तिकं तले कुंभे यजेद्देवमसंशयः। आदे
रेशानुसंबंधिकलादशकुंभे यजेत्। कलाद्वादशकं सौरं पूजयेत्तदनंतरं। कलाषोडशकं चांद्रं यजेत्पश्चात्कुरूत्तमः। वेदादिभेदसंजाताः कलाः पंचशतैर्युताः। सत्रिंशाप्यसमभ्यर्च्य ततो मंत्री
युताः। क्रमात्तामध्ये मध्ये ऋचः पंचदशनीयादमा अपि। आत्मनमंत्रं समुच्चार्य शुचिषत्पदमुच्चरेत्। वसुरंतमत्रपदं रिक्षसिद्धोपदं ततः। पदंता वेदिषवदेददतिथिर्दुपदं ततः। रोणसत्पदमु
च्चार्यन्त्रषद्दुरपदं वदेत्। वदेत्सदतम व्योमसदब्जागोपदं वदेत्। वदेऽज्जा ऋतजेत्यस्मादद्रिजाशब्दमुच्चरेत्। सप्तमस्वरमुच्चार्य सविंदुमाद्यादिनं वदेत्। उकारवह्निसंदंशंबांतेऽन्धपमो मंत्र ईरितः॥
आत्ममंत्रः हंस इति। सप्तमस्वर ऋकारः। आषाटीतकारः। अन्यानि पदानि स्वरूपाणि। तथा लोहितो वह्निः। सहितः प्लुतान्यंतिकान्ततः। उकारस्तु स्वतत पश्चाद्धीयं णमथ पदं वदेत्। गां नभी
मध्यकुचरो गिरिष्ठाश्च ततो वदेत्। यस्योरुपुत्रिपुपरं ततो विक्रमणेष्वधि। क्षियंति भुपदं ब्रूयात् उर्वनाविततो वदेत्। तोयस्तोमा धवः पश्चाद्धीं तस्याजोयकांतियुक्। इतीयो मन्तुरा स्यात्तस्त
तीयः प्रोच्यते भुजा। लोहितः पकारः। वह्नी रेफः। लेन प्रारतनालकारः। तोयं वकारः। ततस्तोमा धवदकारः। तेनाविस्यांतेशा। तोयं व। शांतिश्चा। तेन भ्या। अन्यानि पदानि स्वरूपाणि। एतेनोक्तो मंत्रो प
तस्य कलायुक्तत्तृतीयकः। चतुर्मुखः स चंद्रार्धस्ततः स्याद्यजामहे पदं। सुगंधिं पुष्टिवर्धनं च ततो वदेत्। उर्वारुकमिव बंधनान्मृपदं वदेत्। त्योर्मुक्षीय पदं पश्चान्मामृतात्पदमुच्चरेत्। ए
तः तकारः। अग्नी रेफः। मांतो यकारः। उपांत्यकलाविंदुः। एतेः अं। पतृतीयो वकारः। चतुर्मुखः ककारः। चंद्रार्धो विंदुः। तेन कं। अन्यानि पदानि स्वरूपाणि। गायत्र्यामथ चतुर्थः स्तोमा मंत्रः स्तातो
जगत्पदं। ततोपस्तोमाशाम्लानी प्रोक्ता सहजान्तं तविष्णुपकः। अग्निश्चक्रेवलं प्रोक्तो योनि कल्पपदं वदेत्। यत्तु त्वष्टा पदं पश्चात्ततो रूपाणि पिंशतु। आसिंचतु प्रजापश्चात्पतिर्धा[illegible] वदेत्॥

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
१४१
141

गर्भं दद्यात्क्षितिपदं आषाढीपद्मनाभयुक्तं पंचैतेन वेदिकामंत्रात्तोषैकेकं प्रपूजयेत्। तो यंच कारः श्रीकण्ठ ली ह्रकारः। तेन वि। सहजाः पकारः। ॐ तो ण कारः। विष्णुयुक्
उकारस्युक्तः। ते न हुं। अग्नीरेफः। केवलो विसरः। आषाढीतकारः। पद्मनाभ एकारः। तेनते इति। तारस्य पंचभेदो ष्टकलानामंतरे सुधीः। आवाह्यादौ कलाः पश्चात्सन्नि
धाप्य वै देशिकः। प्राणान् संस्थाप्य गंधाद्यैः पूजयेत्साधकोत्तमः। यत्र यत्र कलापूजाविधिस्तत्रैवमेव हि। तारस्य पंचभेदो ष्टकलानां पूजयेत्सुधीः। केलादश कुंभानावाह्य स
म्याद्याः सन्निधाप्य च। हंसः शुचिषदित्यादीन् वै संजप्य पूजयेत्। प्राणसंस्थापनं कलाकलानां पूजयेच्च ताः। एवं जरायास्तीक्ष्णाद्याः पीताद्याश्च विधानवित्। अन्ते बलाद्याः
पियते दुक्तपुरुषाविचक्षणः। अकारोकारकौ प्रोक्तौ मकारो विंदुनादकौ। शक्तिसंतावमी सप्त ष्कवभेदाः समीरिताः। अतिमोहविमोभेदो पृथमेव समीरितो। शक्तिः सकारः
सांतो हकारः। ततो रसालपत्रसपिप्पलद्रुमपल्लवैः। ऐंद्रवारुणिसुत्रामवल्लरीनडैः। कल्पवृक्षमन्त्रीपर्यां कलशस्थापनं मंत्री विदधीत समाहितः। पश्चाद्दक्षतसंयुक्तं सपल्लं
शुभचक्रिकां देशिकेंद्र समादाय स्थापयेत्सलिलोपरि। कल्पवृक्षफलानां हिमसाविशदधीर्नृकः। पट्टांबरयुगेन च घटं पश्चात्तु वेष्टयेत्। प्रधानकुंभं संस्थाप्य वै यामे वं गुरूत्तमः। नतो
रणानां समये षु पूर्वादिषु यथाक्रमं। आग्नेय्यं मंडलमालिख्य पद्मं वाष्टदलं शुभं। प्राग्युक्तविधिना तेषु कुंभान् संस्थाप्य देशिकः। क्रं वं धरां वाक्पतिं च विधे ... तेषु पूजयेत्। आग्नेय्यां
दिषु कोणेषु कुंभान् संस्थाप्य पूर्ववत्। अमृतं दुर्जयं चैव सिद्धार्थं मंगलं तथा। संपूज्य वह्निकोणादि दिक्ष्वादी न यथपूजयेत्। पूर्वादिष्वष्टकुंभेषु ते ... देशिकैः। पुनः पूर्वादिकुं
भेषु पूजयेद्दिग्गजानपि। ऐरावतं पुंडरीकं वामनं कुमुदं तथा। पुष्पदंतं सार्वभौमं सुप्रतीकं च देशिकः। पुनर्वेद्यां गुरुर्गत्वा उपविश्य ... [illegible] ... समिन्नु
न्नयः। तस्यां मंत्री समावाह्य पूजयेदिष्टदेवतां। स्वलाम् लमंत्रं मंत्री सम्यक् नाडीपथात्ततः। निर्गमय्य च चेतस्यं नासिकाग्रविनिर्गतां। ... कापदेमहः पुष्पांजलिगतं कः।
मत्तकांतं समुत्थाप्य तस्यामावाहयेत्ततः। सन्निधापनं प्रथमतः सन्निधानमतः परं। सन्निरोधनं च सकलीकरणं च ततःपरं। ... करणं स्वमुद्रया। स
न्निरोधनं वेतिचकारात्संमुखीकरणमपि ज्ञेयं। क्रमाद्विधाय तत उपचारान् प्रकल्पयेत्। आसनादि प्रसूनांतान् उपचारान् प्रकल्प ... [illegible] ... गणा न्यपि। श्री
सर्वांतिलोकपालानां तदस्त्राणां च पूजनं। विधाय पूजामेवं हि धूपदीपनिवेद्यकैः। प्रपंचसारे। कृतेनिवेद्य च ततो मंडलं परितः। क्रमात्। ... स्थापनीयाः त्रिमंत्रि १४१
णा। तथा। वेदिकाया दक्षभागे कृत्वा स्थंडिलमुत्तमं। संस्थाप्य वह्निं संस्कृत्वा वैश्वदेवं समाचरेत्। तत्र प्रणवपूर्वाभिर्द्रुत्वाव्याहृतिभिः ... ततो कृत्वा साज्येन हवि

© Dharmartha Trust J&K. Digitized by eGangotri

ना स्रुधीः। पंचविंशति धा पश्चाद्धुत्वा व्याहृतिभिः पुनः। संपूज्य तां चंदनाद्यैः पीठमूर्त्तौ तु योजयेत्॥ अग्निं विसर्ज्य सपेत्न पायसेन बलिं हरेत् [illegible] चंदनादिपुष्पाक्षतसमन्वितं। नत
उत्थाप्य नैवेद्यं तत्स्थलं शोधयेत्सुधीः। पुनर्यजेच्चोपचारैः पंचभिर्दर्शयेत्ततः। छत्रं चवामरं पश्चाद् दद्यात्तांबूलमुत्तमं। छत्रं चेति चकारात् दर्पणं [illegible] सह स्त्रं च जपेन्मंत्री मूलमंत्रं स
माहितः। देवतायै निवेद्याथ तं जपं संपदेत्ततः। ईशानादिशिष्यः पूर्वस्थापितो विकिरो त्रयः। सुवर्णवस्त्रसंयुक्तं करकं जलपूरितं। न्यसेदत्र [illegible] पश्चिमस्यां खड्ग
खेटधारिणीं सिंहसंस्थितां। तिष्ठ संपूज्य वततो गृहीत्वा तं प्रदक्षिणं। अमेदं तत्सुरक्षेति लोकेशानामितीरयन्। नालयुक्तेनोदकेन देवतां [illegible] स्थाने स्थापयेत्तं तु फट्मंत्र
एतत्तार्च्ययेत्। उपविश्य तु भूयो स्त्रांगं ध्यायेन्मंत्रवित्तमः। ततो वह्निं सुसंस्कृत्य वक्ष्ये गोपयसा पचेत्। नवे ताम्रादिजपात्रे क्षालिते वशरावेण वा। मूला [illegible] तंडुलान् शालिसंभवान्॥
तिथिप्रसृतिमात्रेन शरावेण प्रजपन् क्षिपेत्। प्रक्षालितेन पात्रेण पात्रवक्त्रं पिधाय च। कुंमंत्रेण ततो मूलमनुनादेशिको ऽन्नमः पचे [illegible] मूलेन स्रुवसंस्थे
न घृतेनाथावतारयेत्। कुंमंत्रेणास्त्रसंजप्तकुशास्तीर्णे विभज्य तत्। त्रिधा लेके देवतायै परं च क्रौंति वेदयेत्। शिष्यं शिष्येण सहितो गुरुर्भुंजीत मंत्रवित्। [illegible] तं शिष्यमानी
य मंत्रवित्। आदर्शमात्रं ह्यजस्तं यथोक्तं दंतधावनं। शिष्याय दद्यात्परदानूविशो प्रक्षालितं [illegible] विधाय मंत्री [illegible] यांत
कुशसंस्तरणे रत्नि न्याशिष्येण सार्धममुना मतो धिवासः। ताम्रादीत्यादिपदेन मृन्मयग्रहणं। तल्लक्षणमुक्तं कात्यायनेन। [illegible]
ओडुंबरी वापि वस्थाली प्रशस्यत इति। समित्मात्रा प्रादेशप्रमाणा। प्रादेशान्नाधिका नो ने ति कपिलवचनात्। तिथिप्रसृतिः पंचदश प्रसृतिः [illegible] तंडुलान्
त्रिः क्षालितान्। तदुक्तं गोभिलेन। त्रिःफलीकृतान् तंडुलान् त्रिर्देवेभ्यः प्रक्षालयेदित्यान्कुरिति॥ कुशलो दक्षः। तेनमृतमिव प्रदक्षिणं॥ [illegible] ति। स्थिरे
स्वशास्त्रोक्त असुस्थित्वो स्य दग्धो कठिनः स्वभः नवातिशिथिलः। पाक्यान्नवदीत रसो भवेत् युक्तलक्षणः। घृतेन संस्कृते कुंमंत्रेणावतारयेदिति पूर्वेणान्वयः। [illegible] मं
त्रेणेत्यादिषु [illegible]॥ अथाग्निस्थापनादर्पवरान्त्रं॥ कुंडस्यारंभकाले तु संस्कृते [illegible] न कृतो यदि। [illegible] स्थापवते
सर्वविधेयाः स्युः क्रमेण वै॥ उक्तरतंत्रे॥ होमकर्म ततो वक्ष्ये सकलागमसंमतं। सुसंस्कृते गुरौः कुंडे संस्कारैर्वा यथाविधि। [illegible] सर्वागम [illegible] मलोमा
व संवीक्ष्य संप्रोक्ष्यास्त्रेणेनातत ततः। कुशैः संताड्य वास्त्रेण प्रोक्षयेत्कवचाणुना। खननं स्याछरेणाथ तेने वोद्धारहरितः। पूरणं च हृदास्त्रेण समीकृत्वा सेचनं। कवचेनाथश

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रेण कुर्ह्यं वर्मणाम्रतं मार्जनं च विलेपं च संविंस्यच कलात्मना। कुर्यात्त्रिसूत्रीकरणं नमोमंत्रेण पूजयेत्। शरेण वज्रीकरणं हुं कुशैः स्याच्चतुःपथं। कवचेनेंद्रियाणां च प्रपूज्य दनमथा
वरेत्। एवमुक्तैस्तु संस्कारैर्होमे कुंडानि देशिकः। संस्कुर्यात्प्रथमं तानि चतुर्भिः प्रथमोदितैः। शरेणातनदंगभृतास्त्रमंत्रेण प्रोक्षणमुत्तानहस्ताग्रेण। अभ्युक्षणं मुष्टिबंधेनाधिकं पुनरुद्धारः रवा
तमदा पूरणमस्यमदा। उक्तं च नारदपंचरात्रे। गृहीत्वा चैकदेशात्तु कुंडमध्यात्तु मृत्तिकां। अंगुष्ठानामिकाभ्यां तु हृदयेनाथ पूरयेत्। सेचनमभ्युक्षणमेव। शस्त्रेणास्त्रमंत्रेण। वर्मणा नेनदृग्वि
नेषु चतुर्षु संवधायां। तदुक्तं सोमशंभुना। समार्जने समालेपं कलारूपस्य कल्पना। त्रिसूत्रीपरिधानं च वर्मणाभ्युक्षणं हृदेति। कलारूपप्रकल्पनं सोमसूर्याग्निकलारूपप्रकल्पनं। त्रिसू
त्रीकरणं सूत्रत्रयकल्पनं। हृदयेन पूजनं तु मेखलात्रयस्य वा। तदुक्तं नारदपंचरात्रे। समभ्यर्च्य ततो वा होमभ्यतः प्राणे वनवात्रे नैव विधिना नाभिपूजयेद्वृद्धसन्निभं। मेखलात्रये
पूजायां हृन्मंत्रेणाप्रपूजयेदिति। वज्रीकरणं च ब्रवद्दृढचिंतनं। चतुःपथं कुशैश्चतुर्दिक्षु मार्गचतुष्टयकरणं। शारदातिलके तु नेत्रेणानुयादक्षपाटनमित्युक्तं। अक्षपाटनल
क्षणं तु नारदपंचरात्रे। आक्षिप्त्वा गैसदादर्भैरस्त्रमंत्राभिमंत्रितैः। कुंडमितिगणं सर्वं वर्मणा परिभूषयेत्। इत्येवमक्षपाठारव्यं कुंडसंस्कारमुत्तमं। अत्रेंद्रियाणामुद्घाटनमि
ति यदुक्तं तत्वेवमेवकर्तव्यं। अक्षशब्देन●द्रियवाचकत्वादक्षपाटनमिंद्रियाणामुद्घाटनमित्यर्थः। कुंकारेण राक्षसानिकरणमिति केचित्। आदिनातानां वामेनापाटन
व्याप्तिरित्यपरे। पक्षांतरमाहाथवेति। प्रथमोदितैर्वीक्षणप्रोक्षणताडनाभ्युक्षणैः स्तथा। त्रिशस्त्रिशोल्लिखेद्रेखाः प्रागुदग्रा हस्तानुना। उदगाहूतिदिव्यत्वादुदगग्राः।
स्मृत्वा प्रागग्रा रेखा आशांदेवाधिदैवीशवासवाः। उदग्रेखाग्ररेखाणां ब्रह्मसत्येंद्रवः क्रमात्। अत्र रेखालिखनेकुतमारंभः कुत्रावसानमित्याकांक्षायामाह। सोऽत्रामणि
तंत्रे। प्रागुदीमूर्ध्वेमुदक्संस्थं दक्षिणारंभमालिखेत्। प्राचीमूर्ध्वमागग्र। उदगग्रंपुरः संस्थं पूर्वापूर्वावसानं। नारदपंचरात्रे। उल्लिखेदस्त्रराजेन दर्भकांडेनयत्नतः। भूमावभ्यं
तरकुंडे दक्षिणाग्रादितः क्रमात्। उत्तराग्रा वधिंयावत्तद्वाद्रेखात्रयं समं। प्रत्यग्भागाद्यमारभ्य यावत्पूर्वावधिंतथेति। अत्र हृन्मंत्रास्त्रमंत्रयोर्विकल्पः। तथा अथवाग्नियुगांत
स्थं वह्निगेहं लिखेत्क्रमात्। अग्नियुगं त्रिकोणद्वयं तत्पंचषट्कोणं। वह्निकोणं त्रिकोणं। अत्र रेखाषट्कोणयोर्विकल्पः। तथा याम्यलेख्यषट्कोणे नाव्यते देवि त्रिकोणं तत्रसं
लिखेदिति। अत एव नारदपंचरात्रे। रेखामात्रमुक्तं। शारदातिलके। सर्वोनभ्युक्ष्यतारेण योगपीठमथार्चयेदिति। सोऽत्रामणितंत्रे तु। प्रोक्षयेद्भूभवेन चेत्युक्तं। वाशब्दः प्राण
वाप्रक्षया। अभ्युक्ष्य कुशसलिलेन। अभ्युक्ष्य वकुशांभोभिरिति। योगपीठं तत्र वचनात्। प्रपंचसारे। प्राणाग्निहोत्रविधिनाप्यासर्वे धीयेऽनलस्थाने। प्राणाग्निहोत्रविधिर

© Dharmartha Trust J&K. Digitized by eGangotri

पितत्रैवाप्यथ्वे द्रवरूपाणाशिदिगालानि क्रमेण कुंडानि। आवस्थ्यसभ्याहवनीयान्वाहार्यगार्हपत्यानीति॥ उत्तरतंत्रे॥ संकोक्ष्य प्रणवेनाथ योगपीठं समर्चयेत्। योग
पीठार्चनं प्रयोगे वक्ष्यते॥ तत्र शक्तिं च संस्मृत्य समग्रुतुमतीं शुभां। आंतीह्निया भांसकलजगदात्मस्वरूपिणीं। ईशानसहितां तत्र सम्पूज्य गंधादिभिर्यजेत्। शक्तिमंत्रेण तां
शक्तिं मीशानं मूलमंत्रतः। अर्घ्यमंत्रविद्धिप्यक्रमणि जं वारणेयकं। कुलीनद्विजगेहोत्थं पात्रे कृत्वहि ततः। आनीयास्त्रेण नैर्ऋत्यां क्रव्यादांशं परित्यजेत्। तदेकांशं न
त मंत्रेण स्थापयेद्यत्नतः सुधीः। पश्चात्तमग्निं संस्कारैः संस्कुर्यादीक्षणादिभिः। प्रदीपकलिकाकारं तेजआवाहयेत्ततः। ऐकांजाठरवैदर्भंवह्निस्थं जाठरस्य च। स्मरावाग्निबीजके
नास्यचैतन्यं योजयेद्यथा। ओंकारेणाभिमंत्र्याथ धेनुमुद्रामृतीकृतां। संरक्ष्य च शरेणाथ कवचेनावगुंठयेत्। ततः संपूज्य कुंडस्य भ्रामयेत्रिःप्रदक्षिणं। प्रणवेन ततः स्वस्य संमु
खं स्वीयकुंडके। दृष्ट्वा योनौ तत्र स्वपरभ्रमिश्चदेशिकः। शिवबीजमिति ध्यात्वा निःक्षिपेदाशुशुक्षणिं। ततश्चाचमनीयं च दद्याद्देवस्य कल्पयेत्। वैष्णवयागे तु नारदपंचरात्रे॥
तत्र नारायणाख्यस्य शक्तिर्विद्योतलक्षणा। लक्ष्म्याकृतिं पदं प्राप्ता अमृता। मतजीवनीति॥ तथा कपिलपंचरात्रे॥ कामोऽनंततलः कृत्स्नं लक्ष्मीमृतुमतीं स्मरेत्तानयोः सं
गमयोगेन वह्निः संजातसंस्थितिरिति॥ कुंभसंभवोऽप्याह॥ लक्ष्मीमृतुमतीं मद्गां प्रभानारायणस्य च। गाम्यधर्मेण संजातमग्निं तत्र विचिंतयेत्। पात्रे ताम्रादिपात्रे। यद्वा ता
त्रिः पात्रांतरेण विहिते ताम्रपात्रादिके शुभे। अग्निप्राणयनं कुर्यात्करावेतादृशेऽपि वा। विहिते कवचमंत्रेण तदुक्तं पिंगलामते॥ अस्त्रेणाग्निं समाधाय कवचेनाभिधायवाऽक्र व्या
दांशं वै नैर्ऋत्यां त्यजेदस्त्रेण पार्वतीति॥ तथा नारदपंचरात्रे॥ तैजसे ताम्रपात्रे वा मृन्मये भिन्नवेऽपि वा। तैजसपदं गोवलिवर्दन्यायेन ताम्रेतरपरं। एतेन शरावे भिन्नपात्रे वा
कपाले वालुके पि वा। नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहमिति॥ सरस्वतीसारलिखितवचनं पुरातनमत्रापरं॥ अभिनवेऽप्युक्तं॥ भैरवीतंत्रे तु॥ योनाववेष्टितं न्यसेत्स्थापि
वह्निं पश्चाद्वंमूलमंत्रेणमंत्री लुब्धे। तदत्र प्राणनमूलमंत्रयोर्विकल्पः। जाठर इति। विंदुः परमात्मा तत्स्यांनीको मकलात्तदृवो वह्निः। वैदवः पार्थिवो भौमः। आमतीकृते वीजे
नान्नं अमृतीकरणं ततो विदध्यात्। जलबीजेन सविंदुना कृशानोरितिपिंगलामते वचनात्। शरेणास्त्रेण॥ उत्तरतंत्रे॥ उकारादि पिंगलपदं हनयुग्मं पचद्वयं दहयुग्मं च सर्व
ज्ञं आज्ञापयततो द्विठः॥ अमुं मंत्रं प्रभाष्यैव कृशानुं ज्वालयेत्ततः। द्विठः स्वाहाकारः। प्रपंचसारे॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं। सुवर्णवर्णममलं समिद्धं सर्वतो
मुखं॥ अनेन ज्वलितं मंत्रेणोपतिष्ठेद्धुताशनं। सर्वेज्ञमिति शवः कर्मलिदूतीया। मंत्रेण संबुध्यंतं तेषा। सर्वज्ञा ज्ञापयस्वाहेति दक्षिणामूर्तिवचनात्॥ ज्वालयेत्कृशे॥ मुखेन

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्ण
१४३
143

वाततः प्रज्वालयेत्कुशैरिति कुंभसंभववचनात्। मुखेनैव धमेदग्निं मुखादेषोध्यजायत इति कात्यायनवचनाच्चा मंत्रं तु प्रप्रकाशे॥ ततः प्रविंन्यसेज्जिह्वादेहे मंत्रैर्वि
भावसोः सलिंगगुदमूर्धास्यनासानेत्रेषु चक्रमात्। ससर्वजिह्वाजिह्वकास्ता वक्ष्यंते त्रिविधा प्रथि। हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा। बहुरूपातिरक्ता च जिह्वाः सप्तेति सा
लिकाः। अनलेरार्चिर्बिंदुं तत्सादियाक्षांतरान्विताः। अनलो रेफः। हकारो यकारः। ऊत्वं चीत्कारः। अथ पंचमो वीतोद्धारसौकर्याय। न्यासे तु सलिंगगुदमूर्धास्यनासानेत्रेषु
चक्रमात्। विन्यसेदतिरक्तांताः सर्वगिवहुरूपिणीमिति सिद्धांतशेखरवचनात्। सर्वांतिवहुरूपां न्यसेत्॥ प्रपंचसारे गमंत्री प्रविंन्यसेज्जिह्वा वह्नेरंगानि वैकमात्। सहस्रार्चिः स्व
स्तिपूर्ण उत्तिष्ठपुरुषस्तथा। धूमव्यापी सप्तजिह्वो धनुर्धर इतीरितः। अंगमंत्राः क्रमादिष्टमूर्तीश्चाथ प्रविंन्यसेत्। मूर्धांसपार्श्वकट्यंधुकटिपार्श्वांसकेषु वा। प्रादक्षिण्येन विन्य
स्य यथावद्दृशिकोत्तमः। जातवेदाः सप्तजिह्वो हव्यवाहन एव च। अश्वोदरजसंज्ञश्च सवैश्वानर एव च। कौमारतेजाश्च तथा विश्वादेवमुखाह्वयौ। सुरस्य च [illegible] मूर्तयो वह्नेरष्टयप
दपूर्वकाः प्रणवादिनमोंताश्चेति॥ प्रादक्षिण्येन शिरस्त्वारभ्य वामांसादिक्रमेण दक्षिणांसावधि न्यसेदिति। अत्र पुलिंगं गुदमिति केचित्। मुखशब्दः प्रत्येकं संबध्यते। कौमारः स्यादि
श्वमुखो देवमुखस्तथेति शारदातिलकवचनात्॥ उत्तरतंत्रे॥ प्रादक्षिण्यक्रमेणैव संसिच्य वततोजलैः। मेखलोपरि संस्पृष्टैः पुनर्दर्भचतुष्टयैः। दिक्क्रमेण परिस्तीर्य दिक्षु द्वीवर्हिमा
ल्वितः। निक्षिपेत्परिधीन्बाह्यलग्निस्थूलांशांस्तत्र पूजयेत्। दर्भचतुष्टयैः प्रागुदग्रैः॥ पूर्वाग्रैरुत्तराग्रैश्च दर्भैरग्निं परिस्तरेदिति गोभिलभाष्यकरपरामर्शिनीवचनात्। प्रागग्रैरथ दर्भैर्धनददिशा
ग्नेः परिस्तरेत्कुंडमिति भैरवीतंत्रवचनात्॥ त्रिमेखलकुंडे मध्यमेखलायां परिस्तरणपरिधिप्रक्षेपः कार्यः। तदुक्तं योगिनीतंत्रे। एकमेखलके कुंडे मेखलायां परिस्तरेत्। द्विमेखले द्विती
यायां मध्यमायां त्रिमेखल इति॥ ननु पश्चिममेखलासंलग्नतया नालस्य विद्यमानत्वात् मध्यमेखलायां परिस्तरणपरिधिप्रक्षेपः कथं भवेदित्याशंक्यामाह॥ उत्तरतंत्रे॥ नालेमे
खलयोर्मध्ये परिधेः स्थापनस्य तु। रंध्रं कुर्यात्तथापि हि नाममध्यस्थमेखलोपरीति। स्थंडिले सिकतामंडुयाह्वेभूमेः परिस्तरेदिति परिधयस्तु कात्यायनेनोक्ताः परिधीन्परिदध्याद्याज्ञेने
कवक्षीयान्वा कुमात्रान् पालाशवैकंकतकाश्मर्यवैल्वादीनि। स्थंडिके सिकतामां वा ह्येपविं न्यसेत्परिधीन्निति च ऐंद्रीवर्जं परिधीन्दिक्षु द्विपेदिति संबंधः। दिक्षु पश्चिमदक्षिणोत्तरा
सु। स्थविष्ठो मध्यमस्ताणीयान्द्राधीयान् दक्षिणार्धः कनिष्ठो कृसिष्ठ उत्तरार्ध इति। सूत्रितत्वात्॥ पश्चिमे उत्तराग्रो। अन्ययोः पूर्वाग्रं चेति। दक्षिणामूर्तिसंहितायां॥ प्रणीताप्रोक्षणीपु
ग्नेर्लं वा स्थंचतंतथेति। तत्रादौ स्थापनप्रकारमाह॥ कुंभसंभवः॥ प्रणीतायामप्रविधिवत्परिस्तीर्य कुशांतरैः। स्रुक्स्रुवौ क्रमविधानेन वामुदेशात्ततो मुने। पात्राण्यासाद्य विधिदिव्यं तं

श्री
१४३

© Dharmartha Trust J&K. Digitized by eGangotri

त्रेणमंत्रवित्। ताम्रजोक्ष्यपवित्रेणचोत्तानानि विधापयत्। पुनः प्रोक्ष्य जमेत्यात्रं परिपूर्य शुभांबुना। दत्ताक्षताम्बवित्रं च तत् दुतस्य निधापयेत्। दिक्षुत्तरस्यां तत्पात्रं प्रणीतेत्युच्यते बुधैः। ततः
किंचित्प्रणीतांबु प्रोक्ष्य एषा धायत जलैः। यत्तत्साधनसंभारं प्रोक्षयेन्मूलमंत्रत इति॥ उत्तरतंत्रे॥ आसनं वततो वह्नेः कल्पयित्वा प्रपूजयेत्। आसनं योगपीठं च प्रयोगे वक्ष्यते तथा।
कोणषट्के च मध्ये च जिह्वा अंगानि केसरे। तद्वाह्ये वसुमूर्तीश्च मध्ये वह्निं ततो यजेत्॥ वक्ष्यमाणेन विधिना गंधपुष्पादिभिः सुधीः। कोणषट्के च मध्ये च जिह्वाभिः केसरेषु च। अंग
मंत्रैस्ततो वाह्ये चाष्टमिर्मूर्तिभिः क्रमात्। ततोग्निमनुनानेन मंत्री मध्ये च संयजेत्। वैश्वानरजातवेदः प्राच्का देवावहेति च। लोहिताक्षपदं सर्वकर्माणीति समीरयेत्॥ ब्रूयाद्वसाधयेत्यंते
वह्निजायांतिको मनुः। मंत्रे सर्वाणि पदानि संबुध्यंतानि ज्ञेयानि॥ त्रिनयनमरुणप्राग्वमौलिं सुशुक्लांशुकमरुणमनेकाकल्पमंभोजसंस्थं। अभिमतवरशक्तिस्वस्तिकाभीतिहस्तं
नमत कनककमालालंकृतांसं कृशानुं। जिह्वाज्वालारुचः प्रोक्ताः वराभययुतानि च। अंगानि मूर्तयः शक्तिस्वस्तिको ध्यातदो द्वयः। कोणषट्के च मध्ये चेति संबंधः। तनु [illegible] कं सोमरांभोस
द्विद्वयवह्निमांसादवरुणानिलयोगेवरे। हिरण्याद्याः स्त्रिता वह्नेरसनाः षड्ऋक्रमात्। मध्यतो बहुरूपा स्थितेति॥ गणेश्वरपरामर्षिण्यां॥ मध्ये च कोणषट्के च जिह्वाः संपूजयेत्ततः॥
हिरण्या तप्तहेमाभा शूलपाणि दिशि स्थिता। वैडूर्यवर्णा कनका प्राच्यां दिशि समाश्रिता। तरुणादित्यसंकाशा रक्ता जिह्वाग्निसंस्थिता। कृष्णांजनचयप्रख्या नैरृत्यां दिशि सं-
स्थिता। सुप्रभा पद्मरागाभा वरुणस्यां दिशि संस्थिता। अतिरक्ता जपाभासा वायव्यां दिशि संस्थिता। बहुरूपा च यत्रोभा दक्षिणोत्तरमध्यगा॥ नारदपंचरात्रे॥ प्रभा दीप्ता प्रकाशा च
मरीचिस्तापिनी तथा। कराला लेलिहा चेति कुंडं व्याप्य व्यवस्थिता। ईशपूर्वाग्निदिग्भागे प्रभाद्यास्त्रितयं स्थितं। रक्षो वारुण वायव्ये मरीच्याद्यं त्रयं तथा। सौम्ये च मध्यमे याम्ये स्थि-
ते कराले लिहाभिधाभि। हिरण्यादीनि मि च नामांतराणि प्रभादीनि। यद्वा वैष्णवयागे ह्येताः स्वतंत्राः॥ तथा वायवीयसंहितायां॥ हिरण्या प्राग्गुदग्जिह्वा कनका पूर्वतः स्थिता। रक्ता-
ग्नेयी नैरृती च कृष्णा व्यासुप्रभा मता इति। अतिरक्ता मरुज्जिह्वा स्वनामानुगुणप्रभा। अन्या वारुणा॥ त्रिशिखा मध्यमा जिह्वा बहुरूपा समाकृया। तत्त्वैव कादक्षिणतो ज्वल-
नामतः परा॥ इति सात्विकजिह्वाः॥ राजस्यस्तामस्यश्च वक्ष्यंते॥ केचित्तु कुंडस्य मध्ये त्वधसाद् [illegible] जिह्वा हिरण्याभु चिकर्मेणादौ। तत्रमनादिषु मता कनकांते ईशयणादिषु मता
रक्तौ रक्ता मारणे निगदिता भुवि कृष्णा सुप्रभा बुधवरैरिह शांते। उक्तारक्तातिरक्तां तरिति वदंति। ज्वालारूव इति जिह्वानां ध्यानं॥ जिह्वाः सर्वाः परिहृष्याः ज्वालाभासः स्वरूपत
इति॥ प्रयोगसारवचनात्॥ एता ज्वालारूपा वीता वराभययुता अपीति॥ गणेश्वरपरामर्षिणीवचनाच्च॥ प्रपंचसारे॥ संस्कृते चलते नाग्नि द्योतनो द्योतने न च। स्वाहेत्य

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धा॰
१४४

144

नेतरं ते नकुर्युः ध्यात्मनुना त्रिशः ॥ अभिद्योतनोद्योतनाख्यसंस्कारद्वयसंस्कृतेति संबंधः ॥ अपरे तु संस्कारांतरमप्यंगीकुर्वंति । पिंगलामते । कुंडे
वाद्यादधाहेयाः संस्काराः शिवशास्त्रतः ॥ घृते तु विस्तुवेनाप्रुवितीति ॥ उत्तरतंत्रे ॥ समादाय घृतस्थालीमस्त्रमंत्रेण सेचयेत् । घृतं तत्र समापू-
र्य वीक्षणादिषु संस्कृतां वायव्ये वा घृतेंगारान्नैऋते कुलाते षु हृदा न्यसेत् । तापनं तु समुद्दिष्टं कुशाद्वयमतः क्षिपेत् ॥ आज्ये प्रज्वलितं वक्त्रे विन्यसे-
त घृतान्वितं । पवित्रीकरणं दर्भद्वयेन ज्वलितेन तु ॥ वर्मणा ज्वलं च नीराज्य वक्त्रो दर्भद्वयं क्षिपेत् ॥ अभिद्योतनमेतत्स्यादभिद्योतनमुच्यते । कुशं
प्रज्वलिते वाज्ये दर्शयेत हृदा क्षिपेत् । वक्त्राबुद्धास्य च घृतमंगारानग्निषु क्षिपेत् ॥ आपः संस्पृश्य मंत्रहृत् कुर्यादुत्पवनं ततः ॥ अस्त्रमंत्रेण
पवित्री कुशौ प्रादेशमात्रकौ ॥ अंगुष्ठानामिकाभ्यां च गृहीत्वा घृतमुत्पवेत् । ततो हृदा कुशाभ्यां तु स्वाभिमुख्येन सेचयेत् । घृतं तत्स्यात्संप्ल-
वनं वषट् संस्काराः प्रकीर्तिताः ॥ आज्यमिति ॥ उत्तमं गोघृतं प्रोक्तं मध्यमं माहिषीभवं । अधमं छागलीजातं तस्मात्कव्यं प्रशस्यते इति पिं-
गलामते । [illegible] । वीक्षणादिषु संस्कृते घृतमापूर्य मूलमंत्रेणाभिमंत्र्य धेनुमुद्रयामृतीकृत्य पश्चात् कुंडसंस्कारैः संस्कुर्यात् ॥ उक्तं शैवागमे ॥ गव्य-
माज्यं समादाय मूलमंत्राभिमंत्रितं । स्वकांतलमयीं मूर्तिं संचिंत्य परितापयेत् ॥ वायवीयसंहितायां ॥ न्यस्य मंत्रं घृते मुद्रां दर्शयेद्धेनुसंज्ञि-
तामिति ॥ वा घृतः कुंडस्यासादितिशेषः ॥ प्रज्वलितं कुशद्वयं । हृदा आज्ये क्षिपेदित्यन्वयः ॥ नीराजयन्नभितः परिभ्राम्य दर्भं दर्भद्वयं । दर्भाग्रा-
मग्नौ प्रक्षेपः ॥ प्रतिपत्तिकर्म । अत एव मंत्रोपि नोक्तः ॥ तेन दर्भनाशे सति अकृते पि प्रक्षेपे न वैगुण्यमिति ॥ अंगुष्ठानामिकाभ्यां हस्तद्वयेने- श्रीः
ति शेषः ॥ उत्पवेदग्निसंमुखमिति यावत् ॥ शैवागमे ॥ प्रादेशमात्रदर्भाभ्यामंगुष्ठानामिकाग्रकैः ॥ घृतं ताभ्यां संमुखं च करस्थेणोत्पवनं चरेत् ॥ उभय- १४४
त्र वह्निप्रक्षेप एव कुशानां प्रतिपत्तिकर्म ॥ शैवागमे ॥ गृहीत्वा स्रुक्स्रुवौ वा पूर्वमुखो वाप्युदङ्मुखो क्रमात् । घृतात्पात्रात्त्रिधा दर्भमूलमध्याग्रके-

© Dharmartha Trust J&K. Digitized by eGangotri

स्पृशेत्। मूलमध्याग्रदेशेषु आत्मविद्याशिवात्मकं। क्रमात्तत्त्वत्रयं न्यसेत्। क्रां क्रीं क्रूं बीजकैः प्रियेत्सुचि शक्तिं स्रुवे शंभुं विन्यस्य हृदयाणुना। त्रिसूत्रवेष्टितग्रीवौ पूजि
तौ कुसुमादिभिः। कुशानामुपरि स्थाप्य स्थापयेत्तौ स्वदक्षिणे। दर्भमूलादिभिः स्रुक्स्रुवयोः मूलादिस्पर्शः स्पर्शमभिधायोक्तं। उत्तरतंत्रे। ततस्तमादाय वामेन प्रोक्षयेद्दक्षपाणि
ना। भूयोग्नौ तौ प्रताप्याथ कुशानग्रेण निवेदयेत्। प्रताप्य त्रिशद्धृतिशेषः। उक्तं पिंगलामते। पुनस्त्रिशः प्रताप्याधोमुखावग्नौ कुशाग्रं क्षिपेत्। मूलमध्याग्रके न्यस्येत् छाकिरिका
दिकाः क्रमादिति। इच्छाज्ञानक्रियाः उत्तरतंत्रे। कुशद्वयं घृते न्यस्य ततः प्रादेशसंमितं। सग्रंथिं कृत्वा साग्रौ तौ शस्त्रं कृत्वा स्थो विचिंतयेत्। पक्षौ वामदक्षिणे पिंगलां मध्यतस्त
तः सुषुम्णां संस्मरेन्मंत्री ततो होमं समाचरेत्। सग्रंथिकुशद्वयमित्यन्वयः। दक्षभागात्कृहीत्वाज्यं स्रुवेणाथ हृदाणुना। जुहुयाद्दक्षनेत्रेग्नेः स्वाहांतां याग्नये इत्यतः गृहीत्वाथ
वामभागाद्धृतं वामे ग्निलोचने। जुहुयाद्धृदा सोमाय स्वाहेति वदेत्। कुः गृहीत्वा मध्यतस्त्वाज्यमग्नेरलिकलोचने। हृदाणुनाग्निषोमाभ्यां स्वाहेति जुहुयात्सुधीः। दक्षभा
गात्कृहीत्वाज्यं तु दो हृ त्वं जुहुयात्सुधीः। वक्त्रे वक्त्रैः स्विष्टकृते स्वाहेति च ततो गुरुः। सर्वत्र हृन्मंत्रस्त्वाज्यग्रहणे ज्ञेयः। शारदातिलके। सतारां भिर्व्याहृतिभिराज्येन जुहुयात्सुतस्मा
जुहुयादग्निमंत्रेण त्रिवारं देशिकोत्तमः। व्याहृतिभिर्व्यस्तसमस्ताभिस्तिसृभिः। प्रपंचसारे। … ध्यात्वेवमाकारं गर्भाधानादिकाय क्रमः। समुद्वाहावसानकाः। क्रियास्ता
रेणैव कुर्यादाज्याहुत्यष्टभिः पृथक्। शारदातिलके। गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा। वायवीसंहितायां। जातं ध्यात्वेवमाकारं जातकर्म समाचरेत्। नालापनय
नं कृत्वा ततः संशोध्य सूतकं। शिवाग्निरिति नामास्य कृत्वा कृतिपुरःसरं। ततोपनिषदं चैव पित्रोर्विसर्जनं कुलात् … पानयनादिकं। अथोद्वाहावसानेषु … संस्काराग्नेस्यचेति।
शिवाग्निरिति शैवेषु। अन्यत्र तु नारायणाग्निर्दुर्गाग्निरित्यादि। उत्तरतंत्रे। गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा। जातकर्म ततो नामकरणं चोपनिः क्रमं। अन्नप्राशनचौलोपनय
नानि ततः परं। महानाम्न्यं महाव्रतं च तदनंतरं। ततोपनिषदं चैव गोदानं तदनंतरं। समावृत्तं समुद्वाहः संस्कारा मरणांतिकाः। कूरकर्माणि कर्तव्या मरणांता … ए
तत्पर्यायश्च नारदपंचरात्रे। प्रणवं पूर्वमुच्चार्य ततः कर्म समुच्चरेत्। संपादयामि स्वाहेति सर्वकर्मस्वयं विधिरिति। सौत्रामणितंत्रे। विवाहांता वागभवेनैव जुहुयात्। … यो विधि
ल्पः। उत्तरतंत्रे। विवाहानंतरं त्वग्निमव … पितरौ संयोज्यात्मनि मंत्रविद्बुधः। यथासंप्रदायं ज्ञेयं। तथा। आघारं पद्मसंक्षिप्तः पंचाथ समिधो कुर्यात्। जुहुयाद्
सनांगाद्य मूर्तिमंत्रैः सकृत्सकृद्घृतैः। गणेश्वरपरामर्शिणां। ततो जुहुयाद्गर्भमंत्रादीन् सकृत् सकृत्। तन्नामांते निशितधीः स्वाहांतेश्च यथाक्रमं। विष्णुधर्मोत्तरे। मंत्रेणोंका

© Dharmartha Trust J&K. Digitized by eGangotri

रपूर्वेण स्वाहान्ते न विचक्षणः॥ स्वाहावसाने तु कुर्यादाद्यन्ते मंत्रदेवतामिति॥ आकृतिरिति॥ यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति॥ स्वाहान्तमंत्रस्तु तदंतेन क
तेव्यनः॥ उत्तरतंत्रे॥ चतुर्वारं स्रुवेणाज्यं गृहीत्वा स्रुचि निक्षिपेत्। तेनैव तां पिधायाग्नौ जुहुयात्तिष्ठन्गुरुः स्वयं वौषडंतेन यद्वा समन्तुना स्वपदेनातः॥ प्रपंचसारे॥ जिह्वायां मध्यसंस्थायां मंत्री
ज्वालावलीलग्नः तारा चैदस्य मिर्मंत्रैः पूर्वपूर्वसमन्वितैः॥ मनुना गणपस्येन जुहुयात्पूर्वदशाहुतीः॥ जुहुयाच्चतुर्वारं समस्तेनैव तेन तु॥ आज्येन साध्यमनुना पंचविंशतिसंख्यकं॥ जुहुयात्पूर्व
होमेषु सुधीरनलं तर्पयेत्। तांत्रिकानामयं न्यासो कृतानां समुदीरितः॥ गाणपत्येन महागणेशमंत्रेण॥ गणेशं परमं चिंत्यं॥ महागणेशमंत्रेण पूर्वपूर्वयुतेन तु॥ हारादिबीजष
ह्वकेषु कृत्येषु द्विवर्णैकैर्भिन्नेन दशधा तेन समस्तेन कुर्यात्क्रियां मंत्रः प्रयोगो वक्ष्यते। इषवः पंच॥ करणानी क्रियाणि पंच॥ अत्र इषवः सप्त॥ बीजषट्कं दशपदं छेदः॥ सर्वहोमेषु वह्निमिदा
नीअपयेत्। तत्प्रकारः प्रागेव प्रपंचितः॥ उत्तरतंत्रे॥ संपूज्य देवतापीठं वह्नौ सम्यक् ततो गुरुः॥ अग्निरूपधरां तत्र पूजयेदिष्टदेवतां॥ आज्येन साध्यमनुना पंचविंशतिसंख्यकं॥
कुर्यान्मंत्री यावत्प्रमुखवह्नेरेकीकरणं मतं। आत्माग्निदेवतानां वह्निं तर्पयेन्मात्मने कथमालृचिते। एकादशाथ मूलेन कुर्याद्दाज्येन वाहुतीः॥ नाडीसंधानमेवं हि प्रोक्तं देशिकसत्तमैः॥
त्रेगणप्रभृत्या वह्नीनां एकैकीमाहुतिं कुर्यात्। पूर्वादिदिक्षु कुंडेषु सर्वेष्वपि यथाविधि गुरुर्वह्निं प्रविहरेत्तं स्वकुलेषु कुवर्त्मना। सर्वैर्विलिख्य श्रुंदनाद्यैः संपूज्य प्रोक्तदेवताः। सर्वावरणसं
पुकं मूले न जुहुयात्ततः पंचविंशतिधा सर्पिः संयुतेन पयोऽथ सा॥ गायत्रीसंहितायां॥ स्रुवेणाज्यं समिल्लाप्य स्रुवाशेषकरेण वा। तत्र इध्मेन होतव्यं तीर्थमार्गेण तात्तथा॥ छंदोगप
व रिशिष्टे॥ देवेन तीर्थेन च हूयते हविः स्वंगारिणि स्वर्चिषि चेत्पावके॥ यो नर्विदित्तु हात्यग्नौ व्यंगारिणि कमान वः॥ मंदाग्निरामयावी च दरिद्रश्चोपजायते॥ तथा प्रपंचसारे॥ कुर्यात्तु देशिकः
पश्चान्मंडले बलिमाहरेत्। नक्षत्राणां सवाराणां सराशीनां यथाक्रमं। दद्याद्बलिं गंधपुष्पधूपदीपकमाद्दत्। ताराणामश्विन्यादीनां राशिः पादाधिकं द्वयं। मेषादिषु क्रमान्नक्षत्रसं
हापूर्वमनंतरं देवताभ्यः पदं प्रोक्ता दिवानक्तं वदेत्तथा। चारिभ्यश्चाथ सर्वेभ्यो भूतेभ्यो वै नमो वदेत्। एवं राशौ तु संपूर्णे तस्मिन् दत्वा यो नत्वभेत्। तथा राश्यधिपानां च ग्रहाणां तत्र तत्र च॥
सत्तानीकरणानां च दद्यान्मीना क्रमेण योः॥ अंतरांतर्बलिस्त्वेवं संप्रोक्तः सकलशात्मकः॥ पुनर्निवेद्य धूपपूर्ववत्परिपूज्य च सुखावासादिकं नाम तदंतदुक्तं पापुनः॥ सत्वाप था
वत्सलमे रुक्तियुक्तस्तु साधकः॥ मीना क्रमेण योरंतराले॥ ईशानपूर्वादिशामध्ये तथा तत्र राजेः॥ प्राच्यां मेषवृषौ वक्ते मिथुनौ दक्षिणे ... कुलीरसिंहौ वत तथा नैर्ऋत्यां कन्या
कास्थिता॥ तुलाकीटौ पश्चिमतो धनुर्वो यो तु संस्थितौ॥ तत्र कुंभौ तु उत्तरतो मीनमीनौ तु संस्थितमिति॥ ॥ इति श्रीविद्यार्णवे ... श्वासः॥ ॥ उत्तरतंत्रे॥ समुत्थापोन

श्री
३४५

© Dharmartha Trust J&K. Digitized by eGangotri

सितिलेऽङ्कुरः सर्पिरन्वितैः । पुनः साध्येनमनुना अष्टोत्तरसहस्रकं । द्रव्यैर्विधानज्ञोक्तैर्वा कुर्यात् दक्षाधिकं शतं । शिष्यं स्नातं पंचगव्यं प्राशयेन्मंत्रवित्तमः । कुंडस्याभ्यासमानी
य दिव्यदृष्ट्या विलोकयेत् । हृत्पुंडरीकाच्चैतन्यं तस्य स्वात्मनि योजयेत् । आचार्यस्ततश्च ध्यानं षड्विधं शोधयेत्क्रमात् । तत्कलातत्त्वभुवनवर्णपदामंत्रपूर्वकाः । अध्वानः षडेव संप्रो
क्तास्तेषां लक्षणमुच्यते । कलानिवृत्तिप्रमुखाः सद्ध्या पंचकीर्तिताः । शैवादिनिगमैर्भिन्नास्तत्त्वाध्वानो व कुक्रमाः । तत्र शैवानि तत्त्वानि षट्त्रिंशत्प्रमितान्यथा । वक्ष्यंते शिवशक्तीच स
दाशिव ईश्वरः । ततः विद्या चैतानि शुद्धानि शुद्धाशुद्धानि सप्त च । मायाविद्याकलारागः कालो नियतिरेव च । पुरुषश्चाथ प्रकृतिः प्रकृतिर्बुद्धिरहंकृतिः । मनश्चेन्द्रियदशकं तन्मा
त्राभूतपंचकं । उक्तानि शैवतत्त्वानि षट्त्रिंशन्मंत्रवेदिभिरिति ॥ अथ वैष्णवतत्त्वानि । द्वात्रिंशत्प्रमितानि च । वक्ष्यंते जीवसहितः प्राणो बुद्धिर्मनस्ततः । दशेन्द्रियाणि तन्मात्राभूतानां पं
कं तथा । हृत्पद्मं तेजसो चैव त्रयं चत्वारि एव च । वासुदेवादयः सौराः पुनर्यंते भूतपंचकं । तस्मात्मात्राश्चेन्द्रियाणि स्युर्मनोऽहंकारबुद्धयः । प्राधान्ये नियताः किं तु तत्त्वानि सुदेवैर्वहि
आत्मविद्याशिवा एते विपरीतास्त एव च । सर्वतत्त्वसंप्रोक्तास्तत्त्वाध्वान सुदेशिकैः । भुवनानीह सर्वाणि भुवनाध्वा प्रकीर्तितः । भुवनानि लोकाः । तेन कलाएवं ॥ अनललो
वितलश्चैव सुतलश्च महातलः । रसातलश्च तलदनुतलातल इति स्मृतः । पातालो भूर्भुवः स्वश्च महर्जनतपाह्वयाः । सत्यलोकश्च संप्रोक्ता लोकाएते यथाक्रमं । मात्रादिक्षांतो
सुधावर्णाध्वर्णाध्वानं प्रचक्षते । पादादौ ध्वावर्णवं दस्या मंत्राध्वा पदसंचयः । शिष्यस्मरेत्तान्यादौ धुम्रमिह कालमूर्ध्वसु । कूर्वेन्नगुरुः शिष्यं स्पर्शनं कुंडेऽस्य कुर्यात् । तिलै
र्घृताक्तैस्ताराद्यमनुकाध्वानमत्र वा । शोधयामि द्विठांतेन मंत्रेणाष्टाहुतीः पृथक् ॥ श्रीकुलार्णवे ॥ अङ्कुसंकरजालीनां नाध्वशुद्धिर्विधीयते ॥ पादादौ दक्ष सदानादोः
कुर्यात्पाशविमोचनं । तथा ॥ षडध्वनः क्रमाद्रूपमक्षविलाप्य शिवात्मनि । सदेहस्याविलीनांस्तान् शिवांतानाचतुर्हू नमः । देशिकं कृत्वा शिष्यं दृष्ट्वा दृष्ट्या दिव्यया । त
च्चैतन्यं स्थितं तस्मिं स्वात्मनि च नियोजयेत् । कुर्यान्महाव्याहृतिभिस्ततो देशिकसत्तमः । अग्निप्रभस्यावलीनां कुर्यात् कूर्मोघतेन वौमूरगश्चैव पश्चाद्यपदीपयेत् हुतामनुः ।
भूयोस्याद्भावयेन्नां तरिक्षाय वयुता मनुः ॥ स्वाराद्दित्याय च दिवे च युता मनुरोदितः । भूर्भुवः स्वः श्चंद्रमसे नक्षत्रेभ्यश्च पूर्वतः । दिग्न्यासतो वदेदेषमंत्रः प्रोक्तः सुरेशकः । मह
लिवह्निठांताः स्युर्महाव्याहृतिभिः त्रकाः । महते इति पदं भूरित्यादिवत्स संप्रपन्नेति । द्विठः स्वाहाकारः । अत्र लोर्पणाकमंत्रेण सर्वकर्मछिद्रेषु धीः । ... आदरकुर्तीरघोके
वलाद्येन मंत्रवित् । वदेदितः परं पूर्वं प्राणबुद्धितो वदेत् । देहधर्माधिकारं च तो जाग्रत्स्वप्नसुषुप्ति । वदेत्स्वस्थस्तु मनसा वाचा पदमुद्धरेत् । कर्मणावेन हस्ताभ्यां पज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

वि घार्ण
१४६
146

मुद्वरेण च। वदेच्छिष्यावयकेभ्यस्तं यत्पदमुद्धरेत्। उक्तं च यत्कृतं तच्च सर्वं ब्रह्मार्पणं भवतु स्वाहा। तच्च संकल्पो ब्रह्मार्पणम् नतमः। कृत्वा पूर्णाहुतिं मंत्री स्वयमेव लक्षणात्। ततः ब्र
ह्मार्पणमंत्रः प्रयोगे स्पष्टीक्रियते॥ कपिलपंचरात्रे॥ अर्धे पिलाघथा स्यायं तु कुर्याद्धि पुनः सुधीः। न्यूनातिरिक्तपूर्णार्थं दद्यामि सघृतं तिलं॥ विष्णुबीजं समुच्चार्य सांग
कुकुकूद्धिठः। यानुलोमाष्टमे वर्णे षष्ठोपान्त्यस्वराकुलं। अनेनैव समायुक्तं विष्णुबीजं प्रकीर्त्तितं। यानुलोमाष्टम हकारः। षष्ठस्वर ऊकारः। उपान्त्यस्वरो बिंदुः। शैवाग
मे॥ कलानुमडनामाग्निमप्यर्च्य प्रयतः पठेत्। सहस्रार्चिर्महातेजा नमस्ते वक्रतुण्डरूपधृक्। सर्वाशिने सर्वगत पावकाय नमोस्तु ते। तैरो ड्रो रौद्रकर्मा च घोरहा लंबनामितो॥
विष्णुस्त्वं लोकपालोसि शांतिमत्र प्रयच्छ मे। सर्पिषा स्रुचमापूर्य पुष्पं चोपर्यधोमुखं। स्रुगुपरि स्रुवं दत्वा पुष्पं तत्र प्रतापयेत्। सव्यान्तरकराभ्यां च संपुटाभ्यां वशं रक्षवह्नि। संग्रहोसाय सल
ग्नौ नाभौ तिर्यङ्निधाय च। पूर्णादर्वीति मंत्रेण मूलेन वसुसंमतः। दद्यात्पूर्णाहुतिं तिस्रः सर्वकामप्रपूरणीः। पुष्पदानं स्रुगुपरि॥ तदुक्तं गायत्रीसंहितायां॥ ततो होमावशिष्टेन चेत्
ना पूर्य वै स्रुवं। निधाय पुष्पं च तस्याग्रे स्रुवेणाधोमुखेन तां। सदर्भेण समाक्रम्य मूले नांजलिना ततः। वौषडंतेन तु कुर्याद्याज्ञरं जपसमन्वितां। पूर्णादर्वीति शास्त्राविशेषो वैदिके होमे
मूलेन वौषडंतेन स्वाहाकारं ततो होमे पूर्णायां वौषडुहीति लदीयवचनात्। कृत्वा च हविषा दद्यात् [?] वा पूर्णाहुतित्रयं। वौषडंतेन मंत्रेण वेदवेन सुरोत्तम इति॥ दर्वीहोमेषु पूर्णाम
ग्नौ॥ आज्येन स्रुचमापूर्य तेनापूर्य स्रुवं तल्लग्ने हयशीर्षपंचरात्रे वचनात्॥ घृताभावे तु नारदपंचरात्रे॥ अभावे तु घृतस्यैव होमद्रव्येण पूरयेत्। तस्योपरि घृतं दद्यात्तत्पूर्वं कृत्वा तु
मादिकमिति॥ दर्वीहोमेषु लक्षणं यथा॥ आज्येन स्रुचमापूर्य तेनापूर्य स्रुवं ततः। ततः दूर्वा अधोमुखं कृत्वा स्रुवमुत्थाप्य मंत्रवित्॥ ऋजुकायस्ततो मूलं नाभिमूले निधाय च। मूलं नमोन्तमुच्चा
र्य कामपादपुरःसरं। दद्यात्पूर्णाहुतीं मंत्री परामृतधियान्वित इति॥ गणेश्वरपरामर्शिन्यां॥ ॐ भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक। कर्मान्तरेपि संप्राप्ते सान्निध्यं कुरु सादरं।
इति मंत्रेण संप्रार्थ्य वह्निमुद्वासयेद्धीति॥ उत्तरतंत्रे॥ पुनः संपूज्य गंधाद्यैर्मूलमंत्रेण मंत्रवित्। कुंडादुद्धृत्य चाचार्यो देवतां कलशे न्यसेत्। सांगां सावरणां तत्र मूलमंत्रेण यथा
विधि॥ सप्तव्याहृत्यग्निजिह्वादीनामेकाहुतिं क्रमात्। कृत्वाद्भिः परिषिंच्याग्निमिति॥ कपिलपंचरात्रे॥ ततो ब्रह्माणमुद्वास्य ब्राह्मणाय प्रदापयेत्॥ द्वात्रिंशत्पलताम्रेण निर्मि
ताम्रपात्रकं। तंडुलेन समापूर्य सहिरण्यं सदक्षिणं॥ गुरुर्वेदाय तत्रस्थे पूर्णपात्रे विदुर्बुधाः॥ उत्तरतंत्रे॥ संपोष्य पात्राणि निमं त्रवित्॥ ततः परिस्तरान् मंत्रोपरि धीन्निक्षिपेत्सुत॥
निवेश्यैवेदिकेनां स्रुक्षिपेद्देशिकसत्तमः। वस्त्रेण नेत्रमंत्रेण। शिष्यनेत्रे निबध्य वा। कुंडाद्धृत्य समादाय तये मंडलसन्निधौ। सुमनोभिः प्रपूर्णां स्यपलललिं स्वशयेद्दर्पाम

श्री
१४६

© Dharmartha Trust J&K. Digitized by eGangotri

लमंत्रोच्चारपूर्वं देवतां कीलयेद्गुरुः॥ नेत्रबंधमपास्योपवेशयेत्कुशसंस्तरे। ततश्चापाठयेच्छिष्यं मंत्रमेनं गुरूत्तमः॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया। चक्षु
रुन्मीलितं येन तस्मै श्रीगुरवे नमः॥ अतः पूजाविधानेन संहरेज्जनयेद्व्रतं। तान्मूलान्शिष्यदेहे न्यासान्सर्वान्प्रविन्यसेत्। अभ्यर्च्य पंचोपचारैः कलशस्थदेवतां। ततो
कमलेनात्र सकलीकृतमाचरेत्। अथोपवेशयेच्छिष्यं भूषितं मंडलोत्तरे। कुंभास्यस्य सुरद्रुमस्य मूर्ध्नि न्यस्य शिशोर्गुरुः॥ अथ पंचनिनादैश्च विप्राशीर्वचनैः सह। सुस्थितं नि
यतात्मानं सिंचेत्कलशपुष्करैः॥ येन प्रकारेण पुरा पूरितस्थसुधारसैः। ततो ये रक्षरसंयुक्तैर्घटस्थैस्तैर्वतलोमातः। तथैवेनं त्वाभिषिंचेदाशु संपदर्थमस्य ये। गृहीत्वाभ्यर्चितं पूर्वं करकेह
स्वरूपिणं। ततोऽघोरमभिषिंचेन्नं रक्षायै देशिको नमः। जलेन शिष्यं गुरुराचमयेत्ततः। तद्देवतास्वरूपं च विदध्यात्सकलीकृतिं। वाससी विमले रम्ये परिधाप्य तदा गुरोः। आ
म्यग्निकरे तस्य विनिवेश्य ततः शिशुः। गुरुः संपूज्य शिष्यस्य देवतां भावयंस्ततः। एकं गुरुर्विनीतस्य सम्यक्तस्य मनुं त्रिशः॥ दक्षकर्णे वदेद्विद्वान्न विप्राणोदकपूर्वकं। अन्येभ्यस
वदेदेवमेवं मंत्रविचक्षणः॥ आगमस्य॥ स्वयं ज्योतिर्मयीं विद्यां गृहीत्वा भावयेद्गुरुः। आगतो मां वदेच्छिष्यो यत्नो सर्वातिविशेषतः॥ तथा॥ अष्टोत्तरशतं शिष्यः प्रजपेद्गुरुणोदितं।
अष्टाविंशतिवारं वा ह्यष्टकृत्वोऽथवा जपः॥ गुरुदेवात्ममंत्राणामैक्यं शिष्यो विभावयेत्। प्रणम्य विभवे कुर्यात्साधको भक्तिमान्गुरुः॥ सोऽष्टांगश्चाथ पंचांगः प्रणामकर्म सुसंमतः॥ हस्ता
भ्यां चरणाभ्यां जानुभ्यां वक्षसा तथा। मूर्ध्ना दृशा तथा वाचा चित्तेनाष्टांग ईरितः॥ हस्तजानुशिरोवाक्यधीभिः पंचांग ईरितः॥ आचार्यो हि ततः कुर्यात्साधकः शिष्यो विभावयन्। अलंका
रांश्च वासांसि दद्याद्दक्षिणामत्रादरात्। ईश्वरार्पणबुद्ध्या तु द्विजाशीर्भिश्च नंदितः॥ प्रदद्याद्गुरवे शिष्यो वित्ताद्यर्धं तदर्धकं। दशांशं वा प्रदद्याद्वा वित्तशाठ्यविवर्जितः॥ तदधीनमन
निर्हृत्य तच्चित्तस्तत्परायणः॥ तस्याकुंदाकुरजो भूषाभिर्वसाधकसत्तमः॥ तंत्रराजे॥ गुरवे दक्षिणां दद्यात्स लक्षाय शिवात्मने॥ सर्वस्वं वा तदर्धं वा तदर्धं वा तदा स्वयं। न चेत्तच्छक्तिसंको
चः कथमस्य भविष्यति॥ गजाश्वमहिषीमेषपश्वदासीमहीयुतं। सुवर्णभूषणैर्वासोभवनैर्वान्यदीप्सितं। दद्याद्यथाशक्ति तोऽर्पयेत्॥ तथा॥ ततो नापि धेर्मंत्रैर्लेभ्यो ... येस्तु ये
तरैः॥ ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याद्भूरिदक्षिणां। एवं क्रियामयी दीक्षा संवक्राद्भिनिरूपिता। अत्रोदपूर्वकमित्यनेन गोहिरण्यवत्मंत्रस्य प्रदानं प्रतीयते। दानं तु स्वस्वत्वपरित्यागपूर्वकं
विधिवत्परसत्त्वापादनरूपं भवति। तत्तु कापि शिष्याय मंत्रं दत्त्वा पुनस्तं मंत्रं गुरुर्न जपति नाराधयति पुनरन्यस्मै कस्मैचित्तं ददाति च तन्मंत्रसंप्रदायो वा। न दृश्यते तस्मादुदकदा
नं चौपचारिकमिति वाच्यं तर्हि चतुर्णामपि वर्णानामुदकदानं साधारणं केषां न स्यात्। दीक्षायां विशेषाभावाद्दोषपकारिकत्वाच्च। तस्मादुदकदानं मंत्रदानरूपमेव। तत्र परसत्त्वापादने कृते

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
१४७

पिस्य सत्तापरित्यागराहित्यं तु कन्यादानवज्जवितुमर्हति। यास्तां विचारः॥ अनंतरोक्तवर्णात्मदीक्षां वक्ष्ये यथाविधि॥ पुंप्रकृत्यात्मकत्वं हि वर्णानां समुदीरितं॥ तादृक्त्वेनैव श
ततस्तनौ शिष्यो न्यस्य वर्णान् देशिकसत्तमः। संहरेद्वैपरीत्येन वर्णान् तत्स्थानसंस्थितान्॥ देशिकेन्द्रस्य सामर्थ्याद् दृत्या देवतात्मनः॥
शरीरस्य प्रोक्तमेवास्ति देशिकैः॥ ततस्तु शिष्यचैतन्यं परमात्मनि योजयेत्॥ तन्मयीं स्तत उत्पाद्य न्यसेच्छिष्यशरीरके॥ तस्मिंश्च सृष्टिक्रमतस्तत्त्वेन न्यसेत् पुनः न्यसे
देवतात्मा भवेच्छिष्यस्तदा संलीनतत्त्वकः॥ ज्ञानात्मिवमयी दीक्षा कथिता सर्वसिद्धिदा॥ अथोच्यते कलात्मादीक्षादिव्यत्वदायिनी॥ कलानिवृत्तिप्रमुखाः पंचतां पं
त्। भवेच्छिष्यो देवतात्मा नित्यानंदात्मकः शिशुः॥ पादाज्जानुपर्यंतं निवृत्तिः संस्थिता कला॥ जान्वोः सकाशादानाभि प्रतिष्ठाख्या कला स्थिता॥ नाभितः कंठपर्यंतं वि
द्यारिता॥ शिष्यकाये भूतमये वेधयेत्ताः क्रमात्सुधीः॥ पादाज्जानुपर्यंतं संस्थिता कला॥ ललाटाच्छिरोवधि प्रोक्ता शांत्यतीता कला तथा॥ सप्तधा क्रमतो विद्वान् वेधयेत्तत्र मंत्रतः स्थाने स्था
द्याख्या संस्थिता कला॥ कंठतो ललाटं तु शांत्याख्या संस्थिता कला॥ अथ वेधात्मिका दीक्षा प्रोच्यते भवमोचनी॥ चतुर्दले स्मरेत्पद्मे मूलाधारे शिशोस्तनौ॥ धामत्रितयसंयुक्ते त्रिकोणे कं विलेख
याल्या वैषा कलादीक्षा समीरिता॥ अथ वेधात्मिका दीक्षा साक्षात्तान्मात्रस्वरूपिणी॥ अरुणोरणीयसीं देवीं च कुषट्कप्रभेदिनीं॥ सुषुम्णावर्त्मनादिव्यां यांतीं शिवग
धीः॥ त्रिरावर्तमयीं देवीं विद्युत्पुंजस्वरूपिणीं॥ महादेवमयीं साक्षात् तां न मात्रस्वरूपिणीं॥ षट्कलेकमलेतं तु क्रांतवा चतुर्णामुद्दले॥ स्वाधिष्ठाने गुरुः सम्यक् योजयित्वा तु वेधयेत्॥ दलार्णानानयेद्धि
हृ प्रति॥ सांतान् वादीन् बलस्थार्णान् पयोमौ समाहरेत्॥ षट्कले कमले तं तु क्रांत वा चतुर्णामुद्दले॥ डांत का चार्णपत्रा कें वेधयेदीश्वरे स्वयं॥ वर्णांस्तान् संहरेदस्मि
न्नेवि लुप्तं नाभिर्यकं तेः॥ फांत डा चार्णसंयुक्ते द्विद्ग्दले वेधयेत्स्वयं॥ वर्णांस्तान् योजयेद्रुद्रे तं हृत्सरोरुहे॥ ठांतका चार्णपत्राकें वेधयेदीश्वरे स्वयं॥ सदाशिवे च संयोज्य तांस्तान् क्रमशः पंपके॥ द्विदले हक्षसंयुक्ते वेधयित्वा तु देशिकः॥ हक्षौ वा हरेद्विंदौ कला
न्के तप मे वतं तथा॥ कलामय दले पद्मे स्वरान् संयोज्य पलतः॥ सदाशिवे च संयोज्य तांस्तान् क्रमशः पंपके॥ विषुवक्रे स्वके चक्रे संहरेद्देशिकः स्वयं शक्तया सहैव मालाने नयेत्तु रश्मिवावधि
वामा हरेच्चतां॥ कलां नादे समायोज्य नादं नादांतके पुनः॥ नादांतमुन्मनीतमध्ये विषुवक्रे तथोन्मनीं॥ विषुवक्रे स्वके चक्रे संहरेद्देशिकः स्वयं शक्तया सहैव मालाने नयेत्तु रश्मिवावधि
देशिका हान्त्रशक्तिर्ध्यो दर्शिता नन्सदाशिवेक्षितौ॥ पतेद्वा पतिहानः सर्वज्ञो जायते ततः॥ सदाशिवः स्वयं भूयात् समस्तसंशयः॥ ज्ञानप्रदाम याप्रोक्ता दीक्षा वेधात्मिका गु
रो॥ चतस्रस्त्वेवमुद्दिष्टा दीक्षाः सम्यक्शुभावहाः॥ कुलार्णवे॥ हस्ते शिवपुरं ध्यात्वा जपमूलांगमालिनीं॥ गुरुः स्पृशेच्छिष्यतनुं स्पर्शदीक्षा भवेदियं॥ चिंतं तत्त्वसमाधाय परतत्त्वे
पदे हितान् तव उच्चरेत् संहृतान्मंत्रान् वाग्दीक्षेति निगद्यते॥ निमील्य नयने ध्यात्वा परतत्त्वप्रसन्नधीः॥ सम्यक्पश्येद्गुरुः पश्यं दृग्दीक्षा सा भवेदियं॥ गुरोरालोकमात्रेणभाष

श्री
१४७

© Dharmartha Trust,J&K. Digitized by eGangotri

एताहस्पर्शनादपि। सद्यः संजायते ज्ञानं सा दीक्षा शांभवी मता। क्रियासिद्धं ततः शास्त्रार्थसंप्रदायादिहेतुभिः। अंतरेणोपदिष्टा येनं आस्फुर्त्यैव फलायतः। देवास्तमे
वशं संति पारंपर्यप्रवर्तकं। गुरुमं आगमाभिज्ञं समयाचारपालकं। गुरुः शिष्याधिकारार्थविरक्तोपि शिवाज्ञया। कंचित्कालं विधार्येत तत्सुशिष्याय समर्पयेत्।
तस्यार्पिताधिकारस्य योगः साक्षात्परे शिवे। ततस्तु शांभवी मुक्तिरिति शंकरभाषितं। तस्मात्सर्वप्रयत्नेन साक्षात्परशिवोदितं। संप्रदायमविच्छिन्नं सदाकु
र्याद्गुरुः प्रिये। भुक्तिमुक्तिप्राप्त्यर्थं परीक्ष्य विधिवद्गुरुः। पश्चादुपदिशेन्मंत्रं अन्यथा निःफलं भवेत्। अन्यायेन च यो दद्या [illegible] न्यायतश्च यः। ददद्योग
फलतो देवि कुलशापो भविष्यति। गुरुशिष्यावुभौ मोहादपरीक्ष्य परस्परं। उपदेशो ददन्नूनं लभन्नूप्राकृप्यातां पिशाचतां। अशास्त्रीयोपदेशं तु योगं लभेति ददाति यः।
भुंजाते तावुभौ घोरान्नरकानेकविंशतिं। असंस्कृतोपदेशं तु यः करोति विमूढधीः। विनश्यति च तन्मंत्रं सैकते शालिबीजवत्। अनर्हे तत्वविज्ञानं न तिष्ठति कदाच
ना। तस्मात्परीक्ष्य यत्नेन अन्यथा निःफलं भवेत्। सद्भिर्व्याख्याति भक्ताय यत्तत्ज्ञानमुपदिश्यते। तत्सम्पद्यति तत्त्वं गोक्षीरामृतं यथा। धनेलाभयुलोभाद्वोरखोग्यं
पूरिदीक्षयेत्। देवताशापमाप्नोति कृतं च विकृतं भवेत्। उत्तरतंत्रे॥ पूर्णाभिषेकं वक्ष्यामि साधकानां शुभावहं। विनाप्येनाभिषेकेण साधकः पूर्णबोधतां। आगा
येत्वं समाप्नोति सऊतिं च समीहितां। तस्माद्गुरुः प्रियं शिष्यं बोधयित्वाभिषेचयेत्। विरम्य विपुलं चक्रे मंडपेति मनोरमे। शिष्यस्य जन्मनक्षत्रे प्राग्वत्तेरभिषेचये
त्रिसूत्रयं पूर्णाभिषेकः स्यात्साधकाभीष्टसिद्धिदः॥ खारीलक्षणं तु स्कंदपुराणे॥ खारीतोयपूर्णं तं कुंभे स्थापयेच्च क्रमध्यतः। अन्येषु कलशान्नूतनान् रत्नवस्त्रहेमसमन्वि
तान्। दलेषु विधिवत्तस्याप्य तत्रावाहयेदिष्टदेवतां। अभ्यर्च्य मध्ये वान्येषु कोणावरणदेवताः। शिष्यस्य जन्मनक्षत्रे प्राग्वत्तेरभिषेचयेत्। अयं पूर्णाभिषेकः स्यात्साध
काभीष्टसिद्धिदः। खारीलक्षणं तु स्कंदपुराणे॥ पलद्वयं तु प्रसृतं कुडवं द्विगुणं मतं। चतुर्भिः कुडवैः प्रस्थः आढकैस्तैश्चतुर्गुणैः। चतुर्गुणो भवेद्द्रोणः कुंभस्तद्द्विगुणः स्म
तः। कुंभैस्तैरष्टभिः खारीति॥ ॥अथ दीक्षाप्रयोगः॥ तत्रैवं विचार्य विहितकालेषु दीक्षादिनात्पूर्वदिने शिष्यः प्रातः स्नातः कृतनित्यकृत्यः समलंकृतः पंचगव्य
घोषपुरःसरं ब्राह्मणैः कृतस्वस्तिवाचनः प्रियसुहृद्भिः सार्धं स्वयं गुरुगृहं गत्वा तं विधिवत्प्रणम्य तदाज्ञया प्राणायामपुरःसरं ॐ अद्यामुके मासि अमुकरा
शिगते सवितर्यमुकपक्षे अमुकतिथौ अमुकगोत्रो ब्राह्मणश्चेदमुकशर्मा क्षत्रियश्चेदमुकवर्मा वैश्यश्चेदमुकगुप्तः शूद्रश्चेदमुकदासोहं चतुर्विधपुरुषार्थसि

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ आर्णव
१४८
148

द्धिकामो ऽमुकमंत्रग्रहणं करिष्य इति कृताहृताः प्राङ्मुख उदङ्मुखो वा संकल्प्यैवं विधाय प्रमाणोक्तमधुपर्कसामग्रीभिः स्वशाखोक्तविधिना श्रीगुरुं मधुपर्केणाभ्यर्च्य धौ
तोत्तरीयप्रकल्पपट्टस्वर्णाङ्गुलीयककर्णाभरणस्थलीपूतोपवीतहारकेयूराङ्गदादिनानाभरणछत्रवासशोपानद्युगलशय्यासनासनारणसंपन्नां वरणसामग्रीं गुरुसं
निधौ निधाय याचेत्यादि प्रागुक्तिपक्षे स्वमन्त्रेते ऽमुकगोत्रो ऽमुकशर्मेत्यादि यथावरणविहितममुकाचार्यमहं चतुर्विधपुरुषार्थसिद्धिकामो ऽमुकमंत्रग्रहणार्थममुकगोत्र
ममुकवेदान्तर्गत ऽमुकशाखाध्यायिनममुकमेभिर्यथाशक्ति विहितवरणसाधनैर्गुरुत्वेन वृणे। इति गुरुपादयोः प्रणम्य वरणसामग्रीं निवेदयेत्। ततो वृतो ऽस्मी
ति गुरुणा प्रतिवचने दत्ते शिष्यः कृताञ्जलिः यथोक्तं गुरुकर्म कुरुष्वेति ब्रूयात्। ततो गुरुः करवाणीति प्रतिब्रूयात्। इत्थं गुरुं वरणं विधाय तदनुज्ञया ऽष्टौ ब्राह्म
णान् वेदवेदाङ्गपारगान् स्वेष्टदेवतोपासकान् प्राग्गुरुवरणोक्तसामग्रीभिस्तथैव ऋत्विक्त्वेन वृणुयात्। चतुःकुण्डपक्षे चत्वार एव ऋत्विजः कार्याः। ततः शिष्येणै
वं वृतो गुरुः कृतनित्यकृत्यः समलंकृतः पंचवाद्यघोषपुरःसरं ब्राह्मणैः सुहृज्जनैश्च वृतः शिष्येण सह मंडपद्वारं गत्वा वक्ष्यमाणविधिना द्वारपूजां विधाय
तथैव भक्तोत्साहनपूर्वकं मंडपान्तः प्रविश्य तथैव पंचगव्याद्यैस्तोयप्रोक्षणपूर्वकं वक्ष्यमाणदीक्षणादिचतुर्भिः संस्कारैः संस्कृतमंडपाभ्यन्तरे चंदनागरुकर्पू
र धूपितं चंदनसर्षपदूर्वाभस्माक्षतलाजान् अस्त्रमंत्रेण सप्तधाभिमंत्रितान् मंडपान्तर्विकीर्यास्त्रमंत्रेण कुशमुष्टिना संमार्ज्य मंडपस्यैशान्यकोणे संस्थाप्य ब्राह्मणैः
पुण्याहवाचनं कारयित्वा वास्तुपुरुषपूजादिकं विधाय भैरवाह्वापुरःसरं वेदिकायामासीर्य वक्ष्यमाणविधिना संपूज्य तत्र प्राङ्मुख उपविश्य स्वपुरतः सुसमभू
तले वेदिकोपरि सर्वतोभद्रमंडलं कुर्यात्। तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च सप्तदश सप्तदश रेखाः कृत्वा षट्पंचाशदुत्तरशतद्वयकोष्ठयुतं चतु
रस्रमंडलं कृत्वा तन्मध्यगतद्वात्रिंशत्कोष्ठान्येकीकृत्य तद्बहिश्चार्द्धदिक्ष्वेकपंक्तिं परितः संमार्ज्यैकीकृत्य पीठं परिकल्प्य तद्बहिश्चतुर्दिग्गतपंक्तिद्वयमेकीकृत्य
संमार्ज्य वीथीं परिकल्प्य सर्वमध्यगतसरोजस्थानं बहिः परितो द्वादशभागं परित्यज्य सर्वमध्यावलंबनेन समान्तरालं वृत्तत्रयं निष्पाद्य तत्र सर्ववृत्तमध्यक
र्णिकां परिकल्प्य तद्बहिर्गतवृत्तवीथीं केसरार्थं परिकल्प्य केसरस्थानं षोडशधा विभज्य तच्चिह्नावलंबनेन द्वितीयतृतीयवृत्तयोरंतराले मानसूत्रमानेन श्री
रक्तयुक्त्या षोडशार्धचंद्रान् परिकल्प्य तेनाष्टदलानि कृत्वा तृतीयवृत्ताद्बहिः स्पृक्कैकांशतोऽपि मध्याच्चिह्नावलंबनेन वृत्तांतरं निष्पाद्य गुरुः कृपयुक्त्यापत्राग्रा १४८

© Dharmartha Trust J&K. Digitized by eGangotri

णि विधायैकैकदलमूले केसरद्वयं यथा दृश्यते तथा विरच्य पक्षांकुलापन्न बहिर्गतैकपंक्तिरूपचतुरस्रपीठस्य कोणचतुष्टयेपि कोष्ठत्रयेण कोष्ठत्रयेण पीठपीठपादा
न्परिकल्प्यावशिष्टकोष्ठैरेकीभूतैः पीठगात्राणि विधाय तद्बहिर्गतपंक्तिद्वयकोष्ठानि सम्यक्प्रमार्ज्य तद्बहिर्गतपंक्तेश्चतुर्दिक्षु मध्ये मध्ये कोष्ठद्वयं कोष्ठद्वयमे
कीकृत्य सर्ववाह्यगतपंक्तेरपि चतुर्दिक्षु प्रतिदिशं कोष्ठचतुष्टयमार्जनेन द्वारचतुष्टयं परिकल्प्य द्वारचतुष्टयस्यापि पार्श्वयोः पंक्तिद्वयगतकोष्ठेषु अंतःपंक्तेः
कोष्ठत्रयं बहिःपंक्तेः कोष्ठमेकमिति कोष्ठचतुष्टयमेकीकृत्य शोभां विधाय तत्पार्श्वयोरप्यंतःपंक्तेः कोष्ठमेकं बहिःपंक्तेः कोष्ठत्रयमिति कोष्ठचतुष्टयं कोष्ठचतुष्टय
मेकीकृत्योपशोभां विधायावशिष्टैः षड्भिः कोष्ठैश्चत्वारि कोणानि कल्पयेदिति सर्वतोभद्रमंडलं निर्माय सरोजकर्णिकाकेसरदलाग्रपीठवीथीद्वारशोभोपशोभाको
णस्थानानि पंचवर्णरजोभिर्भूषयेत् । पंचवर्णरजांसि तु हरिद्राचूर्णं पीतं रजः तंडुलचूर्णं शुक्लं कुसुंभकुसुमचूर्णं रक्तं दग्धतंडुलचूर्णं कृष्णं बिल्वपत्रचूर्णं श्याममिति रजो
विन्यासप्रकारस्तु सीमागताः सर्वे रेखाः शुक्लेन रजसा एकांगुलोत्सेधविस्तारयुताः कार्याः पीतरजसा कमलकर्णिकां केसराणि च समापूर्य शुक्लेन रजसा दलानि च संपूर्य श्या
मरजसा दलसंधीनापूरयेत् । अथवा कर्णिकां पीतेन केसरान् पीतरक्ताभ्यां दलानि रक्तेन दलसंधीन् कृष्णेन रजसा संपूर्य पीतेन कृष्णेन वा पीठगर्भमापूर्य पीठपादान् रक्ते
नापूर्य पीठगात्राणि शुभ्ररजसापूर्य वीथीचतुष्टये कल्पवल्लीः कोरकपुष्पपल्लवफलमंडिता नानावर्णरजोभिरारचय्य शुभ्रेण रजसा द्वारचतुष्कमापूर्य रक्तवर्णेन द्वारशोभाः
पीतेनोपशोभाः कृष्णेन कोणानि चापूर्य तद्बहीरेखात्रयमेकैकांगुलांतरालं शुक्लरक्तकृष्णरजोभिः कुर्यादिति सर्वतोभद्रमंडलं विधाय जे दीपरितो दीपान् प्रज्वाल्य वक्ष्यमा
णवक्ष्यमाणविधिना पूजाद्रव्याण्यासाद्य तत्रैव तानि संस्कृत्य छत्रचामरद्वयदर्पणव्यजनादिकं च यथायथं निधाय गुर्वादिवंदनपूर्वकं करशुद्धितालत्रयदिग्बंधनाग्नि
प्राकारत्रयभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यासमूलमंत्रन्यासांश्च विधाय मुद्राविरचनस्वेष्टदेवताध्यानमानसपूजांते वैश्वदेवमूलमंत्रजपतत्समर्प
णार्घ्यस्थापनात्मपूजांतर्हवनमूलमंत्रजपतत्समर्पणानि विधाय सर्वतोभद्रमंडलाय नमः इति मंडलं गंधादिपंचोपचारैः संपूज्यार्घ्यजलेन प्रोक्ष्य तत्र वक्ष्यमाणविधि
नापीठपूजां विधाय तत्कर्णिकां शालिभिरापूर्य तंडुलान् कुशान् दूर्वाः सप्तविंशतिभिः कुशैरेकीकृताग्रविरचितब्रह्मग्रंथिकं कूर्चं च निधाय तत्र वक्ष्यमाणविधिना शालिपुंजोप
रि वह्निमंडलं वह्निकलाश्च संपूज्य तत्र स्वर्णादिनिर्मितं त्रिगुणीकृतसूत्रवेष्टितसर्वांगं चंदनागुरुकर्पूरधूपधूपितं कुंभं प्रणवमुच्चरन् संस्थाप्य तत्र पुष्परागनीलं

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्ण
३४९

149

दूर्वाविद्रुममौक्तिकमरकतवज्रगोमेदपद्मरागाख्यानि नव रत्नानि सुवर्णानि निक्षिप्य कुंभस्योपरि गंधाक्षतदूर्वान्वितप्रागुक्तलक्षणं कूर्चं निधाय तत्र लं क्षं इत्यादि विलो-
म मातृकान्ते मूलमंत्रं त्रिर्जपन् आत्मनः कुंभस्य योगपीठस्य चैक्यं भावयन् वक्ष्यमाणपंचाशदक्षरैरवधिकार्थैरश्वत्थोदुंबरप्लक्षवटकाष्ठैः कर्पूरचंदनकस्तूरीकुंकुमवासि-
तैस्तीर्थजलैर्वा कुंभमापूर्य तत्पुरतो वक्ष्यमाणविधिना शंखं संस्थाप्य कुंभपूरितजलसजातीयजलेनापूर्य तत्र गंधाष्टकं विलोड्य तत्र वक्ष्यमाणा वह्निकलाः सूर्यकलाः सोमकलाः
श्चावाह्य तासां पृथक्पृथक्प्राणप्रतिष्ठां विधाय संपूज्य प्रणवोल्लेखपूर्वकं कला वक्ष्यमाणकलामातृकान्यासोक्ताः संपूज्याः। तत्र प्रथमम् अकारादुत्पन्नाः कचवर्गो-
त्थाः सृष्ट्यादि दश कलाः समावाह्य हंसः शुचिषदित्यस्य वामदेव ऋषिर्जगती छंदः सूर्यो देवतेति ऋष्यादीन् स्मृत्वा ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरो-
णसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति मंत्रमुच्चार्य ब्रह्मणे नम इति संपूज्य पूर्वोक्तप्राणप्रतिष्ठामंत्रेण ममपदस्थाने सृष्ट्यादीनामिति पदं द-
त्त्वा सृष्ट्यादीनां प्राणप्रतिष्ठां विधाय ॐ कं सृष्ट्यै नम इत्यादि दश कलाः संपूज्य उकारादुत्पन्नाः टतवर्गोत्थाः जरादि दश कलाः समावाह्य ॐ प्रतद्विष्णुस्तवते वी-
र्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा इति पठित्वा विष्णवे नम इति संपूज्य प्राग्वज्जरादि दश कलानां प्राणप्रतिष्ठां विधा-
य जरादि दश कलाः संपूज्य मकारादुत्पन्नाः पफवर्गोत्थाः तीक्ष्णादि दश कलाः समावाह्य ॐ त्र्यंबकमिति मंत्रस्य वसिष्ठ ऋषिरनुष्टुप् छंदः त्र्यंबकरुद्रो देवता इति ऋष्या-
दिकं स्मृत्वा ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम्। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति पठित्वा ॐ रुद्राय नमः इति संपूज्य तासां प्राणप्रतिष्ठां विधाय ॐ पं ती-
क्ष्णायै नम इति संपूज्य ईश्वरादिं दोत्पन्नाः षकारादिक्षकारांताः पंचवर्गोत्थाः पीतादि पंच कलाः आवाह्य ऋष्यादिस्मरणपूर्वकं गायत्रीमुच्चार्य ईश्वराय नम इति संपूज्य ता-
सां प्राणप्रतिष्ठां विधाय ॐ षं पीतायै नम इत्यादि पंच कलाः संपूज्य ततो नादोत्थाः सदाशिवादुत्पन्नाः स्वरजातनिवृत्त्याद्याः षोडश कलाः समावाह्य विष्णुर्योनिं कल्पयत्विति
मंत्रस्य त्वष्टा गर्भकर्त्ता ऋषिरनुष्टुप् छंदः विष्णुर्देवतेति ऋष्यादिकं स्मृत्वा ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते इति पठि-
त्वा सदाशिवाय नम इति संपूज्य तासां प्राणप्रतिष्ठां विधाय ॐ निवृत्त्यै नम इत्यादि षोडश कलाः संपूज्याः। इत्थं चतुर्णवति देवताः शंखे संपूज्य सकलकलामयं शंखजलं
मूलमंत्रेण कुंभे संयोज्य ततोऽश्वत्थपनसाम्रइपल्लवानि दूर्वाकुणीलतया संवेष्ट्य कल्पवृक्षधिया कलशे निधाय तदुपरि कलशसजातीयं तंडुलपूर्णं नारिके-

श्री
३४९

© Dharmartha Trust J&K. Digitized by eGangotri

लं फलाद्यं कल्पवृक्षफलं बुध्वा पात्रे संस्थाप्य पट्टवस्त्रयुगेन धारं संवेष्टयेदिति वेद्यां प्रधानकुम्भस्थानं विधाय पूर्वादितोरणसमीपे प्रागुक्तमण्डलेष्वष्ट
दलकमलेषु वा शालिपुंजोपरि प्रागुक्तविधिना प्रतिद्वारमेकमेकं स्थापयेत् तत्र पूर्वदिग्गतकुम्भे ध्रुवं दक्षिणे धरं पश्चिमे वाक्पतिमुत्तरे विघ्नेशं च संस्थाप्य तद
दाग्नेयादिकोणचतुष्टये कुम्भान् संस्थाप्याग्नेयकुम्भेऽमृतं नैरृत्ये दुर्जयं वायव्ये सिद्धार्थं ईशाने मंगलं च संपूज्य पुनः पूर्वादिकुम्भेषु इन्द्रादिलोकपालान् वा संवेद
क्तमन्त्रेण संपूज्य पुनः पूर्वादिषु दिक्षु कुम्भाद्बहिरैरावतं पुण्डरीकं वामनं कुमुदं अंजनं पुष्पदन्तं सार्वभौमं सुप्रतीकं च पूजयेदिति दिग्गजान्संपूज्य पुनरुक्तवेद्यां गता
स्वासने समुपविश्य स्वेष्टमन्त्रेण प्राणायामत्रयं कृत्वा तस्य मन्त्रस्य ऋष्यादिकरषडंगन्यासपूर्वकं सकलन्यासजालं विधाय देवतां ध्यात्वा मानसोपचारैः संपूज्य प्र
धानकुम्भे वक्ष्यमाणप्रकारेण मूर्त्तिं परिकल्प्य तत्र स्वेष्टदेवतामावाह्य वक्ष्यमाणप्रकारेण षोडशोपचारैः सांगावरणां तत्कल्पोक्तविधिना संपूज्य वेद्या दक्षिण
भागे हस्तमात्रायामविस्तारमंगुष्ठपर्वमात्रोच्चं वालुकाभिः समचतुरस्रं स्थंडिलं कृत्वा वक्ष्यमाणनित्यहोमप्रोक्तविधिना वह्निं संस्थाप्य चरुं श्रपयित्वा तत्र देवतामावाह्य संप
ूज्य नित्यहोमोक्तविधिना साज्येन तेन चरुद्रव्येण हुत्वा पुनर्देवं संपूज्य कुम्भस्थमूर्त्तौ संयोज्य तथैव वह्निं संपूज्य विसृज्य वक्ष्यमाणविधिना सर्वभूतबलिं तत्कल्पोक्तबलिदा
नं च विधाय देवायोत्तरापोशनादि नीराजनांतं नित्यपूजोक्तविधिना विधाय प्राणायामत्रयं ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरसहस्रं जपित्वा देवाय वक्ष्य
माणविधिना तं समर्प्य एवं मंडपस्येशानकोणे स्थापितविकिरपुंजोपरि सुवर्णं वस्त्रयुग्मवेष्टितं जलपूरितं करकं विन्यस्य तत्रास्त्रदेवतां सिंहरूपां दक्षवामकरयोः
खड्गखेटकधारिणीं घोररूपां पश्चिमाभिमुखां ध्यात्वा तिष्ठ त्वं गंधादिपंचोपचारैः संपूज्य नमस्कृत्य तं करकं कराभ्यामुद्धृत्य मंडपाभ्यंतरे प्रदक्षिणं भ्रमन् करकं स्वस्थाने निवे
श्योपवेश्यास्त्रमंत्रेण पुनस्तामस्त्रदेवतां पंचोपचारैः संपूज्य ततः प्राकृतेषु कुंडेषु ईशानयोर्मध्यगताचार्यकुंडे गुरुरग्निस्थापनं कुर्यात् ॥ तत्रादौ कुंडं गोमयेनोपलिप्य कुंडस
दा मीपे नित्यपूजोक्तविधिना स्वासनमास्तीर्य संपूज्य तत्रोदङ्मुखः प्राङ्मुखो वोपविश्य मूलमंत्रेण प्राणायामऋष्यादिकरषडंगन्यासान्विधाय स्वस्य देवं ध्यात्वा मानसोपचारैः संपूज्य
मूलं यथाशक्ति जपित्वा जपं समर्प्य श्रीगुरुं प्रणम्य कुंडसंस्कारान्कुर्यात् ॥ तत्रादौ कुंडं मूलमंत्रेण वीक्ष्यास्त्रमंत्रेण प्रोक्ष्यास्त्रेणैव कुशैस्त्रिः संताड्य कवचेनाभ्युक्ष्या
स्त्रेण कुंडमध्ये किंचित् खात्वास्त्रमंत्रेणोन्मृदमंगुष्ठानामिकाभ्यामुद्धृत्य वहिस्त्यक्त्वा हृन्मंत्रेण शुद्धमृत्तिकया खातमापूर्यास्त्रमंत्रेण समीकृत्य कवचमंत्रेणाज

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिकालेव
३५०

150

ले: संसिच्यास्त्रमंत्रेण काष्ठादिनाकुट्टयित्वा हृदीकस्य कवचमंत्रेण कुशैः कुंडं संमार्ज्य कवचेनैव गोमयाद्भिः संलिप्य कवचेनैवाग्निसोमौ संपूर्णं नामपंत्रिंशत्कलारूपं संचिंत्य
कवचेनैव मेखलात्रयेपि त्रिगुणीकृतसूत्रेण प्रतिमेखलं त्रिः त्रिः संवेष्ट्य अस्त्रमुकुंडाय एतदासनं तेन मः इत्याद्यासनादि दीपांतैरुपचारैः प्रथमं चतुरस्रादि
तत्कुंडं नाम चतुर्थी नमोंतेन संपूज्य तथैव नाभिं च संपूज्य मेखलात्रयं तथैव हृन्मंत्रेण संपूज्यास्त्रमंत्रेण कुंडं वज्रदृढं संचिंत्य हृन्मंत्रेण च कुशैः कुंडस्य चतुर्दिक्षु वह्निज्वालाद्रि
लास्य चतुष्पथं मार्गं चतुष्टयं परिकल्प्य कवचमंत्रेणाच्छिन्नाग्रैः कुशैः रस्त्रमंत्राभिमंत्रितैः कुंडं भिन्निगणो सर्वमाकादयन्नस्त्रक्षेपाटनेकुर्यादित्यष्टादशसंस्कारान् कुर्या
त्वास्त्रशस्त्रैः प्रथमोदितैश्चतुर्भिरेव संस्कारैः कुंडं संस्कृत्य तत्र हृन्मंत्रेण स्त्रमंत्रेण वा दक्षिणमध्योत्तरेषु प्रागग्राः पश्चिममध्यपूर्वेषूदगग्रा इति तिस्रस्तिस्रः स्तोरेखाः कुश
मूले न विलिखेत् अग्रणे नाभ्युक्ष्य प्रागग्रासु रेखासु दक्षिणरेखायां विरिंचये नमः मध्यरेखायां रुद्राय नमः उत्तररेखायामिंद्राय नमः उदगग्रासु रेखासु पश्चिमायां ब्रह्मणे
नमः मध्यमायां ब्रह्मणे नमः पूर्वरेखायां सोमाय नमः इति संपूज्य तत्र वक्ष्यमाणयोगपीठपूजाक्रमेण मंडूकादिपरतत्वांतं योगपीठं संपूज्य तत्र पद्मकेसरेषु स्था
ग्न्यादि प्रादक्षिण्येन मध्यांते ॐ जयायै नमः एवं विजयायै· अपराजितायै· नित्यायै· विलासिन्यै· दोग्ध्र्यै· अघोरायै· मंगलायै नमः इति संपूज्य ह्रीं सर्वशक्तिकमलास
नायै नमः इति मध्ये पुष्पांजलिं निक्षिप्य तत्र भुवनेश्वरीं तन्मंत्रेण वाह्यवाहनादिपरमीकरणांतं तन्मुद्रयाविधायासनादिषोडशोपचारैराराध्य तत्र श्रीशिवं ध्यात्वा
मूलमंत्रेण तथैव संपूज्य देवीं मनुस्नातां देवं च कामोन्मत्तं च विचिंत्य स्वर्णादिपात्रे मत्स्यपात्रे चेत्तत्र सूर्यकांतादिमवमरणिमंथजं श्रोत्रियगृहाद्वाग्निमस्त्रमंत्रेणाप
त्रे कृत्वा कवचमंत्रेण संज्वालीयेन पात्रांतरे विधाय कन्यया सुवासिन्या वासमानीयतं गुरुर्वादायास्त्रमंत्रेणैकमंगारं तन्मध्यात्क्रव्यादांशं नैर्ऋत्यकोणे परि
त्यज्य देवांशं मूलेन पुरतः प्राक्स्थितेव क्रौ वह्निचैतन्यं संयोज्य ओं दर्पवेदं (कु) संस्थाप्य मूलेन वीक्ष्यास्त्रेणाभ्युक्ष्यास्त्रेण कुशैः संताड्य कवचेनाभ्युक्ष्य तत्र स्वमूला
धारस्थवह्निमंडलगतपरमात्मस्वरूपाग्निज्वालात्मकलादिंदोः सकाशाद्वह्निमणिपूरगतज्ञठरानलेन सहसुषुम्णामार्गेण ब्रह्मरंध्रनासापुटाध्वना निष्का
स्य रमिति वह्निबीजमुच्चरन्पुरतः पात्रस्थिते वक्रौ वह्निचैतन्यं संयोज्य ओं दर्पवेदं वपार्थिव वह्निनामेकं विभावयन् [illegible] देवाभिमुखमिति धेनुमुद्रयाः
मृतीकृत्यास्त्रमंत्रेण संरक्ष्य कवचेनावगुंठ्य ओं रं वह्नये नमः इति गंधादिभिः संपूज्य जानुभ्यामवनीं गत्वा तत्पात्रं करा[illegible]दाय कुंडोपरि त्रिः प्रदक्षि श्री ३५०

© Dharmartha Trust J&K. Digitized by eGangotri

ण्योपरि स्थाप्य देव्या योनौ शिवबीजमिति ध्यायन् स्वाभिमुखं कुंडमध्ये प्रणवमुच्चरन्नंतमग्निं निःक्षिप्य मैथुनधिया देवदेव्यौ रावमेत्र दत्वा ओं चित्पिंगल हन हन दह पच पच दह
दह सर्वज्ञाज्ञापय स्वाहेति मंत्रमुच्चरन्मुखेन फूत्कृत्य कुशैरग्निं प्रज्वाल्य काष्ठैः फट्कृत्य कृतांजलिस्तिष्ठन् ओं अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं । सुवर्णवर्णममलं
समिद्धं सर्वतोमुखमिति ज्वलनमग्निमुपविश्य वक्ष्यमाणवह्निमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगुऋषये नमः मुखे गायत्रीछंदसे नमः हृदये अग्नये देवतायै नमः
गुह्ये रं बीजाय नमः पादयोः स्वाहाशक्तये नमः इति विन्यस्य दीक्षांगहोमे विनियोगः इति कृतांजलिर्वदेत् । लिंगे स्त्रूं हिरण्यायै · गुदे ष्मूं कनकायै · श्रूं शिरसि भ्रूं रक्तायै · मुखे श्नूं
कृष्णायै · नासिकायां ल्मं सुप्रभायै · नेत्रयोः प्र्यूं अतिरक्तायै · सर्वांगे ष्मूं बहुरूपायै नमः इति सप्तजिह्वाविन्यस्य । ओं सहस्रार्चिषे हृदयाय · स्वस्तिपूर्णाय शिरसे स्वाहा । उत्ति
ष्ठपुरुषाय शिखायै वषट् । धूमव्यापिने कवचाय हुं । सप्तजिह्वाय नेत्रत्रयाय वौषट् । धनुर्धराय अस्त्राय फट् । इति षडंगानि विन्यस्य शिरसि अग्नये जातवेदसे नमः वामां
सेऽग्नये सप्तजिह्वायै नमः वामपार्श्वे अग्नये हव्यवाहनाय नमः । वामकट्यां । अग्नये अश्वोदराय नमः दक्षकट्यां अग्नये कौमारतेजसे नमः दक्षपार्श्वे । अग्नये वि
श्वमुखाय नमः दक्षांसे अग्नये देवमुखाय नमः । इति विन्यस्य वह्निरूपं स्वात्मानं ध्यात्वा सप्तजिह्वामुद्रां प्रदर्श्य कुंडस्योत्तरभागे कुशास्तरे स्रुक्स्रुवौ प्रोक्षणीपात्रं आ
ज्यस्थाली चरुस्थाली परिधित्रयं समित्पंचाशत्कमिध्मं लेखनमूलं साग्रकुशमुष्टिरिति पात्राण्यधोमुखानि संस्थाप्य त्वा स्वपिदध्यक्षतादिवालिद्रव्याणि गंधपुष्पादिपूजाद्र
व्याणि च यथायथं स्थाप्याधोमुखानि स्रुक्स्रुवादीनि सपवित्राण्यधोमुखहस्तेनैकरूपाणि प्रोक्षणपूर्वकमुत्तानीकृत्य प्रणीतापात्रं प्रक्षाल्य स्वपुरतः कुशास्तरे निधाय शुद्धजलै
रापूर्य तत्र गंधाक्षतानि क्षिप्त्वा प्रादेशमात्रं साग्रं कुशद्वयं मध्ये बलन्ग्रंथियुतं जलाग्रे उत्तराग्रं पवित्रं निधाय करद्वयानामिकांगुष्ठाभ्यां पवित्रं मूलाग्रे विधृत्यास्त्रमंत्रमुच्चर
न् पवित्रमध्येन जलं पात्राद् द्विः त्रिवारं भूमौ निक्षिपेदित्युत्पवनं विधाय तन्मध्ये किंचित् घृतं निक्षिप्य तत्पात्रं कुशाभ्यामामस्तकमुद्धृत्य कुंडस्योत्तरभागे कुशास्तरे निधाय
तदुपरि भागत्रयं दर्भान्दर्भान्निक्षिपेदिति प्रणीतापात्रं संस्थाप्य प्रोक्षणीपात्रं प्रक्षाल्य शुद्धजलेनापूर्य तन्मध्ये प्रणीतापात्रजलं पात्रांतरेणोद्धृत्य किंचिद्दत्वा तेन जलेन
मूलमंत्रेण सर्वाणि पात्राणि होमद्रव्याणि पूजाद्रव्याणि च प्रोक्षयेदिति द्रव्यासादनं विधाय प्रोक्षणीजलेनाग्निं परिषिच्य नानावर्णैस्तु भिर्दर्भैः प्राचीदिशमारभ्य ज्ञात्वा उत्तरा
ग्रैरीशानादिनिर्ऋत्यंतं परिस्तीर्य पुनर्द । क्षिणस्यां प्रागग्रैः पूर्वपरिस्तरणमूलमग्रैराच्छादयन् पुनः पश्चिमायामुत्तराग्रैर्दक्षिणपरिस्तरणमूलं मूलेनाच्छादयन् पुनरुत्तरस्यां प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णे
१५१
151

ग्रैः पश्चिमपरिस्तरणाग्रे पूर्वपरिस्तरणाग्रम मग्रेलत्रपरिस्तीर्य परिधित्रयमादाय सर्वतः स्थूलं पश्चिमे उत्तराग्रं ततः कनिष्ठं दक्षिणे पूर्वाग्रं पश्चिमपा
रिधेर्मूलोपरि मूलं यथा मध्यमवर्ति तथा पुनस्तलोपरि कनिष्ठमुत्तरस्यां पूर्वाग्रं पश्चिमपरिधेरग्रोपरि मूलमिति कुण्डस्य मध्यमेखलोपरि परिस्तरं लोपरि परिधित्रयं
निक्षिपेत्। अत्र पश्चिममेखलायां तु परिस्तरणपरिधिस्थापनं योनिनालोर्ध्वमेखलयोरन्तराले कार्यमिति पश्चिमपरिधौ ओं नलाय नमः। दक्षिणपरिधौ
ओं विहृद्वे नमः। उत्तरपरिधौ ओं कृशानवे नमः इति संपूज्य स्वेष्टदेवतादीक्षितं वा लक्षणमाहूय कुण्डस्य दक्षिणभागे कुशासने समुपवेश्यामुकगोत्रामुकशर्माहममुकगो
त्रामुकवेदान्तर्गतामुकशाखाध्यायिनममुकशर्माणं ममेष्टदीक्षाङ्गभूतहोमकर्मणि कृताकृतावेक्षणाय ब्रह्मत्वेन त्वां वृणे इति वस्त्रालङ्कारादिभिर्वृणुयात्। ततस्तं
गन्धादिभिः संपूज्य आ लक्षणालाभे कुशबटुं वा संपूज्य वह्निमन्त्रेणार्घ्यपाद्याचमनीयमधुपर्कपात्राणि संस्थाप्य सकृत्य कुण्डमध्ये षट्कोणगर्भितं कर्णिकेसकेसरं च
तुर्द्वारयुक्तं चतुरस्रत्रयवेष्टितमष्टदलकमलं वह्नेः पूजापीठं विभाव्य तत्र प्रागुक्तविधिना मण्डूकादिपरतत्त्वान्तयोगपीठं समभ्यर्च्य अष्टदलकेसरेषु स्वाग्न्यादि प्रादक्षिण्येन
ॐ पीतायै। एवं श्वेतायै। अरुणायै। कृष्णायै। धूम्रायै। नीलायै। विस्फुलिङ्गिन्यै। रुचिरायै। ज्वालिन्यै नम इति मध्ये तं नवशक्तीः संपूज्य रं सर्वशक्तिकमलासनाय नमः
इति समस्तपीठं संपूज्य तन्मध्ये वह्निं करैर्वरस्वस्तिकशक्त्यभीतिर्दधानमम्भोजगतं त्रिनेत्रं त्वासिं दूरवर्णं तपनीयभूषं वह्निं जटामण्डितमौलिमीडे। इति ध्यात्वा समस्तजिह्वा
मुद्रां प्रदर्श्य ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा। अग्नये नमः इत्यग्निं त्रिः पुष्पाञ्जलिना संपूज्य पुनर्वह्निमन्त्रमुच्चार्याग्नये [illegible] नमः। एवमग्न
त्रेः एतत्तेऽर्घ्यः स्वाहा। एतत्ते पाद्यं नमः। एतत्ते आचमनीयं स्वधा। एष ते मधुपर्कः स्वधा। एतत्ते पुनराचमनीयं स्वधा। एतत्ते स्नानं नमः। इति पुरस्कृत्य मधुपर्कादि सर्वांगा
इशानमेखलायां बहिः पात्रान्तरेऽर्घ्यपाद्यादिस्नानोत्तानवक्त्रस्तत्तद्गोभावं परिकल्प्य पुनराचमनीयं दत्वा गन्धादिवस्त्रं दत्वा पुनराचमनीयं दत्वा यज्ञोपवीतानि
वेद्य बहिः पुनराचमनीयं दत्वा गन्धपुष्पे च क्षौए वह्निं वेदयेदिति वह्निमन्त्रेणासनादिपुष्पान्तानुपचारानुपचर्य षट्कोणे देवाग्न्यादिकोणमारभ्य मध्ये [illegible] हिरण्या श्री
ये नमः। ओं कनकायै। ओं रक्तायै। ओं कृष्णायै। ओं सुप्रभायै। ओं अतिरक्तायै। ओं बहुरूपायै नमः इति संपूज्याष्टदलकेसरेषु अग्नीशासुरवायव्यदेवताग्रतः दादिवत् १५१
दिक्षु ॐ सहस्रार्चिषे हृदयाय नमः। ॐ स्वस्तिपूर्णाय शिरसे स्वाहा। ॐ उत्तिष्ठपुरुषाय शिखायै वषट्। ॐ धूम्रव्यापिने कवचाय नमः। ॐ [illegible]ति कायते नेत्रत्रयाय नमः

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ धनुर्धराय स्वाहा नमः इति वह्न्यंगानि संपूज्याष्टदलेषु देवाग्न्यादि प्राग्दक्षिण्येन ॐ अग्नये जातवेदसे नमः एवमग्नये सप्तजिह्वाय · अग्नये हव्यवाहाय · अग्नयेऽश्वोद
राय · ओं अग्नये वैश्वानराय · अग्नये कौमारतेजसे · अग्नये विश्वमुखाय · अग्नये देवमुखाय · इति प्राग्दक्षिण्येनाष्टमूर्तीः संपूज्य तद्बहिर्भूपुराग्रे इन्द्रादीन्सायुधान्सं
पूज्य पुनर्वह्निं मंत्रेण वह्निं संपूज्य धूपदीपादि दत्वा नैवेद्यमुद्रया ज्याग्रावेव दत्वा प्राग्वदाचमनीयं दत्वा ततः स्रुक्स्रुवौ प्रांचावधोमुखाय कौ संताप्य तयोरग्रं कुशाग्रैर्मध्यं
मध्ये मूलं मूलैरिति त्रिः संमृज्याग्नौ प्रक्षिप्य स्रुक्स्रुवौ स्वदक्षिणभागे कुशास्तरे निधायाथ उपस्थालीमादायास्त्रमंत्रेण प्रक्षाल्य स्वपुरतः कुशास्तरे निधाय तदुपर्युत्त
राग्रं प्रादेशमात्रं मध्ये च लग्रंथि पुतं कुशद्वयरूपं पवित्रं निधाय पात्रांतरस्थं शुद्धं गोघृतं दुर्गंधादिदूषणरहितं वीक्षणादिचतुःसंस्कारैः संस्कृतं वह्निरिति धेनुमुद्रया
प्रतीकृतं मूलेनाष्टधाभिमंत्रितमाज्यस्थाल्यां निक्षिप्य कुंडाद्दंगादुद्धृत्य स्रुव मेखलाया वहिर्भूमौ वायव्यकोणे निक्षिप्य ते आज्यस्थाली हृन्मंत्रेण निधाय कुशद्वयं प्रज्वाल्य हृ
मंत्रेणोत्पूय प्रदर्श्य निक्षिप्य शेषमग्नौ निवेश्य पुनर्दर्भद्वयं प्रज्वाल्य कवचमंत्रेणाज्यस्थालीमभितः परिभ्राम्य दग्धशेषमग्नौ निक्षिप्य पुनः कुशाग्रं ज्वाल्य हृन्मंत्रेणालो ९
प्रदर्श्य दग्धशेषमग्नौ निक्षिप्याज्यस्थालीमुद्धृत्य प्राग्दक्षिण्येन कुंडं परितो भ्रामयन्नानीय स्वपुरतः कुशास्तरे निधाय बाह्यस्थांगारान्कुंडमध्ये निक्षिप्यापः संस्प
श्यांगुष्ठानामिकाभ्यां करद्वयेन पवित्रं मूलाग्रे धृत्वा मंत्रमुच्चरन्पवित्रमध्येन घृतमुत्प्लूय हृन्मंत्रमुच्चरन् तथैव पवित्रमध्येन स्वाभिमुखं च त्रिः संप्लाव्य पवित्रमा
ज्यस्थाल्यामाज्यमध्ये निवेश्य भागद्वयं कृत्वा दक्षिणभागस्थं कृष्णपक्षं वामभागं शुक्लपक्षं परिकल्प्य पुनस्तथैव वामभागे इडां दक्षिणे पिंगलां मध्ये सुषुम्नामिति ना
डीत्रयं संविंस्य स्रुवेण दक्षिणभागादाज्यं मंत्रेणादायाग्नये स्वाहेति वह्नेर्दक्षिणनेत्रे कृत्वा अग्नय इदं न मम इत्युद्देशत्यागं विधाय पुनः हृन्मंत्रेण वामभागादाज्यं गृही
त्वा सोमाय स्वाहेति वह्नेर्वामनेत्रे कृत्वा सोमायेदं न मम इत्युद्देशत्यागं विधाय पुनर्हृदयमंत्रेण मध्यादाज्यं गृहीत्वा अग्नीषोमाभ्यां स्वाहेति वह्नेर्ललाटलो
चने कृत्वा अग्नीषोमाभ्यां न मम इत्युद्देशत्यागं कृत्वा पुनर्दक्षिणभागादाज्यं गृहीत्वा अग्नये स्विष्टकृते स्वाहेति वह्नेर्वक्त्रे कृत्वाऽग्नये स्विष्टकृते न मम इत्युद्देशत्यागं विधा
य ॐ भूः स्वाहा अग्नय इदं न मम । ॐ भुवः स्वाहा वायव इदं न मम । ॐ स्वः स्वाहा सूर्यायेदं न मम । ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम । ॐ वैश्वानर जातवेद इहावह लो
हिताक्ष सर्वकर्माणि साधय स्वाहेति वह्नेर्मुखे तन्मंत्रेण वारत्रयं कृत्वाऽग्नय इदं न मम इत्युद्देशत्यागं कृत्वा ॐ अग्ने गर्भाधानं संपादयामि स्वाहा । एवं पुंसवनं सीमंतो

© Dharmartha Trust J&K. Digitized by eGangotri

नयनं। इति प्रतिकर्म। स्त्याकुल्यषट्कं कृत्वा वागीश्वराज्जातं वह्निं प्रागुक्तरूपं ध्यायन्। अग्नये जातकर्म। इत्यष्टावाज्याहुतीर्हुत्वा वह्नेर्नालच्छेदं कृत्वा सूतकं संशोध्य वह्नेर्नामक-
रणं सं। इत्यष्टाज्याहुतीर्हुत्वाग्निकान्तिरिति तस्य नाम कृत्वा ॐ वह्नेरुपनिष्क्रमणं सं। अन्नप्राशनं सं। अग्नेश्चौलं सं। अग्नेरुपनयनं सं। अग्नेर्महानाम्न्यं सं। अग्नेर्महाव्रतं सं।
अग्नेरुपनिषदं। अग्नेर्गोदानं सं। अग्नेः समावर्तनं सं। अग्नेरुद्वाहं सं। इति प्रतिकर्माष्टाज्याहुतीर्हुत्वा वह्नेर्गर्भाधानादुद्वाहान्तान् संस्कारान्विधाय वह्नेः पितरौ देवदेवौ
प्राग्वत्सम्पूज्य विसृज्य मूलाग्नेषु घृतसेचिताः पंच समिधस्तूष्णीं। एकदेवांजलिना वह्नौ समर्प्य ॐ सं हिरण्यायै स्वाहा। एवं प्रं कनकायै· रं रक्तायै· कृं कृष्णायै· सुं सुप्रभा-
यै· अं अतिरक्तायै· बं बहुरूपायै· ॐ सहस्रार्चिषे हृदयाय स्वाहा। एवं स्वस्तिपूर्णाय शिरसे· उत्तिष्ठपुरुषाय शिखायै· धूम्रव्यापिने कवचाय· सप्तजिह्वाय नेत्रत्रयाय· धनुर्ध-
रायास्त्राय· ॐ अग्नये जातवेदसे स्वाहा। एवं अग्नये सप्तजिह्वाय· अग्नये हव्यवाहनाय· अग्नये अश्वोदराय· अग्नये वैश्वानराय· अग्नये कौमारतेजसे· अग्न-
ये विश्वमुखाय· अग्नये देवमुखाय· इति त्रिकोणमूर्तिमंत्रैरेकैकामाहुतिं हुत्वा ॐ लं इन्द्राय स्वाहा। एवं अग्नये· यमाय· निर्ऋतये वरुणाय· वायवे· कुबेराय· ईशाना-
य· ब्रह्मणे· अनन्ताय· वज्राय· शक्तये· दण्डाय· खड्गाय· पाशाय· अंकुशाय· गदायै· शूलाय· पद्माय· चक्राय· एवं तत्तन्नाममंत्रैरेकैकामाहुतिं हुत्वा सर्वत्र तत्तन्नामादि-
शस्वागं कुर्यात्। ततः स्रुवेणाज्यमादाय चतुर्वारं निक्षिप्याधोमुखं स्रुचौ मुखेनिधायोत्थाय प्रागुक्तवह्निमंत्रमुच्चार्य स्वाहान्ते वौषडित्यग्नौ तिष्ठन्स्रुचा कुला पवित्रया ॐ
स्वाहा। ॐ श्रीं स्वाहा। ॐ श्रीं ह्रीं स्वाहा। ॐ श्रीं ह्रीं क्लीं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं
गं गणपतये वरवरद स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा। इति दशधा
विभक्तेन महागणपतिमंत्रेण दशाहुतीर्हुत्वा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहेति समस्तसमस्तमंत्रेण चतस्रः आज्याहुतीर्जुहुयात्॥ ।
इत्यग्निस्थापनविधिः॥ ॥ इत्थमग्निस्थापनं विधाय नूतनताम्रादिपात्रमस्त्रमंत्रेण प्रक्षाल्य तत्र मूलमंत्रेणाष्टधाभिमंत्रितान् तंडुलान् पंचदशप्रसृतिमितान् त्रिः
प्रक्षालितानस्त्रमंत्रेण पात्रे निक्षिप्य तत्र गोदुग्धं वाप्यं यावत्तावत्पक्वं भवति तावन्निक्षिप्य प्रक्षालितेन पात्रेण कवचमंत्रमुच्चरन् तत्पात्रं वदनं पिधाय तत्र दुग्धं वोष्णव
रादुपर्यापालितदापेक्षणेन दक्षिणमूर्ध्वमवधाय मूलमंत्रैस्त्रैरं आप्लुतं सुगन्धं च सुपवित्रमष्टतेतस्मिन्मूलमंत्रेणाज्यं स्रुवेणाभिक्षिप्य कवचमंत्रेण तत्पात्रं

© Dharmartha Trust J&K. Digitized by eGangotri

मयतार्घ्यास्त्रमंत्रेणाभिमंत्रितं कुशास्तरे चरुं निक्षिप्य त्रिधा विभज्यैकं भागं देवाय कुंभस्थाय निवेद्य मंडपपरितः पूर्वमंकुरार्पणकर्मणि कृतांकुरभाजनानि निक्षिप्य घृत
पूर्णान्नृपित्रमयदीपांश्च निधाय कुंडसमीपं गत्वा स्वासने समुपविश्य तत्र वक्ष्यमाणविधिना मूलमंत्रेणार्घ्योदिपात्रस्थापनं विधाय कुंडमध्ये वह्निं संस्थाप्य पूजाचक्रे विभाव्य तत्र
वक्ष्यमाणविधिना मंडूकादिपीठमन्वं तत्संस्थाप्य तत्र देवतामावाह्य वक्ष्यमाणविधिना सांगं सावरणं सर्वोपचारैः पूजयेत्। अत्रार्घ्यादिस्थापनं तो नो नाग्निपूजां च देवकुंडाद्बहिः पा
त्रांतरे देवमुद्दिश्य कल्पयेत्। अन्यत्सर्वं कुंडमध्य एव कल्पयेत्। ततो मूलमंत्रेण वह्निदेवतयो वक्त्रैकीकरणार्थं पंचविंशत्याहुत्या कुर्यात्। हुलास्या आग्निदेवतात्मने कं विभा
वयमूले न नाडीसंधानार्थं मिकादशवारं घृतैर्जुहुयात्। अंगावरणदेवतानामेकैकामाहुतिं कुर्यात्। एकनिर्मितवरोत्पत्तीयांशं नवधा विभज्यैकांशेन मूलेन पंचविंशति
धा कुर्यात्। प्राणादिदिक्संस्थं कुंडे यत्ररुत्विग्भिः प्रागुक्तविधिना द्वादशसंस्कारैः संस्कृते गुरुः स्वकुंडादग्निमुद्धृत्योद्धृत्य निक्षिपेद् ऋत्विजश्च स्वस्वकुंडे वह्निं प्रागुक्तविधिना
प्रज्वाल्योपस्थाय परिषेचनपरिस्तरणपरिधिप्रक्षेपणपूजादिभिः सम्यक्परितो व्यसमिद्धे तस्मिन्नस्वेष्टदेवतां नित्यपूजोक्तविधिना देवमावाह्य तां पूजां सोपचारैः
सम्यक्संपूज्य वक्त्रैकीकरणनाडीसंधानांगावरणहोमांते मूलमंत्रेण गुरूणां विभज्य दत्तेन घृतमिश्रेण पायसेन पंचविंशतिधा स्वस्य कुंडे जुहुयुः। अथ गुरुः सर्वतो
भद्रमंडलस्य पूर्वादिदिक्षु चतुष्कयेमेषादिराशिस्थानेषु प्राच्यां मेषवृषौ आग्नेय्यां मिथुनं दक्षिणे कर्कटसिंहौ नैर्ऋत्ये कन्या पश्चिमे तुलावृश्चिकौ वायव्ये धनुः उत्तरे म
करकुंभौ ईशान्ये मीनं इति विभक्तेषु राशिस्थानेषु राश्याधिनाथेभ्यो ग्रहेभ्यो नक्षत्रेभ्यः करणेभ्यश्च कृतशेषेण पायसेन बलिं दद्यात्। यथा मेषवृश्चिकस्थानयोः कं र
गं घं ङं मेषवृश्चिकराश्याधिपतये मंगलाय एष गंधपुष्पाक्षतयुक्तः पायसबलिर्नमः। एवं चं ५ वृषतुलाराश्यधिपतये शुक्राय एष० नमः। टं ५ मिथुनकन्याधिपतये बुधाय एष० न
मः। शंषयं १० कर्काधिपतये सोमाय एष० नमः। अं १६ सिंहाधिपतये सूर्याय एष० नमः। तं ५ धनुर्मीनाधिपतये गुरवे एष० नमः। पं ५ मकरकुंभाधिपतये शनैश्चराय एष० न
मः। पुनः क्रमेण मेषादिस्थानेषु मेषराश्यंशभूताश्विनीभरणीकृत्तिकापादनक्षत्रदेवताभ्योऽश्विन्यादिनक्षत्रेभ्यः सर्वेभ्यो भूतेभ्य एष गंधेत्यादि। एवं वृषराश्यंशभ
तकृत्तिकापादत्रयरोहिणीमृगशिरोर्धनक्षत्रेभ्य इत्यादि। मिथुनराश्यंशभूतमृगशिरोर्धार्द्राक्षपुनर्वसुपादत्रयनक्षत्रेभ्य इत्यादि। एवं मृगेऽपि मंत्राद्यूहः। ततो मीनमेष
योरंतराले बवकरणाय एष इत्यादि। एवं वृषमिथुनयोरंतराले बालवाय। मिथुनकर्कयोर्मध्ये कौलवाय। सिंहकन्ययोर्मध्ये तैतिलाय। कन्यातुलयोर्मध्ये गराय। वृश्चि

© Dharmartha Trust J&K. Digitized by eGangotri

कुंभधनुषोर्मध्ये वलितेः। धनुर्मकरयोर्मध्ये विषवे। एषां धाक्षतपुष्पयुतपायसवलिर्देयः। इति वलिं दद्यात्। अत्र राशिद्वयाधिपती तौ राशिद्वयस्थानेऽपि वलिर्देय इति संप्रदायः।
ततो गुरुः कुंभस्थायदेवताया नराषोडशनादिनीराजनां तं वक्ष्यमाणविधिना कृत्वा स्तुत्वा प्रणम्य क्षमापयेत्। ततस्तृतीयभागे शिष्येण सह गुरुर्भुक्त्वा स्वपमानो ततः स्नात्वा शाय
शिष्याय षडंगन्यासयोगेन सकलीकृत्वा यथादेशमात्रं यथोक्तहृन्मंत्रेणाष्टधाभिमंत्रितं दंतकाष्ठं दद्यात्। शिष्योऽपि तेन दंतधावनं दंतधावनविधायदंतकाष्ठं प्रक्षाल्य
पुरतः परित्यज्याचम्य गुरोः समीपं गच्छेत्। ततो गुरुः शिष्यशिखाबंधनेन मूलमंत्राभिमंत्रितेन संरक्ष्य तेन सार्धं वेद्यां कुशास्तरणे तस्यां रात्रौ शयनं कुर्यादित्यधिवासः।
अत्र प्राक्प्रोक्तविधिनोर्ध्वाम्नायादिआम्नायदेवतानां दीक्षायां तत्तन्मंत्रहोमस्तद्देवतापूजनक्रमोक्तविधिभिर्विधेयः। नवग्रहपूजा तु आगमोक्तैर्वा वैदिकमंत्रैर्वा विधेया तत्र कोल
वैद्यां पृथगेवेति संप्रदायः। पंचदशकूटविद्याभ्यां शोधितं वक्ष्यमाणेरीतिक्रमेण क्रमेणैव दीक्षाप्रयोगक्रमः साधीयस्त्वांगत्वेनान्यमंत्राकथनात्। षट्दर्शनांगभूतप्रधान
विद्यादीक्षांगविधौ तु षट्दर्शनेषु अंगत्वेन येषां मंत्राणामभिहितास्तद्दीक्षावलिक्रसामयिके होमजपपूजादयो विधेयाः। गुरुरपि तथैव सांगोपांगं पूर्वरूपेणोपदेशः कार्यः।
पूर्णाभिषेकविधिमग्रतत्प्रकरणे वक्ष्यामः। वैदिकदर्शनप्राधान्येनयथोपदेशस्तत्र भक्तिस्मृत्युक्तविधिनैव विशेषो वोद्धव्योऽन्यत्साम्यं॥ अथ वैदिकदर्शने दीक्षायाः
आदौ गणाधिपपूजादिमंडपपूजाप्रयोगः। तत्रादौ गणेशपूजा॥ यजमानः आसने उपविश्याचम्य प्राणानायम्य कृत्वा कुशाक्षतान् हस्ते गृहीत्वा संकल्पं कुर्यात्॥
तद्यथा। अद्येत्यादि मासपक्षाद्युल्लेखानंतरं करिष्यमाणामुकदेवतामंत्रदीक्षाकर्मणि निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनमहं करिष्ये इति संकल्प्यावाहनादिषोडशोपचारैः
गणानां त्वेति मंत्रेण गणपतिं संपूज्य बद्धांजलिः प्रार्थयेत्। वक्रतुंड महाकाय सूर्यकोटिसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। पूजां संपूर्णतां वाचयित्वा वि
सर्जयेत्। ततः पीठेऽक्षतपुंजेषु गौर्यादिषोडशमातृकाः आहत्यादि समंत्रमातृकाः प्रपूजयेत्॥ तास्तु। गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा
मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता। आद्याब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेंद्राणी चामुंडाः सप्तमातरः। पूजाप्रकारस्तु पू
जोपकरणान्युपकल्प्य आग्नेयदिग्रवउपविश्य कुशयवतिलान्यादाय अद्येत्यादि करिष्यमाणमंत्रदीक्षांगभूततया गौर्यादिषोडशमातृकापूजनं आहत्यादि समंत्रमातृपूज
नं च करिष्य इति संकल्प्याक्षतैः ॐ भूर्भुवः स्वः गौरीइहागच्छ इह तिष्ठेत्यावाह्य स्वशाखोक्तमंत्रेण प्रतिष्ठाप्य गौर्यै नमः इदमासनमित्यादिरीत्या पदार्थानुसम

© Dharmartha Trust J&K. Digitized by eGangotri

ये मुत्तरसंस्थाः पूज्याः ॥ एवं ब्राह्म्याद्याश्चपि । यदा तु मातृणां गणदेवतात्वं तदा प्रत्येकं नाम गृहीत्वा गौर्यादिभ्य इति चोक्त्वा युगपत्पूजयेत् । एवं ब्राह्म्याद्यान्स्रपि । ततः स्वाचारतो वसोः
पवित्रमसीति कुड्यलग्नाः पंच सप्त वा घृतेन धाराः कुर्यात् । ततस्तन्मपि केचिदा कुः ॥ ततः शांतिपाठः ॥ ततो यथाचारं वृद्धिश्राद्धं संकल्पपूर्वकं स्वशाखोक्तं कुर्यात् । ततः पुण्याह
वचनं ॥ तच्चाग्निकृतजानुमंडल इत्यादि । पुण्याहं भवंतो ब्रुवंत्विति त्रीन् ब्राह्मणान् श्रावयेत् । ते च पुण्याहमिति त्रिः प्रतिब्रूयुः ॥ ओं स्वस्ति भवंतो ब्रुवंत्विति त्रिः । ओं स्वस्तीति त्रिः
प्रतिवचनं । ओं ऋद्धिं भवंतो ब्रुवंत्विति त्रिः ॥ ओं ऋध्यतामिति प्रतिवचनं । ततो मंडपाद्बहिः पश्चिमदेशे उपविष्टो यजमानः प्राङ्मुख उपविश्याचम्य प्राणानायम्य चेत्याद्यमु
मुद्देवतामंत्रदीक्षाकर्म कर्तुमाचार्यर्त्विजां वरणमहं करिष्ये इति संकल्प्य । आचार्यो यमुदङ्मुखमुपवेश्य सितांबरहेमकुंडलसूत्रकेयूरकंठाभरणाभिरामं कृत्वा बद्धांजलिः दीक्षा
दाने त्वं मे गुरुर्भवेति प्रार्थये भवानीति तेनोक्तो । अमुकप्रवरान्वितामुकगोत्रामुकवेदांतर्गतामुकशाखाध्यायिनममुकशर्माणममुकप्रवरान्वितामुकगोत्रोऽमुकशर्माहमभि
श्चंदनपुष्पाक्षततांबूलहेमाभरणांगुलीयकवासोभिरमुकमंत्रदीक्षादाने गुरुत्वेन त्वां वृणे । वृतोऽस्मीति स वदेत् । एवं पूर्वकुंडे गायत्रीहोमार्थमेकं आग्नेयदक्षिणनैर्ऋत्यप
श्चिमवायव्यसौम्येशानेषु कुंडेषु होमार्थं सप्तब्राह्मणान् नवब्राह्मणान् वृणुयात् । ततः पूर्वद्वारपालनार्थं द्वौ ऋग्वेदिनौ दक्षिणद्वारपालनार्थं द्वौ यजुर्वेदिनौ पश्चिमद्वारपा
लनार्थं द्वौ सामगौ उत्तरद्वारपालनार्थं द्वावथर्वणौ वा सर्वेऽपि पृथक् वृणुयात् । वरणवाक्यं प्राग्वदेव । एवं पुस्तकावाचार्थं वृणुयात् । अत्र द्वारपालकास्तु सर्वे दर्शनसाधार
णाः ॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः सपत्नीकः सशिष्यर्त्विजः आचार्यो मंगलघोषे जायमाने संपूर्णकलशहस्तो भद्रं कर्णेभिरित्यादिमंत्रघोषेण मंडपं प्रद
क्षिणीकृत्य पश्चिमद्वारेण प्रविश्य मंडपांतः पश्चिमदेशे उपविश्याचम्य प्राणानायम्य देशकालौ स्मृत्वा करिष्यमाणदीक्षादानांगतया यागरंगस्थमंडपदेवतास्थापनादि
करिष्य इति संकल्प्य षोडशोपचारैर्गणेशं संपूज्य गौरसर्षपान् सर्वतो मंडपांतर्विकिरेत् ॥ तत्र मंत्रः ॥ रक्षोघ्नाः ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं
यत्रस्थं तत्र गच्छतु । अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ इति च पंचगव्येन कुशैः सर्वत्र सर्वतः प्रोक्षयेत् । स्तुवीबो हव्येति आपो
हिष्ठेति च वा । ततः कृतांजलिः स्वस्त्ययनं तार्क्ष्यमिति मंत्रं द्विर्जपेत् । ततः पूर्वस्यां दिशि मंडपद्वाराद्बहिर्हस्तमात्रे वंदनतोरणमाश्वत्थं वा सुदृढं नाम्यकं सुशोभनयामकं वा
रंभांकितं अग्निमीळे पुरोहितमिति निधाय नाम्ना संपूज्य वंदनादिचर्चितं कृत्वा राकुं बृहस्पतिं तत्र न्यसेत् । तत्रैकः कलशः स्थाप्यः ॥ तत्र मंत्राः ॥ मही द्यौरिति भूमिं

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
१५४
154

स्पृशन् प्रार्च्य ओषधयः समिति यवान् क्षिप्त्वा आ कलशे धीति आजिघ्र कलशमिति कलशं निधाय इमं मे गंगे इति जलेनापूर्य गंधद्वारामिति गंधं या ओषधीरिति सर्वौषधीः
ओषधयः समिति यवान् । कांडात्कांडादिति दूर्वाः । अश्वत्थे व इति पंचपल्लवान् । स्योना पृथिवीति पंच मृदः । याः फलिनीरिति फलं । स हि रत्नानीति पंचरत्नानि । हिरण्यरूपमिति हि-
रण्यं । युवा सुवासा इति वस्त्रेण रक्तसूत्रेण च मुखं वेष्टयेत् । पूर्णा दर्वी सुपरिधान्य पूर्णशरावं निधाय तत्र ध्रुवमावाह्य पूजयेत् । ततो दक्षिणे औदुंबरे वा सुभद्रं चक्रदंडांका
कितं तोरणं इषे त्वोर्जे त्वेति निधाय नाम्ना पूर्ववत्संपूज्य चंदनादिचर्चितं कृत्वा सूर्यमंगारकं च न्यसेत् । ततः पूर्ववत्कलशं स्थापयित्वा तत्र धारामावाह्य पूजयेत् । ततः पश्चिमे प्ल-
क्षमौदुंबरं वा सुहोत्रं सुप्रभं पद्मांकितं तोरणं शन्नोदेवीरिति निधाय नाम्ना पूर्ववत्संपूज्य चंदनादिचर्चितं कृत्वा शुक्रं बुधं च न्यसेत् । पूर्ववत्कलशं निधाय वा क्ष्यति
मावाह्य पूजयेत् । ततउत्तरे काष्ठमश्वत्थं पलाशं वा पूर्णं सुकर्मं सुभीमं गदांकितं तोरणमग्न आयाहीति निधाय नाम्ना संपूज्य चंदनादिचर्चितं कृत्वा सोमकेतू
रात्रीस्तत्र न्यसेत् । ततः पूर्ववत्कलशं निधाय तत्राविघ्नेशमावाह्य पूजयेत् । ततः पुनः पूर्वद्वारे द्वारश्रियं द्वारपालद्वयं कलशद्वयं दध्यक्षतालिंगं पूर्ववत्संस्था-
पयेत् । प्रतिकलशं मंत्राः ऋत्विजः ऐरावतः कलशद्वयं न्यस्य पूजयेत् । तत्र ऋग्वेदिना वत्विमो ऋग्वेदः पद्मपत्राक्षो गायत्र्यः सोमदेवताः । अग्निमीळे ... इंद्रशांति
पाठं मखे कुर्वीत । ज्ञार्थे प्रत्येकमग्निमीळ इति गंधादिना पूजयेत् । ततः ओं एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधारामरेशः संवीज्यमानोऽप्सरसां गणेन रक्षो-
ध्वरं नो भगवन्नमस्ते । इंद्रेहागच्छ इह तिष्ठ मीढुं सांगं सपरिवारं सायुधं सशक्तिकं पूर्वकलशे आवाहयामि । त्रातारमिंद्रमिति इंद्रं संपूज्य ... शिरसा नत्वा पीतपताकोपे-
तं च ध्वजं द्वयमपि पंचहस्तदंडमुच्छ्रयेत् । इंद्रं वो विश्वतस्परीति मंत्रेण तत्र सहस्राक्षं मत्तैरावणस्थितं पीतं किरीटकुंडलधारं दक्षिणवामकरस्थवज्रोत्पलमिंद्रं ध्या-
त्वा इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः । शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः । इति नत्वा इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकायेमं माषभक्त- श्री
बलिं समर्पयामीति बलिं दद्यात् । तत आग्नेय्यां गत्वा पूर्ववत्कलशं निधाय तत्र पुंडरीकं पूजयित्वा ऽमृतं च प्रपूज्य एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोऽभि- १५४
ष्टुतस्तेजोवता लोकगणेन सार्धं ममाध्वरं पाहि कवे नमस्ते । अग्ने इहागच्छ इह तिष्ठ इति सांगं सपरिवारं सायुधं सशक्तिकं आग्नेयकलशे आवाहये त्वं नो अग्ने इत्यग्निं ग-
न्धादिना पूज्य अग्निं दूतमिति रक्तोपताकां रक्तध्वजं पंचहस्तदंडमुच्छ्रयेत् । ततश्छागस्थं रक्तं दक्षिणवामकरधृत रक्तकमंडलु यज्ञोपवीतिनमग्निं ध्यात्वा आग्नेयः पुरु-

© Dharmartha Trust J&K. Digitized by eGangotri

घोरकः सर्वदेवमयोव्ययः । धूमकेतुरजोध्यक्षस्तस्मै नित्यं नमो नमः इति नत्वा सांगायेत्यादिकं मुक्त्वाऽग्नये एतं माषभक्तबलिं समर्पयामीति दद्यात् । ततस्त्रावय्य दक्षिणगत्वा
प्रति धारस्थारवं पूर्ववत्कलशद्वये संस्थाप्य वामनगाउं तत्र न्यस्य पूजयेत् । ततो यजुर्वेदावलिजो कातराक्षोय यजुर्वेदस्तोत्रपु मो विष्णुदेवत भकाश्यपे … विप्रेंद्र शांतिपाठं मरवे कु
र्वीति प्रत्येकं प्रार्थ्य गंधादिने पेतोर्जेनि पूजयेत् । ततः ओं एह्येहि वैवस्वत धर्मराजं सर्वामरैरर्चित धर्ममूर्त्ते । शुभाशुभानंदशुचामधीश शिवाय नः … हि शिवं नमस्ते । ओं यमेहा
गच्छेह तिष्ठेति सांगादिविशिष्ट यममावाहयमायसोममिति गंधादिभिः पूजयित्वा कृष्णां पताकां कृष्णं च ध्वजं पंचहस्त … मायतमाय गौरिसुवु … ये । ततो महिषारूढं धृतदंडपा
श दक्षिणवामकरद्वये रुद्धांजनचयोपममग्निसमनयनं तं यमं ध्यात्वा महामहिषमारूढं दंडहस्तं महाबलं । आवाहयामि यज्ञेऽस्मिन् पूजां मे प्रतिगृह्यतामिति नत्वा सांगा
येत्यादि यमायेतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । ततस्त्रावय्य नैर्ऋत्यां पूर्ववत्कलशौ संस्थापयित्वा कुमुदागजे दुर्ऋयं च पूजयित्वा । ओं एह्येहि रक्षोगणनायक सर्वपिशा
लवेतालपिशाचसंघैः ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते ॥ ओं निर्ऋते इहागच्छेह तिष्ठेति सांगादिविशिष्टमावाहयामो पुण इति … नत्वा प्रतिदा नि
र्ऋतिं गंधादिभिः पूजयित्वा नीलां पताकां ध्वजं च पंचहस्तदंडं मोपुण इत्युच्छ्रयित्वा नरारूढं महाकायं रक्तहस्तं महाबलं । नीलं रक्षोगणैर्जुष्टं नीलाभरणभूषितं । निर्ऋतिं र
वलिं क्तहस्तं च सर्वलोकैकनायकं । आवाहयामि यज्ञेऽस्मिन् पूजां मे प्रतिगृह्यतामिति नत्वा सांगायेत्यादि निर्ऋतये एतं माषभक्तबलिं समर्पयामीति दद्यात् । ततस्त्रावय्य पश्चिमद्वा
रे प्रतिशारवं कलशद्वयं पूर्ववत्स्थापयित्वा अंजनं दिग्गजं न्यस्य पूजयेत् । ततः सामवेदावलिजो सामवेदस्तुविंगाक्षो … ततः शक्रदेवतः भारद्वाजसगुविप्रेंद्र शांतिपाठं मरवे
कुर्वीति प्रार्थ्य गंधादिना … गमन्नायाहीति पूजयेत् । ओं एह्येहि यादोगण वारिधीनां गलेन पर्जन्य सहाप्सरोभिः । विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते । ओं
वरुण इहागच्छेह तिष्ठेति सांगादिविशिष्टवरुणमावाहयामीति गंधादिभिः पूजयित्वा श्वेतां पताकां ध्वजं चेमं मे वरुणेत्युच्छ्रयेत् । ततो मकरस्थं पाशहस्तं शुक्लवर्णं की
रीटधारिणं वरुणं ध्यात्वा पाशहस्तं च वरुणं यादसांनिधिमीश्वरं । आवाहयामि यज्ञेऽस्मिन् वरुणाय नमो नम इति नत्वा सांगायेत्यादि वरुणायेतं माषभक्तबलिं समर्पया
मीति बलिं दद्यात् । ततस्त्रावय्य वायव्यां पूर्ववत्कलशं निधाय पुष्पदंतं सि … वसं पूज्य एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः … सहसिद्धसंघैः । प्राणाधिपः का
लकवेः सहायगृहाण पूजां भगवन्नमस्ते । ओं वायो इहागच्छेह तिष्ठेति सांगादिविशिष्टं वायुमावाहयेत् तव वायव्यं तस्य त इति गंधादिना पूजयित्वा धूम्रां पताकां ध्वजं

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ प्रा॰ प॰
१५५

वज्राघोषणां तमित्युच्चार्य ततः महाभिरूढं चित्रांबरध्वजं धारं दक्षवामहस्ताभ्यां वायुं ध्यात्वा वायुमाकाशात् कं चैवपवनं वेगवाहनं। आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतां। अनाकारो
महोनाम्नां पशुदष्टगतिर्दर्विवित्तिरस्मिन्पूजायाय वायवे नमः। हं नमामि चेति नत्वा सांगायेत्यादि वायवे एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्। ततश्चावाह्य उत्तरद्वारे प्रति
द्वारशास्त्रं कलशादूर्ध्वं भागवत्स्थापयित्वा सांगो मंदिगा जं न्यस्य पूजार्थं यो विद्यावत्तिलो वेदं हन्तुं त्रोपर्ववेदेनु घ भोगुरुः दैवतः। वेशं पायनाविप्रे द्रुशांतिपाठं म रवे कुर्वीतिका
ध्येशं ओ दंवीरितिगंधादिना पूजयेत् ततः एह्येहि यक्षेश्वर यक्षरक्षांवि यक्षनक्षत्रगणेन सार्धं। सर्वौषधिभिः पितृभिः सह देवगणाण पूजां भगवन्नमस्ते। सोमहाग च्छेति हृतिष्ठेति
सांगादि विशिष्टं सोमसमावाह्य सोमो धेनुं वयं सो मे तिजापयित्वा हरितां श्वेतां पताकां ध्वजं तां पाययसेति न्यस्य नरयुतं विमानसंस्थं ध्यात्वा ... परमेश्वरं गदाधरं दक्षिणवामभु
जद्वयं मुकुटिनं महोदरं महाकायं हरितवर्णं कुबेरं ध्यात्वा सर्वनक्षत्रमध्यगं सोमेशाताय वस्थितः ततः सोमाय देवाय नक्षत्रपतये नमः इति नत्वा सांगायेत्यादि सोमायेतं माष
भक्तबलिं समर्पयामीति बलिं दद्यात्। ततश्चावाह्य ईशानेपूर्व ... सुप्रतीकं दिग्गजं मूंरुलंचतत्र संपूज्य ओं एह्येहि विश्वेश्वर नस्त्रिशूल रवड्गधारे सुरग
णेन सार्धं। लोकेश यक्षेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते। ओं ईशानेहागच्छ इति हृच्छेति सांगादि विशिष्टं ईशानमावाह्य ईशानमिति गंधादिनाभ्य
र्च्य श्वेतां सर्ववर्णां वापताकां ध्वजं वन्यमित्वादेवसवितरित्युच्चार्य वृषारूढं दक्षिणवामहस्तद्वयं तवरम त्रिशूलं त्रिनेत्रं शुभ्रवर्णं ईशानं ध्यात्वा वत्सरस्य सर्वसमारू
ढ भूतेहरसंत्रिलोचनं। आवाहयामि यज्ञेऽस्मिन् पूजेयं मे प्रतिगृह्यतां। सर्वाधिपो महादेव ईशानः शुक्र ईश्वरः। शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः इति नत्वा सां
गायेत्यादि ईशानायेतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्। ततश्चावाह्य ईशानपूर्वयोर्मध्ये ऽधः एह्येहि पातालधारामरेंद्र नागांगनाकिन्नरगीयमान। रक्षोगणेंद्रा
मरलोकसंघ ... रक्षाध्वरमस्मदीयं। ओं अनंतेहागच्छ हृतिष्ठेति सांगादि विशिष्टमनंतमावाह्य यदोरितिगंधादिभिरभ्यर्च्य मेघवर्णां श्वेतां पताकां ध्वजं तां यस्मै रित्युच्चार्य
ओं अनंतं शयनासीनं फणा सप्तकमंडितं। पद्मशंखधरो ... दक्षभागकरद्वयं। नीलवर्णमनंतं ध्यात्वा योसावनंतरूपेणब्रह्मांडं सचराचरं। पुष्पवद्धारयेन्मूर्ध्नि त
स्मै नित्यं नमो नम इति नत्वा सांगायेत्यादि अनंतायेतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्। ततश्चावाह्य पश्चिमनैरृतिमध्ये ऊर्ध्वं एह्येहि सर्वाधिपते सुरेंद्र लोकेन
सार्धं पितृदेवताभिः सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवाय। ओं ब्रह्मन्निहागच्छ हृतिष्ठेति सांगादि विशिष्टं ब्रह्माणमावाह्य ब्रह्मन्नानामिति गंधादि श्री
१५५

© Dharmartha Trust J&K. Digitized by eGangotri

मिरभ्यर्च्य रक्तांपताकां ध्वजं चतेनैव । छित्वाक्षसूत्रकुशमुष्टिधरो ध्येयो दक्षिणकरे स्रुवकमंडलुधरो ध्येयो वामकरद्वयं चतुर्मुखं श्मश्रुजटिलं लंबोदरं रक्तवर्णं ब्रह्माणं ध्या
त्वा पद्मयोनिश्चतुर्मूर्त्तिर्विदावासः पितामहः । यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नम इति नत्वा सांगायेत्यादि ब्रह्मणे एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ॥ ततश्चाव
प्यमंडपमध्ये चामरांकिंकिणीयुतश्च स्रुचदंडो दशषोडशहस्तदंडो वा द्वादशहस्तदीर्घस्त्रिहस्तविस्तारः पंचहस्तदीर्घो हस्तविस्तारो वा महाध्वजो विचित्रवर्णैर्द्रस्य वृत्ता इति स्थाप्य त
अप्सु न ताननिति चतत्रे च ब्रह्मणे ध्वजनं कार्यं । ततो मंडपषोडशस्तंभेषु सर्वेभ्यो देवेभ्यो नमः । देवेषु किंनरेभ्यो नमः । ततः पूर्वस्यां दिशि किंचिद्भूमिमुल्लिख्योपविश्य । त्रैलोक्ये यानि
भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वंतु तानि मे । देवदानवगंधर्वा यक्षराक्षसपन्नगाः । ऋषयो मुनयो गावो देवमातर एव च । सर्वे ममाध्वरे रक्षां प्रकुर्वंतु
मुदान्विताः । ब्रह्माविष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह । रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः । त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः । त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः । ब्र
ह्मणे विष्णवे शिवाय देवेभ्यो गंधर्वेभ्यो यक्षेभ्यो राक्षसेभ्यः पन्नगेभ्य ऋषिभ्यो मनुष्येभ्यो गोभ्यो देवमातृभ्यो नम इति प्रत्येकं संपूज्य पुष्पादियुतं पूर्ववत् मंत्रैरेव तत्स्या भूमावे
भ्य एव माषभक्तबलिं दद्यात् । ततश्चाचार्यः सर्त्विक् प्रक्षालितपादपाणिराचांतः प्राग्द्वारेण मंडपं प्रविश्य दक्षिणद्वारपार्श्वमदेशमुपविश्यायमभ्यो ब्रह्मणा यथाविहितं क
र्म कुर्यां च मिति ब्रूयात् । ततो गुरुर्महावेद्युपरि पुष्पाणि विकीर्य । उपरि वितानं पंचवर्णं फलपुष्पोपशोभितं वेदिमानं बध्नीयात् । महावेद्यां चतन्मानं बध्नीयात् । रहोतो मंडपे चालिखे
दिष त् । पूर्णाभिषेक दीक्षायां तु नवहस्तापरिमितमध्यवेद्यां श्रीचक्रं तत्संदर्शनतां चक्रं वा रचयेत् । नवहस्तं त्रिहस्तं वा श्रीचक्रमभिषेचने । स्थंडिले नित्यपूजायां हस्तमात्रं प्रशस्यते द्
तिलं तत्र राजवचनात् । तस्मिन्पक्षे ग्रहवेदी सर्वतोभद्रमंडलवेदी वायव्ये त्रिपुरपूजावेदी आग्नेये तद्दिनं नित्यपूजावेदी वास्तुमंडलसमीपे इति संप्रदायः । यथा । आचार्य श्रो
त्रियः स्वगृह्योक्तविधिना स्वकुंडेऽग्निस्थापनं कुर्यात् । तेनैव क्रमेणान्यकुंडेष्वपि स्वस्वशाखोक्तविधिना ऋत्विजोऽग्निस्थापनं कुर्युः । [illegible] सर्वे कर्म व्याक्षस्तिष्ठेत् । एवमग्नि
प्रणीतेषु गुरुर्महावेद्यां सर्वतोभद्रे चक्रे चेत्यादि दीक्षादानारंभकर्मांगभूतयागमंडपदेवस्थापनं करिष्य इति संकल्प्य ब्रह्मादीन् स्थापयेत् । मध्ये ब्रह्मा । ब्रह्मजज्ञान [illegible] तमो वाम
देवो ब्रह्मा त्रिष्टुप् । ब्रह्मस्थापने पूजने च विनियोगः । एवमुत्तरत्र । ॐ ब्रह्म जज्ञानं ॥१॥ उत्तरे सोमः । ॐ आभिलादेवसवितः ॥२॥ पूर्वे इंद्रः इंद्रं वो मधुच्छंदा इंद्रो गायत्री ॥४॥ आग्नेये अग्निः
अग्निं का एकोमे ध्यातिथिरग्निर्गायत्री । अग्निं दूतं वृणीमहे ॥५॥ दक्षिणे यमः । यमाय सोमं वैवस्वतो यमो यमोऽनुष्टुप् ॥६॥ नैर्ऋत्यां नैर्ऋतिः सोमपुत्रो घोरः कण्वो त्रिर्नैर्ऋतिर्गायत्री ॥
७॥ पश्चिमे वरुणः । तत्त्वायामि शुनःशेपो वरुणस्त्रिष्टुप् ॥८॥ वायव्यां वायुः । वायो शतं गोतमो वामदेवो वायुरनुष्टुप् ॥९॥ वायुसोमम ध्ये ध्वो वसवः । अयान्त्र त्रमेत्रावरुण

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
१५६
156

वसिष्ठो वासवस्त्रिष्टुप्। ओं ज्मया अत्र। १०। सोमेशानमध्ये एकादश रुद्राः। आ रुद्रासः। श्यावाश्व एकादश रुद्राः जगती। आ रुद्रासः। ११। ईशाने द्रुमध्ये द्वादशादित्याः। त्या
न्नु क्षत्रियान्। सांमदो मगे द्वादशादित्या जगती। १२। इंद्राग्निमध्ये ऽश्विनौ। आश्विनारा हूगणो गौतमो ऽश्विनावुष्णिक्। १३। अग्निमध्ये विश्वेदेवाः। सैपत्नकः। ओमासोम
धुछंदो विश्वेदेवा गायत्री। १४। यमनिरृतिमध्ये सप्तयक्षाः। अभि त्यं वामदेवः सप्तयक्षाः प्रकृतिः। अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रि
यं कविं मतिं। ऊर्ध्वो यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः। १५। निरृति वरुणमध्ये अष्टनागाः। आ यं गौः सर्पराज्ञी सर्पा गायत्री। आ
यं गौः। १६। वरुणवायुमध्ये गंधर्वाप्सरसः। अप्सरसामेनश ऋष्यशृंगो गांधर्वाप्सरसो त्रिष्टुप्। ओं अप्सरसो गंधर्वोलां। १७। ब्रह्मसोममध्ये स्कंदः। नदीश्वरस्तं तमसाकालाः
कुमारं कुमारः स्कंदस्त्रिष्टुप्। कुमारं माता। १८। ऋषभं ऋषभो वैराजो त्रिष्टुप्। ऋषभं मा। १९। ब्रह्मेशानमध्ये दक्षादिः। मदलकोलवा अदितिर्लौ [illegible] बृहस्पतिः दशोऽनुष्टु
पूः ओं अदितिर्हलेनत्रिष्टुप्। २०। ब्रह्मेन्द्रमध्ये दुर्गा त्रिष्टुप्। तामग्नि[illegible] वर्णां सोमरि दुर्गा त्रिष्टुप्। ओं तामग्निवर्णां। २१। इंद्रविष्णुः काण्वो मेधातिथिर्गायत्री। ओं इदं विष्णुः
।२२। ब्रह्माग्नेयमध्ये स्वधा। उदीरतां शंखः स्वधा त्रिष्टुप्। उदीरतां सूनृताः। २३। ब्रह्मयममध्ये विष्णुः सुरगणाः। परं मृत्यो संकुसुको मृत्युर्देवा त्रिष्टुप्। २४। ब्र
ह्मनिरृतिमध्ये गणपतिः। गणानां त्वा गृत्समदो गणपतिर्[illegible] जगती। २५। ब्रह्मवरुणमध्ये आपः। शन्नो देवीः। सिंधुद्वीप आपो गायत्री। २६। ब्रह्मवायुमध्ये
मरुतः। मरुतो यस्य राहूगणो गौतमो मरुतो गायत्री। २७। ब्रह्मणः पादमूले कर्णिकाधः पृथ्वी। स्योना पृथिवि मेधातिथिर्भूमिर्गायत्री। २८। तत्रैव गंगा नद्यः। इमं मे सिंधुद्वी
पमेधा गंगा यमुना सरस्वत्यो जगती। २९। तत्रैव सप्तसागराः। धाम्नो धाम्नो राजन्नितो वरुण नो मुंच। यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच। मा यि
वायो मो षधीर्हिंसीरतो दिश्व्यवाभूस्त्वेतो वरुण नो मुंच। ३०। तदुपरि मेरुं नाम्ना पूजयेत्॥ ब्राह्म्ये सोमादि समीप क्रमेणायुधानि गदां त्रिशूलं। वज्रं शक्तिं खड्गं। पा
शं। अंकुशं। तद्बाह्ये इन्द्रादितः। गौतमः। भरद्वाजः। विश्वामित्रः। कश्यपः। जमदग्निः। वसिष्ठः। अत्रिः। अरुंधती। इति। ८। तद्बाह्ये पूर्वादि दिक्षु। ऐंद्री। कौमारी। ब्राह्मी। वाराही।
चामुंडा। वैष्णवी। माहेश्वरी। वैनायकी। लक्ष्मीः शक्तयः। एता स्वस्वमंत्रैः प्रतिष्ठाप्य प्रत्येकं सह वा पूजयेत्॥ एवमग्निं प्रणीय देवतास्थापनं वा ग्रहादिपैवाक्षीति देवस्था
पनं कुर्यात्॥ तत्रायं प्रयोगः॥ अद्येत्यादि दीक्षादानाख्यकर्मणि ग्रहादिपीठदेवतास्थापनमहं करिष्ये। अस्य परब्रह्मऋषिः परमात्मा देवता। देवी गायत्री छंदः॥

श्री
१५६

© Dharmartha Trust J&K. Digitized by eGangotri

व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृगवो ऋषयः। अग्निर्वायुः सूर्यो देवताः। देवीगायत्री देवी उष्णिक् देवीच हत्यश्छंदांसि। सूर्यावाहने विनियोगः तत्रादित्याया
मध्ये वर्तुले द्वादशांगुले मंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः। आकृष्णेनेति हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप् छंदः सूर्यावाहने विनियोगः। आकृष्णेन०। ओं भूर्भुवः स्वः क
लिंगदेशोद्भव काश्यपगोत्र सूर्य इहागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥१॥ ततआग्नेय्यां चतुरस्रे चतुर्विंशांगुले मंडले प्राङ्मुखं सोमं श्वेतपुष्पाक्षतैः। आप्यायस्वेति गौतम ऋषिः सोमो
गायत्री सोमावाहने विनियोगः। ओं आप्यायस्व०। ओं भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र सोम इहागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥२॥ ततो दक्षिणे त्रिकोणे त्र्यं
गुले मंडले दक्षिणमुखं भौमं रक्तपुष्पाक्षतैः। अग्निर्मूर्धेति विरूप अंगारको गायत्री। अंगारकावाहने विनियोगः। अग्निर्मूर्धा०। ओं भूर्भुवः स्वः सरस्वतीसमुद्भव भरद्वाजसगो
त्र भौम इहागच्छ इह तिष्ठ इति स्थापयेत् ॥ ततईशान्ये बाणाकारे चतुरंगुले मंडले उदङ्मुखं बुधं पीतपुष्पाक्षतैः। उद्बुध्यध्वं बुधः सोम्यो बुध त्रिष्टुप् बुधावाहने विनियोगः। ओं
भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र बुध इहागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥४॥ ततउत्तरतो दीर्घचतुरस्रे षडंगुले उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः। बृहस्प
ते गृत्समदो बृहस्पतिस्त्रिष्टुप्। बृहस्पत्यावाहने विनियोगः। ओं बृहस्पते अति०। ओं भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पते इहागच्छ इहावाहये इह तिष्ठ इति
स्थापयेत् ॥५॥ ततः पूर्वे पंचकोणे नवांगुले मंडले प्राङ्मुखं शुक्रं श्वेतपुष्पाक्षतैः। शुक्रः पाराशरः शुक्रो द्विपदा विराट् शुक्रावाहने विनियोगः। शुक्रः शुशु
क्वा०। ओं भूर्भुवः स्वः भोजराष्ट्रदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥६॥ ततः पश्चिमे धनुषि द्व्यंगुले मंडले प्रत्यङ्मुखं शनिं कृष्णपु
ष्पाक्षतैः। शमग्निरिति विठि शनैश्चर उष्णिक्। शन्यावाहने विनियोगः। ओं भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इहागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥७॥
ततः कृष्णशूर्पमंडले दक्षिणामुखं राहुं धूम्रपुष्पाक्षतैः। कयानो वामदेवो राहुर्गायत्री। राह्वावाहने विनियोगः। ओं भूर्भुवः स्वः पर्वदेशोद्भव पैठीनसिगोत्र राहो इ
हागच्छ इहावाहये इह तिष्ठ इति स्थापयेत् ॥८॥ ततः वायव्ये ध्वजाकारमंडले दक्षिणमुखान् केतून् धूम्रपुष्पाक्षतैः। केतुं कृण्वन् मधुच्छंदाः केतुर्गायत्री। केत्वावाहने वि
नियोगः। केतुं कृण्वन्। मध्यदेशोद्भवाः जैमिनिगोत्राः केतव इहागच्छत इहावाहये इह तिष्ठत इति स्थापयेत् ॥९॥ अथाधिदेवताः। श्वेतपुष्पाक्षतैः क्रमात् सूर्यादीनां
दक्षिणतः स्थाप्याः। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्। विनियोगः सर्वत्र [illegible] त्र्यंबकं०। ओं भूर्भुवः स्वः ईश्वरं ॥१॥ गौरीर्मिमाय दीर्घतमा उमा जगती। सोमदक्षिणतो ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

यदक्रंदो दीर्घतमा स्कंदस्त्रिष्टुप् ३ विस्त्रो दीर्घतमा विष्णुस्त्रिष्टुप् ४ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ५ इंद्र इंद्रो मधुच्छंदा इंद्रो गायत्री। ६ यमाय सोमं मधुमत्तमोय
मोयमो नुष्टुप् ७ मो षु णो घोरः कण्वो गायत्री। ८ उषो वाजे प्रस्कण्व उषास्त्रिष्टुप् सोव हती। ९। एवमेव स्थं ७ पुष्पाक्षतैः ग्रहाणां नाममंत्रानाह॥ नीम के हामके त्रिष्टु
तिवो स्थाप्य प्रत्यधिदेवता स्थापयेत्॥ अग्निं काण्वो मेधातिथिर्गायत्री। ओं अग्निं दूतं। १। अप्सु मे धातिशापो नुष्टुप् २ स्योना मेधातिथिर्भूमिर्गायत्री ३ इदं विष्णुर्मेधा
तिथिर्विष्णुर्गायत्री। ४। इंद्र इंद्रश्रेष्ठानि गृत्समदो इंद्रस्त्रिष्टुप् ५ इंद्राणी वृषाकपिरिंद्राणी पंक्तिः ६ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ७ आयं गौः सार्पराज्ञी स
र्पो गायत्री। ८ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ९ ततः शुक्लपुष्पाक्षतादीन्पंच। गणानां त्वा गृत्समदो गणपतिर्जगती। १ हेविनायकं जातवेदसे कश्यपो
दुर्गा त्रिष्टुप् २ शन्नेकृत्तरतो दुर्गो ३ तव वायवृतस्पते अंगिरसो वायुर्गायत्री। २ वेकृत्तरतो वा मुं एतान्मंत्रानन्ये ठंति सांप्रदायिकाः। ३। आदित्यस्तत्रस्य वस्य आकाशो
गायत्री शं नो दक्षिणे आकाशः। [illegible]षेरुषा प्रस्कण्वोऽश्विनौ गायत्री। अश्विनाविहागच्छेह तिष्ठति केतोर्दक्षिणेऽश्विनौ। ५ अथ लोकपालाः। इंद्र इंद्रं विश्वाजे
तामधुच्छंदस इंद्रो नुष्टुप् ४ इंद्रेहागच्छेह तिष्ठति पूर्वे इंद्रमेवमुत्तरत्रा। १। अग्निर्मेधातिथिरग्निर्गायत्री। २ यमाय सोमं यमो यमो नुष्टुप्। ३। मो षु णो घोरः कण्वो निर्ऋतिर्गायत्री॥
ठलवन्तोऽग्ने वामदेवो वरुणस्त्रिष्टुप् ५ तव वायो अश्वे वायुर्गायत्री। सोमो धेनुं गौतमः सोमः त्रिष्टुप् ७ तमीशानं गौतमः सोम ईशानो गायत्री। ८ सहस्रशीर्षो ना
रायणोऽनंतो नुष्टुप् ९ ईशानपूर्वयोर्मध्येऽनंतं ९ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्। नैर्ऋत्यपश्चिमयोर्मध्ये ब्रह्माणं १० ततः उत्तरे क्षेत्रस्य वामदेवः क्षेत्रपा
लो नुष्टुप् ११ वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् ११ ततः साम्यधं नि शरीरस्थं वाहतं परमेष्ठिनं। सर्वपापहरो नित्यमतः शांतिं प्रयच्छ मे इत्यनेन नमोनरोगरूपं तमावास्य
रवेः पूर्वे शेषं सोमस्याग्नेयां वासुकिं भौमाग्ने तक्षकं बुधोत्तरे कर्कोटकं बृहस्पतेरग्रे पद्मकं शनिपश्चिमे शंखपालं राहोः पुरः कंबलं केतोः पुरः कुलिकं पीठात्प्राच्या
मश्विन्यादि सप्त नक्षत्राणि। विष्कंभादि सप्त योगाः बवबालवकरणे सप्त द्वीपानि ऋग्वेदं। दक्षिणे पुष्यादि सप्त नक्षत्राणि धृत्यादि सप्त योगाः कौलवतैतिलके
पश्चिमे करणे सप्त सागराणि यजुर्वेदं। स्वात्यादि सप्त नक्षत्राणि। वज्रादि सप्त योगान् गरवणिजे करणे सप्त पातालानि सामवेदं। उत्तरे अभिजिदादि सप्त नक्षत्राणि
साध्यादि सप्त योगान् विष्टिकरणं भूरादि सप्त लोकान् अथर्ववेदं। वायव्ये ध्रुवं सप्तर्षींश्च। अथ पंचावकाशं गंगादि सप्त सरितः सप्तकुलाचलान्। आ

श्री
१

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादशादित्यान् एकादश रुद्रान् एकोनपंचाशन्मरुतः षोडशमातृः षड्तन् द्वादशमासान् देवायने पंचदश तिथीन् षष्टिसंवत्सरान् नागान्यक्षान् खगः अपविद्या
धरान् अप्सरसः रक्षांसि भूतानि मनुष्यान् इति ॥ ततो वेदीशान्यां कलशं स्थाप्य तत्र वरुणमावाह्य संपूज्य अभ्यर्चयेत् यथा ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मूले
तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अंगैश्च सहिताः सर्वे कलशं तु स
माश्रिताः । अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा । आयांतु यजमानस्य दुरितक्षयकारकाः । देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोसि तदा कुंभ विधृ
तो विष्णुना स्वयं । त्वत्तोये सर्वभूतानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदि
त्या वसवो रुद्राः विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सांनिध्यं कुरु मे देव प्रसन्नो भव स
र्वदेवते ॥ ततः फलपुष्पमालोल्लसितं वितानं बृहस्पति देवते । सूर्यादिभ्य हृदे नम मे सुतल्पं गृहवेद्यु परिबध्नीयात् । एवं वेदोक्तमंडपप्रतिष्ठादिकं विदध्यादिति
अन्यत्सर्वं प्रागुक्तविधिना विधेयं । ततो गुरुः स शिष्यः प्रातरुत्थाय कृतावश्यकक्रियः शिष्याय प्रादेशमात्रं यथोक्तं दंतकाष्ठं मूलमंत्रेण सप्तधाभिमंत्रितं दत्वा
दंतधावनं कारयित्वा दंतान्विशोध्य दंतकाष्ठं प्रक्षाल्य पुरश्चतुरस्रे हस्तमात्रे स्थंडिले त्यजेत् । ततो गुरुस्तत्परीक्षां कुर्यात् तत्र शुभाशुभफलानि आगमप्रमाणान्नि
रूपणोक्तानि प्रायश्चित्तं वाग्रे वक्ष्यते । ततः शिष्योपि स्नातः कृतपूर्वाह्णिकक्रियः समलंकृतः श्रीगुरुं प्रणम्य तदाज्ञया तत्पार्श्वे उपविशेत् । ततो गुरुश्च ऋत्विज
श्च स्वस्वकुंडे तथैव देवं सांगं सावरणं संपूज्य सघृतैस्तिलैस्तत्तत्कल्पोक्तपुरश्चरणहोमद्रव्यैर्वाष्टोत्तरसहस्रमष्टोत्तरशतं वा जुहुयुः । ततो गुरुः शिष्यमुद्धातिरि
क्तं पंचगव्यं पाययित्वा कुंडसमीपं नीत्वा दिव्यदृष्ट्यावलोक्य तस्य हृदयारविंदाज्जीवात्मानं भूतशुद्ध्युक्तपरिपाट्या तद्देहाद् ब्रह्मरंध्रमार्गेण निःसार्य स्वात्मनि युक्त्या
योगबलेन संयोज्य शिष्यषडध्वशोधनं कुर्यात् । तत्र शिष्यस्य पादयोः कलाध्वानं निवृत्तिप्रतिष्ठाविद्याशांतिशांत्यतीतात्मकं पंचकलात्मकं संचिंत्य ततस्तस्य लिं
गप्रदेशे शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकलारागनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थ
शब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकषट्त्रिंशत्तत्त्वरूपं शैवतत्त्वाध्वानं ध्यायेत् ॥ इति शैवदीक्षायां ॥ वैष्णवदीक्षायां तु जीवजोणा

© Dharmartha Trust J&K. Digitized by eGangotri

वि० प्रा०लि० व
१५८
158

।धिपस्तुर्मेन इंद्रियदशकतन्मात्राभूतानां पंचकर्मे॥पिहृत्यस्तेजसां त्रितयतत्त्वं वासुदेवप्रमुखाश्चत्वार उपदिष्टा इति। इंद्रियदशकं प्रागुक्तं श्रोत्रादयो
वागादयश्च। तन्मात्राश्च शब्दादयः। भूतपंचकमाकाशादि। तेजसां त्रितयं सोमसूर्याग्निमयं। वासुदेवप्रमुखाश्च वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः॥
सोऽरदीक्षायां तु। भूततन्मात्रेंद्रियाणि मनोगर्वश्च। बुद्धिश्च धीस्तथा प्रधानं चेति। इंद्रियाणि दश। ज्ञानकर्मभेदात्। जैवोऽहंकारः। प्रधानं प्रकृतितत्त्वं॥ शाक्ति
दीक्षायां तु॥ आत्मविद्याशिवा एते विपरीतास्त एव वा। सर्वतत्त्वं चेति। विपरीताः शिवविद्यात्मानः। इति क्रमेण तत्त्वत्रयं। आत्मविद्याशिवा एवेति दशतत्त्वानि
इत्थं तत्त्वदीक्षायां तत्त्वाध्वानं चिंतयेदिति। गाणपत्यदीक्षायां तु शैववत्तत्त्वान्येव ज्ञातव्यानि। ततः शिष्यस्य नाभौ अतलवितलसुतलमहातलतलातलरसातल वि
पातालभूर्भुवःस्वर्महर्जनस्तपःसत्यलोकात्मकचतुर्दशभुवनाध्वानं संचिंत्य ततः शिष्यशिरसि पदसमुदायमयं मूलमंत्रस्वरूपं मंत्राध्वानं भावयेदिति शि
ष्यशरीरेऽध्वषट्कं संचिंत्य तं कूर्चेन स्पृशन् गुरुः स्वकुंडे ओं अमुकस्य कलाध्वानं शोधयामि स्वाहा। एवं घृताक्तैस्तिलैः षट्धा हुत्वा कलाध्वानं तत्त्वाध्वनि विलीनं वि
भाव्य अमुकस्य तत्त्वाध्वानं शोधयामि स्वाहा। इत्यषट्धा हुत्वा तत्त्वाध्वानं भुवनाध्वनि विलीनं विभाव्य पुनः ओं अमुकस्य भुवनाध्वानं शोधयामि स्वाहा। इत्य
षट्धा हुत्वा भुवनाध्वानं वर्णाध्वनि विलीनं विभाव्य पुनः ओं अमुकस्य मंत्राध्वानं शोधयामि स्वाहा। इत्यषट्धा हुत्वा तं पदाध्वनि विलीनं विभाव्य पुनः ओं अ
मुकस्य पदाध्वानं शोधयामि स्वाहा। इत्यषट्धा हुत्वा तं मंत्राध्वनि विलीनं विभाव्य पुनः ओं अमुकस्य मंत्राध्वानं शोधयामि स्वाहा। इत्यषट्धा हुत्वा तं ब्रह्मरंध्र
वेदिभिः। गुरुः संतोषयेत् कन्याभूषणाच्छादनादिभिः। गुरोः संतोषमात्रेण मंत्रसिद्धिर्भवेद्ध्रुवं। गुरुमूलमिदं सर्वमित्याकुलतंत्रवेदिनः। गुरुं विलंघ्य यात्स्वे सिद्धिं न्याधि श्री २२०
कारः सुरेश्वरि। एतेषां मंत्रतंत्राणां प्रयोगः क्रियते यदि। गुरोराज्ञां विनादेवि सिद्धिर्हानिः प्रजायते। शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन। यस्य देवे च मंत्रे च गुरौ चा त्रिषु
निश्चला। न व्यवाक्ष्यते भक्तिस्तस्य सिद्धिरदूरतः। भावनानां रहितानां चक्षुद्राणं क्षुद्रचेतसां। चतुर्गुणं जपः प्रोक्तः सिद्ध्येनान्यथा भवेत्॥ इत्येकवीराकल्पे वने

© Dharmartha Trust J&K. Digitized by eGangotri

नात्।पशुभावानांपुरश्चरणंचतुष्टयात्मकं।सिद्धिः।अतएवचतुर्धोनुष्ठितोमन्त्र इति पूर्वमुक्तं।शुद्धानांपशूनामित्यर्थः।भावानां दिव्यवीरभावानां।अपि
यपुरश्चरणांतरान्तरे।यदि विप्रः कुलश्रेष्ठः कुलद्रव्यपरायणः।तदा तेन विधानेन केवलं कुलसाधनं।मद्यं मांसं च मत्स्यं च मुद्रां मिथुनमेव वा।अन्योन्यं नित्य
तान्हित्वा कुलद्रव्यैः प्रपूजने।कुलश्रेष्ठादिकोवा वीरो वा।अनेन विधानेन वक्ष्यमाणेन विधानेन।विप्राणां पाशवमेवानुकूल्यादिविधानमिति विप्रपदेन निरस्तं।
कुलार्णवे च।कुलक्रममुपक्रम्य।ब्राह्मणैस्तु सदा कार्यं क्षत्रियैस्तु रणागमे।वैश्यैर्धेनप्रयोगे च शूद्रैरेव कदाचन।अनुकल्पस्तु विप्राणामित्यादि वचनानि च पशु
विप्रपराणि।वा कुल्येन विप्राः पशव एव।भवंतीति यदि कारः।कुलचूडामणौ।पुरश्चरणकालेन कुलशक्तिं प्रपूजयेत्।दीक्षितां गंधपुष्पाद्यैर्भक्ष्यैः पायससंभ
वैः।आरंभकाले वनितां स्वयं भक्षान्वितैर्मतैः।अन्यगेहे समानीय वाद्यादिकं विशेषो धेयात्।अमृतीकरणं कृत्वा शक्तिं वाभिमुखीं नयेत्।आसनं प्रथमं दद्यात्स्वा
गतं च वदेत्सुनः।पाद्यमर्घ्यं च पानीयं मधुपर्कं जलं तथा।स्नापयेद्गंधपुष्पाद्भिः केशसंस्कारमारभेत्।धूपयित्वा ततः केशान्कौशेयं च निवेदयेत्।ततः स्नानांतरे पी
ठमास्तीर्य पादुकायुगं।दत्वा तत्र समासीनां नानालंकारभूषणैः।भूषयित्वानुलेपं च गंधं माल्यं निवेदयेत्।दद्यान्मंडलमध्ये तु स्वर्णपात्रे सुशोभने।चर्व्यं चोष्यं लेह्य
पेयं भोज्यं च पंचभक्ष्यकं।नानाविधं पिष्टकं च नानारससमन्वितं।दुग्धं दधि घृतं तक्रं नवनीतं सशर्करं।उपलारवंडपूर्णं च नानाविधरसायनं।नारिकेलं कपित्थं
च नागरंगं सुदर्शनं।लिंपाकं बीजपूरं च डाडिमं फलमुत्तमं।नानावन्यफलैश्चैव नानागंधविलेपनैः।चंदनं मृगनाभिं च श्रीखंडं नवपल्लवं।टंकणं लोध्रकं चैव जलं तं
च नजं तथा।नानाशैलसमुद्भूतं नानालंकारभूषणं।आदावंते च मध्ये च जपपूर्तौ विशेषतः।न पूजयति चेत्कांतां तदा विघ्नैर्विलिप्यते।पूर्वार्जितफलं नास्ति का कथा
परजन्मनि।तस्मात्सर्वप्रयत्नेन यदीच्छेदात्मनो हितं।ममापि क्रोधसंतापशमनं चिरकाङ्क्षितं।यत्नतः पूजनीयाः स्युः कुलाकुलजनांगनाः।आदिमध्यावसान
विधिसु आलाभे जवधेयः।अत्यंतालाभेपि आद्ये तयोरावश्यकविधिः।आरंभकाले चेति जपपूर्तौ विशेषत इति चोक्तेः।। ।।इति श्रीविद्यार्णवे षोडशश्वासः।।
।।अथ रहस्यपुरश्चरणं।।तदुक्तं स्वतंत्रतंत्रे।।अथवान्यप्रकारेण पुरश्चरणमिष्यते।कुलेवाशनिवारे वा नरमुंडे समाहृतो।पंचरागे चेनमिलितं वंदनादौ विशेषतः।नि
शि पश्यन्मीहस्तधमानतः।कामतं चेतनात्तत्र तु दिवसेरात्रौ सह स्त्रियं दिमानतः।एकाकी प्रजपेन्मंत्रं संभवे कल्पपादपः।।अथवान्यप्रकारेण पुरश्चरणमिष्यते।।

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२२१

यावमानीयत इति तेनैव परिस्वन्यच्च। तद्दिना तद्दिनयावज्जावदष्टोत्तरशतं। समये त्सर्वसिद्धीर्नो मात्र कार्या विचारणा॥ अथवान्यप्रकारेण पुरश्चरणमुच्यते। अष्टम्यां
चचतुर्दश्यां पक्षयोरुभयोरपि। सूर्योदयं समारभ्य यावत्सूर्योदयांतरं। तावज्जप्त्वा निराहारकः सर्वसिद्धीश्वरो भवेत्॥ मुंडमालातंत्रे॥ अथवान्यप्रकारेण पुरश्चरणमि
ष्यते। शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः। भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकं। जपेदेकोपि विजने केवलेति निरालये। अष्टम्यादिनवम्यंतं उपवासपरो
भवेत्। कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत्। सहस्रसंख्यं जपते तु पुरश्चरणमिष्यते। कृष्णां चतुर्दशीं प्राप्य नवम्यंतं महोत्सवे। अष्टमीनवमीरात्रौ पूजां
कुर्याद्विशेषतः। दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिर्युतं। षट्सहस्रं जपेन्मंत्रं नित्यं भक्तिपरायणः। चतुर्दशीं समारभ्य यावदन्या चतुर्दशी। तावज्जप्त्वा महेशानि पु
रश्चरणमिष्यते। केवलं जपमात्रेण मंत्राः सिद्धिर्भवंति हि॥ स्वतंत्रतंत्रे॥ रात्रौ मांसं रसं देवीं पूजयित्वा विधानतः। ततो नग्नां स्त्रियं नग्नो क्षेत्रे केद पुलोपि वा। जपेल्ल
क्षं ततो देवीं होमयेऽज्जुलदानजे। योनिकुंडे स्थिरः सर्पिर्मांससमन्वितायुतं तथा। दशांशं तर्पयेन्मत्स्यैर्मांससम्मिश्रैस्तु साधकः। तर्पणस्य दशांशेनाभिषिच्य जगन्मं
दशांशं भोजयेत्साधुः साधकः देवताप्रियं। आद्यं मांसं च मत्स्यं च चर्वणं च निवेदयेत्। ततस्तु तोषयेत्कन्यागुरुं स्वर्णादिभिः प्रिये। दिव्यमनस्य मंत्रस्य फलावलक्ष एव जपः। स
हस्रमात्रमेव प्रोक्तं हि के। अत एव जपे लक्षमिति पूर्वं दर्शितवचनैकवाक्यता। होमादेश्च प्रथमादिपदार्थस्य प्राधान्यं। कुंडस्य च योनिरूपतायां नियमः॥ कुलरीत्
यां॥ रात्रौ नग्नो मुक्तकेशो मैथुने यापि तत्ततः। प्रजपन् प्रयत्नेन सर्वकामार्थसिद्धये॥ तन्त्रांतरे॥ तावत्काले जपेन्मंत्रं यावच्छुक्रं न मुंचति। मुक्ते शुक्रे च देवेशि पुनर्म
त्रं जपेत्सुधीः॥ रात्रौ तां कुलपूर्णां स्यः शय्यायां लक्षमात्रतः इति चाशावासनाधिकफउंलगेह प्रवेशनं। इति चाथो न्याभिमंत्रणादेव दूतीयागवत्। अत्र च साधकानां निरी
समये नग्नस्त्रीदर्शनं निषिद्धमिति पूर्वोक्तं। यदि भाग्यवशाद्देवि कुलदृष्टिः प्रजायते। तदेव मानसीं पूजां स्वयं तासां प्रकल्पयेदिति कुत्रचिदभिहितं विहितमपि पाए वेविरोधे
व्यवस्था। बलात्कारेण विदुं वज्रानकर्त्तव्येति निषेधः॥ भावपूर्वकस्तु विधिः॥ तथा च तन्त्रांतरे॥ तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा। सर्वथा नैव कर्त्तव्यमन्यथा
सिद्धिरोधकृत्। स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव हि जीवितं। स्त्रीगणेषु सदा भाव्यमभावे स्वस्त्रियामपि। तद्स्नापवितं पुष्पं तद्स्नापचितं जलं। तद्स्नापचितं श्री
नोऽपि देवताभ्यो निवेदयेत्। दिव्यो वाप्यथ वीरो वा रात्रौ लक्षं जपं चरेत्। दिव्यके दिव्यवीरयोः समानमेव विधानं। दिव्ये कुलसाधनमावश्यकं॥ गांधर्वेण क्रमेण

श्री
२२१

© Dharmartha Trust J&K. Digitized by eGangotri

वभीभुवि दुर्लभे नेति वचनात् श्रीविद्याविषये दिव्य एव क्रमः ॥ अन्यत्रोभयोस्तुल्यत्वात् ॥ अथ वीरपुरश्चरणं कुलरूपं ॥ भावचूडामणौ ॥ वीरसाधनकार्ये च
कर्त्तव्यं वीरपरूपेण दिव्यैरपि वकर्त्तव्यं पशुभिर्नैव पामरैः ॥ वीरं दिव्यं न यत्कर्म तत्पशोर्नेति निश्चितं ॥ अत्र दिव्यैरपीत्यनेन दिव्यानुष्ठेयत्वाच प्रतिपाद्यते ॥ एवं सति दि
व्यवीरकर्मेणुक्तं ॥ वीरदिव्यकर्मेणुक्तं तत्क्वचित्कदाचित्किं दिव्यवीरत्वेष्वेतु प्रकृतौ ॥ वस्तुतस्तु सर्वमेवमुक्तं गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वतीति ॥ प्रकाशनात् सिद्धि
हानिर्नो अत्र कार्या विचारणा ॥ इत्यादि तंत्रांतरवचनात् ॥ गोपयेन्मातृजारवदिति कौले ॥ वीराणां पुरश्चरणादौ परकीयनारीं दीक्षितां यथाशक्ति पूजयेत् ॥ तदुक्तं
कुलचूडामणौ ॥ पुरश्चरणकाले तु परयोषां प्रपूजयेत् ॥ दीक्षितां वस्त्रभूषाद्यैर्मांसैः पायससंभवैः ॥ आरंभकाले नियतं स्वयं पक्वान्नलेपनं ॥ दुग्धं दधि घृतं त
कं नवनीतं सशर्करं ॥ उपलाखंडमार्द्वं च नानाविधरसायनं ॥ नारिकेलं कपित्थं च नागरंगं [illegible] दर्शनं ॥ लिंपाकं वीजपूरं वडाडिमीफलमुत्तमं ॥ नानावन्यफलं
चैवं नानागंधविलेपनं ॥ चंदनं मृगनाभिं च श्रीखंडं नवपल्लवं ॥ टंकणं लोध्रकं चैव वजलं वजनं तथा ॥ नानाशैलसमुद्भूतं नानालंकारभूषितं ॥ भूमिगेहे समानीय
वाद्यौदकविशोधिकं ॥ अमृतीकरणं कृत्वा शक्तिं चाभिमुखीं नयेत् ॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलसंभवा ॥ वेश्या नापितकन्या च रजकी नटकी तथा वि
शेषवैदग्ध्ययुताः सर्वा एव कुलांगनाः ॥ दीक्षिता अष्टशक्तीः क्रमेण संस्थाप्य पाद्यार्घ्यपात्रं स्थापयित्वा ऽर्घ्योदकेन ताः प्रोक्ष्य वमिति धेनुमुद्रया ऽमृतीकृत्याष्टशक्ती
रूपभेदं कृत्वा ब्राह्म्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः ॥ आसनं प्रथमं दत्वा स्वागतं च पुनः पुनः ॥ अर्घ्यपाद्यं च पानीयं मधुपर्कं जलं ततः ॥ स्नापयेत् धूप
ध्यादि केशसंस्कारमेव वा धूपयित्वा ततः केशान् कौशेयं च निवेशयेत् ॥ ततः स्नानांतरे पीठमास्तीर्य पादुकाद्वयं ॥ दत्वा तत्र समानीय नानालंकारभूषणैः ॥ भूषयि
त्वानुलेपनं गंधैर्माल्यं निवेदयेत् ॥ ततस्तां शक्तिं यथाक्रमेण ब्राह्मण्यादिरूपां समावाह्य जीवन्यासादिकं कुर्यात् ॥ यथा पूर्वोक्तप्राणप्रतिष्ठामंत्रेण ॥ अमुष्य स्थाने अमु
ष्याः प्राणा इह प्राणा इत्यादिक्रमेण प्राणप्रतिकुर्यादित्यर्थः ॥ एवं माहेश्वर्या इत्यादि क्रमः ऊहनीयः ॥ ततो गंधपुष्पदीपान्नव्यंजनादिकं दत्वा तासां सव्यकर्णे क्रमेण
स्तोत्रं पठेत् ॥ तदुक्तं तत्रैव ॥ तां तां शक्तिं समावाह्य मूर्च्छितां सां समानयेत् ॥ भोज्यं मंडलमध्ये तु स्वर्णपात्रे सुशोभने ॥ चर्व्यं चोष्यं लेह्यपेयं भोज्यं भक्ष्यं निवेदयेत् ॥ अ
दीनामेव चानु तदमायां निवेदयेत् ॥ तासां मध्ये पुकर्णे तु ततः स्तोत्रं समाचरेत् ॥ मातर्देवि नमस्तेस्तु ब्राह्मणरूपधरे नघे ॥ रूपयाहरमेवि घां मंत्रसिद्धिप्रयच्छ मा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

माहेशि वरदे देवि परमानंदरूपिणि। रूपये स्यादि॥२॥ कौमारि सर्वविद्येशि कुमारक्रीडने परे। रूपये०॥३॥ विष्णुरूपधरे देवि विनतासुतवाहिनि। रूपये०॥४॥ वाराहि वरदे दे
वि दंष्ट्रोद्धृतवसुंधरे॥ रूपया०॥५॥ शक्ररूपधरे देवि शक्रादिसुरपूजिते॥ रूपया०॥६॥ चामुंडे मुंडमालाभिश्चर्चिते विघ्ननाशिनि। रूपया०॥७॥ महालक्ष्मि महोत्साहे क्षोभ
संतापनाशिनि॥ रूपया०॥८॥ मिति मातृमये देवि मिति मातृबहिःकृते। एकधा बहुधा विधे देवि विश्वरूपे नमोस्तु ते॥९॥ एतत्स्तोत्रं पठेद्यस्तु कर्मारंभेषु संयतः। विघ्नध्वांतस
मालोक्य तस्य विघ्नं न जायते॥ कुलीनस्य गुरुर्देवः कथितास्तत्र पुत्रका। दीक्षाकाले विशेषपूजा समये नार्चयेद्यादि तस्य पूजाफलं व त्सनीयते यक्षराक्षसैः। यदि पीडा परा सा तु भ्रां
न्तेन गृहाद्बहिः स्थितः स्मरेत्पठेत्स्तोत्रं यावत्तत्तिः प्रजायते। आचम्य मुखवासादि तांबूलं च निवेदयेत्। ततो दद्यात्पुनर्माल्यं गंधं चंदनपंकिलं। ५ विसृज्य च दक्षिणी कृत्य
वरे प्रार्थ्य सुखी भवेत्। अन्याय दिनाछे तु निलकन्यां ज्ञातिजां तुला। अग्रजां मातुलानीं वा मातरं तत्सपत्निकां। पूर्वाभावे परा पूज्या मदशायोषितो नताः। सर्वाभाव एकतरा पूजनीया
प्रयत्नतः। एकस्यैः कुशा स्त्रीजनः पूजार्हस्तत्र भैरवा सर्वाएव सुराः पूज्याः सत्यं ब्रह्मशिवादयः। एकैव युवती तत्र पूजिताचारलोकिताः सर्वाएव परा देव्यः पूजिताः कुलभैरवैः।
॥वीरतंत्रे॥ यः कलौ तु कुरुते वीरसाधनं सुसमाहितः। प्राप्नोति परमां सिद्धिं नात्र कार्या विचारणा। तस्मात्सर्वप्रयत्नेन कर्त्तव्या वीरसाधना॥ निर्भये वै विशृ विना भूत्वा सर्वा
र्थसिद्धिदा। नास्याः परतरा किंचिद्विद्यते शीघ्रसिद्धिदं। भैरवेण पुराप्रोक्तं सर्वकामार्थसिद्धिदं। घटीवेधेन वस्त्रेण मूले न परिधायवा लं छाद्येच पुनर्वस्त्रं मूले लोगवि
लेपनं। धृतो छीवस्य मूले नरसिंहरेणोर्ध्वपुंड्रकं। इष्टदेवं गुरुं नत्वा यायात्त्र्यग्रहरमध्यतः। कार्योऽथ साधकैः सार्द्धं हृदि मंत्रपरामृश्य। अक्षुब्धो मुक्तभोगस्तु भुक्त्वा साधनं
मायरेत्। अष्टम्यां च चतुर्दश्यो पक्षयोरुभयोरपि। भौमवारे तमिस्रायां साधयेत्सिद्धिमुत्तमां। उपचारं समादाय कुलामृतरसादिकं। निशायां मम हृद्यं चतुष्पथाग्रे दै
रवः। द्विग्वासा विमली भस्मभूषणो मुक्तकेशकः। इति दिव्यस्थलं च कुत्र विद्धि हि तौ॥ अन्यत्र च॥ भूमिपुत्रसमायुक्ता सा मावास्या शुभोदया। भद्रपुष्करसंयोगेन सा यो वी
रवीरो नमः॥ रुद्रयामले॥ सत्यक्रमे च तुर्वर्गैः क्षीरान्नमधुपिष्टकैः। त्रेतायां पूज्यते देवी घृतेन सर्वजातिभिः॥ मधुभिः सर्व वर्णैश्च पूज्यते द्वापरे युगे। पूजनीया कलौ दे
वी केवलैरासवैश्च तैः। इति युगांतरे चानुकल्पविधिः॥ सर्ववर्णसाधारणः॥ कलौ प्रधानकल्पोपि तादृश एव। शुद्धाद्धकरसेनैव सुरां न ब्राह्मणस्य च वा गौडी तु या क्ष
त्रियेण माध्वी वैश्येन तत्र वै। कदलीमधुसंमिश्रशालितंडुलैः सदा सर्वभद्रस्येव प्रोक्ते पत्र वा तद्रव विभवेत्। इति कुलार्चिता। पूर्वे वदेव स्यव्याख्यानं॥ वस्तुतोऽनु

© Dharmartha Trust J&K. Digitized by eGangotri

कल्पः प्रधानालाभे संभवति ननु पुगवंल्पेयरतया। गौडी माध्वीति विशेषः कामनापरत्वेन। अथवा। सुरा नेति भवली त्यध्याहारः। तेन सुरा न भवति। वेदित्यर्थः।
गौडी माध्वी तु गुडं मधु चेति स्वार्थे कप्रत्ययः। मूळालाभमपि प्रधानालाभे कदल्यादीन्येव सुरासुरानुकल्पः। यद्यतत्रेति पदं वितायामित्यर्थं बोधयति। वीरसाधनप्रकरणे
तात्। यत्र वितानमत्र शवस्पर्शादिकमनवद्यं तत्र प्रधानमनवद्यमिति कानुपपत्तिः। तत्र तदा शिरश्चालनेन। प्रधानानुकल्पाभावे विधानात्। गुडार्द्रकरसेनेनिक्षुदळी
त्यादि वा। नारिकेलोदकं कांस्ये ताम्रे दद्यात्तथा मधु। दधि दुग्धे तथा ताम्रे गुडमिश्रं तथा दधि। गुडार्द्रकमथो वापि शूद्रानार्थं प्रकल्पयेत्। इति पत्तदित्तिला दशपात्रादिसं
योगेन प्रधानतुल्यत्वेन भवतीति निषेधात् दवसां स्वयमेव। तस्मात्प्रधानालाभे अनुकल्पपराण्येतानि वचनानि। अन्यच्च। कुलागमक्रमेणैव पूजयेत्परमेश्वरी
मिति सकलतन्त्रस्वरसात्। कुलाम्भाः कुलार्णवः। यथा। शैवे च वैष्णवे शाक्ते सौरे सुगतदर्शने। बौद्धपाशुपते सांख्ये मौक्ते कालामुखे तथा। दक्षिणे वामसिद्धान्ते वै
दिकादिषु पार्वति। विना लिपिताभ्यां वै पूजनं निःफलं भवेत्। कुलद्रव्यैर्विना कुर्यात् जपं पूजां व्रतं तपः। निःफलं तद्भवेद्देवि भस्मन्येव यथा हुतं। यथा क्रतुविप्राणां
सोमपानमदूषितं। अलिपानं तथा देवि सोमवत् भोगमोक्षदं। इत्यादि सहस्रशो वचनेभ्योऽपि ज्योतिष्टोमादियागेषु विहितवदत्रापि समत्यनुमितवेदविहितत्वात्ता धर्म
साधनं। निषिद्धत्वात् एवाधर्मः। निषिद्धं निन्द्यमानं तत्र विधिहस्तान्निःशंको निर्भयो धीरो निर्लज्जो निष्कुतूहलः। नित्योतवेदशास्त्रार्थो वरदां वारुणीं पिबेत्।
तत्कर्म कुर्वतां पुंसां कर्मलोपो भवेद्ध्रुवं। तत्कथं तत्प्रकुर्वन्ति सप्तकोटिमुनीश्वराः। निषिद्धं निंद्यते वा। आकृतिं गुरुरूपे किं न बटुकादीन् प्रपूजयेत्। वा। वीरोऽप्यत्र कथा पापकर्म
नं देवताशापमाप्नुयात्। अयश्चाभैरवं देवं मकुल्यामंत्रतर्पणं। पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत्। अज्ञात्वा कौलिकाचारं मद्यं गुरुपादुकां। अस्मिन्स्थ
लेप्रवर्तेत तं लं पीडयसे ध्रुवं। कौलहानेत्वपसिद्धो यो द्रव्यं भोक्तुमिच्छति। समहापातकी देवि सर्वकर्मबहिष्कृतः। समयाचारहीनस्य स्वैरवृत्तेर्दुरात्मनः। नास्ति द्रव्यः
कुलभ्रष्टस्य सर्वं नरकायैव। यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः। स सिद्धिमिनाप्नोति परत्र च परां गतिं। स्वेच्छया वर्तमानो यो दीक्षासंस्कारवर्जितः। ननस्य स
त्तिः क्वापि तपस्तीर्थव्रतादिषु। असंस्कृतं पिबेद्द्रव्यं बलात्कारेण मैथुनं। स्वप्रियेण हतं मांसं रौरवं नरकं व्रजेत्। इत्यादि वचनानि शतशः। अविधिनिषेधपराणि।
अति प्रसवस्तु कविषद्दकृया आपन्नमलि द्रव्यं तु भक्तितः। गृहीत्वा मूलमंत्रेण गुरुं स्मृत्वा च पादुकां। तत्पात्रेण संयुक्तं गच्छेत्पानं लम्युद्धरन्। इत्यपि संस्क

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२२३

२२३

तपूजावशेषद्रव्यपरं ॥ फलश्रुतिरपि ॥ सर्वसिद्धिकरी पैष्टी गौडी भोगप्रदायिनी ॥ माध्वी मुक्तिकरी ज्ञेया सुरा स्याच्छ्रीविद्याप्रिये ॥ विद्याप्रदेक्षुजा प्रोक्ता द्राक्षारा
ज्यप्रदायिनी ॥ तालजा स्तंभने शस्ता खार्जूरी रिपुनाशिनी ॥ नारिकेलभवा श्रीदा पानसा स्याच्छुभप्रदा ॥ माधूका स्याज्ज्ञानकरी क्षारि रिपुहारिणी ॥ मैरेया स्यात्कुले
शानि सर्वपापप्रणाशिनी ॥ क्षररक्षसमुद्भूतमथवल्कलसंभवं ॥ यस्यान्नं देवि नैवेद्ये सोमदं वममोहरं ॥ इक्ष्वंतद्भूतमं देवि देवताप्रीतिकारकं ॥ सुरासंदर्शनाद्देवि तीर्थको
टिफलं लभेत् ॥ तद्गंधघ्राणमात्रेण शतक्रतुफलं लभेत् ॥ देवि तत्पानतः साक्षाल्लभे मुक्तिं चतुर्विधां ॥ मांससंदर्शनादेव सुरादर्शनवत्फलं ॥ तस्मात्कुलार्णवोक्तवचनान्ये
वादरणीयानीति संगतं प्रतिभाति ॥ इत्यलं जल्पितेन ॥ नीलतंत्रे देव्युवाच ॥ महा नीलक्रमं देव सूचितं न प्रकाशितं ॥ कथयस्व महादेव सर्वसिप्रदं महत् ॥ भैरव उवाच ॥
शृणु देवि वरारोहे वीरसाधनमुत्तमं ॥ सर्वसिद्धिप्रदं साक्षात्सर्वदेवनमस्कृतं ॥ सर्वपापहरं देवि सर्वरोगविनाशनं ॥ ब्रह्मविष्णुशिवादीनां दिक्पालानां च भामिनि ॥ भैरवाणां च स
र्वेषां गंधर्वाणां च योगिनां ॥ सततं सिद्धिप्रदं देवि सर्वेषां मालये महत् ॥ नान्या सिद्धिप्रदं देवि वीरसाधनवर्जितं ॥ मतः वक्तो महाबुद्धिर्महासाहसिकः शुचिः ॥ महासत्वो दयावान्स
र्वभूतहिते रतः ॥ तेषां कृते महादेवि कथितं नीलसाधनं ॥ सान्निधान्नं गुडं छागं सुरापिष्टकमेव च ॥ नानाफलं बलिं चैव धूपस्य च कल्पितं साधनं ॥ चितास्थानं समानीय सुहृद्भिः शस्त्र
पाणिभिः ॥ समानगुणसंपन्नैः साधकैर्वीतभीः स्वयं ॥ नवीक्षेत चतुर्दिक्षु देवताध्यानतत्परः ॥ भीतश्चेत्साधकस्तत्र चतुर्दिक्षु च साधकाः ॥ नचेत्स्वयं केवलो सौ भैरवः परिकीर्तितः ॥
प्रक्षालितो चितं भूमिं गत्वा साधकसत्तमः ॥ प्रक्षालितायदि प्रायः कारये दक्षिसंस्थितं ॥ अस्त्रांतमूलमंत्रेण प्रोक्षणं यागभूमिषु ॥ उरूपादरज्जो ध्यात्वा गणेशं बटुकं तथा ॥ योगिनीनां मा
तृकां चैव वामपादपुरःसरं ॥ येचात्र संस्थिता देवा राक्षसाश्च भयानकाः ॥ पिशाचाः सिद्धपश्चक्षा गंधर्वाप्सरसां गणाः ॥ योगिन्यो मातरो भूताः सर्वाश्च खेचरास्त्रियः ॥ सिद्धिदास्ता भवं
तु च तथा चममरक्षकाः ॥ प्रणम्य मनुना तेन पुष्पांजलित्रयं क्षिपेत् ॥ स्मशानाधिपतिं पश्चात्भैरवं कालभैरवं ॥ महाकाले पतेच्चलात्पूर्वादिदिक्चतुष्टये पापाद्यादि मिश्रमंत्र
ज्ञो बलिं पश्चान्निवेदयेत् ॥ शब्दबीजं पुनः पश्चात्स्मशानाधिपतत्परं ॥ इमममंते सान्निधान्नं बलिं गृह्ण ततः परं गृह्ण गृह्णापयपयुगं विघ्ननिवारणं ततः ॥ कुरु सिद्धिं मे ततो ते प्रयच्छ
स्वाहयान्वितं ॥ ताराद्यमनुना देवि प्रथमो बलिरीरितः ॥ मायांते भैरवं पश्चाद्भूयानकततः परं ॥ पूर्ववद्बलिमुद्धृत्य दक्षिणे बलिमाहरेत् ॥ कुमंते वमहाकालात्पश्चात्पूर्ववदुद्धरेत् ॥ श्री
पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत् ॥ शब्दांते कालशब्दांते भैरवेतिपदं ततः ॥ स्मशानाधिप इत्येवं पूर्ववच्चोत्तरे हरेत् ॥ चितामध्ये ततो दद्याद्बलिं नेयमनुना मंत्रा २२३

© Dharmartha Trust J&K. Digitized by eGangotri

लरात्रिर्महाकाली कालिके घोरनिस्वने। गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमां। कालिकायै बलिं दत्वा भूतनाथाय दापयेत्। आं ह्रीं ते भूतनाथाय ते स्मशानाधिप इदं ब-
पि। प्रणवाद्येन मंत्रेण दापयेद्बलिमुत्तमं। हूं सर्वगणनाथाय ते धिपतये वै तथा पुनः। स्मशानमस्तके दत्वा पूर्ववच्च समुच्चरेत्। ताराद्येन बलिं दत्वा पंचाग्न्येन सुंदरि। अ-
स्थि संप्रोक्षणं कृत्वा पीठमंत्रं न्यसेत्ततः। भूर्जे वा वाटपत्रे वा तत्र पीठमनुं न्यसेत्। पीठमास्तीर्य तस्मिन्वै वद्धवीरासनस्तदा। वीरार्द्दनेन देवेशि लोष्ट्रान्दिक्षु परिक्षि-
पेत्। कूर्चबीजद्वयं देवि मायायुग्मं ततः परं। कालिके घोरदंष्ट्रे च प्रचंडे चंडनायिके। दारवान्दारयेत्युक्त्वा हन हनेति द्विठयं ततः। द्विठांतो वर्मशस्त्रांतो वीरार्द्दनमनुर्मतः।।
अनेन मंत्रितान्लोष्ट्रान्दशदिक्षु विनिक्षिपेत्। तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते। यदि प्रमादाद्देवेशि साधको भयविक्लवः। गतदा तैस्तैः सुहृद्वर्गै रक्षितो नाभिभू-
यते। अर्कतूलसितगव्यालमूलनिर्मितवर्तिका। प्रदीपं तत्र संस्थाप्य मंत्रं तत्र प्रपूजयेत्। हस्ते तस्मिन्महादीपे विघ्नैश्च परिभूयते। दग्धमाषान्नमंत्रेण निक्षुतः कुलदीपि-
कां। ततः कल्पविधानेन भूतशुद्ध्यादिकं चरेत्। षोढा वा तारकं वापि विन्यस्य जपेत्ततः।। तं त्रोंतरे।। जपांते पुनरमध्येव देहि देहीति भाषते। बलिं दद्यात्तदा देवि ज्ञो वे दंते भवेद्बलि म-
वलिस्तु छागादिः।। सामिषान्नादिकं तु बलिपात्राण्यमर्घ्यो। चिताप्रश्चिमभागे चडपविशयन्न पंचरेत्। इति च क्वापि। गुरुर्वापि सती योषा वा शिष्यो वा साधकोपि वा। स्थाप्यो दक्षि-
णादिभागे भवेन्नोत्तरसाधकः।। कोऽप्यक्षेपयन्भागे किंचिद्दूरे विचक्षणः।। इति वरुद्रयामले।। ततः पंचोपचारेण पुरतो देवतां यजेत्। निमील्य चक्षुषी पश्चात् देवीं ध्यात्वा मनु-
ं जपेत्। एकाक्षरादिकं सहस्रं त्र्यक्षरी मयुतं जपेत्। ततः परं तु मंत्रज्ञो गुह्यांतकसहस्रकं। निशायां वा समारभ्य उदयांतं समाचरेत्। यद्यत्स्त्रं भयं कलौ नेत्रे वस्त्रेण च-
धयेत्। लतोर्धरात्रपर्यंतं यदि किंचिन्न लक्षयेत्। जयदुर्गे स्वमंत्रस्तु मनोवांछितमेव स सर्षपान्। तिलोसि सोमदेवत्यो गो सवकृत्तिकारकः। पितृणां स्वर्गदाता त्वं मर्त्यानां मम
यक्षमः। भूतप्रेतपिशाचानो विघ्नेषु शांतिकारकः।। इति सिक्त्वा तिलान्देवि चतुर्भागेष्वादितः पुनः सप्तपदोत्वा पुनस्तत्रैव संविशेत्। देवेत्त्वापि संप्रुष्य प्रजपेन्मनुमुत्त-
मां। निर्भयः प्रजपेत्तावद्यावत्सिद्धिः प्रजायते। भयेनित्सप्रवलेयं परे द्विशेषमाचरेत्। शेषं ब्राह्मणभोजनादिकं। तिलकी पूर्वद्व्येण डष्टा यचमनुं जपेत्। इति आतिभ-
यनिवारणं रक्षातिलकं च कुत्र चित्। कुंकुमागुरुकस्तूरीरोचना रक्तचंदनं। कर्पूरं पद्मरागं च केसरं हरिचंदनं। प्रत्येकं साधितं कृत्वा एकत्र साधयेद्बुधः।। जितकाय्यगुरु विरं
चीरं श्मशानेन च समाहितः। तेन वगुटिकां कृत्वा भद्रकालीमनुं जपेत्।। नीलां नीलपताकां च ललजिह्वां करालिकां। ललाटे तिलकं कृत्वा साधको वीतवभीः स्वयं। विय-

© Dharmartha Trust J&K. Digitized by eGangotri

दस्त्रान्वितं देवि वामाक्षिचंद्रभूषितं। बीजं प्रत्येकवस्तूनां शृणु तासां चयार्थेति। मूलमंत्रं तु मंत्रज्ञो जपेत्सार्द्धशतत्रयं। विक्रां य रुधिरं गृह्ण चामुंडे घोरनिस्वने। वलिं भुंक्ष्वा
वरं देहि रुधिरं गृह्ण नेवने। कालि कालि प्रचंडोग्रे ततो स्त्रं कवचं पुनः। कालिके ति समाख्याता जीवानां हितकाम्यया। कूर्चयुग्मं महादेवि नीलायाः कथितस्तवा विश्य दस्त्र
युतं देवि वलमिंदुसमायुतं। चंद्रखंडसमायुक्तं। ततो नीलपदं पुनः। ततः पताके हूं फट् स्यात्सर्वकूटमनुर्मतः। जयश्रीधरणीदेवी पताके च रणास्वले। इति नीलपताकेयं यो
ल्या वा नीलसाधने। यास विद्या महातारा सा काली ति प्रकीर्तिता। पद्मरागं केसरं चागोध द्रव्यविशेषतः। वियत् हकारः अस्त्रान्वितं रेफान्वितं। वामाक्षि ईकारः चंद्रो अनुस्वा
रः तेन क्रीं इति बीजं। अस्त्रं कवचमिति क्रमेण तात्पर्यं। किंतु अस्त्रं कवचमिति क्रमः। तेन हुं फट्। कूर्चयुग्मं हूं हूं। वलस्वरूपं इंद्र ईकारः। तेन हूं ब्लीं। इति कूटं। अथो नका
रः श्रीः ईकारः धरणी लकारः। तेन नील इति। वरणं कवचं। तेन हुं। सवलं अस्त्रं। तेन फट्। अत्रं तत्रं चितलोचन इति वे क्वापि अत्र न्यूनं। स्वयं वे तत्र भागान्भैरवो लगुडं कितः।
श्रमती तस्ततो वीरस्तं विलोक्य जपेन्मनुं। यदि भाग्यवशाद्देवि लगुडस्तत्र लभ्यते। तदा स्वयं भैरवो सौ स्वयं विघ्नं भरो भवेत्। तत्र नत्वा महादेवं महाकालं च भामिनि। लब्ध्वा
तिलकं कृत्वा स्वयं वीरेश्वरो भवेत्। तत्र स्मर स्मशानभस्म तिलकं विभूति धारणमित्यर्थः। प्रयोगस्तु॥ तत्र प्रथमं विहित भौमावास्यादिपर्वसंलक्ष्य रात्रौ प्रहरार्धे गते अ
भुक्तो भुक्तभोज्यो वा मूलमंत्रेण घटी वेधेन वस्त्रं परिधाय उपरिसर्वाच्छादकवस्त्रांतरेणाच्छाद्य धृतोष्णीषो मुक्तकेशो दिगंबरो वा मूलेन पूर्वसाधिततिलकं कृत्वाऽतंनीचित
नेत्रो रक्तचंदनादिनांगं विलिप्य मूलेन वसिं हरेणार्घ्यपुंड्रं कृत्वा हृदि देवीं मूर्ध्नि गुरुं ध्यात्वा नत्वा कुलामृतरससाम्रिषान्नमिष्टकमस्य वटकादि पूजा बलिपात्रसामग्री पथा
लो भंसमादाय बल्यर्थं कागादि गंधपुष्पाक्षतपंचगव्यपंचमतादि विगृहीत्वा रवड्गपाणिभिः सुहृद्वेक्षकैः कृतरक्षो अघोरास्त्रादिना वद्धशिखो मूलविद्यां हृदि स्मरन् अ
प्रक्षालितासप्रक्षितां प्रक्षालितां प्राचीनचितां वा गत्वा। प्रक्षालनपक्षेलस्थिसंचयनं कुर्यात्। ततः कांडप्रक्षेपमात्रभस्मं तरा चतुर्दिक्षु अवेक्षकान् सुहृद उत्तरसाधकान् रवड्गपाणी
न् षि कृत्वि हरलए कश्चो दक्षिणतस्तमुत्तरसाधकं कांडांतरा धत्वा पश्चिमस्थः स्वयं सामान्यार्घ्यं कृत्वा मूलमंत्रांते अत्रास्त्रमंत्रेण पंचगव्येन तां भूमिं संप्रोक्ष्य उरुगणेशवटुकयो
गिनी क्षत्रपालमातृका अत्र नत्वा वामपादमग्रे कृत्वा ॐ ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः। पिशाचा यक्षसिद्धाश्च गंधर्वाप्सरसां गणाः। योगिन्यो मातरो भूताः सर्वाश्च
खेचराः स्त्रियः। सिद्धिदात्रा भवंतु चात्र तथा च मम रक्षकाः। इति मंत्रेण नमस्कृत्य पुष्पांजलित्रयं केवलत्रयं वा चितामध्ये निक्षिपेत्। ततो बलिपात्राणि सप्त कृत्वा चतुर्दिक्षु

© Dharmartha Trust J&K. Digitized by eGangotri

वतुः श्रीपात्राणि त्रीणि पात्राणि चितायोपश्चिमभ्यपूर्वभागे सुत्रिकोणाकारकं तथा कासं स्थापयेत्। पूर्वदिशि त्रिकोणोपरि श्मशानाधिपति श्मशानस्तंभं पाद्यादिभि
रभ्यर्च्य। ॐ ह्रूं श्मशानाधिप श्मशानस्तंभ इमं सामिषान्नं सामृतं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु कुरु सिद्धिं मे प्रयच्छ स्वाहा। इति बलिं समर्पये
त्। दुग्धेन पंचगव्येन वा सर्वत्र संकल्पः। एवं दक्षिणदिशि भैरवं संपूज्य। ॐ ह्रूं क्रीं श्मशानाधिप भैरव भयानक इमम् इत्यादि। पश्चिमदिशि महाकालं संपूज्य ॐ ह्रूं श्मशा
नाधिप महाकाल इमम् इत्यादि। उत्तरदिशि कालभैरवं संपूज्य ॐ ह्रूं श्मशानाधिप कालभैरव इमम् इत्यादि। एवं चितायां प्रथमं श्मशानकालिकां संपूज्य ॐ ह्रूं श्मशानवा
वासिनि महाभीमे कालरात्रि महाकालि कालिके घोररूपिणि श्मशानगृहालये बलिं मातर्देहि सिद्धिमनुत्तमां। क्रीं कालिकायै स्वाहा। एवं भूतनाथं संपूज्य ॐ ह्रूं श्मशानाधिप
भूतनाथ इमम् इत्यादि। श्मशानमस्तके गणनाथं संपूज्य ॐ ह्रूं श्मशानाधिप सर्वगणनाथ इमम् इत्यादि। ततश्चितापश्चिमभागे दक्षिणभागे वा कियंति अस्थीनि ए
कत्र कृत्वा ॐ क्रीं आधारशक्तये नमः इति पंचगव्येन प्रोक्षयेत्। भूर्जे वा वटपत्रे वा यंत्रं प्रेतपीठासनं मंत्रान् रक्तचंदनादिना विलिख्य अभ्यामुपरि निधाय तदुपरि
कंबलादिना आच्छाद्य तमासनमास्तीर्य संपूज्य वीरासनेन तत्रोपविश्य ह्रूं ह्रूं क्रीं क्रीं कालिके घोरदंष्ट्रे प्रचंडचंडनायिके दानवान् दारय दारय हन हन परबीजं महावि
घ्नं छेदय छेदय स्वाहा हुं फट्। इति वीरार्दनमंत्रेण दश लोष्टानि अभिमंत्र्य दशदिक्षु क्षिपेत्। अर्कतूलकर्पूरश्वेतवाचालमले निर्मितवर्त्तिकां घृततैलादिकं चाघो
रास्त्रमंत्राभिमंत्रितं रक्षार्थं दीपं मूलेन प्रज्वालयेत्। तत्र यंत्रं च संपूजयेत्। तथा यत्नेन भाव्यं यथा जपसमाप्तिपर्यंतं ज्वलति। ततस्तत्कल्पोक्तविधिना भक्तगुड्वादि
घोटादि व्याससज्जालं यथोचितं विन्यस्य आचमनादिकं संस्कृत्य चितामध्ये महाचक्रोपरि चिंत्यपीठपूजां ते देवतां संस्थाप्य यथासंभवोपचारैः संपूज्य वरणपूजादि विधाय
वयथोक्तसंख्यया विहितमालया देवताध्यानपूर्वकं जपेत्। एवं जपे यदि किंचिद्विघ्नं भवेत्तदा। ॐ दुर्गे दुर्गे रक्षाणि स्वाहा। इति जपदुर्गामंत्रेण देव्यै अर्घ्यं दत्वा। ॐ तिलो
सि सोमदेवत्यो गोसवस्तपिकारकः। पितृणां स्वर्गदाता त्वं मर्त्यानां मम भयक्षमः। भूतप्रेतपिशाचानां विघ्नप्रशांतिकारकः। इति सर्वत्र तिलान्विकिरेत्। जयदुर्गामंत्रेण
सर्षपान्वीकीर्य उक्षपायसमन्नपदानि गत्वा पुनस्तत्रोपविश्य देवीं संपूज्य निर्भयो जपेत्॥ छागाय बलिविधानं यथोक्तसमये कर्त्तव्यं। जपसमाप्तौ वरप्रार्थनां कृ
त्वा विसर्जनादि कृत्वा सामग्रीं जले निक्षिप्य स्नात्वा गृहमागच्छेत्। मार्गे न लघुडलामध्ये तदा तमाद्यागच्छेत्॥ ॥इति चितासाधनं॥ अथ शवसाधनं॥ नील

© Dharmartha Trust J&K. Digitized by eGangotri

तंत्रे। पूर्वोक्तमुपहारादि समादाय तु साधकः। साधयेद्व्रतथा सिद्धिसाधनस्थानमाश्रयेत्। गुरुं ध्यानादिकं सर्वं पूर्वोक्तमनमाचरेत्। वीरार्द्दनां कृते भूमौ मायामोहे
नविद्यते। येयात्रेत्यादिमंत्रेण पुष्पांजलित्रयं क्षिपेत्। स्मशानाधिपतीनां तु पूर्ववद्बलिमाहरेत्। अघोरास्त्रेनमंत्रेण शिखाबंधनमाचरेत्। सुदर्शनेन चारक्षां तु मा
यांवा प्रकल्पयेत्। मायास्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः। घोरघोरतरस्यांते तनुरूपपदं ततः। चटयुग्मं तदंते च प्रचटद्वितयं ततः। कहद्वंद्वं यमद्वंद्वं बंधद्वंद्वं तथैव च। घातयुग्मं
पुनः। घातयद्वितयं वर्मफट् ततः समुदाहृतः। एकपंचाशदक्षरो यमघोरास्त्रमयो मनुः। हुलाहलं समुद्धृत्य सहस्रारस्वरूपकं। वर्मास्त्रांतो महामंत्रः सुदर्शनस्य की
र्तितः। भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत्। जप[illegible]स्य मंत्रेण सर्षपान्दिक्षु निक्षिपेत्। तिलोसीति मंत्रेण तिलान्दिक्षु विनिक्षिपेत्। यष्टिविद्धं भल्लविद्धं स्वरूपवि
द्धं पयोमृतं। रज्जुबद्धं सर्पदष्टं चाण्डालं वाभिभूतकं। तरुणं सुंदरं शूरं वारुणं न दृष्टं समुज्वलं। पलायनविभ्रष्टं तु सम्मुखे रणवर्जितं। स्वेच्छामृतं द्विवर्षं च वृद्धस्त्रीजातिं
तथा। अन्नाभावमृतं क्लिष्टं सप्तार्द्धवर्षकं तथा। एवं चाष्टविधं त्यक्त्वा पूर्वोक्तान्यतमं शवं। गृहीत्वा मूलमंत्रेण पूजास्थाने समानयेत्। चाण्डालं वातिभूतं तु शीघ्र
सिद्धिफलप्रदं। प्रणवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणं चरेत्। प्रणवं कूर्चबीजं च मृतकाय नमस्तु फट्। पुष्पांजलित्रयं दत्वा प्रणमेत्स्पर्शपूर्वकं। वीरपरमा
नंदशवानंदकुलेश्वर। आनंदभैरवाकारदेवीपर्यंकशंकर। वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने। प्रणम्यानेन मंत्रेण क्षालयेत्तदनंतरं। तारशक्तिमृतका
य नमोंतं मंत्रमुच्चरेत्। शवस्नपनमंत्रोयं सर्वतंत्रेषु देशितः। धूपेन धूपितं कृत्वा गंधादिनाभिषिच्य च। आरक्तो क्रोधादि देवेशि भक्षयेत्कुलसाधनं। गत्वा शव
स्य सान्निध्यं धारयेत्कटिदेशतः। यथुपकारयेदस्य दद्यान्निष्ठीवनं शवे। पुनः प्रक्षालितं कृत्वा जपस्थाने समानयेत्। कुशशय्यां पुरस्कृत्य तत्र संस्थापयेत्सुधीः। ए
लालवंगकर्पूरजातीखदिरसारकैः। तांबूलं तन्मुखे दत्वा शवं कुर्यादधोमुखं। संस्थापयित्वा तत्पृष्ठं चंदनेन विलेपयेत्। बाहुमूलादिकट्यंतं चतुरस्रं विभाव्य चाप[illegible]पद्मं
चतुर्द्वारं दलाष्टकसमन्वितं। ततस्त्रैनयमार्जिनकं बलांतरितं न्यसेत्। द्वादशांगुलमानानि यज्ञकाष्ठानि दिक्षु च। संस्थाप्य पूजयेत्तत्र इंद्रादिदशदेवताः। विषमिंद्राय सं
लिख्य सुराधिपतये ततः। इदं बलिं गृह्ण गृह्ण द्वयं गल्लापयमुग्रं ततः। विघ्ननिवारणं कृत्वा सिद्धिं मे प्रयच्छ ठद्वयं। अनेन मनुनापूर्वं बलिं दद्यात्तु सामिषं। स्वस्वनामादि
के दत्वा पूर्ववद्बलिमाहरेत्। सर्वेषां लोकपालानां ततः साधकसत्तमः। शवाधिष्ठातृदेवेभ्यो बलिं दद्यात्सुरेश्वरि। मुनयः सहचंतुः षष्टियोगिनीभ्यो बलिं दिशेत्ताप्र

© Dharmartha Trust J&K. Digitized by eGangotri

आद्रवंसन्निधौ च दूरे चोत्तरसाधकं। संस्थाप्यासनमभ्यर्च्य स्वतंत्रांते त्रयं ततः फट् इत्यनेन मंत्रेण तत्राश्वारोहणं विशेत्। कुशान् पादतले दत्वा शवकेशान् प्रसार्य
वा दृढं त्रिवध्य चुटिकां कृतसंकल्पसाधकः। शवोपरि समारुह्य प्राणायामं विधाय वा वीरार्द्धेन मंत्रेण दिक्षु लोष्ठानि निक्षिपेत्। ततो देवीं च संपूज्य उपचारैः सुविस्त
रैः शवास्ये विधिवद्देवि देवताप्यायनं चरेत्। उत्थाय संमुखे स्थित्वा पवे हूलिपरायणः। ॐ वशो मे भव देवेश ममानुकंपदं ततः। सिद्धिं देहि महाभाग कृताश्रमपदो वराम
लं समुच्चरन् मंत्री शवपादद्वयं पुनः। पट्टसूत्रेण बध्नीयात्तदोत्थातुं न शक्नुयात्। ॐ भीमभीमभयाभाव भवलोचनभावुक। त्राहि मां देव देवेश शवानामधिपाधिप इती
पादतले तस्य त्रिकोणं वक्रमुल्लिखेत्। तदोत्थातुं न शक्नोति शवोपि निश्चलो भवेत्। उपविश्य पुनस्तस्य बाहू विस्तार्य पार्श्वयोः हस्तयोः कुशानास्तीर्य पादौ तत्र निधापयेत्।
ॐ ह्रौं तु संपुटीकृत्वा स्थिरचित्तः स्थिरेंद्रियः। सदा देवीं हृदि ध्यात्वा मौनी जपमथाचरेत्। स्मशाने प्रोक्तसंख्याभिर्जपं कुर्यात् कुलेश्वरि। अथवारंभकालात्तु यावदुदयते रविः।
यमर्द्धरात्रपर्यंतं जप्तोके चिन्नलक्षते। तदा पूर्ववदर्घ्यादि सप्तपादगतानि वा कृत्वोपविश्य तत्रैव जपं कुर्यादनन्यधीः। चलाचलरूपं नास्ति भयेत्तातेव देशुनः यत्स्वार्थ
यसि देवेश नरं वा कुंजरादिकं। दिनांतरे तदास्याम्रि सत्ताम कथयस्व मे। इत्युक्ते संस्कृते नैव निर्भयस्तु पुनर्जपेत्। पुनश्चेन्मधुरं वाक्कु वक्तव्यं मधुरे ततः। तदा सत्यव शंका
र्थ वरं च प्रार्थयेत्ततः। यदि सत्यं न कुर्याश्च वरं वा प्रयच्छेन्नचा। तदा पुनर्जपेद्धीमान् एकाग्रमानसं स्मरन्। नररूपं विना तत्र देवो विनोपसर्पति। पश्चात्तरेण वोद्वयं नरैर्वा
देवयोनयः माता वा तत्सुता वापि मातुलानि तथैव च। आगत्य विघ्नं चरते मायापारम्य विग्रहाः उक्तिश्च वक्ष्यते कार्यं सर्वं जातं न संशयः। प्रभातसमयो जातस्त्वत्पिताऽसौ
शमो गृहे। प्रायशो मत्सरा लोका राजानो दंडधारिणः। कदाचित् केनचित् तत्र हास्ति तदा किं ते करिष्यति। इत्यादिविविधैर्वाक्यै नैव जाप्यं परित्यजेत्। मातापितृगणास्तत्र परदे
श निवासिनः। बांधवास्तत्र प्रयांति देवरूपधरास्ततः। स्त्रीपुत्रसेवका येऽपि च गृहीता नीयते परैः। रुदंति पुत्रकाः सर्वे भ्रातरो नुज शिष्यकाः। निजकांतांगसंस्पर्श चक्रमा
भरणादिकं। गृहीतानीयते यत्नु पालकैस्तरूपं त्यजेत्। यदि तत्र क्षुभ्यते तत्र तदा किं वा न लभ्यते। स्त्रीरूपधारिणी वा वीरो द्विरूपधरः पुमान्। जरं गृह्णाति शवं देवैश्चिवारो
नेव रंलभेत्। साधुना साधुना वापि पोषिते वरदायिनी। तदा वीरपतेस्तस्य किं भूते न त्रासिष्यति। निःपापपुरुषे चैव कुले चैव सुसंस्कृते। असंस्कृते तदा देवि पापमुक्ते
न संशयः। संमुखे संमुखे वापि संस्कृतं च क्रियापरं। सैव देवी न संदेहः स देवो भैरवः स्वयं। न चेद्देवं भवेच्छैव मायापुटिता विग्रहाः। न वरं वरयेत्तत्र नाकिं विद्यवदेत्ततः॥

© Dharmartha Trust J&K. Digitized by eGangotri

संस्कृतं च समाख्यातिवक्तिवक्रेयमीदृशः ॥ न चेत्स्वयं लौकिको त्यावरं ग्राह्यं निराकुलं ॥ अथवा उक्तं किंचिल्लभ्येताप्याले मोहितः ॥ शब्दो वा जायते सम्यक् म
तं वापि न लभ्यते ॥ सर्वं विचार्य ज्ञातव्यमेवं विद्याः प्रकीर्तिताः ॥ देवताकृतयो देवि भैरवाकृतिभुधयः ॥ अपश्यं तत्र भेतव्येन तत्र प्रत्ययः क्वचित् ॥ भैरवो वा वटुकाद्योऽथ
कुलशास्त्रपरायणाः ॥ एतच्छास्त्रप्रसंगेन कृत्वा कुटिलविग्रहाः ॥ पुत्रो भूत्वा हरेद्वित्तं नारी भूत्वा विमोहयेत् ॥ तस्मात्तत्परो वीरो विचारयत्नमाचरेत् ॥ सत्ये कृते
वरं लब्ध्वा संत्यजेत् जपादिकं ॥ फलं ज्ञातमिति ज्ञात्वा लुटिकां मोचयेत्ततः ॥ शवं प्रक्षाल्य संस्थाप्य मोचयेद्ध्वनेपदं ॥ पदच्युक्रमार्जयित्वा पूजाद्रव्यं जले क्षिपेत् ॥ शवं
जले वा गर्ते वा निक्षिप्य स्नानमाचरेत् ॥ ततस्तु स्वगृहं गत्वा बलिं दत्वा दिनोत्तरे ॥ अग्रिमे दिवसे रात्रौ येषां देवानां यजमानोहि तेन गृह्णन्तु मया दत्तं बलिमंत्रोयमीरितः ॥
अथ येर्याचितश्चास्य नरकं जनसूकरान् ॥ दत्वापि प्रमयान्ते न कर्त्तव्यं समुपोषणं ॥ यवक्षोदमयं वापि शालिक्षोदमयं च वा ॥ चंद्रहासेन वा विधिवत् मंत्रेण च आतये
तत्परेह्नि नित्यमाचर्य पंचगव्यं पिबेत्ततः ॥ ब्राह्मणान्भोजयेत्तत्र पंचविंशतिसंख्यया ॥ पंचपंचविहीनानां क्रमाच्चेव दक्षिणा ॥ ततः स्नात्वा च भुक्त्वा च निवसेद्वहुत
मे स्थले ॥ यदि न स्याद्धि प्रमोक्तं तत्तन्निर्धनतां व्रजेत् ॥ तेन वेन्निर्धनत्वं स्यात्तदा देवः प्रकुप्यति ॥ त्रिरात्रं साधयेद्धस्तं जपयेत् कुलसाधनं ॥ संध्यायां यदि गच्छेद्दूतस्तदा या
धिर्वित्ति निर्दिशेत् ॥ भीतं श्रुत्वा च घिरा निश्चक्षुर्नेत्य दर्शनाशाय दिवा [illegible] दिने कार्यं तदा समृतो व्रजेत् ॥ पंचदशदिनेतांहि देहे देवस्य संस्थितिः ॥ गोब्राह्मणदेवानां निंदां
कुर्यात्र च क्वचित् ॥ देवकान्ब्राह्मणादींश्च प्रत्यहं संस्पृशेत् शुचिः ॥ प्रातर्नित्यक्रियां ते तु पंचगव्यादकं पिबेत् ॥ ततः स्नात्वा तु तीर्थादौ प्राप्ते षोडशवासरे ॥ स्नात्वा हंतं मूलमुच्चार्य
तर्पयामि नमः पदं ॥ एवं शतत्रयाद्दूर्ध्वं देवानां तर्पयेज्जले ॥ स्नानतर्पणभूत्यस्य नस्याद्वस्पतर्पेण ॥ इत्थं न मंत्रिधाने न सिद्धिः प्राप्नोति निश्चितं ॥ भुंक्ते हे वचनात्भोगान्
तया ति हरेः पदं ॥ असौ गं संगमेवापि निःफलं सफलं च वा ॥ कृत्वा साधनमेवैतत् लक्ष्यः प्रियतरो भवेत् ॥ शवाभावे श्मशाने वा कार्या वीरस्य साधना ॥ ये भावाय सर्वे प्रोक्ता
स्तेऽर्भावैर्यदि नार्चयेत् ॥ दशाहं क्रमयोगेन भ्रष्टो भवति साधकः ॥ नोपदिशेद्वीरभावं न प्रजोतत्र संदिशेत् ॥ कुलामंत्रं गृहीत्वा तु यावत्सिद्धिः प्रजायते ॥ तत्रांतरे ॥ सर्वं यांजी
वहीनानां जंतूनां नीलसाधने ॥ ब्राह्मणो गोमयं त्यक्त्वा साधयेद्वीरसाधनं ॥ मतास्सनं च नायसु पूजयेत्सार्वतीशिवां ॥ तावत्कालेव सेत घोरे यावदाहूतसंस्थवं ॥ महाशयाः
प्रशस्तास्युर्देवता वीरसाधने ॥ क्षुद्रः प्रयोगकरणां प्रशस्ताः सर्वसिद्धिदाः ॥ एवं नीलक्रमो देवि कथितस्त्वतवानघो न कस्यचित्स्वचक्रं मया प्रीत्यात्वोदितं ॥ अथ योगस्तु ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र पूर्वोक्तपर्वसंलक्ष्य यथोक्तसमये पूर्वोक्तलक्षणस्तथा सामग्रीं समादाय योनरसाधकसहितो विहितस्थानमासाद्य सामान्यार्घ्यं विधाय स्नानशोधनं कृत्वा गुरुं गणे
शादीन्नमस्कृत्य वीरार्द्धनमंत्रं भूमौ लिखेत् ये वानेत्यादिना पुष्पांजलित्रयादि विधाय पूर्वोक्तसत्वबलिपात्राणि स्मशानाधिपतिभ्यो निवेद्य ॐ क्रीं स्फुर स्फुर घोरघो
रतर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घातय घातय हुं फट् इति अघोरास्त्रेण शिखां बध्वा ॐ सहस्रार हुं फट् इति सुदर्शनास्त्रेण आत्मरक्षां कृत्वा
स्वस्वकल्पोक्तभूतशुद्ध्यादिन्यासतालं विधाय दुर्गामंत्रेण सर्षपान् तिलान् सितासिततिलान्विकिरेत्। विहितशववनिकटे गत्वा मूलेन वीक्ष्य अस्त्रमंत्रेण शवं संप्रोक्ष्य ॐ हूं मृ
तकाय नमः इति पुष्पांजलित्रयं शवोपरि निक्षिपेत्। ॐ हूं रे वीरपरमानंद शवानंदकुलेश्वर। आनंदभैरवाकार देवीपर्यंकशंकर। वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चंडिका
र्चने। इति स्पर्शपूर्वकं प्रणम्य ॐ क्रीं मृतकाय नमः इति पंचकृत्वस्तन्मंत्रेणार्घ्यपंचगव्येन सुगंधिजलेन च संस्नाप्य धूपेन धूपयित्वा गंधादिना विलिप्य कटिदेशोर्ध्व
लामूलमंत्रं जपं नेजपस्थानमानयेत्। आजीयवासंस्कारमाचरेत्। भूमौ कुशशय्यामास्तीर्य तदुपरि संस्थाप्य एलालवंगकर्पूरजातीखदिरसहितं ताम्बूलं तन्मुखे दत्वा श
वमधोमुखं कुर्यात्। तत्पृष्ठे चंदनेन वा कुंकुमादिकद्रव्यं तत्र चतुरस्राकारं तथा विलिप्य तन्मध्ये चतुर्द्वारात्मकं भूपुरसहितमष्टदलं विलिख्य तत्र कंबलाद्यासनमास्तीर्य
द्वादशांगुलप्रमाणान् यज्ञकाष्ठोद्भवान् दश कीलान् दशदिक्षु निवारयेत् तेषु इंद्रादि दशदिक्पालान् संपूज्य पूर्वोक्तमंत्रैः सामिषान्नबलीन् दद्यात्। ॐ हूं शवाधिष्ठा
तृदेवताभ्यो नमः ॐ डाकिनीभ्यो नमः ॐ क्रीं चतुःषष्टिकोटियोगिनीभ्यो नमः इति बलित्रयं किंचिद्दूरे दद्यात्। पूजोपहारसामग्रीं समीपे उत्तरसाधकं दूरे स्थापयित्वा
मूलमंत्रांते क्रीं फट् स्वाहा आसनाय नमः इति आसनमभ्यर्च्य मूलमंत्रं स्मरन्नश्वारोहक्रमेण शवोपरि पूर्वमुखं उपविश्य स्वपादतले कुशान् दत्वा शवकेशान् प्रसार्य दृढमुष्टि
कां बध्वा स्ववामे अर्घ्यादिकं संस्कृत्य कृतसंकल्पः प्राणानायम्य वीरार्द्धनमंत्रेण दशदिक्षु लोष्टान्निक्षिपेत्। पूर्वोक्तरक्षादीपं दक्षिणे संस्थाप्य बद्धजुटिकायां नित
देवतायाश्चक्रं परिचिंत्य पीठपूजांते देवीमावाह्य सावरणां सर्वोपचारैः संपूज्य बटुकादिबलिविधिं च कृत्वा उत्थाय संमुखस्थिता ॐ वशे मे भव देवेश शवममामुकसिद्धिं
देहि महाभाग कृताश्रमपरायण। इति भक्तियुक्तः पठेत्। मूलमंत्रेण पट्टसूत्रेण शवपादद्वयं बध्नीयात्। ॐ भीमभीम भयाभाव भवलोचन भावुक। त्राहि मां देवदे
वेश शवानामधिपाधिप। इति शवपादतले त्रिकोणं च क्लीं लिखित्वा। प्रयत्नेन शवोपरि उपविश्य पार्श्वद्वये शवबाहू विस्तार्य त्रिजपादद्वयं तत्र निधापयेत्। पुनः

© Dharmartha Trust J&K. Digitized by eGangotri

प्राणायामादि विधाय निर्भयः सन् देवताध्यानपूर्वकं श्मशाने नोक्तसंख्यया मौनी स्थिरकायवाङ्मना रहस्यमालया तु जपेत्। आरंभादुदयपर्यंतं वा जपेत्। कु
त्रचिच्छवस्योक्ता मता। श्रूयते तदा हृदयोपरि आसनं शवस्य देवतापूजा जपमध्येऽर्घ्यादिकं पूर्ववत्। अति भयं चेदुत्पद्यते तदा कागादिबलिस्तु आदौ मध्ये समा
प्तौ वा। एवमुक्तभयादिकं परिहृत्य साधकध्यानतया जपासत्यवचनेन वरं संप्रार्थ्य जपं त्वत्काफलं जातमिति। अथ धार्यदेवतां सर्जयित्वा शवचुटिकां मोचयि
त्वा शवं प्रक्षाल्य पदबंधं विमुच्य पदवक्त्रं मार्जयित्वा पूजाद्रव्याणि जले निक्षिप्य जले वा गर्ते वा शवं निक्षिप्य स्नात्वा गृहं गच्छेत्। दिनांतरे पूर्वसंकल्पितं बलिं
पिष्टमयं रचयित्वा। ॐ अस्मिन् दिवसे राज्ञो येऽर्चा देवानां यजमानोऽहं तेन हं तु मया दत्तं नरकुंजरभकरं। इति खड्गेन पिष्टपुत्तलीं घातयेत्। दिनांतरे नित्यं कृ
त्वा पंचगव्यं पीत्वा पंचविंशति विंशति पंचदश दश वा यथाशक्ति ब्राह्मणान् भोजयेत्। स्वयमपि स्नात्वा भुक्त्वा उत्तमे स्थले निवसेत्। एवं कुलसाधनं त्रिरात्रं प्र
त्यहं वा गोपयेत्। पंचदशदिवसपर्यंतं पंचगव्यप्राशनं दिवा मौनं स्त्रीनृत्यगीतवादित्रवहिर्गमनादिवर्जनं सत्यभाषणं संयतेंद्रियता च गोब्राह्मणदेवताभ
क्तिर्विशेषात्। षोडशदिने तीर्थादौ स्नात्वा सार्धशतत्रयसंख्यया देवतां तर्पयेत्। इति शवसाधनं पायात् पुण्यतरादेवस्तासामेवं विधिर्मतः। इति वचनात् उग्रदेवता
विषयमेतत्। अत्र नयोर्द्विवीरकामयोरहस्यमित्यपि नामांतरं॥ अथ संक्षेपपुरश्चरणं तंत्रांतरे। ग्रहणेऽर्कस्य चेंदोर्वा शुचिः पूर्वमुपोषितः। नद्यां समुद्रगा
मिन्यां नाभिमात्रेंभसि स्थितः। स्पर्शादिमुक्तिपर्यंतं जपेन्मंत्रमनन्यधीः। होमयेत दशांशेन तर्पणं अभिषिंचेद्दशांशेन दशांशो विप्रभोजनं। उपोषितः प्र
मुक्तः समुद्रगामिन्यां साक्षात्परंपरया वा। असंभवे तडागादौ। जलस्थित्यसामर्थ्ये तीरे स्थितोऽपि। स्पर्शात् प्राणायामऋष्यादिकरषडंगन्यासविलंबितस्पर्शने।
अंगवैगुण्येऽपि ग्रहणपुरश्चरणं कर्तव्यमेव महाफलत्वात्। अथवान्यप्रकारेण पुरश्चरणमिष्यते। अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि। सूर्योदयात्समार
भ्य यावत्सूर्योदयांतरं। तावज्जप्त्वा निरातंकः सर्वसिद्धीश्वरो भवेत्। अत्र तिथिभेदेन पुरश्चरणभेदः। होमादिकं तु पूर्ववत्। निरातंकः शंकारहितः॥ अथवान्य — श्री २२७
प्रकारेण पुरश्चरणमिष्यते। शरत्काले चतुर्थ्यादि नवम्यंते विशेषतः। भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकं। एकाकी विजनेऽप्यालये बले वाथि बालया
अष्टम्यादि नवम्यंतमुपवासपरो भवेत्। चतुर्थ्यादित्वमतभेदेन कृष्णपक्षनवम्यादि प्रतिपदादि षष्ठ्यादिपक्षा अपि कुत्रचिदुक्ताः। वस्तुतः प्रतिपदादि

© Dharmartha Trust J&K. Digitized by eGangotri

पक्षः सांप्रदायिकः॥ रात्राविष्टुपलक्षणां तावत्सहस्रं तिथिसंख्यसहस्रकं। सहस्रं प्रत्यहमित्येव वा। अल्पाक्षरमंत्रेषु संख्यावृद्धिक्रमः॥ अन्यत्र सहस्रमेव।
तद्दतावदिति पादपूरणे होमादिकं पूर्वोक्तमेव पशुपतानुकल्पमेतत्॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते। अष्टमीसंधिवेलायाम् अष्टोत्तरलताग्रहे। प्रविश्य
मंत्री यत्नेन ततः सम्यगर्चयेत्पुनः॥ पूर्वोक्तकल्पमासाद्य सर्वपूजादिकं चरेत्। केवलं कामदेवो सौ जपेदष्टोत्तरं शतं। तासां तु पत्रमूले तु उग्रा संपूज्य कर्णके॥ मंत्रसिद्धिर्भ
वेत्तस्य चालितादर्शनपूजनात्। संधिवेलावरारदीयेचपूर्वक्रमात्। अष्टोत्तरशतमित्यर्थः॥ अष्टावेव ग्राउत्तरं तदाश्रेष्ठमित्यर्थः॥ लताग्रहमिति लतासंकेतः॥ प्रविश्य
संगतीभूय वेष्टितो वा पूर्वोक्तकल्पं शक्तिपूजाकल्पं पत्रमूले मुद्रा मूले उग्रां देवीं कर्णे कपार्श्वे श्रेया विद्याभगात्रयं सांलिख्येति शेषः॥ अष्टोत्तरशतं जपस्तु प्रत्येक
मवधेयः॥ कामदेवो दिव्यवेशधरः॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते। आकृष्टायाः कुलागारे भावने मंत्रमुत्तमं। कर्णे कृष्टिलतागात्रे लिखित्वा मंत्रमेव वा। विधा
यतत्रसंस्कारं कृत्वा तस्यै निवेद्य वा। किं विज्ञप्य मनुं नीत्वा देवताभावतत्परः॥ तां विसृज्य नमस्कृत्य स्वयं तद्वासु खं पुनः॥ प्रातः स्त्रीभ्यो बलिं दत्वा मंत्रसिद्धिर्न संशयः॥
आकृष्टाया उपभुक्तायाः कुलागारे मुद्रायां संपूर्णे विद्या भावना। कर्णे त्रयं लिखनं भागत्रयस्य संस्कारं शक्तिसंस्कारं। निवेद्य संतर्प्य किं विदष्टोत्तरशतं जपः स्पर्शपू
र्वकः॥ स्वयं जस्ताद्वोत्तरसहस्रमित्यर्थः॥ अथवा विजने रम्ये स्थित्वा शय्यासने रतः॥ उदयांते दिवा जप्त्वा सर्वसिद्धीश्वरो भवेत्। शय्यासने शक्तिसहिते इति शेषः॥ दिव्य
मतानुकल्पमेतत्। अथवान्यप्रकारेण पुरश्चरणमिष्यते। कुजेवारे निवारे वा नरमुंडसमाहृतं। पंचगव्येन निर्मिद्य वंदनाद्यैर्विशेषतः॥ निक्षिप्य भस्मो हस्ताद्धर्मान
तः का कृजनेवने। तत्रलद्धिवरेरात्रौ सहस्रं यदि मानवः॥ एकाकी प्रजपेन्मंत्रं सभवेत्कल्पपादपः॥ कुजे मंगले नरमुंडसद्यः कृतं यथा लाभं वा। शवनमुंडेपि विहि
तनिष्ठा दत्वा हस्ता ईमानतलोद्धां दशांगुलमानतः॥ कानने वने। आलिंगहने इत्यर्थः॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते। शवमानीयतद्वारे तेनैव परिखन्य वा न
द्धिनो तद्दिनं यावत्तावदष्टोत्तरं शतं। सभवेत्सर्वसिद्धीशो नात्र कार्या विचारणा। तद्वारे मंगलादिवारे तेनैव मानेनेत्यर्थः॥ तद्दिनादारभ्य दिनान्ते अष्टोत्तरशतं प्रतिदिनं
जपेदितिशेषः॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते। निशायां मतहृदेरुडन्मत्तानंदभैरवः। दिग्वासा विमली भस्मभूषणो मुक्तकेशकः॥ कपालखड्गहस्तश्च जपे
न्मातृकयायदा। तदा तस्य महादेवि सर्वसिद्धिः प्रजायते। निशायामर्धरात्रे मतहृदे श्मशाने उन्मत्तानंदभैरवः प्रौढोल्लाससहितः॥ दिग्वासादिगंबरः मातृकया

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२२८

242
228

मातृकामालया जपेदष्टोत्तरशतमित्यर्थः॥ वीरमतानुकल्पमेतत्। अथवान्यप्रकारेण पुरश्चरणमभिधीयते। गुरुमानीय संस्थाप्य देववत्पूजनं गुरोः॥ वस्त्रालंकारहेमाद्यैः संतो
ष्य गुरुमेव च। तत्सुतं तत्सुतां चैव तस्य पत्नीं तथैव च। पूजयित्वा मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्। मनुं जप्त्वा सहस्रमित्यर्थः॥ अथवान्यप्रकारेण पुरश्चरणमभिधीयते। सहस्रारे
गुरोः पादपद्मं ध्यात्वा प्रजप्य वा। केवले देवभावेन सर्वसिद्धीश्वरो भवेत्। अत्र प्रस्तावमंत्रोक्तसंख्यातिशयः॥ इदं च गुरोरसान्निध्ये। सर्वमतानुकल्पमेतत्। एतेषु हेमादिनि
यमाभावः॥ इति संक्षेपपुरश्चरणानि॥ नानातंत्रविचारेण नानामार्गानुमोदनात्। पुरश्चरणरूपेण संसिद्धैव ततो नरः॥ अथ प्रयोगविशेषाः॥ वैशंपायनतंत्रे॥ एवं नित्यक्र
मं कृत्वा नैमित्तिकमथाचरेत्। कृते निमित्ते कैविस्त्र नित्यस्य पूर्णता भवेत्। लक्षं कृत्वा जपं तंत्र मणिमादिगुणान् लभेत्। समुद्रगोदकाहारो जपेल्लक्षं समाहितः॥ जन्मस्थे
भास्करे पक्षे सोमदृष्टा सहस्रकं। कोटिजन्मकृतं पापं नाशमायाति निश्चितं। नाशयेत्सर्वपापानि वाक्सिद्धिं चापि विंदति। पर्वताग्रे यजेद्देवं शाकमूलफलाशनः॥ पुंडरी
कवरे देवं मासमेकं समर्चयेत्। धर्मार्थकाममोक्षाश्च करस्थाश्च भवंति हि। लक्ष्मीः स्थिरा भवेत्तस्य पुत्रपौत्रानुयायिनी॥ श्रीपुष्पैर्दुकुयात्तद्देशारवे मासि दुग्धपयः॥ सर्वाभ्यु
द्धिक्षयकरः सर्वसिद्धिविवर्द्धकः॥ देवाः सर्वे तमस्यंति भक्त्या ते पुरुषर्षभं। श्रीजले सर्पयेद्देवं मत्स्यं डीवं च संयुतः॥ अष्टोत्तरशतं कृत्वा पश्चात्तेन भक्तितत्परः॥ मंडलात्सले भोहिं
द्धितस्करं सुकरं तु वीयद्याकामयते मंत्री अनमासेन लभ्यते। दुग्धवृक्षाजलैर्नित्यमष्टोत्तरशतैः शतं। तर्पयन्नखिलान् कामान् लभेन्मोक्षं च विंदति। कुरवपुष्पैः समभ्यर्च्य मा
समात्रं निरामयः॥ परासे धर्मवृद्धेच ब्रह्मचारी व्रतेस्थितः॥ हयारिकुसुमैः शुभैः मंडलान् ज्ञानवान् भवेत्। तथा रक्ताश्वसारेण अचलां भक्तिमाप्नुयात्। तथा दाम्भ्यां समभ्यर्च्य
भुक्तिं मुक्तिं च विंदति। ब्राह्मणानां क्षत्रियाणां वैश्यानां शोषजन्मनां स्त्रीणां चैव विशेषेण नैमित्तिकमिदं भवेत्। एतेषां चैव मंत्रं तु कृत्वा काम्यानि साधयेत्। एवं प्रणवपुटि
तं मंत्रमयुतसंख्यया। त्रिरात्रं जपेन्नरः स्यात्स तिसमः सर्वशास्त्रव्याख्याता भवति। रविवारे अश्वत्थवृक्षमूले याष्टोत्तरशतं भूयो भूयो जपेत्। शतांतरष्टोत्तरशतवर्षजी
वनं। अर्कमुके मासमात्रे पूजया मलिनकृच्छ्रघोरतरपापविमुक्तिः॥ पद्मसूत्रैः पूजया अतुलसंपत्तिः॥ विद्रुमपूजया त्रैलोक्यवशीकारः॥ माणिक्यपूजया सार्वभौमत्वप
द्मरागेण पूजया राज्यफलं। गारुत्मतैः पूजया ज्ञानं। हीरकेन पूजया सर्वसिद्धिः। स्वर्णपुष्पैः पूजया कुबेरसमसंपत्तिर्देहांते निर्वाणपदं। मासमात्रेति सर्वत्र योजनीयं।
तंत्रांतरे॥ एवं सिद्धमनुर्मंत्री प्रयोगानथ साधयेत्॥ शारदातिलके॥ अथाभिधास्यते त्रैस्मिन् समस्तषट्कर्मलक्षणं। सर्वतंत्रानुसारेण प्रयोगफलसिद्धिदं॥

श्री
२२८

© Dharmartha Trust J&K. Digitized by eGangotri

शांतिवश्यस्तंभनानि विद्वेषोच्चाटने ततः। मारणांतानि शंसंति षट्कर्माणि मनीषिणः॥ रोगकृत्याग्रहादीनां निरासः शांतिरीरिता। वश्यं जनानां सर्वेषां
विधेयत्वमुदीरितं॥ प्रवृत्तिरोधः सर्वेषां स्तंभनं समुदाहृतं। स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतं॥ उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्तितं॥ प्राणिनां प्राणि
हरणं मारणं समुदाहृतं॥ स्वदेवतादिकं कृत्वा दीन् ज्ञात्वा कर्माणि साधयेत्॥ रतिर्वाणी रमा लक्ष्मी दुर्गा काली यथाक्रमं। षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपू
जयेत्॥ ईशचंद्रेंद्रनिर्ऋतिवाय्वग्नीनां दिशो मताः। सूर्योदयात्समारभ्य घटिकादशकं क्रमात्॥ ऋतवः स्युर्वसंताद्या अहोरात्रं दिने दिने॥ वसंतग्रीष्मवर्षाख्या
शरद्धेमंतशैशिराः॥ हेमंतः शांतिके प्रोक्तो वसंतो वश्यकर्मणि॥ शिशिरः स्तंभने ज्ञेयो विद्वेषे ग्रीष्म ईरितः॥ प्रावृडुच्चाटने ज्ञेया शरन्मारणकर्मणि॥ पद्मास्वस
स्तिकं भद्रयो विकटं कुक्कुटं पुनः। वज्रं भद्रकमित्याहुरासनानि मनीषिणः॥ षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः। मुसलाशनिखड्गाख्याः शांतिकादिषु कर्म
सु॥ जलं शांतिविधौ शस्तं वश्ये वह्निरुदीरितः। स्तंभने पृथिवी शस्ता विद्वेषे व्योम कीर्तितं॥ उच्चाटने स्मृतो वायुर्भूयोऽग्निर्मारणे मतः॥ तत्तद्भूतोदये सम्यक्कृतं तन्मंडल
संयुतं तत्तत्कर्म विधातव्यं मंत्रिणा निशितात्मना॥ सीतांशुसलिलक्षौली व्योमवायुहविर्भुजां। मंत्रा स्युर्वर्णाः यंत्रबीजानि षट्कर्मसु यथाक्रमं॥ ग्रथनं च विदर्भं च
संपुटं रोधनं तथा। योगः पल्लव इत्येते विन्यासाः षट्सु कर्मसु॥ वर्णान्मंत्राणां तरितान् कुर्यान्नामवर्णान्यथाविधि॥ ग्रथनं तद्विजानीयात्प्रशस्तं शांतिकर्मणि॥ मंत्रा
र्णैर्द्वयमध्यस्थं साध्यनामाक्षरं लिखेत्॥ विदर्भ एव विज्ञेयो मंत्रिभिर्वश्यकर्मणि॥ आदावंते च मंत्रः स्यान्नाम्नो संपुट ईरितः॥ एवं स्तंभने शस्तं संपुटं कथितं मंत्रवेदि
भिः॥ नाम्न अंतमध्ये तु मंत्रस्याद्रोधनं मतं॥ विद्वेषणविधाने तु प्रशस्तमिदमुत्तमं॥ मंत्रस्यांते भवेन्नाम पल्लवो मारणे मतः॥ अंते नाम्नो भवेन्मंत्रो योगः प्रोच्चाट
ने मतः॥ सितरक्तपीतमिश्रकृष्णधूम्राः प्रकीर्तिताः॥ वर्णास्तामंत्रतंत्रोक्ता देवताः षट्सु कर्मसु॥ यंत्राणां लेखने द्रव्यं चंदनं रोचना निशा॥ गृहधूमश्चितांगारो मा
रणे च विषाणि च॥ श्वेताग्निलोणपिंडानि धत्तूररकरसस्तथा॥ गृहधूमस्त्रिकटुकं विषाद्यकमुदीरितं॥ देवताकालमुद्रादीन् सम्यक्कृत्वा विचक्षणः॥ षट्कर्
माणि प्रयुंजीत यथोक्तफलसिद्धये॥ एवं प्राणप्रतिष्ठामंत्रमुपक्रम्य॥ इति संसाधितो मंत्रः षट्कर्मफलदो भवेत्॥ स्थापये मनुना तेन प्राणान्सर्वत्र देहिकं॥ वी
जांते॥ मुख्यशब्दा नामादौ दूतीः प्रयोजयेत्॥ मता वैवस्वतो मया जीवहा जालहा ततः॥ आकृष्यात्र सतापश्चात्स्वमादा हि सुरु लिंगिनी॥ क्षेत्रज्ञा प्रतिगृहीत्वा ताप्रा

© Dharmartha Trust J&K. Digitized by eGangotri

णं हृत्वो नवस्मृतानाः पाशेन रुद्ध्वेष्टस्ववशं नयास्तीकृतचेतसः ॥ अंकुशेन हतस्यापि साध्यस्या सन्नसमाहरेत् ॥ द्व्यंगुलमात्रेन रुत्वा साध्यस्य पुत्तलीं ततः सं
प्राणात्मकं यंत्रं सकीटं हृदये न्यसेत् ॥ निशीथसमये साध्ये सुप्ते तस्य हृदंबुजे ॥ दले पुष्पायुधक्रीडं वरुणानामतः परां ॥ ईशराक्षसशीतांशुयमाग्नां कर्णिकालेरा याद
नूहे ससमायुक्तान् भृंगाकारान् अनुस्मरेत् ॥ शिरोवस्त्राससंभूततंतुसंबद्धविग्रहान् ॥ एवमात्महृदंभोजे मंत्रीरूपान् धियास्मरेत् ॥ आत्महृत्पद्मगान् मंत्रीः प्रस्थापय
श्वासवर्त्मना ॥ एकैकं साध्यहृत्पद्मांगानेकैकमानयेत् ॥ पुनर्जपं स्थापयेन्मंत्री स्वचित्ते वा विधानवित् ॥ तं तु छेदं प्रकुर्वीत वह्निबीजेन संयतः ॥ साध्यरूपान् साध्य
हृद्भृंगांस्ततः संस्तंभयेद् ध्रुवात् ॥ एवमेकादशावर्तीः कुर्यात्सर्वेषु कर्मसु ॥ वश्याकर्षणयोर्वादी ... नरतणान् संस्मरेद्ध्रुवं ॥ मोहविद्वेषयोर्ध्यान ... मारणकर्मणि
पीतान् संस्तंभने ध्यायेत् प्राणाकर्षणकर्मवित् ॥ आकृष्य साध्यहृत्प्राणान् स्थापयेदात्मनो हृदि ॥ क्रूरकर्मसु पुत्तल्यां तेषां स्थापनमीरितं ॥ प्राणान् साध्यस्य मंत्रकान् त
न सुभुजंगमात्रा संस्मरेत् तन्निपुणः सदा क्रूरेषु कर्मसु ॥ वामाग्निशक्रवरुणेश्वरराक्षसेन्दुप्रेतेशपत्रलिखितैरथ यादिवर्णैः ॥ विद्धं तिकोणगतहंससमेतमध्यं प्रा
णाख्ययंत्रमथ वर्णवते धरास्थं ॥ इत्थं प्रयोगकुशलो मनुनानेन मंत्रवित् ॥ वशयेत् सकलान् देवान् किं पुनः पार्थिवानपि ॥ तत्रांतरे ॥ साध्यनाम मार्णमेकैकं मंत्रार्णैः सं
प्रयोजितं ॥ ग्रथितं तत्समाख्यातं वश्याकृष्टिकरं परं ॥ मंत्रमादौ वदेत् सर्वं साध्यसंज्ञामनंतरं ॥ विपरीतं पुनर्मंत्रं तं संपुटं भवेत् ॥ शांतिपुष्टिकरं ह्येतत् त्रैलोक्यैश्वर्य
दायकं ॥ अर्द्धमर्द्धं तदा चैतं मंत्रं कुर्याद्विचक्षणः ॥ मध्ये वा साध्य भवेत् साध्यं ग्रस्तमित्यभिधीयते ॥ अभिचारेषु सर्वेषु प्रयोजयेन्मारणेपि वा ॥ अभिधानं वदेत् पूर्वं पश्चान्मंत्रं
तथा वदेत् ॥ एतत्समस्तमित्युक्तं शत्रूच्चाटनकारकं ॥ द्वौ द्वौ मंत्राक्षरौ यत्र एकैकं साध्यवर्णकं ॥ विदर्भितं तत्प्रोक्तं दुष्टं वश्यलक्षणं ॥ मंत्रार्णैरंतरिते साध्यं समंता
न्निष्ठते यदि ॥ आक्रांतं तद्विजानीयात् सद्यः सर्वार्थसाधकं ॥ स्तोभस्तंभसमावेशवश्योच्चाटनकर्मसु ॥ सकृत्पूर्वं वदेन्मंत्रं मंते चैव तथा पुनः ॥ मध्ये वा साध्य भवेत्सा
ध्यमाद्यंतमिति तद्विदुः ॥ अन्योन्यप्रीतियुक्तानां विद्वेषणकरं परं ॥ आदौ चांते तथा मंत्रं द्विवारं संप्रयोजयेत् ॥ साध्यनाम सकृन्मध्ये गर्भस्थं संप्रवक्ष्यते ॥ मारणोच्चा
टने वश्ये प्रयुक्ते कारयेन्नृणां ॥ हंति नो रोगव्याधीन् गर्भस्तंभनं ... तथा ॥ त्रिधा मंत्रं वदेत् पूर्वं तथैवान्ते पुनस्त्रिधा ॥ सकृत् साध्यं भवेन्मध्ये तद्विद्यात् सर्वतोमुखं ॥ सर्वो
पसर्गशमनं ... सर्वसौभाग्यजननं ... ॥ आदौ मंत्रं ततो नाम पुनर्मंत्रं समुच्चरेत् ॥ एवमेव त्रिधा कुर्यात् ... विदर्भितं ॥ सर्व

© Dharmartha Trust J&K. Digitized by eGangotri

धिहरं प्रोक्तं भूतापस्मारमर्दनं॥ एकैकं साध्यवर्णं तु कलामंत्रं विदर्भितं॥ पूर्ववत्कथितं चान्यत् तत्स्थाने प्रकल्पयेत्॥ विदर्भग्रथितं नाम मंत्रलक्षणमुत्त
मं॥ सर्वकर्मकरं प्रोक्तं सर्वैश्वर्यफलप्रदं॥ एवमेते प्रयोगाः स्युः सिद्धिमंत्रस्य सिद्धिदाः॥ एतत् ग्रथितानन्तकर्मसु [illegible] यंत्रे लेखनादिविधये बोद्धव्या॥ तत्रोत्तरे नम स
र्वेषां मंत्राणां तारं प्रणवः शिर उच्यते॥ हुं फट् स्वाहा वषट् वौषट् नमः पल्लवसंज्ञकाः॥ तत्तत्कर्मविधानेन तत्तन्मंत्रं विचारतः॥ शिरःपल्लवसंयुक्तो मंत्रो भव
ति सिद्धिदः॥ दक्षिणामूर्तिसंहितायां॥ अथातः संप्रवक्ष्यामि वशीकरणस्य साधनं॥ एवं संसिद्धविद्यायां विनियोगक्रमं शृणु॥ कल्यासि दूररराजस्य वक्त्रं तेत्र
वि चिंतयेत्॥ साध्यप्रकृतिं नामालिख्य चिंतयेत्ततः॥ ज्वलंतीं तत्क्षणाद्देवि मोहिता लपवर्जिता॥ तत्कालज्ञो समायाति अथान्यत्कथ्यते प्रिये॥ तन्नाम्ना ध्यै संलि
लो मंत्री चिंतयेदरुणप्रभं॥ आनीने च तथा साध्यं तदा सौभाग्यसुंदरः॥ कृत्वैकपवारे मुख्यजये मुद्रया च तं॥ यस्य नाम्ना पुनः सम्यक् संभवे द्वासएव हि॥ अ
ष्टस्त्री नाम वर्णाद्यं क्रमध्ये विलिख्य तु॥ योनिमुद्राधरो भूत्वा वागादाकर्षणं भवेत्॥ देवकन्यां राजकन्यां नागकन्यामथापि वा॥ गोरोचनाकुंकुमाभ्यां समभागं च
चंदनं॥ अष्टोत्तरशतावृत्त्या तिलकं सर्वमोहनं॥ पुष्पं फलं जलं चान्नं गंधं वस्त्रं च भूषणं॥ तांबूले पूर्वजप्तं च यस्मै संप्रेष्यते स तु॥ अंगभावात्क्षणाद्देव दासीवास्य भ
वेत्प्रिये॥ करवीररक्तवर्तीं स्त्रिमध्ये [illegible]ः प्रपूजयेत्॥ चिंतयन्मासमात्रं हि साध्यां रक्तां लक्ष्यं ततः॥ इति कुर्वन्महेशानि पूजयेदरुणप्रभां॥ सिंदूररचितोत्र [illegible] राज्ञा नेमो
हयेत्क्षणात्॥ त्रैलोक्यमोहनं वापि रंभामाकर्षयेद्द्रुतं॥ चिताङ्गारेण च करंगुलि लेखे [illegible] द्रवेण हि॥ वध्या वाहोथवा कोपि ज्वरं नाशयति क्षणात्॥ अर्कनिंबद्रवाभ्यां तु ले
खयात् केस्य संलिखेत्॥ दूर्वा नाम मध्या च [illegible] दशो वक्रस्य संलिखेत्॥ गोमूत्रे स्थापयेत् यद्वा भवेद्विद्वेषणं क्षणात्॥ धूपयेच्चंदनं रात्रौ वस्त्रं वा धारयेत्ततः॥ अष्टोत्तरशता
वृत्त्या मोहयेद्भुवनत्रयं॥ लिखेत् गोमयभूमौ तु लिखेद्देव नयानतः॥ सुरूपां प्रतिमां रम्यां भूषाढ्यां परिचिंतयेत्॥ तत्कालं गलहस्ताभिः [illegible] मंडले यांति तां [illegible] नामसंपु
विद्याम्मंकुशांतर्विदर्भितां॥ सर्वांगसंधिसंलीनं कामकूटं समालिखेत्॥ साध्याशाभिमुखो भूत्वा श्रीविद्यान्यासविग्रहः॥ क्षोभणी बीजमुद्रायां चिंत्यामभ्यर्च्य [illegible] जपेत्॥ पोत
यंतीं कामगेहे चंद्रसूर्यकलात्मकं॥ सानुरागातिविकलो कामसायकपीडिता॥ त्रैलोक्यसुंदरी यामक्षणादायाति मोहिता॥ अथ कामांतकोवाच [illegible] वाले संवे [illegible] मंत्रवित्॥ [illegible]
कं प्रपूजयेत्सम्यक् विधायां पूर्णां च धारयेत्॥ लो अवध्यः सर्वदुष्टानां व्याघ्रादीनां न संशयः॥ श्री रां [illegible] कस्तूरीकर्पूरैश्च सकुंकुमैः॥ स्वनाम कमलेतो लेख्यं पूर्वे [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ यार्णव
२३०
230

तं कांलिखेत् ॥ तेनातनो भरत्वेन साधकस्य न संशयः ॥ अनेनैव प्रकारेण रोचनागरुकुंकुमैः ॥ वज्रं विलिख्य साध्याख्यं साधकाख्यं विदर्भितं ॥ त्रैलोक्यमोहनो मंत्री
भवत्येव न संशयः ॥ कामकूटेन देवेशि संदर्भ्य पृथगक्षरं ॥ साध्यनाम त्रिकोणांतर्मोतं काकवेष्टयेद्बहिः ॥ स्वर्णमध्यगतं धार्यं शिखायां यत्र कुत्रचित् ॥ लोकपा
लाश्च राजानो दुष्टास्त्रैलोक्यसंस्थिताः ॥ ते सर्वे वश्यमायांति सान्निपातादयो ज्वराः ॥ अनेन विधिना मपुरं संदर्भ्य संक्षिपेत् ॥ चतुःपथे मध्यदेशे दिक्षु पूर्वादितः क्र
मात् ॥ तस्य सौभाग्यमायाति राजानः किंकराः सदा ॥ स्फुरत्तेजोमयी पृथ्वी प्रज्वलंती वराचरा ॥ चक्रांतस्थिंतये त्रिसंमासषट्कं ततो नरः ॥ तेन कंदर्पसुभगो लोके भ
वति निश्चयात् ॥ दृष्ट्वा कंपयते लोकान्नृविषं नाशयति ज्वरान् ॥ तथाति घं हरति दृष्ट्या वशं करोति चाराम्त्रो सिंदूरलिखितं पूजयेदेकचित्ततः ॥ करोत्याकर्षणं दूर
स्थोत्तमानां धातादपि ॥ अरविंदं दिक्षु कोणेषु क्रमेण परिपूरयेत् ॥ नायदत्त देवलोको यं वश्यो भवति नान्यथा ॥ भूर्जपत्रे लिखेद्वज्रं रोचनागुरुकुंकुमैः ॥ स्वनाम दर्भितं
कुर्यात् दिक्ष्वग्नि पुटभेदनी ॥ मंडले विषमस्थानं भूमौ चक्रं निधापयेत् ॥ धारयेद्वा ततो मंत्री पुरक्षोभयती क्षणात् ॥ उन्मत्तरसलाक्षार्कक्षीरकुंकुमरोचनागकस्तूर्यलक्त
सहिता एकीकृत्य तु संलिखेत् ॥ यन्नाम्ना तस्य देवेशि चारयं [illegible] भयो ग्रहदंतं व्यापिनं चैव रिपुजे सिंहदंतं तथा ॥ अहिदंतं कांजिकं नास्ति सको [illegible] तिक्ष्णाहा
रोचनाकुंकुमाभ्यां तु मध्यगां संलिखेद्बुधः ॥ त्रिकोणेषु यंत्रे वसाध्यनामांकितां मध्यः ॥ तत्र चक्रं धारयेत्तस्मात् [illegible] भवेत् ॥ पीतद्रव्येण चक्रं तल्लि
खेद्धाम मध्यतः ॥ साध्यनाम विलिख्येत तत्पूर्वस्यां दिशि संक्षिपेत् ॥ तस्मात् [illegible] सर्वलोकं कृतांजलीः ॥ अनेन विधिना नीलीरसेनाविलिखेत्ततः ॥ दक्षि
णाभिमुखो मंत्री वज्रं दग्ध्वारि पूर्ववदेतन्माहिषा [illegible] पुरीषेण गोमूत्रेण संलिखेत् ॥ आरनालस्थितं कुर्यात् क्रव्यादि [illegible] क्षणात् ॥ साध्यनामविलिख्येत् [illegible] कपस्थे
णसंचयेत् ॥ संलिख्य [illegible] शत्रु [illegible] महानीलीरसे [illegible] रोचनादग्धमिश्रितैः ॥ [illegible] लिखेत्
कु वज्रवर्जान्वेशं नयेत् ॥ अनेन विधिना [illegible] सौभाग्यं महदाप्नोति [illegible] नपानान्न संशयः ॥ पीते चक्रं [illegible] सर्वभये [illegible] सिंदूरलिखितं
वज्रं [illegible] पश्चिमपूजितं चक्रं गौरिकालिखितं ततः ॥ मंत्रिणो देवता वश्याः किं पुनर्योषितः प्रिये ॥ तथैव दक्षिणास्या [illegible] समर्थ श्री
ता साध्यस्य मंत्रहानिः स्यान्मारणं चविशेषतः ॥ क्रमाद्दिगंतरास्थः सन् वह्निकोणादिषु क्रमात् ॥ [illegible] मंत्रि दूषणं [illegible] तेनरसकुंभे वश्यकरं २३०

© Dharmartha Trust J&K. Digitized by eGangotri

शिश्नं रोचनालिखितं हस्ताद्ध्मातं कुंकुममध्यस्थं सर्वेश-न्त्रिनाशयेत्॥ गोमूत्रमध्यगं चैतं ऊर्ध्वं दुष्टान्तरियोऽ विद्वेषणं भवेद्यकेनैव परमेश्वरि
ब्रह्मा सृष्टिकरो भवेत्। चंद्रसूर्यौ वरारोहे सृष्टिसंहारकारकौ॥ अथ श्रीचक्रसाधनविधिः॥ तत्रस्वारतोरेण। अष्टसु सर्वदुर्गेषु सुभगा श्रीचक्रविधिं तु नभोयस्य विद्यानमाने
लकर्त्ता हर्त्ता सदा प्रियः। अनेन विधिना यत्र श्रीचक्रं क्रमसंयुतं। पूज्यते तत्र सकलं वशी कुर्यान्न संशयः। नगरं वशमायाति देशमंडलमंडितं। योषितः सकला वश्या ज्वल
कालाग्निपीडिताः। विद्याविमूढहृदयाः साधकेन्द्रस्य मानसः। तद्दृष्टेन तु देवेशि जायंते सर्वयोषितः। गोरोचनादिभिर्द्रव्यैश्च कराज्ञे समालिखेत्। अतीव सुंदरं रम्यं तन्मध्ये ज्ञतिमो
वंशी। ज्वलंती नामसहितो महावीजं विदर्भितं। महावीजे मूलविद्यायां कामराजकूटं। विदर्भलक्षणं प्रागवोचं॥ चिंतयेत्तु तदा देवि यावत्तन्नाम्नो सहस्रशः॥ अदृष्टपूर्वा देवेशि कृतमात्रापि
दुर्लभा राजकन्याथवा वान्याभयलज्जाविवर्जिता। आयाति साधकं सम्यक् मंत्रमहात्म्यसती प्रिये। या च क्रममध्यगता भूत्वा साधकश्चिंतयेद्यदा उपसर्वसहस्राभामात्मानमरुणं त
या। साध्यमध्यहृल्लीभूतं चिंतयेत्परमेश्वरि। अनेन क्रमयोगेन स्वयं कंदर्परूपवान्। सर्वसौंदर्यसुभगः सर्वलोकवशंकरः। सर्वरक्तोपचारेश्च मुक्तासहितविग्रहः। चक्रप्रपूजयेद्यस्तु
यस्य नाम विदर्भितं। स भवेद्दासवद्देवि [illegible] भूपतिः। चक्रमध्यगतं कुर्यान्नाम यस्यास्तु योषितः। अदृष्टायां महेशानि योनिमुद्राधरो बुधः। हठादानयते शीघ्रं यक्षि
णीं राजकन्यकां। नागकन्यामप्सरसं खेचरीं वा सुरांगनां। विद्याधरीं दिव्यरूपामृषिकन्यां विचित्रियं। मदनोऽवसंताय स्फुरज्जघनमंडलां। कामबाणप्रभिन्नांतःकरणां
लोलचक्षुषां महाकामकलाध्यानयोगानुसुरवंदिते। क्षोभयेत्स्वर्गमर्त्यलोकपातालतलयोषितः॥ अथ तिलकादिवश्यप्रयोगः। गोरोचनाभागमेकं तु भागमेकं तु कुंकुमं।
अष्टभागद्वयं देवि चंदनेन मर्दयेत्समं। एकत्र तिलकं कुर्यात्त्रैलोक्यवशकारिणं। अष्टोत्तरशतावृत्त्या मंत्रयित्वा वशं नयेत्। राजानं नगरं ग्रामं येन येन प्रदर्शयेत्। मंत्रिणा
परमेशानि तत्सर्वं तस्य वश्यगं। तांबूलं धूपमुदकं पत्रं पुष्पं फलं दधि। दुग्धं घृतं चूर्णं पत्रं वस्त्रं कर्पूरमेव वा कस्तूरी कुसुमं चैलाऊंवं गंजातिपत्रकं। फलं वा वस्तु यच्च
सुसफलं परमेश्वरि। शतमष्टोत्तरं जप्त्वा यस्मै यस्मै प्रयच्छति। स वश्यो जायते देवि नात्र कार्या विचारणा। स्त्रियस्तु सकला वश्या दासीभूता भवंति हि। हृदाकर्षणमेतत्तु क

© Dharmartha Trust J&K. Digitized by eGangotri

भितं नान्यथा भवेत्॥ अथाकर्षणप्रयोगः॥ रहस्ये स्थानके मंत्री लिखेद्देवतयामुचि। कामरूपं गारवेषाढ्यां सर्वाभरणभूषितां। अतिमां सुंदरांगीं तां विलिख्य सुम-
नोहरां। तत्फालकं ठहह्नाभितन्मंडलयोषितां। जम्भनाम महाविद्यामंकुशांतर्विदर्भितां। सर्वसंधिषु देहस्य मदनाक्षरमालिखेत्। क्लीं नेत्रदाडिमपुष्पाभं चिंतयेद्दृहसं-
धिषु तदग्राभिमुखो भूत्वा स्वयं देवीस्वरूपकः। मुद्रां तत्क्षोभिणीं बध्वा मंत्रमष्टशतं जपेत्। नियोज्य दहनागारे चंद्रसूर्यकलात्मके। ततो विकलसर्वांगी कामबाणप्रपीडि-
ता। अनन्यमानसं प्रेमभ्रमभ्रममाणा मदालसा। एवमाकर्षयेन्नारी योजनानां शतान्यपि। तथा मातृकां विलिख्यैकं बाह्यतः सकलां प्रिये। भूर्जपत्रे स्वर्णपत्रे रौप्यपत्रे तथां-
बरे। सोऽवधः सर्वजंतूनां व्याघ्रादीनां विशेषतः। तथैव मातृकापुटं सुसंज्ञो नाम मंडितां। कर्पूरकुंकुमाद्यैस्तु अजरामरतां लभेत्। अनेनैव विधानेन रोचनागुरुकुंकुमैः। लि-
खितं वज्रयोगेन साध्यनामवरान्वितं। विदर्भितं स्वनाम्ना तु यस्मिन्कस्मिन् विलिखितं स्थावरं जंगमं वापि सकलं जनमंडलं। वशीकुर्यान्महेशानि पादाक्रांतं न संशयः। महात्रिपु-
रसुंदर्याः कामकूटेन भास्वता। एकमेवमवष्टभ्य साध्यनामाक्षराणि हि। बहिरप्यलिखेद्वर्णैः मातृकायाः प्रवेष्टयेत्। हेममध्यगतं कुर्यात् क्षितिखातायां वामके भुजे। धारये-
द्यंत्रकं चापि त्रैलोक्यवशकारकं। राजेंद्रमपि देवेशि दासभूतं करोति हि। राजानो वाजिनः सर्वे महादुष्टा महोत्कटाः। व्याघ्राः केसरिणो मत्ता वश्यास्तस्य भवंति हि। पूर्व-
क्रमेण तद्वारनाम संदर्भ्य शैलजे। मध्ये चतुःपथे वापि चतुर्दिक्षु निधापयेत्। महाक्षोभो यो विदितां तु भजतां नाम हन्तामपि तथैव सर्वदुष्टानां पुरस्थानां च जायते। एतन्म-
ध्यगतां पृथ्वीं सशैलवनकाननां। ज्वलंतीं सर्वरात्रेंदुमंडितां भास्वत्यगारांबरां मासवद्धां चिंतयेद्यः स संक्षोभकरो भवेत्। कटाक्षक्षेपमात्रेण नार्यस्तस्य वशाः प्रिये। राजानो
ब्राह्मणा वैश्याः शूद्राश्च पशवो जगत्। दृष्ट्वाकर्षयते देवि त्रैलोक्यं सचराचरं। दृष्ट्वा विषं नाशयते नात्र कार्या विचारणा। भूतप्रेतपिशाचांश्च ज्वरांश्चातुर्थिकादिकान्। अश्म-
लगुल्मादिरोगांश्च दृष्ट्वा नाशयति क्षणात्। एतल्लिखेद्रसुभगं ऋषिसंपूजितं प्रिये। योजनानां शतादूर्ध्वं विसर्पयत्याकर्षयेद्धि यं। पदादिषु विदिक्ष्वेवं सम्यक्दे-
विग्रहूनतां। तद्दिक्षु स्थिता लोकान्नृविदिक्स्थानपि सुंदरि। वशमानयते शीघ्रं सपुत्रपशुसबांधवान्। भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः। तन्मध्ये नग-
रं देशं मंडलं खंडमेव वा। नाम्ना विदर्भितं सम्यक्पूजयित्वा यथाविधि। भूमिमध्यगतं कृत्वा त्रैलोक्यं वशमानयेत्। अथवा धारयेत्कंठे शिखायां वा कुमूलके। यंत्र-
कुत्र स्थितं भद्दूक्षोभयेन्नगरं महत्। अर्कक्षीरेण संयुक्तं धत्तूररसं तथा। रोचनाकुंकुमैश्चैव लाक्षालक्तकसंयुतं। कस्तूरीद्रवसंयुक्तमेकीकृत्य ततः परं। चक्र-
मेतत्समालिख्य साध्यनाम महेश्वरि। तस्य व्याघ्रहयव्याधिरिपुसर्पगजादिकं। चौरग्रहजलाग्निछंशाकिनीडाकिनीभयं। भयं न विद्यते देवि परमं त्राणकारकं।

© Dharmartha Trust J&K. Digitized by eGangotri

(२४)

नित्यं समर्चयेद्देवि कालमृत्युं विनाशयेत्॥ अथ वाममध्यगं देवि त्रिकोणे भयमध्यगं॥ अधस्तान्नाम संयुक्तं रोचनाकुंकुमान्वितं॥ त्रिधापयेत् साहाद्य सवत्त्विंकं करोभ
वेत्॥ पीतद्रव्यैः समालिख्य पीतपुष्पैः समर्चयेत्॥ पूर्वाशाभिमुखो भूत्वा स्तंभयेत् सर्ववादिनः॥ सहस्रवदनो देवि मूको भवति तत्क्षणात्॥ नाम्नायस्य सवाम्मीहि पाषाण
इवत्रिशूलः॥ जायते देवदेवेशि महानीलीरसेन तु॥ नाम संयोज्य विधिवत् दक्षिणाशामुखो बुधः॥ वक्रौ दग्ध्वा महेशानि मारयेद्रिपुं प्रिये॥ महिषाश्वपुरीषाभ्यां सम
मा कृष्णशैलजे गोमूत्रेण संलिख्य नाम संदर्भ पूर्ववत्॥ लेवमानं तदा काशशाखूच्चाटनकारकं॥ महानीलीरोचनाभ्यां दुग्धलाक्षारसादिभिः॥ विलिख्य धारयेन्मं
सर्ववर्णे वशं नयेत्॥ अनेनैव विधानेन स्थापयेन्नीरसमध्यगं॥ तेनोदकेन संस्नानं पीतं तत् सर्ववश्यकृत्॥ सौभाग्यं जायते तेन पानीयेन न संशयः॥ एतन्मध्यगतो ते
न पृथ्वी नगरं वाम लोचने॥ सप्ताहं क्षोभयेत्सर्वं संज्वलमानं विचिंतयेत्॥ अथ वक्ष्ये महेशानि महापातकनाशनं॥ श्रीवीसं पूजयेद्देवि सुगंधैः कुसुमैः प्रिये॥ महापात
कयुक्तात्मा तत्क्षणात्तावता भवेत्॥ शमीदूर्वाकुशाश्वत्थपल्लवैस्तथार्ककैः॥ मासेन हंति कलुषं सप्तजन्मकृतं नरः॥ पूर्वाशाभिमुखो भूत्वा पीतद्रव्यैः समर्चयेत्॥ यस्य
सामांकितं तत्र मंत्रहानिः प्रजायते॥ अग्निराक्षसवायव्ये पीतस्थाने समालिख्य स्तंभयेत् सर्ववादिनः॥ उत्तराभिमुखो भूत्वा वंदनेन समालिखेत्॥ संपूज्य विधिवत्कृत्वा
सर्वयोषिन्मनोहरः॥ वश्यमेव जायते तासां दासीमिव वशं नयेत्॥ यमाशाभिमुखो भूत्वा चक्रं कुर्यात्तदार्चयेत्॥ यस्य नामांकितं तत्र मंत्रहानिः प्रजायते॥ अग्निराक्षसवा
यमशेषकोणे शुभूजितं॥ पूर्ववत्परमेशानि क्रमेणापरितोषिते॥ स्तंभयेद्वि दूषणाक्वाधिशत्रूच्चाटकरं परं॥ रोचनालिखितं चक्रं क्षीरमध्ये क्षिपेद्बुधः॥ सर्ववश्यकरं देविभ
वत्येव न संशयः॥ गोमूत्रमध्यगं सम्यक् शत्रूच्चाटकरं परं॥ तैलस्थं चक्रराजं तं छिद्रपांतकरं भवेत्॥ ज्वलज्ज्वलनमध्यस्थं शत्रुनाशकरं भवेत्॥ यदेकांते चतुर्भोगसिं
दूररजसा लिखेत्॥ सर्वेग घृत आरभ्य यावन्मध्यं महेश्वरि॥ अकारादिक्षकारांतां मातृकां तत्र विन्यसेत्॥ पूजयेत्प्रातिसमये कुलाचारक्रमेण तु॥ साधकः खेचरो
विजायते नात्र संशयः॥ गिरादेकंतरौ तदुद्दर्वयेत्कुलमागतः॥ अजरामरतो लब्ध्वा सुखी भवति मंत्रिकः॥ श्मशाने पूजयेच्चक्रं महाभूतदिने तु यः॥ पूर्वक्रमेण विधिवद्धा
कस्थिरमानसः॥ खड्गसिद्धिं च वेतालसिद्धिं च गुटिकां लभेत्॥ पादुकांजनसिद्धिं च मनसिद्धिं च धातुदां॥ स महावीरसिद्धिं तु यक्षिणीचेटकोटकं॥ सर्वं लभते मंत्री तात्रको
र्णाविचारणा॥ ॥इति श्रीविद्यार्णवे सप्तदशाश्वासः॥ ॥अथ समयाचारः॥ प्रयोगसारे॥ देवस्थाने गुरुस्थाने श्मशाने वा चतुष्पथे॥ पादुकासनविस्मृत
मेषु नानि विवर्जयेत्॥ प्रमत्तामंत्यजां कन्यां पुष्पितां पतितां स्तनीं॥ विरूपामुक्तकेशीं च कामार्त्तां च न नतिं दयेत्॥ धान्यो गुरुदेवाग्निविद्विष्टो याति नरान्प्रति॥

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यां पुस्तकं नैव प्रसारयेत्पादौ नैतानपि विलंघयेत्। आलस्यमदसंमोहशाठ्यपैशुन्यविग्रहान्॥ अयामात्मसंमानं प्रतिनिंदां च वर्जयेत्॥ आलस्यं मदता॥
मदः विद्याधनाभिजात्यादेः समुद्भितो मनस उल्लासः। मोहो मिथ्याभिनिवेशः। शाठ्यं शक्तिगूहनं। पैशुन्यं परोक्षे परदोषप्रकाशनं। असत्स्वगुणेषु
दोषारोपः। आत्मसंमानं। आत्मनि सम्यक् पूज्यत्वबुद्धिः। लिंगिनं व्रतिनं विप्रं वेदं वेदांतसंहिताः। पुराणागमशास्त्राणि कदापि न दूषयेत्॥ वेदांगा
निप्रसिद्धानि संहिता मन्वादिप्रणीतस्मृतिशास्त्राणि। आगमशास्त्राणि शिवाद्युक्तयामलादीनि। आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे। मतं च वासुदे
वस्य तस्मादागम उच्यते। इत्यागमशब्दनिरुक्तिः। कल्पा नु नक्षत्रकल्पो वि[illegible]धानकल्पोऽभिचारकल्पः शांतिकल्पश्चेत्यथर्ववेदविभागरूपा नक्षत्रादिक
ल्पादिका न त्यांश्च। युगं मुसलं भस्मानदानवुद्धिमुलूखलं। शूर्पं संमार्जनी दंडं ध्वजं वैडूर्यमायुधं। कलशं चामरं छत्रं दर्पणं भूषणं तथा। भोगयोग्यानि यान्यानि भाग
या द्रव्याणि [illegible] नित्यं महास्थानेषु वस्तूनि यानि वा देवतालये। दिव्योकानि पदार्थानि भूतानि विष्ठानि यानि वै लंघयेत् नु तु। नैतानि यद्वा न च पदा स्पृशेत्॥ योगो ष्ठीलो
कविद्विष्टायां वसेर विसर्पिणी। धारयेद् वंसत्यं सोष्णीलं समतो धृतिं। क्षांतिं दयां मनास्कं वदिम्यं शक्ति व सर्वदा। आर्जलमवक्रता सत्यं यथादृष्टार्थभाषणं। सुशी
लत्वं सुस्वभावत्वं समता रागद्वेषादिराहित्यं। धृतिं दुःखादिभिरवसीदत्तिस्थिन्नस्य स्थितीकरणं। क्षांतिः क्षमां परिभवादिषु सत्स्वमानक्रोधप्रतिबंधता यांपरिदुः
खासहनं॥ मंत्रं तंत्रं प्रकाशेत्॥ विभीतकार्कं कारंजस्नुहिच्छायां न संश्रयेत्। स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा। न रजांस्यकेशनिधूलस्नानवस्त्रघटोदकं।
एतस्य शौंल्पजं हरं खरे[illegible]वाजरजस्तथा। लिंगपुराणे। स्त्रातः स्नानस्त्रोषुणां मार्जनीभवरेणुकं। संस्पृशेद्यदि मूढात्मा श्रियं हंति हरेरपि। सोमशंभुः॥ नानि
वेदकारणं देवं नशास्त्रं तेन निर्मितं। नगुरुं साधकं चैव लिंगछायां न लंघयेत्। नाद्यात्लंघेन निर्माल्यं तद्द्याच्छिवदीक्षिते। तत्शिवनिर्माल्यं॥ तथा नारदपंचरात्रे॥
साधनस्य स्वभावेन केशश्मश्रुविलंवितः। संभवेनव वस्त्रं च मलपंकाविवर्जितः। सुविनीतः सदायं वमंत्रमाराधयेत्परं। साधनस्य स्वभावे येनेन पुरश्चरणम
ध्येन वपनं कार्यमित्युक्तं। अपनीतकेशश्मश्रुरित्यर्थः। अत्र तु गंगायां भास्करक्षेत्रेपि त्रोश्च मरणे विना। यथाहि न्नोतिषः केशांस्तमाकुर्वीत घातके। प्रयाग
तीर्थयात्रायांपितृमातृवियोगतः। कचानां वपनं कुर्यात् वृथा नाविको भवेत्। इति वकालिकापुराणविद्धुष्यांयद्वपनं न निषिध्यते। तद्दीक्षितपरं। जटिलमुनिना

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२४२

श्चैवम्भूतः क्रियलोपरीतिः तन्न ब्रह्मचर्यरताः श्रोता वेदांतज्ञानतत्परः ॥ इति कूर्मपुराणे शैवानां मुंडितत्वोक्तेः ॥ तथा सामान्यसिद्धौ रह्स्यार्थपरे यांन कदाचन । प्रयोगः सामंत्रश्च
श्चैवं स्मृत्या स्मृतिः पदर्थी नाना व्रताचरणं भावयेत् स्त्रयं भूतवादं च भयात् तस्मात् तन्न चासुनि । कृपया परया कुर्याद्दानाद्येषु असंसदि । सोम सूर्यांतरस्थं वाग्वाचा स्मान्निमध्यमो भावये ये दैवतं विष्णुं गुरुं वि
आप घपिव नावरेत ॥ गारुडं भूतवादं च भयात् स्वार्थं न चामुनि । कृपया परया कुर्याद्दानाद्येषु असंसदि । सोमसूर्यांतरस्थं
श्रशरीरं गामस्त्रेनमातापितरौ विष्णुं तद्दृष्टिरियाति पिंतुं ह्येयो वीप्साश्च यो विष्णुराला ह्ययश्च विष्णुवत् ॥ यत्र यत्र परीवादो मात्सर्यात् क्रियते गुरोः ॥ तत्र तत्र न वक्तव्यं प्रयाया त्
संस्मरं हरिं ॥ यैः कृता वयरोर्निंदा विमोः शास्त्रस्य भारदा । नापितैः सह वक्तव्यं वस्तव्यं वा कदाचन ॥ कर्मणा मनसा वाचा न हि स्यात्परदारकः ॥ न निंदा वा ब्राह्मणादे
वा विष्णुर्देनुस्तथैव च ॥ रुद्राक्षादि त्वग्निश्चालो कपालो ग्रहस्तथा ॥ गुरुर्वा चैव वश्यापि पुरुषः ॥ पूर्वदीक्षितः ॥ न तेन कुत्रचित् कार्यं शापानुग्रहकर्म लि ॥ न ते न मंत्रो
वक्तव्योऽरुद्राक्ष समयाचिंचि ॥ स्वानुष्ठानविपत्कर्म सर्व सर्व स्वलोपयेत् ॥ मंत्रगुप्तिश्च कर्तव्या सततं मंत्रसिद्धये ॥ तेन साधकेनान्यत्रांतरे ॥ सर्वभूतेषु चानुकंपा दानं चाति
थिपूजनं ॥ पर्वस्नानं तीर्थसेवा च स्वाध्यायो गुरुसेवनं ॥ सामान्यं सर्वलोकानामेष धर्मः सनातनः ॥ ब्रह्मचारी दीक्षितश्च त्रिसंध्यं देवमर्चयेत् ॥ स्नानं त्रिषवणं तत्र स्ववेदा .
ध्ययनमेव च ॥ भैक्ष्यं संप्रार्थयेत् साक्षाद्ध्याये द्देवं निरंतरं ॥ गृहस्थो दीक्षया सिक्तः सर्वपूर्ववदाचरेत् ॥ न जपो नार्चनं नैव ध्यानं नापि विधिक्रमः ॥ केवलं सततं श्रीमद्
रत्नं मे नव भाति नौ ॥ संन्यासीनां मुमुक्षूणां मानसः कथितः क्रमः ॥ परिव्राड्विरक्तश्च विरक्तगृहीतथा ॥ गुप्तो लोचरकेच्योरपयेतां भूतसंप्लवां ॥ गृहस्थो धर्मपत्न्या च पूजये
द्देवमन्वहं ॥ दयादानेमहार्हैश्च येन देवः प्रसीदति ॥ संन्यासीनांद्र्वयदानेनाधिकारोऽस्ति सुव्रत ॥ वर्णिनो वनवस्थानां कोऽपि दनेऽपेक्षितो ॥ अन्यत्रापि ॥ अथाचारं प्रवक्ष्या
मि यत्स्मृत्वा मृतत्वकेता सर्वभूतहिते युक्तः समयाचारपालकः ॥ अकर्मसंस्मागी नित्यानुष्ठानतत्परः ॥ मंत्राणां साधने द्वारेशि वभावनतत्परः ॥ परस्वं देवतायां तु सर्व
कर्म निवेदकः ॥ अन्यमंत्रार्चनं भ्रूकुमन्यमंत्रप्रपूजनं ॥ कुलस्त्रीवीररतिंदा च तद्द्रव्यस्यापहरणं ॥ स्त्रीपुरोषे प्रहारं च वर्जयेत् किमासदा ॥ स्त्रीमयं च जगत्सर्वं स्वयं चैव तत्
त्वा भवेत् ॥ स्त्रीषु द्वेषो न कर्तव्यो विशेषात्पूजनं स्त्रियः ॥ भक्ष्यं तां वृल मन्यत्र भक्ष्यद्रव्यं यथारुचि ॥ पंचमं तथा योनिं भक्ष्यं लेह्यं तथा सुखं ॥ सर्वं च युवतीरूपं भाव
येद्धनमानसः ॥ कुलजां युवतीं वीक्ष्य नमस्कुर्यात् समाहितः ॥ बालां वा यौवनप्रौढां वृद्धां वा सुंदरीं तथा ॥ कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ॥ कुमारीपूजनं
कुर्यात् सर्वकार्येषु सर्वदा ॥ कुमारीपूजनाद्देवि सर्वा सिद्धिः प्रजायते ॥ कुमारीपूजनं मन्त्रे वक्ष्यामः ॥ अन्यत्रापि ॥ यस्मिन्तंत्रे य आचारस्तत्र धर्मः स्मृतो हृदयाः कृता यं
स्तेन जायेत स्वर्गो वा मोक्षदेवा ॥ नाधर्मो जायते लेनाकं च धर्मो महान् भवेत् ॥ विरित्ना विरुध्यंते परावः शास्त्रमोहिताः ॥ श्रौतिसान्तं च कर्तव्या सिद्धिः

नित्य

श्री
२४२

© Dharmartha Trust J&K. Digitized by eGangotri

निःसंजायते। विमुक्तश्चिंतस्तस्मिन्सिद्धिं लभते वापवर्गजां। निर्विकल्पस्तु मंत्रज्ञो ब्रह्मसाक्षान्न संशयः॥ भैरवो यदि संज्ञातः सिद्धिस्तत्र न संशयः॥ शास्त्रो
क्तं विशेषेण कर्तव्या सिद्धिमिच्छता। देव्यै निवेदितं यच्च तस्यांशं भक्षयेन्नरः॥ मद्यादेवताय स्यात्तदन्नः पुरुषोत्तम॥ नैवेद्यं तिं दत्तं दृष्ट्वा न त्यजेत योगिनीग
णाः॥ रक्तपानोद्यताः सर्वा मांसास्थिचर्वणोद्यताः॥ कुलाचारे॥ असंस्कृतं वृथापानं बलात्कारेण मैथुनं। स्वप्रियेण हृतं मांसं रौरवं नरकं व्रजेत्। आत्मार्थं प्रा
णिनां हिंसा न कदाचिन्मयोदिता। बलिदानं विना देव्या हिंसां सर्वत्र वर्जयेत्॥ अनिमित्तं तृणं वापि छेदयेन्नैव कदाचन॥ मामनादृत्य पुण्यं वा पापं स्यात्तत्स्वयातनः॥
मन्निमित्तं कृतं पापं पुण्यं भवति शांभवि॥ ये रवयाणां देव्यैः सिद्धिर्भैरवोदिता॥ कुंडकं कुक्कपालानि मधुपूर्णानि बिभ्रतः॥ किं न पश्यति लोकोयं ब्रह्मविष्णुमहेश्व
रान्॥ श्रीगुरोः कुलशास्त्रेभ्यः सम्यग्विज्ञाय वासनां। पंचमुद्रान्निषेवेत वान्यथा नरकं व्रजेत्॥ कुलद्रव्याणि सेवंते येन्यदर्शनमाश्रिताः॥ तदंगरोमसंख्यातैर्यांते
भूतयोनिषु॥ अदीक्षितैरनाचारैरतंत्रज्ञैरदेवतैः। दूषकैः समयभ्रष्टैर्न कुर्याद्द्रव्यसंगतिं। अभिज्ञमन्यमानैश्च पापैर्वेदव्रतधारिभिः पशुभिर्द्रव्यकर्मस्थैर्न कुर्या
द्द्रव्यसंगतिं॥ द्विष्टैश्च गुरुभिः शश्वद्भक्तिहीनैर्दुरात्मभिः॥ कुलोपदेशहीनैश्च न कुर्याद्द्रव्यसंगतिं॥ अनभिज्ञैरनर्हैश्च न कुर्याद्द्रव्यसंगतिं। वेदवाक्यप्रमाणज्ञाः
श्रुतिस्मृत्यर्थवेदिनः॥ कुलधर्मानभिज्ञाश्चेत्तान्सर्वान्वर्जयेत्प्रिये। स्वकुलेपि प्रसक्ता ये वह्न्याचारप्रवर्तिनः॥ ख्यातपूजाविमुखाः स्युश्चेत्तैः संगं वर्जयेत्प्रिये॥ स्त्रीमित्र
पुत्रबंधुपूर्णं स्निग्धा नाम्नापि पार्वति। कुलाचारानभिज्ञानां संगतिं वर्जयेत्प्रिये॥ अदृष्टपुरुषाणां च देशांतरनिवासिनां। विना संकेतयोगेन न कुर्याद्द्रव्यसंगतिं॥
कुलीनं नावमन्येत पूजयेत्तं विचक्षणः॥ कुलीनेषु प्रसन्नेषु प्रसन्ना देवता भवेत्॥ स्वपात्रस्थितशेषं च न दद्यात्कैरवाय वा। यदि दद्यात्कुलेशानि देवताशापमाप्नुया
त्॥ आसनं भोजनं पानं उपानच्छयनानि च॥ अनभिज्ञैरनर्हैश्च संकरं नैव कारयेत्॥ कुलपूजांतरायं तु यः करोति हि दुर्मतिः॥ स याति नरकं घोरमेकविंशतिभिः
कुलैः सह। तस्मात्सर्वप्रयत्नेन कुलपूजारतो भवेत्॥ लभते सर्वसिद्धिं च नात्र कार्या विचारणा॥ आराधनासमर्थश्चेद्दद्याद्दर्शनसाधनं॥ यो दातुं नैव शक्नोति कु
र्याद्देवदर्शनं॥ सम्यक्शतक्रतून्कृत्वा यत्फलं समवाप्नुयात्॥ तत्फलं समवाप्नोति सकृत्कुलार्चदर्शनात्॥ कुलाश्वमेधादीनां यत्फलं लभते नरः॥ तत्फलं स
मवाप्नोति दृष्ट्वा श्रीचक्रसाधनं॥ सार्धत्रिकोटितीर्थेषु स्नात्वा यत्फलमाप्नुयात्॥ तत्फलं लभते मर्त्यः कुलश्रीचक्रदर्शनात्॥ वकुलोकंनाकिं देवि यथाशक्त्या द
दाति यः॥ कुलाचार्याय पूजार्थं कुलद्रव्यं स सर्ववित्॥ यथैवोध्वाराशाः प्रियाः स्युर्न बहिश्चराः॥ तथा तद्योगनिष्ठाय प्रिया मे देवि नापरः॥ समर्पयति भक्त्या

© Dharmartha Trust J&K. Digitized by eGangotri

त्यागाभ्यां पिशिताः सर्वाः उल्लासयति चानंदमात्रियाः कौलिका प्रिये। अनधीतोप्यशास्त्रज्ञो गुरुभक्तो दृढव्रतः। कुलपूजारतो यस्तु स मे प्रियतमो भवेत्। तत्रो
तरे। कुलजां युवतीं वीक्ष्य नमस्कुर्यात्समाहितः। यदि भाग्यवशाद्देवि कुलदृष्टिः प्रजायते। तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्। तासां मन्त्रादि देवीनां त
था। भगिनी भगक्लिन्ना च भगास्या भगमालिनी। भगावहा भगाक्षी च भगकर्णा भगलयां। भगनासा भगमस्तनी भगस्रावा भगसर्पिणी। संपूज्यैता ध्यायं ध्यायेम
नसैगुरुरूमेव वा। नमस्कृत्य विधानेन स्वयमक्षोभितः सुधीः। बालां वा यौवनोन्मत्तां वृद्धां वा सुंदरीं तथा। कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्। तासां प्रहा
रं निंदां च कौटिल्यमप्रियं तथा। सर्वथा च न कर्तव्यमन्यथा सिद्धिरोधकृत्। स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं। स्त्रीसंगिना सदा भाव्यमन्यथा
स्वस्त्रियामपि। जपस्थाने महाशंखं निवेश्योर्ध्वे जपं चरेत्। स्त्रियं गच्छन्स्पृशन्पश्यन्विशेषात्कुलजां शुभां। भक्ष्यं सर्वं कुलमन्यानि भक्ष्यद्रव्याणि यथारुचि भु
क्त्वा ह्यशेषभक्ष्याणि भुक्त्वा शेषं जपं चरेत्। वीरतंत्रे। दिक्कालनियमो नात्र स्थित्यादिनियमो न च। जपे न कालनियमो नार्चादिषु बलिष्वपि। स्वेच्छानियम
उक्तश्च महामंत्रस्य साधने। महामंत्रास्तु तत्रैव। काली तारा महाविद्या षोडशी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती मता। बगला सिद्धविद्या
च मातंगी कमलात्मिका। एता एव महाविद्या दशविद्याः प्रकीर्त्तिताः। नात्र सिद्धाद्यपेक्षास्ति नारिमित्रादिदूषणं। न चा प्रयासवा कुलं समयासमयादि
कमिति। अथ काली। दक्षिणकालिकादिभेदाः। तारा ताराभेदाः। महाविद्याषोडशी। श्रीमहात्रिपुरसुंदर्याः षोडशी पंचदशी भेदसहिता। भुवनेश्वरी
तद्भेदसहिता। भैरवी। बालादिसभेदैः सहिता। छिन्नमस्ता तद्भेदसहिता। विद्याधूमावती। तद्भेद धूम्रटी मर्कटी आद्रूपटी सहिता। बगला तद्भेदसहिता।
वाराह्यष्टविध सहिता। सिद्धविद्या च मातंगी। सुमुखी श्यामला लघुमातंगी राजमातंगी भेदसहिता। कमलात्मिका। महालक्ष्मी भेदसहिता। तथा वस्त्रास
न स्पृशेन्नग्ने हृद्देहस्पर्शादि वारिणा शुद्धिं न चाचरेत्। तन्निर्विकल्पमनश्चरेत्। कुलार्णवे। कुलाचारगृहे गत्वा भक्त्या पापं विशोधयेत्। यावद्यदमृतं वोलं तद
भावे कुले भवेत्। कुलाचारेण यत्कोलाद् दण्डपात्रं तु भक्षितः। नमस्कृत्य च गच्छीयादन्यथा नरके पूजेत्। अन्यत्रापि। यथा नागमये कालं द्यूतक्रीडादिना श्री
सुधीः। गमयेद्देवता पूजा जपयागस्तवादिना। वीराणां जपयज्ञस्तु सर्वकाले प्रशस्यते। सर्वदेशे सर्वपीठे कर्तव्यो नात्र संशयः। शक्तिः शिवः शिवः शक्तिः २४३

© Dharmartha Trust J&K. Digitized by eGangotri

शक्तिर्ब्रह्मा जनार्दनः। शक्तिरिंद्रो रविः शक्तिः शक्तिश्चंद्रो ग्रहा ध्रुवः। शक्तिरूपं जगत्सर्वं यो न जानाति नारकी॥ वीरतंत्रे॥ स्नानादिमानसं शौचं मानसप्र
वरो जपः। पूजनं मानसं दिव्यं मानसं तर्पणादिकं। सर्व एव शुभः कालो नाशुभो विद्यते क्वचित्। न विशेषो दिवारात्रौ न संध्यायां दिवानिशं। सर्वदा पूजयेद्देवीम
स्नातः कृतभोजनः। महानिशि प्रयत्नेन दद्याद्बलिं मंत्रेण दापयेत्। रात्रावेव महापूजा कर्त्तव्या वीरवंदिते। तद्दिने सर्वथा कार्यो शासनात्मम सुव्रते। महानिशा तु तत्र
चा। अर्धरात्रात्परं यच्च मुहूर्तद्वयमेव च। सा महारात्रिरुद्दिष्टा तत्कृतं चाक्षयं भवेत्॥ गंधर्वतंत्रे॥ पृथ्वी ऋतुमती वीक्ष्य सहस्रं यदि नित्यशः। तदा वादीश्वसिद्धः सहानःषि
निलं व्रजेत्। नित्यशः इति कोऽर्थः दिनं यावत्। पर्वते हस्तमारोप्य निर्भयो यतमानसः। कवितां लभते सोपि अमृतत्वं च गच्छति। अत्रापि सहस्रमिति संबंधः। पृथ्वी कुलो
पर्वतेस्तनः। नीलतंत्रे। पक्वं दृष्ट्वा यथा बिंबं खंजनं शिखरं तथा। चामरं रविबिंबं च तिलपुष्पं सरोरुहं। त्रिशूलं वीक्ष्य तत्स्याच्छतशः शुद्धभावतः। मुखं प्रसादं सुमुखं
सुलोचनं सुहास्यकं। सुकेशं सुगतिं वै सुगंधिं सुखमेव च। लभते च यथा संख्यं भृगुपार्वति सादरं॥ पक्वं मुखं॥ बिंबं अधरं। खंजनं चक्षुः। शिखरं स्तनं। चामरं के
शं। रविबिंबं सिंदूरं। तिलपुष्पं नासिकां। सरोरुहं। नाभिं त्रिवलीमिति। भावचूडामणौ। एकाकी निर्जने देशे स्मशाने विजने वने। शून्यागारे नदीतीरे निःशंको विहरेत्स्व
मो दा। महाचीनद्रुमे देवी ध्यात्वा तत्र प्रपूजयेत्। तं द्रुमं च पुष्पेण पूजयेद्भक्तिभावतः। सम्भवे कुलदेवस्य कुलक्रमागतः सुधीः। ब्रह्मांतरो महापद्मे देवीं ध्यात्वा यथाविधि
तत्सुधारससारेण तर्पयेन्मातृकाननैः। महाचीनद्रुमलतावेष्टितः साधकोत्तमः। रात्रौ यदि जपेन्मंत्रं सेवकः कल्पतां भवेत्। तिथिक्रमेण संख्याभिर्लक्षेनाभिवेष्टितो यदि
तदा मासेन सिद्धिः स्यात् सहस्रजपमानतः। अष्टम्यां च चतुर्दश्यां द्विगुणी यदि दृश्यते। तत्रैव महती सिद्धिर्देवतामपि दुर्लभा॥ कुलचूडामणौ॥ शृणु पुत्र रहस्यं मे सम
याचारसंभवं। ये न हीनास्त्रसिध्यंति जन्मकोटिसहस्रशः। मानवः कुलशास्त्राणां कुलाचारानुचारिणां। तदाचारं तु सर्वत्र वै ह्यवाचारत परः। परनिंदा सहिष्णुः स्या
दुपकाररतः सदा। पर्वते विपिने वापि निर्जने शून्यमंडपे। चतुष्पथे जपं नूनं यादि देवाकृति भवेत्। क्षणं ध्यात्वा मनुं जप्त्वा नत्वा न लागच्छेद्यथा सुखं। गृध्रं वीक्ष्य महाकालीं न
मस्कुर्याद्दलक्षिते। क्षेमंकरीं तथा वीक्ष्य जंबूकीयमहूतिकां। कुररं श्येनभूकाकोलूकश्च मार्जाररमेव च। कृशोदरि महाचंडे मुक्तकेशि बलिप्रिये। कुलाचारप्रसन्नास्ये न
मस्ते शंकरप्रिये। स्मशानं च शवं दृष्ट्वा प्रदक्षिणमनुव्रजेत्। प्रणम्यानेन मनुना मंत्री सुखमवाप्नुयात्। घोरदंष्ट्रे करालास्ये पिंगिटि शब्दप्रणादिनि। घोर घोर रवास्फा
रे नमस्ते चितिवासिनि। भाग्योदय समुत्पन्ने नमस्ते वरवर्णिनि। कुरुड वर्णं तथा पुष्पं राजानं राजपुत्रकं। हरत्यश्वरथशस्त्राणि फलकानीर परुषान्। महिषं कुल

© Dharmartha Trust J&K. Digitized by eGangotri

देवं च दृश्यामहे षमर्दिनी। प्रणम्य तव दुर्गां वा रश्च विघ्नैर्न लिप्यते। जय देवि जगद्धात्रि त्रिपुराद्ये त्रिदैवते। भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते। म
च भोः ॐ सदा लोकाय मत्स्य मांसं वरस्त्रियं। दृष्ट्वा च भैरवी देवी प्रणमेद्भिमशनमतुं। घोरविघ्नविनाशाय कुलाचारसमृद्धये। नमामि वरदे देवि मुण्डमालाविभू
षितां। रक्तधारासमाकीर्णां वरदे त्वां नमाम्यहं। सर्वविघ्नहरे देवि नमस्ते हरवल्लभे। एते पांदर्शने नैव यदि नैवं प्रकुर्वते। शक्तिमंत्रपुरस्कृत्य तस्यासिद्धिर्न जा
यते। कुलाचारे कुलाष्टम्यां चतुर्दश्यां विशेषतः। योगिनीपूजनं तत्र प्रधानं कुलपूजने। यथा विष्णुतिथौ विष्णुः पूजितो वांछितप्रदः। तथा कुलतिथौ दुर्गा पूजि
ता वरदायिनी। कुलाचारनियमस्तु यामले। रविर्विंबो गुरुः सौरिश्चलाख्या कुलादिमे। भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः। द्वितीया दशमी षष्ठी कुला
कुलमुदाहृता। विषमाख्याः कुलाः सर्वाः शेषाश्च तिथयः कुलाः। वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतं। कुलानि समयुग्मानि शेषभान्यकुलानि यानि यौ
वारे च नक्षत्रे च कुले स्थापितो जयः। कुलाख्येन यियोनित्यं साम्यं चैव कुलाकुले। एवं कुलाचारादिकं ज्ञात्वा साधकः कुर्यात्। अथ शिवाबलिः। कुलचू
डामणौ॥ बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः। मांसप्रधानं नैवेद्यं संध्याकाले निवेदयेत्। कालि कालीति वक्तव्यं तत्रो माशिवरूपिणी। पशुरूपधरा याभि
परिवारगतैः सह। भुक्त्वा रौति यदेशान्यां मुखमुन्नोल्य सुस्वरं। तदेव मंगलं तस्य नान्यथा कुलभूषणे। अवश्यमन्नदानेन नियतं तोषयेच्छिवां। नित्यश्राद्धे तथा
संध्यावंदनं पितृतर्पणं। तथैव कुलसेवायां निरता कुलपूजने। पशुरूपां शिवां देवीं यो नार्चयति निर्जने। शिवागारेण तस्यास्तु सर्वं नश्यति निश्चितं। जपपूजा
प विधानानि यत्किंचित्सुकृतानि च। गृहीत्वा शिवा पापं ददाति शिवारोदिति निर्जने। शिवागारेण तस्यास्तु एकया भुक्तया नेयं त्र शिवया देवमेरवा। तत्रैव सर्वशक्तीनां प्री
तिः परम दुर्लभा। पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्। एतन्नादिगुणं कर्म सगुणो साधयेत्ततः। ततेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत्। राजादिभयमा
पन्ने दशांतरभयादिके। शुभाशुभानि कर्माणि विचिंत्य बलिमाहरेत्। गृहाण देवि महाभागे शिवे कालाग्निरूपिणि। शुभाशुभफलं व्यक्तं ब्रूहि गृहाण बलिं तव। एवमु
क्त्वा दातव्यो बलिः कुलपूजनप्रियैः। यदि न भुज्यते वस्तु तदा नैव शुभं भवेत्। शुभं यदि भवेत्तत्र भुज्यते तदशेषतः। एवं ज्ञात्वा महादेवि शांतिस्वस्त्ययनं चरेत्। कु श्री
लवर्त्मे सर्वं गोपनीयं। तत्रांतरे॥ निर्जने चैव कर्त्तव्यं नवैवं जनसन्निधौ। किं वा पक्षिपतंगादि दर्शने नैव कारयेत्। पातालमंडपे वापि कामकपुनिर्यंत्रितो। निश्चि २४४
दमंडपे वापि कर्त्तव्यं न च सन्निधौ। कुलपुष्पं कुलद्रव्यं कुलपूजां कुले जपं। कुलं कुलपतिं चैव कुलमालां कुलाकुले। कुलवर्त्म कुलध्यानं सर्वथा न प्रकाशयेत्।

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकाशात्कार्यहानिः स्यात्प्रकाशान्निधनादिकं। प्रकाशान्मंत्रनाशः स्यात्प्रकाशात्कुलहिंसनं। प्रकाशान्नस्तु लाभः स्यान्न प्रकाश्यं कदाचन। पूजाकाले वदेद्योऽपि यदि
कोऽप्यत्रागच्छति। दर्शयेद् हूं हूं वीमुद्रां विघ्नुन्यासं तथास्त्र वै। प्रकाशाद्विघ्नशुद्धिः स्यात्तत्प्रकाशान्न दूषणं। गोपनाद्विद्व्यक्तिः स्यान्न गुप्तिः सन्निधीयते। कदाचि
देहहानिरस्तु तव व्यक्तिः कदाचन। वरं पूजा न कर्तव्या व्यक्तिर्नैव कदाचन॥ वीरतंत्रे॥ शिवाबलिमधिकृत्य। नृपलं वैरिनाशाय समरे विजयाय वा। छागलं प
रसेन्यस्य स्तंभनाय विशेषतः सर्वरोगोपशमनं सर्वोपद्रवनिवारणं। परवादिमुखस्तंभं माहिषं शस्यते पलं। मगजं सर्वशत्रूणामुच्चाटनकरं परं। शशकोर्थं म
श्यकर्मोद्भवाचीजं कृषिकारकं। पशुसंमोहयेशस्तो विद्वेषे तुरगोरुणं वा उच्चाटे चोष्ट्रजं शस्तं खरोर्थं प्रीतिनाशनं। महामांसाष्टकस्येह फलं शृणु क्रमेण वा। आयुः
कीर्त्तिर्धनारोग्यपुत्रश्रीजयकांक्षिदं। महामांसाष्टके तंत्रे वा गोनरेभाश्वमहिषवराहाजमृगो रुरु वा। महामांसाष्टकमिदं देवताप्रीतिकारकं। खेचराणां विशेषेण
खेचरीसिद्धिदं फलं। सर्वमांसे सुरायुक्ते दद्याद्विधिविशेषतः। मत्स्यार्थं मंत्रसिद्ध्यैव कौकुरं कर्मणापहं। इति॥ अथैतस्य प्रयोगः॥ बिल्वमूले प्रांतरे वा इत्यादि विज
नस्थले संध्याकाले तत्रागत्य बलिद्रव्यं कुचित्संस्थाप्य स्वयमासने समुपविश्य पुरतः पाषाणादौ पूजायंत्रमथवा त्रिकोणं षट्कोणं वृत्तं चतुरस्रात्मकं वा मंडलं
यं दत्वादिना विरच्य गुरुगणपतिक्षेत्रेशान्संप्रणम्य मूलेन प्राणायामत्रयं ऋष्यादि करषडंगन्यासं ध्यानान्तं विधाय ध्यात्वादि अमुकदेवशर्मा अमुककामः श्रीपरदेवता
प्रीत्यर्थं शिवाबलिविधिं करिष्ये इति संकल्प्य बलिमंडलाय नम इति गंधादिना मंडलं संपूज्य तत्र बलिद्रव्यं निक्षिप्य बलिद्रव्याय नम इति बलिद्रव्यं संपूज्य मूलविद्या
मुच्चार्य कालिकास्तु मे शिवरूपिणि पशुरूपधरैः परिवारगणैः सहैरत्रायाहि धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वाहा पुनर्मूलं अमुकदेवतायै साधु धायेस शक्तिः।
कायै पशुरूपधरायै एष बलिर्नमः इत्युक्त्वा गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि। शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं नय। इति प्रार्थ्य कवि दूरे गत्वा एकांते
स्यासनोपर्युपविश्य प्राणायामादि पूर्वकं मूलमंत्रं जपेत्। यावदागत्य शिवा बलिं स्वीकृत्य रौति तावत्कालं जपित्वा तत्पेत् समर्प्य नत्वा दैपादौ प्रक्षाल्य आचम्य देवीं ध्याय
रमोनीयश्चाकुर्यादपरयागं गृहमागच्छेदिति॥ अथ तृतीयागः॥ देवीयामले॥ श्रीमहादेव उवाच॥ तृतीयागविधिं वक्ष्ये कौलधर्मोत्तमोत्तमं। तस्यानुष्ठानमात्रेण स्व
ब्रह्मत्वमाप्नुयात्॥ संति नानाविधा धर्मा ऐहिकामुष्मिकप्रदाः। तत्सारं तु समालोक्य तत धान्यमेत्र संग्रहं। तन्मध्ये सारभूतं च सद्यः प्रत्ययकारकं। न केनापि वरारोहे

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२४५
२४५

ग्रोक्तकोटिस्त्रिदशोऽपि च। दूतीयागे कृते मंत्री सर्वज्ञो जायते ध्रुवं॥ नतस्य पुनरावृत्तिः कल्पकोटिशतैरपि। देवा यक्षाश्च गंधर्वा ऋषयश्च मुनीश्वराः॥ ब्रह्मविष्णु
महेशाद्यास्तथान्ये च देवताः। दूतीयागविधिं कृत्वा तत्तत्पदमवाप्नुयुः॥ विधिवत्सुकृती कृत्वा दूतीयागं नु पार्वति। कृतकृत्यो न संदेहः सुंदरी सुप्रसीदति॥ येषां वं
शं प्रजायेत दूतीयागो महेश्वरि। ते धन्याश्च सम्बन्ध्यास्ते वंद्याः सुहृदः समाः॥ कायेन मनसा वाचा सर्वथा न प्रकाशयेत्॥ सुतं पत्नीं शिरो दद्यान्न देयमिदमुत्तमं॥ कु
र्यात्प्रयत्नतश्चैव दूतीकायजनं प्रिये। यैः कृतं पूजनं दूत्यास्तैरिष्टाः क्रतवोऽखिलाः॥ सर्वतीर्थमयाः प्राज्ञाः सर्वदेवमया भवेत्। पुरश्चर्यादिसकलं कृतं तेन न संशयः॥
अश्वमेधसहस्राणि वाजपेयशतानि वा। आसमुद्रां च धरणीं दत्त्वा तेन सदक्षिणां। मेरुमंदरतुल्यानि सुवर्णान्यर्पितानि वै। गोकोटिदानजं पुण्यं न तुल्यं जायते प्रिये॥
तस्मात्सर्वप्रयत्नेन दूतीयागं समाचरेत्। पूजासंकल्पदं भद्रे सर्वारिष्टप्रशामकं। यदनुष्ठानमात्रेण सर्वमाचरितं भवेत्॥ शक्तिपूजा प्रकर्तव्या विधिवद्भक्तिसंयुतैः॥ अ
थ दूतीं प्रवक्ष्यामि लक्षणानि च सुंदरि। अवंचना सलज्जा च कुलागमसुभाविनी। पद्मी सुशीला प्रियवाक् गुरुशुश्रूषणे रता। दयाधर्मरता शांता हितदा सुखरूपिणी।
रूपयौवनसंपन्ना निश्चला मंत्रतत्परा। सदा तुष्टा सुपुष्टांगी सुंदरी मानिनी शुचिः। नातिकृष्णा च कृशा च चारुसर्वांगसंयुता। दीर्घकेशी विशालाक्षी सच्चक्षुः सुस्पष्टनासिका।
पूर्णगंडकपोला च रक्तोष्ठी च सुदंतिका। चतुलानना गौरा च सुहनुः कंबुकंठिनी। सुबाहुर्वलियुक्ता च कठिनपीनपयोधरा। कृशमध्या सुनाभिः स्याद्वृत्तस्तंभातिमांसला।
सरलांगुलिकायुक्ता सर्वलक्षणसंयुता। कायेन मनसा वाचा सार्थलोलित्यविवर्जिता। पूजनीया प्रयत्नेन पंचविंशतिवार्षिका। अप्रसूता विशेषेण श्यामा चैवोत्त
नरव मा मता। श्यामालक्षणं तु कामशास्त्रे। स्निग्धं नयनदर्शनानिरनुशयामाः नी। स्थिरस्नेहा सुस्पर्शा शिशिरलवरांगा विवरांगना श्यामेति। अतऊर्ध्वं न पूज्या स्यादिह
आपरमेश्वरी। पूजिता श्रीर्द्दारा गेहे तथैव न निःफलं भवेत्। अर्चनेषु प्रयोक्तव्याः कामिन्यो भक्तिचेतसः। तायदा रजसा युक्ता स्तनतः पूज्या महाफलाः। आलीयाश्च परास्त्रैव पु
ष्पवंतीः प्रपूजयेत्। नानेद्वयपरो मूर्खो दारिद्र्यं समवाप्नुयात्। पाडनरतं त्रिं यामम्मा त्रेगतेरा श्रो कुलगेहं ततः पुमान्। लोकूलपूरितमुखो धूपामोदसुगंधितः। रक्तचं
दनादिग्धांगो रक्तमाल्यानुलेपनः। रक्तवस्त्रपरीधानो लाक्षारसगृहे गतः। रक्तमाल्यैन संवीतो रक्तपुष्पविभूषितः। पंचकरणसंकेतैः पूजयेत्कुलनायिकां॥ कुलना श्री
यिका यथा तत्रैव। नटी कपालिनी वेश्या पुल्कसी नापितांगना। रजकी रंजकी चैव सौरंध्री च सुवासिनी। घटिकारवटिका चैव तथा गोपालकन्यका। विशेषवैदग्ध २४५
युताः सर्वा एव कुलांगनाः। गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिता। संगोपनरताः पापस्मरणः सर्वसिद्धिदाः। अक्षतावारसेपन्नां शीलसौभाग्यशालिनीं सदा

© Dharmartha Trust J&K. Digitized by eGangotri

परिगृहीतां भीतायदा संकेतमागतां। अथवा तत्र स्त्रीयात्रा मदनानलतापितां। विलिप्तां चंदनगंधेन रक्तांवरविभूषितां। सुगंधिरक्तकुसुमां सर्वाभरणभूषितां। सदा तुष्टां
ननिरतां सात्विकीभक्तिसंयुतां। कालुष्यरहितां कुर्यात्समागमं भक्तवत्सलां। चातुर्यौदार्यदाक्षिण्यकरुणादिगुणान्वितां। रूपयौवनसंपन्नां शीलसौभाग्यशालिनीं। सुधूपधू
पितां तन्वीं दूतीकर्मसु योजयेत्॥ कुमारीतंत्रे॥ नटी कपालिनी वेश्या रजकी नापितांगना। ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका। मालाकारस्य कन्यापि नव कन्याः
प्रकीर्त्तिताः। ब्राह्मणीति ब्राह्मणविषयं। एवंभूतां यत्नेन तु प्रसन्नां लूलिकोपरि। अन्यां वा कामतो वापि सौख्यादपि वयो नरः। लिंगयोनिरतो मंत्री रौरवं नरकं व्रजेत् इति। देवी
यामले॥ अथ पूजाफलं वक्ष्ये उत्तरोत्तरतो परं। यया तया अयुतं पुण्यं परशक्तिप्रपूजने। ततो वेश्याधिका तेषां रजकी ततोधिका। ततो मातंगिनी श्रेष्ठा मातंग्या पुल्कसी तथा पु
ल्कस्या अक्षता श्रेष्ठा ततोतिसुंदरी स्मृता। सुंदरी परतः श्रेष्ठा प्रीतिवत्यनुकारिणी। तत्परा परमेशानि उन्मत्ता शुभलक्षणा। समयाचारसंपन्ना मंत्रज्ञा भयवर्जिता। विदग्धा लज्ज
सताव धैर्यसत्यान्यसंयुता। एवंगुणसमायुक्ताः पूजयेत् सर्वयोषितः। आलीयाश्च पराश्चैव शक्तिमात्रमहेश्वरि। मंत्राधिदेवताबुद्ध्या पूज्याः सर्वोपचारकैः। विविधैः फलतां
बूलैर्वस्त्रालंकारहेमभिः। संपूज्य विधिवत्तस्याव कुहेत्तु प्रदापयेत्। संभोगवासनो ध्यलायः कुर्याच्छक्तिपूजनं। सदारिद्र्यमवाप्नोति नारकी वा भवेद् ध्रुवं। परमानंदरूपेण दह
भावविवर्जितः। शक्त्या यदुक्तं देवेशि तद्दूवेशं भवी स्वयं। तदाहातु प्रकर्त्तव्या न दाम्भे यः प्रवर्त्तते। शक्त्याहालं च ये मंत्री तपस्तेपे निरर्थकं। कृते तत्रोपहास्यादि कुष्ठी भव
ति नान्यथा। तस्मात्सर्वप्रयत्नेन तद्वाक्यं तु समाचरेत्। व्यंगांगी विकृतांगी च काणाक्षी बधिरा तथा। मुंडिनी विधवा मूका प्रलापिन्य चतस्राभाषिणी। अदीक्षिता भक्तिहीना गु
रुसेवाविवर्जिता। दूषकी समयभ्रष्टा घोराकीर्त्तनचारणी। वक्रातुरा च दुर्मुखी क्रोधा च दुर्गंधकश्मला। सदा निष्ठुरवाणी च अनाचाररतका कुवाक्। दीर्घदंता वलं वोष्ठी शुष्क
स्तनान्वितंबिनी। कष्टवर्णातिमलिना कशाविकलचेतना। महास्थूलातिरोगार्त्ता प्रलंबितपयोधरा। ईषन्नासिकनेत्रा च शुष्कांगी वाथ केशिनी। कनिष्ठा क्रोडदंतावस
दास्यार्थसमन्विता। कुष्ठी हीनांगिनी चैव पञ्चधा चातुरा च या। श्वेतांगिनी रोद्रविंवा कागयोनिः पिशाचिका। मतिभ्रष्टातिविकला अतिदीर्घातिकुब्जिका। एतल्लक्षणसंयुताः
शक्तिर्यत्नेन वर्जयेत्। विशेषतः प्रयत्नेन विधवाः परिवर्जयेत्। शक्तिपात्रं तदा तव्यं विधवायै कदाचन। अज्ञानाल्लोभतो मोहाद्दत्तं तत्प्रशान्तु निःफलं। तस्माद्दूती प्रकर्त्तव्या
लक्षणोक्तानुपार्चयेत्॥ नारद उवाच॥ सर्वज्ञ जगतां नाथ शास्त्रे वेदश्रुतिचोदितं। मातंगीपूजनं तत्र कथं मुक्तिप्रदायकं। अर्चने प्रथिता वेश्या वेश्या सा तु रजस्वला। रजस्वला
च मातंगी सा दूती सर्वमंगला। इति प्रोक्तं त्वया पूर्वमिदानीं तद्विपर्ययः। तव वाक्यं मम भ्रमलन्ते तद्वद पितामह॥ ब्रह्मोवाच॥ मा कुरुष्वात्र संदेहं वेदोक्तं शास्त्रमुत्तमं। असि

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वज्ञकल्पो सो मतंगो मुनिपुंगवः। वर्षाणामयुतं तत्र तपउग्रं चकार ह। तेन प्रीता महादेवी देवानां हितकारिणी। वरं वृणीष्व भगवन्नु दास्यामि तव वांछितं। स च
न कुलाद्द्विजवर्य संज्ञा यया वै धर्मसाधना। हे देवि जगतां मातः प्रीता चेद्यदि सांप्रतं। अपत्यतां समासाद्य मम कुलालंकृतं कुरु। इत्यभ्यर्थ्य मुनिश्रेष्ठो जनयामास
तां सुतां। श्यामलां चारुवदनां वीणाशुकसमन्वितां। शृंगारिकां ज्ञानसंपन्नां जपमालांकुरांबुजैः। धारयंतीं विशालाक्षीं शेखरवतारंकशोभिनीं। सा च भूत्वा महादेवी मात
ङ्गकुलनंदिनी। मातंगिनी तदा देवी विख्याता वरदायिनी। तां विलोक्य तदा शंभुर्हूतीं च चक्रे सुलक्षणां। त्रिपुरं जेतुकामेन योनिपूजा तदा कृता। प्रत्यालीढस्थिता देवी
पूजां स्वीकृत्य निश्चला। यदा दक्षरजो भूत्वा तां च चक्रे शंकरः। प्रियां तदा प्रभृति सेजातो हृतीयागो मनोहरः। ध्यानेन तदा शंभुस्तया सार्धं रतं भजेत्। ध्यानवांतर्गतं मंत्रं मा
तंग्याख्यं च निर्गतं। सर्वसौभाग्यजननं मालामंत्रमभूत्तदा। रसावाप्तिपदं दिव्यमनिधूलोकरंजनं। मातंगीमंत्रमत्यर्थं प्रत्ययप्रतिपादकं। आद्यंतश्च त्या सा देवी तस्मात्
ख्याता तदंत्यजा। मातंगी वांत्यवर्णस्था तदा सा स्वंत्यजा भवेत्। अंत्यजानां द्विजानां च चक्रे ऐक्यं प्रशस्यते। या देवी सर्ववर्णानां वरदा च निरुत्तरा। कुलासंकेतसमयं च
क्रे मातंगमुत्तमं। न दोषः सर्ववर्णानामिति दत्वा वरं तदा। न दोषं तत्र विज्ञेयं सर्वत्रैश्रुतिचोदितं। देवीमुद्दिश्य मोक्षार्थं कृतं यद्दोषवर्जितं। एतच्छास्त्रमिदं दिव्यं न वाच्यं प
शुसन्निधौ। त्यज शंकां महाभ्रम श्रुतिचोदितं। अत्रैतद्यागमिदं दिव्यं हृद्यं वाह्यर्यागं च वैदिकं। मंत्रतंत्रसमायुक्तं तत्र पंचत्वबोधकं। चक्रसंकेतसमयं सर्वतुष्टिप्रका
शितं गोपनीयं प्रयत्नेन न वाच्यं पशुसन्निधौ। त्यज शंकां महाभाग सत्यमेतत्प्रचोदितं। मातंगीपूजनं श्रेष्ठं हृतीयागो मनोहरः। योनिपूजां विना पूजा कृतमप्यकृतं भवेत्।
कलाकेनापि सर्वहः स भवेद्विगतामयः। आयुरारोग्यविभवानमितान् लभते नरः। अनेनैव विधानेन विघ्नार्तो निर्विघ्नो भवेत्। पुत्रार्थी लभते पुत्रं धनार्थी लभते ध
नं। मातंगीशक्तिमभ्यर्च्य तया सार्कं समर्चयेत्। मातंगीमन्त्रयोगेन सर्वकामार्थसिद्धये। शक्त्या सार्कं तदा पूज्या मातंगीमंत्रदेवता। सा देवी शक्तिहीनानां न ददाति मनोर
थं। निःशंकां निर्मलां तन्वीं श्यामां चारुपयोधरां। कौलिकान्वयसंभूतां दीक्षितां क्रोधवर्जितां। दीक्षितां कौलिके यागे सुशीलां च दृढव्रतां। त्रिंशत्कं च समाराधस्थां षोडशा श्री
ब्दाधिकामपि। रजयेत्स्वरया भक्त्या तस्या योनिं सुनिर्मलां। योनिमध्यगतां देवीं कालरात्रिमनुस्मरेत्। तत्र भोगं समासाद्य देवीं संतर्पयेत्सदा। सकृज्जपेन संसिद्धिर्दि २४६
त्रिर्वा नात्र संशयः। पशुस्त्रीसंगमे प्राप्ते शुद्धिं चैतत्पशुबंधनं। अथवा गृहणी पूज्या पूता पुष्पवती यदि। अत्र चैनेकन्यकाः श्रेष्ठाः प्रमदाश्च विशेषतः। तासां भा ज्ये

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकर्तव्यमितिशास्त्रस्य निश्चयः। शम्भुल्लासकरं क्षेत्रे भोगमानन्दमोक्षदुच्यते। इत्यथ भगिनीपुत्री नप्त्री तथा स्नुषा। रकजकी चर्मकारी च मातंगी गृहि-
णी वरा। अर्चने प्रथिता वेश्या मन्त्रसुक्ता मनोहरा। मातंगी यदि चेद् दृश्या वेश्या सापि रजस्वला। रजस्वला यदा दासी त्वसर्वोत्कृष्टा इति स्मृता॥ इत्यादि तथा कुले
कृडामले॥ तरुणोल्लाससंयुक्तां पर्यंके तु निवेशयेत्। भयलज्जादि सर्वाणि परित्यज्याथ इति कौ। कंचुकं च परित्यज्य तथा वस्त्रं च पार्वति। आचार्यानुचरी
रक्तामनसा सुखदायिनी। देहभावं परित्यज्य सर्वसरक्तं भुक्त्वा कौ प्रिये। चुंबनालिंगने चैव नखदन्तक्षतानि च। वक्तुं नाव कि मुक्ते न प्राणमेकं समाचरेत्। दूती यस्य
सुसंज्ञाता सफलं तस्य जीवितं। वंशद्वयं समुद्धृत्य लभते शाश्वतं पदं। सर्वदा सुखमाप्नोति सर्वैश्वर्यं च लभ्यते। न तस्य दुरितं किंचिन्न च मारी भयं भवेत्। चुंबनेन पर-
मैश्वर्यं नखदन्तक्षता युधः। संभोगे च सुखं यद्यज्जातं द्विक्लोः परमं पदं। न दद्यात् चुंबनं यस्तु दरिद्रो जायते ध्रुवं। आलिंगनं विना देवि कुष्ठी भवति पार्वति। विना दन्तक्षतं
देवि लोको भवति निंदितः। पंचमी तु सकृद्ला सा विज्ञायते सती। द्वितीयेन तु लक्ष्मी स्यात् तृतीये पार्वती भवेत्। ततो दशाल्लु रवादि कांत स्याः पुण्ये न गण्यते। आलि-
गने हरेद्रोगान् धन्या धन्यादि चुंबने। नखदन्तकृता चेष्टा तदा मोक्षः प्रजायते। सा युक्तं संगमे नरया सत्यमेव न संशयः॥ इति पंचमयागप्रशंसा॥ भैरव्यामले॥
कुर्याद् दुग्धा टने दृष्ट्वा मारणे मोहने तथा। सुरूपां च सुवेश्यां च तरुणीं सुन्दरीं तथा। प्रसन्नमुखशोभाढ्यां तथा सौभाग्यगर्वितां। उदारवंशसंभूतां पूजाग्रहणहर्षितां। सु-
वासिनीमीदृशीं च पूजयित्वा विधानतः। तत्काले कार्यसिद्धिः स्यान्नात्र कार्या विचारणा। विशेषतो योनिपूजां कुर्याद् दीक्षितसिद्धये। सुरूपां तरुणीं वेश्यां योनिपूजा
समाचरेत्। सर्वजनमोहने स्यान्नात्र कार्या विचारणा। सुरूपां तरुणीं दासीं योनिपूजां समाचरेत्। सर्वलोकवश्यार्थं नात्र संदेह इष्यते। मातंगिन्याः सुरूपायाः सु-
गुणाया स्तथैव च। तरुण्या योनिपूजां च स्तंभनार्थं समाचरेत्। यस्या अंगे देवतास्ति तस्या योनिं प्रपूजयेत्। आकर्षणार्थं मंत्री नात्र संदेह संभवः। सुरूपाया तरुण्या-
श्च योगिन्या योनिपूजने। उच्चाटनादिकर्माणि जायन्ते नात्र संशयः। मदघूर्णितनेत्राया सुरूपाया योनिपूजने। रजस्वला यदि देवी भवत्येव न संशयः। विधवायाः सुरू-
पाया स्तरुण्या योनिपूजने। मारणं जायते शीघ्रं नात्र संदेहसंभवः। परं तु निर्भरा भक्त्या सर्वमेतत् समाचरेत्। रजस्वलायाः च भवेत् सर्वं सर्वजातिसमुद्भवा। तस्यास्तु पूजने स-
र्वकार्यसिद्धिर्भवेद् ध्रुवं। सर्वकार्ये सुवासिन्याः पूजनं न्यासपूर्वकं। भगमालिनि मंत्रेण कुर्यात् स्वार्थं न पूर्वकं। सर्वकार्यं प्रनिष्पत्तिर्भवत्येव न संशयः। षोडशे रूपवारे सु पू-
जा सर्वत्र शस्यते। यस्या अंगे देवतास्ति तस्याः पूजां समाचरेत्। वश्याकर्षण कर्माणि मनसा यद्यदीप्सितं। तत्सर्वं भवति क्षिप्रं नात्र संदेह इष्यते। अस्पृश्याया

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
२४७
247

स्तुरुच्चाटास्तु राज्ञा देवार्थमीरिता। गुरुतः शास्त्रतो ज्ञात्वा सर्वकार्याणि साधयेत्। तां तां स्त्रप्रयोगान् कुर्वीत कार्यसिद्धिर्भवेत्ततः। परवक्त्रस्तंभनं जलस्तंभनं
वशाभिचाराकर्षसुतावाप्तो सर्वशत्रुनिवर्हणो इति॥ अथैतत्प्रयोगः॥ तत्र साधकः प्रातः कृतमलक्षालनः स्वशिरसि श्रीगुरुपादुकां ध्यात्वा संपूज्य प्रणम्य प्रातःकृ
मणां श्रीगुरोराज्ञामादाय सर्वलक्षणसंपन्नां ब्रह्मविद्यादीक्षितां दूतीं प्रातर्निमंत्रितां स्वादरं स्वयं गत्वा प्रणम्य समाहूयानीय पूजास्थानमध्यासने समुपवेश्य तत
स्याः पादावुद्वर्त्य तलेन प्रक्षाल्य सुखोपविष्टो तो प्रणम्य कृतांजलिः सन् भगवति श्रीपरदेवतायतनार्थं त्वं मे दूती भूत्वा मां कृतार्थं कुर्विति प्रार्थ्य देव्यग्रतः स्वास
ने समुपवेश्य स्वतां तत्किरीटेत्यादि श्रीपरदेवताप्रीत्यर्थं दूतीयजनमहं करिष्ये इति संकल्प्य मूलविद्यया प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासान्विधाय
स्ववामभागे दूतीं समुपवेश्य मूलविद्यया सुगंधितैलेनाभ्यंगं कृत्वा सुगंधामलकचूर्णैरुद्वर्तनं विधाय कोष्णोदकेन स्नपयित्वा नीरांजनं कृत्वा सूक्ष्मवस्त्रेणांगप्रों
छनं विधाय पट्टवस्त्रयुगमारक्तकंचुकं च परिधाप्य नानाविधाभरणैरलंकृत्य केशान्विजटीकृत्य धूपयित्वा सम्यक् सिंदूरकज्जलालक्तकादिभिः सीमंतनयन
चरणादि रंजयित्वा ललाटे भूरीविद्यया सकुंकुमचंदनत्रिपुंड्रयुक्ते भालतले सिंदूरतिलकं कृत्वा सुगंधकुसुममालाभिः सुगंधानुलेपनैश्चालंकृत्य स्वस्य वामभागे मदास
ने समुपवेश्य स्वयं स्वासने समुपविष्टः प्राणायामत्रयं ऋष्यादिन्यासांश्च विधाय दूतीं देवीरूपां ध्यायन् स्वाकल्पोचितशक्तिपात्रं तस्याः पुरतः पात्रांतरं कलशस्य हेतु
नापूर्य संस्कृत्य तद्धेतुमुद्रया पात्रेणोद्धृत्य भोगपात्रे कृत्वा सद्वितीयं भोगपात्रं तस्यै पुनः पुनर्निवेद्य तरुणोल्लासयुक्तो ज्ञात्वा च क्रमेणोत्तरभागे स्वर्णरूप्यवि
द्रुमगजदंतादिनिर्मितं स्वच्छं नवं पट्टसूत्ररचितारक्तपट्टिकाभिर्गुंफितं पर्यंकमास्तीर्य तदुपरि पट्टवस्त्ररचितां वरतूलभारभरितां तूलिकामास्तीर्य तदु
पर्युच्छीर्षकोपबर्हणादिकं निवेश्य तत्र सुगंधपुष्पालिकर्पूररजांसि च विकीर्य तत्र प्राग्गुरुणा विहितं योगपीठं संपूज्य तदुपरि श्रीचक्रं संपूज्य विभाव्य तथैव
संपूज्य मध्ये चक्रस्य पश्चिमे योगिनीबलिं पूर्वे क्षेत्रपालबलिं दक्षिणे गणेशबलिमुत्तरे बटुकबलिं चेति बलिचतुष्टयं दत्वा पर्यंकोपरि दूतीं पश्चिमाभिमुखीं समुपवेश्य
स्वयं पूर्वाभिमुखं उपविश्य मूलेन प्राणायामत्रयं ऋष्यादिकरषडंगन्यासांश्च कृत्वा दूतीदेहे केवलां मातृकां विन्यस्य वशिन्याद्यष्टकं विन्यस्य शिरसि ४ द्रां द्रा श्री
वणबाणाय नमः पादयोः ४ द्रीं क्षोभणबाणाय नमः मुखे ४ क्लीं वशीकरणबाणाय नमः हृदि ४ ऐं कं दर्पकाय गुह्ये ४ ब्लूं आकर्षणबाणाय नमः हृदि ४ सः संमो २४७
हनबाणाय नमः इति पंचबाणान्विन्यस्य ललाटे ४ क्लीं कामाय नमः गले ४ ह्रीं मन्मथाय नमः हृदि ४ ऐं कं दर्पाय नमः नाभौ ४ ब्लूं मकरध्वजाय नमः

© Dharmartha Trust J&K. Digitized by eGangotri

मूलाधारे ५ स्त्रीं मीनकेतवे नमः इति विन्यस्य तस्या देहे पूर्वोक्ताः कामकलाः सोमकलाश्चेति विन्यस्य तस्याः शिरसि सुभगाय ऋषये नमः मुखे गायत्री छंदसे नमः ह
दये श्रीभगमालिन्यै देवतायै नमः गुह्ये क्लैं बीजाय नमः पादयोः स्त्रीं शक्तये नमः नाभौ ह्रीं कीलकाय नमः इति ऋष्यादिन्यासं विन्यस्य तस्याः शरीरे भगमालिनी
विद्यया मूर्धादिपादपर्यंतं त्रिर्व्यापकं विन्यस्य तस्याः शिरसि त्रिकोणं विभाव्य शिरसि त्रिकोणमध्ये वक्ष्यमाणविधिना बालां ध्यात्वा तद्विद्यया गुर्वार्यश्रीबालादेवीश्रीपा
दुकां पूजयामि नमः अग्रकोणे क्लीं कामेश्वरीश्री० वामकोणे ऐं वागीश्वरीश्री० दक्षकोणे सौः कुलगणपतिश्री० इति प्रादक्षिण्येन संपूज्य तस्या दक्षिणहस्ते क्लीं काम
देवश्री० वामे वं वसंतश्री० योनौ श्री रतिदेवीश्री० नाभौ श्री प्रीतिदेवीश्री० पुनः शिरसि त्रिकोणाद्बहिः गं गणनाथश्री० ५ सिंहपादश्री० ५ विजयपादश्री० ५ अनंगपादश्री०
ध्यक्ष ५ भुजगपादश्री० ५ विचित्रपादश्री० ५ कनकपादश्री० इति त्रिकोणाद्बहिः परितः स्थाप्यादि प्रादक्षिण्येन संपूज्य शिरसि त्रिकोणस्य वामकोणे ५ सोमहालक्ष्म्यै० ५ दक्षे ५ स
रस्वत्यै नमः तस्या रोमराजिषु ५ नं नं दलो व्याय ५ इति संपूज्य तस्याः शिरसि त्रिकोणमध्ये नवयोन्याढ्यं कर्णिकं सकेसरमष्टदलकमलं दलाग्रेषु त्रिशूलयुक्तं तद्बहि
र्वृत्तं तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयवेष्टितं बालायंत्रं विभाव्य तत्र मंडूकादिपरतत्त्वांतं योगपीठं सर्वशिरस्येव संपूज्याष्टदलकेसरेषु ५ वामायै० ५ ज्येष्ठायै० ५ रौद्र्यै० ५ अंबि
कायै० ५ इच्छायै० ५ ज्ञानायै० ५ क्रियायै० ५ कुब्जिकायै० ५ विभ्व्यै० ५ विषघ्न्यै० ५ दूतर्यै० ५ आनंदायै नमः इति संपूज्य मध्ये ५ ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः इति
नवयोनिस्थत्रिकोणमध्ये संपूज्य तत्र बालाविद्यया गुर्वार्यश्रीबालामूर्तिं परिकल्पयामीति पुष्पांजलिना मूर्तिं परिकल्प्य पुनर्बालया गुर्वार्यश्रीबालामूर्तये नमः इति मूर्तिं
।
संपूज्य कराभ्यां पुष्पांजलिमादाय हृदयकमले वक्ष्यमाणरूपां देवीं ध्यात्वा पुनस्तेजोरूपतामापाद्य तत्तेजः सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा वहन्नासापुटाध्वना बहिर्नि
सार्य करस्थ पुष्पांजलौ संयोज्य ५ ऐं क्लीं सौः श्रीभगवती हागच्छागच्छेति हृत्वाः शिरसि पुष्पांजलिं निःक्षिप्य आवाहनावाहनादि मुद्रा प्रदर्श्य स्थापनादि परमीकरणांतं तत
मुद्रया विधाय प्राणप्रतिष्ठां कृत्वा वरदाभयपुस्तकाक्षमालापाशांकुशधनुर्बाणकपालकमलाख्या दशमुद्राः प्रदर्श्य अथ अमरनीलाभ ... त्रयविराजितां। सूर्यभास्व
न्महारत्नधाम्निकामलपुष्पिणीं। वलरे ५ धस्फुरत्स्फटिकमुक्ताले खाविराजितां। मुक्ताले खा रागरत्नतिलकां मुकुरोज्ज्वलां। विशुद्धमुक्तावज्राढ्यचंद्रलेखाकिरीटिनीं। /
अमरनीलाभनेत्रत्रयविराजितां। सूर्यभास्वन्महारत्नकुंडलालंकृतां परां। भुजाकारस्फुरन्मुक्ताहारभूषणभूषितां। ग्रैवेयांगदपत्राल स्फुरत्कांति विराजितां।
गंगातरंगकर्पूरशुभ्रांबरविभूषितां। श्रीखंडवल्लीसदृशा बाहुवल्लीविराजितां। कंकणादिलसद्रूपां अमलांबं धलसत्करां। प्रवाललतिकाकारपाणिपल्लवशोभितां।

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२४८

248

ह्रीं कामिन्यै॰
ह्रीं विण्यै॰
ह्र

। वस्त्रवैडूर्यमुक्तालिमेखलां विमलप्रभां। रक्तोत्पलदलाकारपादपल्लवशोभितां। नक्षत्रमालासंकाशमुक्तामंजीरमेदुरितां। वामेन पाणिनैकेन पुस्तकं चापरेण तु। दधतीं
चिंतयेद्देवीं वश्यसौभाग्यवाक्प्रदां। क्षीरकुंदेंदुधवलां प्रसन्नां सस्मेरस्त्रियं। इति आलालकाविद्यामुद्रार्थं भगवति एतत्ते आसनं नमः। एवं स्वागतं। पाद्यं। अर्घ्यं। आचम
नीयं। मधुपर्कं। उपनराचमनीयं। स्नानं। वस्त्रं। आभरणानि। समर्प्य। एषो गंधो नमः। इमानि ते पुष्पाणि वौषट्। इति पुष्पांतैरुपचारैः संपूज्य प्राग्योनिमध्ययोन्योर्दलाले॰
ऐं परमगुरुभ्यो नमः ४ ऐं अपरगुरुभ्यो नमः ४ ऐं परात्परगुरुभ्यो नमः इति गुरुपंक्तित्रयं विभाव्य संपूज्य योनिमुद्रां बध्वा हृदि मुखे भ्रूमध्ये ललाटे ब्रह्मरंध्रे च संस्थाप्य दर्शये
त्। ततस्त्रिकोणस्थवामकोणेषु ऐं रत्यै नमः ४ दक्षिणे ४ क्लीं प्रीत्यै। अग्रे ४ सौः मनोभवायै। इति संपूज्याष्टदलकेसरेषु अग्नीशनिर्ऋतिवायुकोणेषु अंगचतुष्टयं देव्यग्रे नेत्रं तद्बा
ह्ये दिक्चतुर्दिक्षु अस्त्रमिति प्रादक्षिण्येन षडंगानि संपूज्याष्टकोणत्रिकोणं तद्दलेषु देव्यग्रमारभ्य चतुर्दिक्षु प्रादक्षिण्येन ४ द्रां द्राविण्यै॰ ४ द्रीं क्षोभिण्यै नमः ४ क्लीं वशीकरण्यै॰
ब्लूं आकर्षिण्यै॰ अग्रे ४ सः संमोहिन्यै॰ एवं वस्त्रानेषु ह्रीं कामाय नमः ४ क्लीं मन्मथाय॰ ऐं कंदर्पाय॰ ब्लूं मकरध्वजाय॰ स्त्रीं मीनकेतवे नम इति संपूज्य पूर्वादिषु सुयोनि
पुष्ट ऐं क्लीं ब्लूं स्त्रीं सः सुभगायै॰ भगसर्पिण्यै॰ अनंगमालिन्यै॰ ५ अनंगायै॰ ५ अनंगकुसुमायै॰ ५ अनंगमेखलायै॰ अनंगमदनायै॰ इति संपूज्याष्टदलेषु देव्यग्रादिप्राद
क्षिण्येन आं असितांगभैरवाय॰ ब्रां ब्राह्म्यै॰ इं रुरुभैरवाय ईं माहेश्वर्यै॰ उं चंडभैरवाय ऊं कौमार्यै॰ ऋं क्रोधभैरवाय ॠं वैष्णव्यै॰ लृं उन्मत्तभैरवाय लॄं वाराह्यै॰ एं कपा
लिभैरवाय ऐं इंद्राण्यै॰ ओं भीषणभैरवाय औं चामुंडायै॰ अं संहारभैरवाय अः महालक्ष्म्यै॰ इति संपूज्याष्टदलांतरालेषु कामरूपाय॰ मलयाय॰ कोलगिरये॰ कुलांत
काय॰ चौहाराय॰ जालंधराय॰ ओड्डियानाय॰ देवीकोट्टाय॰ इत्यादि प्रादक्षिण्येन संपूज्य वहिर्वृत्ते देव्यग्रादिप्रादक्षिण्येनाष्टदिक्षु हेतुकाय॰ त्रिपुरांतकाय॰ वेताला
य॰ अग्निजिह्वाय॰ कालांतकाय॰ कपालिने॰ एकपादाय॰ भीमरूपाय॰ इंद्रेशानयोर्मध्ये॰ हाटकेश्वराय॰ निर्ऋतिवरुणयोर्मध्ये॰ मलयाय॰ इति संपूज्य तद्बहिः पूर्वादिदश
दिक्षु इंद्रादीन् तथायुधानि च सर्वं बाह्ये संपूज्य धूपदीपनैवेद्यानि समर्प्य तदग्रे दमुं बुध्वा हृदये हेतुं समर्प्य स्वदेहे प्राग्वत्श्रीकंठादिमातृकां विन्यस्य स्वाशिवे ओं ह्रीं
क्ष ह ५ स ५ शिवाय नम इति दशार्णेन षाविवयासं कृत्वा शिवाय ह्लौं ईशानाय नमः तत्पूर्वभागे ह्रें तत्पुरुषाय नमः दक्षिणे ह्रुं अघोराय नमः वामे ह्रिं वामदेवाय नमः तत्प
श्चिमे ह्लं सद्योजाताय नमः इति संपूज्य तेष्वेव स्थानेषु निवृत्यै॰ प्रतिष्ठायै॰ विद्यायै॰ शांत्यै॰ शांत्यतीतायै॰ इति संपूज्य क्लां क्लीं मित्यादिना षडंगं विन्यस्य मुद्रयोर्मध्ये मलविद्या
मुद्रार्थं नंदिकेश्वराय नमः इति संपूज्य तस्यैकारणं दत्वा तदवशेषात्स्वादनेन स्वयं तरुणोल्लास युक्तः तत्त्वासनयोर्मध्ये स्वशक्त्या ऐं क्लीं चपले चपल चित्ते रत्नो मुं वरद्

श्री
२४८

© Dharmartha Trust J&K. Digitized by eGangotri

क्लीं स्त्रीं क्रूं ह्लैं इति द्राविणीविद्यां वारत्रयं जपित्वा तस्या हृदयकमले प्रागुक्तानंगकुसुमाद्यष्टशक्तिभिः परिवृतां कामेश्वरीं रक्तवर्णां रक्तमाल्याभरणानुलेपनां
वसनालंकृतां मिक्षुकोदंडपुष्पबाणधरां ध्यायन् क्लीं कामकलात्मिके रेतो मुंच स्वाहा इति कामेश्वरीमंत्रं तस्या हृदि विन्यस्य पशुसंमोहने देवि स्वभक्तानंदद
यिनि विंदुरूपे परानंदे रेतः श्रीघ्रं तु मोचय इति हृदयं स्पृशन् पठित्वा ऐं स्त्रां स्त्रीं ब्लूं स्लः इति योनिमुद्राबीजस्मरणात्तदीयमूलाधारदेशे शक्तिक्षोभं चिंतयित्वा पु
नस्तां शक्तिं मूलाधाराद्धृत्कमले नीत्वा ऐं क्लीं स्त्रीं इति क्षोभिणीविद्यां स्मरन् हृदये शक्तिक्षोभं विचिंत्य पुनस्तां शक्तिं [illegible] मध्ये नीत्वा तत्र ऐं भ्रं ऐं क्लीं इति द्राविणी
विद्यां स्मरन् लययालात्तत्र चक्रभ्रमणकुशलया सकलकमलकाननं विकलीभूतं चिंतयन् ब्रह्मरंध्रं नीत्वा परामृतकलोस्त्रावपूरेण सह पुनर्मूलाधारमानीय
ऐं ग्लौं रं स्लौं ल्सः ऐं क्लीं श्रीं क्लीं क्लौं ब्लूं इति सर्वसुंदरीविद्यां तत्र स्मरन् स्वयं परमानंदनिर्भरमनास्तिष्ठेद्यो भूत्वा किंचित्क्षणं न किंचिदपि चिंतयेत्॥ इत्थं निराल
म्बमुद्रा॥ ततस्तत्स्मरकेतने पि चिंतनीया॥ ततस्तस्याः शिरसि वदने हृदये उपपादयोश्च ग्लूं स्लूं प्लूं म्लूं न्लूं इति पंचरत्नबीजानि विन्यस्य तत्क्रांगांकुरं दक्षिणक
राग्रेण गृहीत्वा वामकराग्रेण मूलविद्यया वाग्भवकूटमुच्चरन् तद्योनिपंकजं स्पृष्ट्वा तत्र कलं ऊर्ध्वजानु सहस्रकांतिमत्कुलेशीतां भुवनीतले ध्या कोशारुणप
द्मरागरुचिरं दृष्ट्वा वरांगं ततः कस्तूरीघनसारकुंकुमचंदनयुतं गोरोचनालेपितं ध्यात्वा तत्र परांपरापरकलां तन्मध्यगां चिंतयेदिति तत्कंठं तन्मध्ये परकुलां च ध्या
त्वा तत्र वाग्भवकूटमध्ये उपरि अवशाभ्यंतरे कामराजकूटं च विलिख्य गंधाक्षतरक्तकरवीरपुष्पैः स्त्रियः संपूज्य वरांगस्य वामभागे गुरुपंक्तित्रयमभ्यर्च्य तस्या वा
मपादांगुष्ठे शंभवे नमः दक्षपादांगुष्ठे शंभवे नमः इति मूलविद्यया संपूज्य नाभिदेशे बलिनाथेभ्यो नमः इति देवताश्च संपूज्य तां प्रणम्य तदा तदुपास्य यथाशक्ति जपः मन्
नानाविधासनपरिष्वंगकरजरदक्षतादिविविधविचित्रलीलाविशेषैः स्त्रीं समभ्यर्च्य परितोषयन् रदगजमदनमथनं कृत्वा तदंगं नितः पीत्वा तत्त्रिर्गतं तत्वा
मृतं सुगंधकुसुमे नो धृत्वा केलशविशेषार्घ्यश्रीपात्रेषु मूलविद्यया संयोज्य तद्वर्द्धिहेतुमाप्रक्षाल्य तद्धनुकलशे निक्षिप्य तं प्रणम्य भोजनतांबूलवस
नाभरणदक्षिणादानैः परितोष्य स्वात्मानं कृतकृत्यं मत्वा श्रीगुरुं प्रणमेत्॥ तत्र तत्वस्य उत्तममध्यत्वादि विशेषो देवीयामले॥ कुंडोद्भवामृतं देवि कुंडगोलसमं
वचाउत्तमं रक्तबीजानि मध्यमं केवलं रजः॥ अधमं पौरुषं वीर्यं तथान्यच्चाधमाधमम् इति॥ अथ संक्षेपतः शक्तिशोधनं॥ स्वतंत्रे॥ अंगन्यासकरन्यासौ प्रा
णायाममतः परं॥ विधाय मातृकान्यासं कुलोभेपि प्रविन्यसेत्॥ भावकूटमंत्रेणो॥ आदौ क्षितिकुलासंगात् लिंपिहानिः प्रजापते वाक्रायत्ते तां वापि अ

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२४९
249

भिषेकं समाचरेत्॥ आदौ वा लां समुच्चार्य त्रिपुरायै समुच्चरेत्। नमः शब्दमुच्चार्य हृमों शक्तिं ततो वदेत्। पवित्रं कुरु शब्दान्ते मम शक्तिं कुरु प्रिये। वह्निजायां समुच्चार्य शुद्धि
मंत्रः सुरेश्वरि। इति मंत्रेणाभिषिच्य तस्याः कर्णे ऽमे दद्यु ध्यामायाबीजं समुच्चरेदिति शक्तिशोधनं॥ ततोऽर्घ्यस्थापनानन्तरं पर्यंकमध्ये मंडलादि परतत्त्वान्तं पीठपूजां
विधाय गंधपुष्पधूपदीपादिकं दत्वा समंततो धूपामोदं कृत्वा तूलिकोपरि कुलं संस्थाप्य तदुपरि पूर्वादिदिक्षु मध्ये च क्लीं कामाय नमः ब्लूं मन्मथाय नमः ऐं कंदर्पाय
नमः स्त्रूं मकरध्वजाय नमः स्त्रीं मीनकेतवे नमः इति संपूज्य तस्याः ललाटे सिंदूरेण त्रिकोणं विलिख्य ऐं क्लीं स्त्रीं क्लीं ब्लूं आधारशक्तिश्रीपादुकां पूजयामीति होमम
पीठपद्मासनाय नमः इति संपूज्य वा ळां कामेश्वरीं च पूजयेत्॥ कुलार्णवे। गणेशं च कुलाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीं। त्रिकोणेषु वसंतं च वसंतं मदनं प्रियं स्तन
योः पूजयेत्सम्यङ्मुखं तस्याः सुधाकरं॥ उत्तरतंत्रे॥ ओं लों गणेशं कुक्षाग्रे कुलाध्यक्षं ललाटके॥ दुर्गां भ्रुवोस्तथा लक्ष्मीं रसनायां सरस्वतीं। अत्र स्थाने वै परीसमे
लिकं॥ ज्ञानार्णवे॥ दक्षपादादिमूर्धान्तं वाममूर्धादि सुंदरि। पादांतं पूजयेत्सर्वाः कलाश्चैव कामसोमयोः। श्रद्धा प्रीती रतिश्चैव धृतिः कांतिर्मनोरमा। मनोहरा मनोरमा
मदनोन्मादिनी तथा मोहिनी दीपिनी चैव शोषिणी वशंकरी रंजनी चैव देवेशि षोडशी प्रियदर्शना। स्वरषोडशसंयुक्ता एताः कामकलाः प्रिये॥ ततः सोमकलाः पूषा:
शिवा ह्याश्वरणा वधिः पूषा रमा च सुभगा रतिः प्रीतिस्तथा धृतिः शुद्धिः सोमा मरीचि विश्वरूपेल लंबुषा मालिनी। अंगिरा वशिनी चैव छाया संपूर्णमंडला तथा तुष्य
मतैवेव कलाः सोमस्य षोडश। एवं स्वरादिकाः संपूज्य तत्कागे ऐं ब्लां ब्लें नमः ऐं सौं दर्यै नमः ऐं आग्नेय्यै नमः इति तिस्रो नाडीः संपूज्य भगमालामंत्रेण पूजयेत्। ऐं क्लीं
श्रीं ऐं नं ब्लूं क्लिन्ने सर्वाणि भगानि वशमानय स्त्रीं ह्रीं क्लीं ब्लूं भगमालिन्यै नमः ऐं क्लीं श्रीं इति मंत्रेण पूजयेत्॥ तंत्रांतरे॥ इहापि वा हतं नास्ति नीव स्यात्सोमहेश्वरि। अ
वीमं च विधानेन षोडशैरुपचारकैः॥ उत्तरतंत्रे॥ अथ धूलेश्वरी कुण्डगोलौ कामरवांसमयामपि। वज्रेश्वरीं कपालिकांच तथा दिक्करवासिनीं। महाचंडेश्वरीं तारां पूजयेद्देव श्री २४९
साधकः॥ तदद्युहां ततो लब्ध्वा दत्वा तां कुलमेव वा। शिवेन तत्र चित्तं हि स्प गजतुंडाख्यमुद्रया। धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यम
क्षवृत्तिर्जुहोम्यहं। स्वाहांतो यं महामंत्र आर मे परिकीर्तितः। ततो जपेत्तु स्त्रियोगं कुर्वन्नपि ध्यात्वा त्रिभुवनेश्वरीं। जपेदिति अष्टोत्तरसहस्रं शतं वा अक्षुब्धो जपेत्।
प्रकाशाकाशहस्ताभ्यां अवलंब्योन्मनी स्रुचा। धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं। स्वाहांतो यं महामंत्रः शुक्रलग्ने प्रकीर्तितः। मयासलो। संयोगाज्जायते
१२ X इष्टदेवी प्रपूज्याथ सर्वसिद्धीश्वरो भवेदिति॥ सर्वे येऽङ्कं धूपपुष्पाद्यैः स्वशिवं तदनंतरो मूलमंत्रं ततः ओं नमः शिवाय ततः परा। यजेत्तु रूपाघोरसघोरा मेरसहैकैः X १२

© Dharmartha Trust J&K. Digitized by eGangotri

सौः स्वयं परमानंदलक्षणं। कुलामृतं प्रयत्नेन ह्रीं याडले भंतरः। तेनामृतेन दिव्येन सर्वे दुष्टा भवंति हि। यत्कामं कुरुते मंत्री तत्क्षणाद्देवसिध्यति। कुलद्रव्यं च
संशोध्य शिवशक्तिमयं प्रिये। वीजामृतं परं ब्रह्मपरं निक्षिप्य सुंदरि। अर्घ्यपात्रामृते यत्रा निर्विकल्पः सदा तत्र घः। श्रीविद्याक्रममध्यं परब्रह्ममयो भवेत्
श्रीविद्येत्युपलक्षणं॥ कुलामृतशोधनमंत्रस्तु॥ ओं अमृते अमृतोद्भवे अमृतवर्षिणि देवि भुक्तिमुक्तिप्रदे अमृतं स्रावय स्रावय अमृतं कुरु कुरु स्वा
हेति सप्तवारं जपेदिति॥ इति कुलयागः॥ अथैवं प्रकारस्नुता हस्तयापि स्थापितां। भुक्त्वा स्थापितां तु प्रथमत एव स्ववामे शक्तिं संस्थाप्य प्राणायामादिकं कुर्यात्॥ तदु
क्तं कुमारीकल्पे॥ ततः षोडशवार्षिकीं नारीमानीय मंत्रवित्। युवतीं वामदेशस्थां सुवेषां चारुहासिनीं। सदारतेः साभिलाषां सिंदूरांकितभालकां। साधकश्चेयस्मस्त
नी वामे संस्थापयेद्बुधः। तस्यास्तु भूतशुद्ध्यादिकं तां वै मातृकां न्यसेत्। प्राणायामं ततः कृत्वा कारयित्वा यथाविधीति। अत्र कुलयागोत्तरमेतद्यजनं प्रशस्तं
तदुक्तं तत्रांतरे॥ कुलयागं ततः कृत्वा तर्पणं समाचरेत्। अथातो यजनं वक्ष्ये इष्टादृष्टफलप्रदं। भूतशुद्धिं प्रकुर्वीत यथापूर्वं विशारदधीः। स्नायाच्च विमले तीर्थे बु
पुष्करे हृदयाश्रिते। विंदुतीर्थेऽथवा स्नायात्सुषुम्नाजलमज्जनं विधीयते॥ अथवा। इडासुषुम्णा शिवतीर्थकेऽस्मिन् ज्ञानांबुपूर्णे वहतः शरीरे। ब्रह्मांबुभिः स्नाति तयोः
सदायः किं तस्य गांगैरपि पुष्करैर्वा॥ इति स्नानं। शिवशक्त्योः समायोगः यस्मिन्काले प्रजायते। सा संध्या कुलनिष्ठानां समाधिस्थैः प्रतीयते॥ इति संध्या॥ व
ड्डार्कानलसंबंधात्फलितं पतत्परामृतं। तेनामृतेन दिव्येन तर्पयेत्परदेवतां॥ इति तर्पणं॥ ब्रह्मरंध्राधोभागे यच्चंद्रपात्रमुत्तमं। कलासारेण संपूर्णं तर्पयेन्
नरवेवरी॥ इत्यर्घ्यदत्तं॥ आधारे लिंगनाभावि शुद्धाचैतन्मौलितकान्यासः॥ इस्मान हृदयांबुजे हृदये स्याच्चिदात्मकः। क्रियते तत्परत्वेन हृन्मंत्रेण ततः परं। सर्वांगा
दिशुलो हृद्गे साविद्रूपे परात्मनि। क्रियते तत्परत्वेन शिरोमंत्रेण दशिकेः। हृच्छिरोंतर्वर्तिचिद्रूपमनसाभावनादृढा॥ क्रियते निजदेहस्य शिखामंत्रेण दशि
कैः। मंत्रात्मकस्य देहस्य मंत्रेणानेन तेजसा। सर्वतो वर्ममंत्रेण क्रियते देहसे द्वितीः। वौषडिति मनुं जप्त्वा क्रियते देहनेत्रकं। ततोऽस्त्रेण वामे च हः करोत्यस्त्रं चतुर्दि
थाः। इति षडंगं विधाय ध्यानं कुर्यात्॥ यद्दहाति परं ज्ञानं संविद्रूपे परात्मनि। हृदयादिमयं तेजः स्यान्मंत्रदेवतमंत्रसंहितं। आध्यात्मिकादिरूपं सत्सा यक
स्यविनाशयेत्। अविद्यायाः स्वतंत्रं यत्परं धाम समीरितं। इति वा षडंगं विधाय ध्यानं कुर्यात्॥ शक्तिद्वयपुटांतस्थं कमलद्वयशोभितं। ज्योतिस्तत्त्वमयं ध्या
ये कुलाकुलनियोजनात्॥ अथवा॥ शृंगाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतं। सदा समरसं ध्येयं ध्यानं तत्कुलयोगिनां॥ इति ध्यानं॥ अर्द्धयन्निषेधैः पुष्पै

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२५०

250

स्तत्क्षणान्न भयो भवेत्। न्यासस्तन्मयता बुद्धिः सोहंभावेन चिंतयेत्। अमायमनहंकारमरागममदं तथा। अमोहकमदंभत्वमद्वेषाक्षोभकौ ततः। अ
मात्सर्यमलोभं च दशपुष्पं विदुर्बुधाः। अहिंसा परमं पुष्पं पुष्पमिंद्रियनिग्रहः। दयापुष्पं ज्ञानपुष्पं क्षमापुष्पं च पंचमं। इत्यष्टसप्तभिः पुष्पैः पूजयेत्परदेव
तां। इति पूजनं।। मालाप्रकाशकाम्योका सूत्रं शक्तिशिवात्मकं। ग्रथिता कुंडलीशक्तिः कलांते मेरुसंस्थितिः। जपांते परे धाम्नि तेनोरूपेण निवेदयेत्।। इ
ति जपः।। अमलमपरिछिन्नं विभाव्यात्मांतरात्मकं। परमात्मस्वरूपं च तथा ज्ञानात्मरूपकं। चतुरस्रं चविकुंडमानंदमेखलायुतं। नाभौ विभाव्य तन्मध्ये जु
हुयात्साधकोत्तमः। मूलाग्नौ भाभिर्वैतन्य हविषा मनसा स्रुचा। ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहं स्वाहा।। इति प्रथमाहुतिः।। ततो मूलांते धर्माधर्म ह
विर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहं स्वाहा।। इति द्वितीयाहुतिः।। मूलांते प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं
धर्माधर्मकलास्नेहं पूर्णमग्नौ जुहोम्यहं स्वाहा।। इति तृतीयाहुतिः।। ततो मूलांते अंतर्निरंतरनिरिंधनमेधमाने मोहांधकारपरिपंथिनि संविदग्नौ। क
स्मिंश्चिदद्भुतमरीचिविकाशभूमौ विश्वं जुहोमि वसुधादिशिवावसानं।। इति चतुर्थाहुतिः।। इत्थंतर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत्।। न तस्य पुण्यपापा
नि जीवन्मुक्तो भवेद्ध्रुवं।। इत्यंतर्यागः।। अथ मधुपर्कांग छागादि पशुबलिविधानं।। पशुं स्नापयित्वा ॐ पशुपाशाय नमः। एवमभ्यर्च्य वनगंधान् दत्वा शृंग
योर्मध्ये सिंदूरादि तिलकं कृत्वा पशुशिरसि पुष्पाणि दत्वा एतदधिपतये ग्नये नम इति पशुपृष्ठे पुष्पं दत्वा मूलं एतत्संप्रदानरूपाय सांगोपांगाय श्री
महात्रिपुरसुंदर्यै नम इति देव्यै पुष्पांजलिं दत्वा वामहस्तेन पशुस्कंधं धृत्वा पायसूपता स्तोत्रेण त्रिधा संप्रोक्ष्य वाङ्मनः श्रोत्रत्वक्चक्षुरसनाघ्राणप्राणहस्त
पादपायुमेढ्रमांसरुधिरमेदोस्थिमज्जाशुक्रनाडीवक्रूरोमपुच्छ सर्वांगानि ते आप्यायतां। एवं सर्वांगानि तेष्भुं धाम्नि। ॐ अग्निः पशुरासीत्तेनायजंत स ए
तं लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता आपः। एवं ॐ वायुः पतिरासीत्। ॐ सूर्यः पशुरासीत्। ॐ विष्णुः पशुरासीत्। ॐ रु
द्रः पशुरासीत्। ॐ हंसः शुचिषत्। ॐ आपो हि ष्ठा मयोभुवः। वरुणस्योत्तंभनमसि। पंचवल्लभमंत्रैर्गायत्र्या मूलमंत्रेण च पशुं प्रोक्षयेत्। ततो गंधा
क्षतकुसुमैः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्हस्तपादपायूपस्थशिरःस्कंधपृष्ठपुच्छमुखकंठहृदयोदरवृषणरोमरुधिरमांसवसाप्राणास्थिमा
डीवक्रूसर्वांगेषु दिग्वात सूर्य प्रचेतो भिन्नीन क्रीं क्रो पंद्रुमि प्रजापतिका मुंडभद्रकालीगंधर्वधीरभद्रसरस्वतीमहालक्ष्मीभैरवीसमुद्रवाराही

श्री
२५०

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ पधिवनस्पतिकुलविश्रुत रूप परमात्मसदाशिवांशाय पशुनाजीवात्मने नमः पशवे नमः इति पूजयेदिति पशुपूजा॥ ततः पशुकर्णे पशुपाशाय विद्महे पशुरू
पाय धीमहि। तन्नः पशुः प्रचोदयात्। ॐ हिलि हिलि किलि किलि किलि पशुरूपधरायै क्रीं दुर्गायै नमः इति मूलविद्यां जपेत्॥ ततः यज्ञार्थं पशवः सृष्टाः यज्ञार्थं पशु
घातने। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥१॥ शिवा दूतमिदं पिंडमतस्त्वं शिवतां गतः। आबुध्यस्व पशो हि त्वं नाशिवस्त्वं शिवोऽसि हि॥२॥ पशो त्वं बलि
रूपेण मम भाग्यादुपस्थितः। चंडिकाप्रीतिदानेन दातुरापद्विनाशय॥३॥ पशुरूपं परित्यज्य त्वं गंधर्वरूपधृक् गौरीरूपं समासाद्य मम कल्याणदो भव॥४॥ पशुपाशविमो
क्षाय हेतुरूपस्थिताय च। पशवे च नमस्तुभ्यं नमस्ते बलिरूपिणे॥५॥ छेदोऽसि बलिरूपस्त्वमातयापरया गुरोः। छेदने तेऽजवेदुःखे क्षमस्व पशुधृक्॥६॥ इति संप्रार्थ्य
संकल्पं कुर्यात्। ॐ अद्य अमुकमासि अमुकपक्षे अमुकतिथौ अमुकगोत्रोऽमुकदेवशर्मा दशवर्ष देवीप्रीतिकामोऽमुं पशुं कांगलेनेमं छागं वह्निदैवतं दक्षय लविना
शिन्यै महाघोरायै योगिनीकोटिपरिवृतायै क्रीं दुर्गायै भद्रकाल्यै श्रीमहात्रिपुरसुंदरीदेव्यै सांगायै सायुधायै सवाहनायै सपरिवारायै सांगोपांगायै सशक्तिकायै तु
भ्यमहं घातयिष्ये इति पशुशिरसि अक्षतपुष्पं जलं दद्यात्॥ अथ खड्गपूजा॥ खड्गमानीय पुरतः स्थापयित्वा पशुपतास्त्रेण प्रोक्ष्य चक्रमुद्रया संरक्ष्य धेनुयोनिमुद्रे दर्श
यित्वा सिंहरेणात्स्त्रमंत्रं खड्गे विलिख्य मूले नास्त्रेणाभिमंत्र्य प्रार्थयेत्। ॐ असिर्वा कुर्म हतेऽजाः श्यामस्त्वारक्तलोचनाः भीमदंष्ट्रः करालास्यो लोलजिह्वो भया
नकः। इति ध्यात्वा प्राणप्रतिष्ठां कुलाख्यादिभिः संपूज्य ॐ खड्गतीक्ष्णाछिंद छिंद कह कह इति त्रिर्जपित्वा। असिर्विशसनः खड्गतीक्ष्णधारो दुरासदः। श्रीग
र्भो विजयश्चैव धर्मपाल नमोऽस्तु ते। करवालरूपाणां त्वं चंडिकायाः करे स्थितः। पशुरक्तप्रदानेन चामुंडा प्रीतिमावह इति संप्रार्थ्य ॐ कालि कालि करालि कालिके काल
रात्रिके। किं छिं छिं छिं फट् फट् हुं फट् रुधिरं पिब पिब मांसं भक्षय भक्षय स्त्रीतिवर्धय वर्धय स्वाहा इति पशुस्कंधे खड्गं स्पर्शयेत्। ततश्छेदयित्वा किंचिद्रक्तमामं मां
सखंडं देव्या दक्षिणभागे स्थापयित्वा ॐ रक्तदंतिकायै स्वाहा इति समर्प्येत नरुधिरेण देवीं त्रिस्तर्पयेत्। ततः सदीपं शिरो देव्या वामतस्त्रिकोणमंडले स्थापयित्वा
जलं गृहीत्वा ॐ महिषघ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥ ॐ चामुंडायै स्वाहा इति समर्पयेदिति पशुबलिविधिः॥ ॥अ
थ कुमारीयजनविधिः॥ तत्र तानार्णवे॥ होमादिकं तु सकलं कुमारीपूजनं विना॥ परिपूर्णफलं नैव सफलं पूजनाद्भवेत्। पुष्पं कुमार्यै यद्दत्तं तन्मेरुसदृशं भवेत्। कु
मारी भोजिता येन त्रैलोक्यं तेन भोजितं। कुमार्यै यज्जलं दत्तं तज्जलं सागरोपमं। अन्ने तु मीनने यत्र कुलाचलसमं भवेत्। एकाब्दाः षोडशाब्दान्ताः कन्यकाः पूजने शुभाः
विवाहैर्रहिता सुभ्रूः दुश्चरा नरसिद्धिदा। विवाहिता कुरेवे बालाए वकुमारिका ध्रुवास्ति व्योमहायो ढाः सशायं त्वपि सुव्रते॥ त्रैलोक्यडामरे तंत्रे॥ सर्वेयतोन्नमंभ

© Dharmartha Trust J&K. Digitized by eGangotri

प कुमारीपूजनं शृणु। कृते यस्मिन्महालक्ष्मी रचिरेण प्रसीदति। आमंत्रयेद्दिने पूर्वं कुमारीं मंत्रपूर्वकं। पूजादिने समाहूय कुमारीमाद्यदेवतां। मंडले चरणौ
तस्याः क्षालयेद्दुग्धवारिणा। अर्चयेद्धेमपात्रेण वारिपुष्पाक्षतैः समं। सुविताने शुभे स्थाने पंकजोपरि पीठके। उपवेश्य कुमारीं तां स्वांगे न्यासं समारभेत्। ल
त मंत्रोक्तऋष्यादिन्यासं। आत्मानं विधिवत्पूज्य क्रोधदर्पविवर्जितः। अथ ध्यायेत्कुमारीं तां महालक्ष्मीस्वरूपिणीं। नवाक्षरेण मंत्रेण सुसिद्धेन समर्च
येत्। महालक्ष्मीस्वरूपिणीमिति नवाक्षरेणेति च तन्त्रकरणात्। तेन स्वेष्टदेवतास्वरूपिणीं स्वेष्टमंत्रेण यजेदित्यर्थः। दद्यादाचमनं तस्यै दद्याद्वस्त्रं स धूपैः
कंचुकं। सकंकणांगुलीयानि कर्णालंकरणे शुभे। गैवेयकं प्रदद्याच्च चंदनेन विलेपयेत्। पूजयेत्पुष्पमालाभिर्दिव्यैः सुधूपयेत्। कुर्यादारात्रिकं राजन्नुद्यं
वाच्यतां मुकुटं भोजयेत्क्षितिपावेन पायसं शर्कराघृतं। सूपकान्नानि व्यञ्जनानि सर्वभक्ष्योभविवर्जितं। फलेक्षुस्वादुवान्नं दद्यात्तस्यै पुनः पुनः। यावत्तृप्ता भो
जनं कुर्यात्तावन्मौनी जपेत्सुधीः। दद्यादाचमनं तस्यै तांबूलं च समर्पयेत्। अनर्घ्यैर्नवदानेन कुमारीं प्रणतो सकृत्। प्रदक्षिणनमस्कारान् कृत्वा मूर्ध्नि कृतां
ञ्जलिः। विसर्जयेत्कुमारीं तां स्वगृहं प्रति भक्तिनिर्भरः। अनेन विधिना नत्वा कुमारीपूजयाप्नुयात्। यं यं प्रार्थयते कामं देवानामपि दुर्लभं। कुमारीपूजनं कृत्वा
तं तं प्राप्नोत्यसंशयः। ब्रह्मविष्णुमहेशानां कुमारी परमा कला। तत्पूजनेन राजेंद्र त्रैलोक्यं स्यात्सुपूजितं। सम्यक्कृतफलं तस्य यः कुमारीः प्रपूजयेत्। तस्मात्त्व
मपि भूपाल कुमारीर्यत्नमानसः। स्वराज्यं प्राप्स्यसे क्षिप्रमेव न संशयः। अथ प्रयोगः। तत्र साधकः कृतनित्यकृत्यः पूजादिनात्पूर्वदिने कुमार्या गृहं गत्वा
मूलविद्यां स्मरन् कुमारिके भगवति श्वः पूजार्थं त्वमस्माभिर्मंत्रितासि मां कृतार्थं कुर्विति नारीकेलपूगीफलादिना निमंत्र्य पूजादिने नित्यपूजां कृत्वा ततः कुमा
रीं सुगंधतैलादिना सुस्नातामलंकृतामाहूय पूजागृहाद्बहिः ध्वजिमंडले तस्याश्चरणौ दुग्धजलेन स्वयं सम्यक्प्रक्षाल्य सूक्ष्मवस्त्रेण प्रोंछ्य पूजास्थानं नी
त्वाऽष्टदले सिंहासनादिरचिते शुभे पीठे शुभासनवरोपरि पश्चिमाभिमुखीं समुपवेश्य स्वयं तत्संमुखः स्वासने समुपविश्याचम्य देशकालादि अमुककामः कुमारीपूजनं करि
ष्य इति संकल्प्य गुर्वादिवंदनपूर्वकं मूलविद्यया प्राणायामत्रयं कृत्वा ऋष्यादि समस्तन्यासजातं कृत्वा आत्मपूजां विधाय पीठपूजापूर्वकं तस्यां देवीमावाह्य श्री
ध्यात्वा मूलविद्यया वसनं दत्वा वस्त्रालंकारगंधपुष्पधूपदीपांतानुपचारान् समर्प्य पायसादिनानाविधान्नपानैर्भोजयन् यथावत्तृप्ता भोजनं करोति तावत्कालं २५१
मौनी मूलविद्यां जपेत्। ततो भुक्तवत्यां तस्यां करक्षालनगंडूषाचमनानि दत्वा सकर्पूरं तांबूलं समर्प्य आरार्तिकं कृत्वा छत्रचामरादिराजोपचारैराराध्य यथा

© Dharmartha Trust J&K. Digitized by eGangotri

शक्तिं दक्षिणां दत्वा प्रणम्य विसर्जयेदिति॥ अथात्र पूज्यकुमारीलक्षणानि॥ स्कांदे॥ अरोगिणीं सुपुष्टांगीं सुरूपां व्रणवर्जितां। एकवंशसमुद्भूतां कन्यां सम्यक्प्र-
पूजयेत्॥ अथाऽपूज्यलक्षणानि तत्रैव॥ हीनाधिकांगीं कुष्ठां च विश्रीलकुलसंभवां। ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां। जालंधरके करां काणीं कुरूपां न
तु लोमशां। संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवामिति। अथ फलविशेषे पूज्यविशेषाः॥ तत्रैव॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां। लाभार्थे वैश्यसं-
भूतां सुतार्थे शूद्रवंशजां। दारुणे चांत्यजातीनां पूजयेद्विधिना नरः॥ अथ वटुकादिबलिपंचकप्रयोगः॥ तत्र पूजावक्रे स्वेशानादिकोणचतुष्के त्रिकोणवृत्तच-
तुरस्रात्मकानि बलिमंडलानि विरचय्य ईशानमंडले वं वटुकभैरवाय नमः इति वटुकं गंधादिभिः संपूज्य तदग्रे अन्नव्यंजनतोयपुष्पादिभरितं साधारं ताम्रादिपा-
त्रं संस्थाप्य वटुकबलिद्रव्याय नमः इति वटुकबलिद्रव्यं संपूज्य ॐ एह्येहि देविपुत्र वटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाश-
य नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहेति पूर्वस्थापितात्पात्रात्पात्रांतरेण घृतजलेन वामांगुष्ठानामिकाभ्यां बलिमुत्सृजेत्॥ एवमाग्नेयमंडले
यां योगिनीभ्यो नमः इति योगिनीः संपूज्य ॐ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वानले वा पवने सलिले वा यत्र कुत्र स्थिता वा क्षेत्रपी-
ठोपपीठादिषु वा कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधिमापातु वीरेंद्रवंद्याः॥ यां योगिनीभ्यः स्वाहा। सर्वयोगिनीभ्यो हुं फट् स्वाहेति वा-
मांगुष्ठानामामध्यामिरर्घ्यजलधारया बलिमुत्सृजेत्। ततो निर्ऋतिकोणगतमंडले क्षों क्षेत्रपालाय नमः इति क्षेत्रपालं संपूज्य प्राग्वद्बलिपात्रं नि-
धाय क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वाहेति वामांगुष्ठतर्जनीभ्यां तर्जन्येकया प्राग्वद्बलिपात्रे अर्घ्यजलधारां दद्यात्। त-
तो वायव्यमंडले गां गणपतये नमः इति गणपतिं संपूज्य प्राग्वद्बलिपात्रं विधायाभ्यर्च्य गां गीं गूं गणपतये वर वरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वा-
हेति वामांगुष्ठमध्यमाभ्यां प्राग्वद्बलिमुत्सृजेत्॥ इति वटुकादिबलिचतुष्टयविधिः॥ अथ कुल्लुकादिलक्षणं॥ तत्र श्रीरुद्रयामले॥ ईश्वर उवाच॥ कुल्लुकां
मूर्ध्नि संजप्य हृदि सेतुं विचिंतयेत्। महासेतुं विशुद्धौ तु सहस्रारे तु योद्धरेत्। मणिपूरे तु निर्वाणं महाकुंडलिनीमधः। स्वाधिष्ठाने कामराजं राकिणीमधि-
संस्थितां। विचिंत्य विधिवद्देवि मूलाधारात्रिकं शिवे॥ विशुद्धौ तं स्मरेद्देवि विसतंतुतनीयसीं। वह्निस्थानं हि तत्कृत्वा मूलमंत्रयुतं मुहुः। हृच्छाकिन्या सम-
न्वितं श्रेष्ठदेवीस्वरूपिणी। ज्ञानतत्त्वा परमेशानि जपमंत्रमनुत्तमं॥ श्रीदेव्युवाच॥ [illegible] सततं देवि तवस्नेहेन कथ्यते। विनायेन महेशानि नि-

© Dharmartha Trust J&K. Digitized by eGangotri

कुल्लुका कीदृशी नाथ सेतुर्वा देव कीदृशः। कीदृशो वा महासेतुर्निर्वाणं नाथ कीदृशं। अन्यच्च कथितं यस्मै कीदृशं तद्वद प्रभो॥ ईश्वर उवाच॥ शृणुष्व कुल्लुकां दे
वि तव स्नेहेन कथ्यते। विना येन महेशानि निःफलं परमेश्वरि। तारायाः कुल्लिका देवि महानीलसरस्वती। पंचाक्षरी कालिकायाः कुल्लिका परिकथ्यते। कालीकूर्च
वधूर्मायाफडन्ता परमेश्वरी। छिन्नायास्तु महेशानि कुल्लिका षडक्षरी भवेत्। वज्रवैरोचनीये च अन्ते हुं फट् द्वयं कीर्तितं। संपत्प्रदायाः प्रथमं भैरव्याः कुल्लिका मता। श्री
मात्रिपुरसुंदर्याः कुल्लिका द्वादशाक्षरी। वाग्भवं प्रथमं बीजं कामराजं ततः परं। लज्जाबीजं ततः पश्चात्त्रिपुरेशी ततः परं। भगवतीति पदं दद्यादन्ते ठद्वयमुद्धरेत्। कालिका
याः स्वबीजं तु कूर्चं वधूं नियोजयेत्। लज्जास्त्रमंतके दद्यात्तारा नीलसरस्वती। अन्येषां तु महेशानि त्र्यक्षरी कुल्लिका भवेत्। तारं कूर्चं समुद्धृत्य पश्चादंकुशमुद्धरेत्। इति
ते कथिता देवि संक्षेपात्कुल्लिका मया। अज्ञात्वा कुल्लिकां मंत्रं जपते यो ऽधमः प्रिये। पंचत्वमाप्नुल भते सिद्धिहानिस्तु जायते। वृथा च तज्जपं सर्वं निःफलं नात्र संशयः। तस्मा
त्सर्वप्रयत्नेन प्रजपेन्मूर्ध्नि कुल्लिकां। अथातः संप्रवक्ष्यामि तच्छृणुष्व प्रियंवदे॥ यस्याज्ञानेन विफलं जपहोमादिकं भवेत्। विप्राणां प्रणवः सेतुः क्षत्रियाणां तथैव च।
वैश्यजातेः फडंतो मायाभूद्रस्य कथ्यते। तत्स्थाने देवदेवेशि सुंदर्या भुवनेश्वरी। कालिकायाः स्वबीजं तु तारायाः कूर्चबीजकं। अन्येषां तु वधूबीजं महासेतुर्वरानने।
आदौ जप्त्वा महासेतुं जपेन्मंत्रमनन्यधीः। धनेन धनेशतुल्योसौ वाचि वाणीश्वरोपमः। पुष्कृतां तु सदृशो नारीणां मदनोपमः। जपकारं भवेत्तस्य सर्वकाले न संशयः।
अथ वक्ष्यामि निर्वाणं शृणु देवि वरानने। प्रणवं पूर्वमुद्धृत्य मातृकाद्यं समुच्चरेत्। एवं पुटितमूलं तु प्रजपेत्कलिपूरकं। एवं निर्वाणमीशानि यो न जानाति पामरः। व
र्षकोटिशतेनापि सिद्धिस्तस्य कदाचन। तस्मात्सर्वप्रयत्नेन यद्यदुक्तं महेश्वरि। तत्तदाचर्य विधि[illegible]वत्प्रजपेन्मनुमुत्तमं। ऋषिच्छंदो देवतां च तद्बीजं शक्तिकीलकं। भा
वयेद्यत्नतो देवि ततः सेत्वादिकं जपेत्। एवं यदि जपेन्मंत्री मंत्रराजमनुत्तमं। स एव सिद्धिमाप्नोति नात्र कार्या विचारणा। साक्षात्स एव जगतामधीशो नात्र संशयः। सश
रण्यं सर्वेलानी सहवम्मत्र लत्वविलास एवन द्यते भस्मौ विचरेद्यथासुखं। तस्य दर्शनमात्रेण पलायंते च वैरिणः। एवं कृत्वा सकलपुटितं यो जपेन्मंत्रराजं तन्निर्वाणं भवन
कथितं कुल्लिकां तान्निज[illegible]ह्वा तेषां तद्वान्निखिलभुवने सिद्धयोऽष्टौ वहंते। तेषां तत्त्वं वच्मि वचनं न पश्यम्य प्रांतरेण। अत्र तु क्रीं स्त्रीं हूँ इति तारायाः सभेदायाः कु
ल्लिका भवति। क्रीं हूं स्त्रीं ह्रीं फट् इति पंचाक्षरी दक्षिणाकालिकायाः सभेदायाः कुल्लिका भवति। वज्रवैरोचन्ये हुं फट् इति छिन्नायाः सभेदायाः कुल्लिका
भवति॥ ऐं क्लीं ह्रीं ऐं क्लीं सौः भगवति स्वाहा इति द्वादशाक्षरी श्रीमत्त्रिपुरसुंदर्याः सभेदायाः संपत्प्रदायाः भैरव्याः सभेदायाश्च कुल्लिका भवति॥ ~~भद्र... सांतु मायया~~

© Dharmartha Trust J&K. Digitized by eGangotri

ऐं ह्रूं क्रों इति त्र्यक्षरी अस्य एषां मंत्राणां विद्यानां च सर्वत्र कुल्लिका भवतीत्यर्थः॥ ब्राह्मणानां प्रणवः सेतुर्भवति। क्षत्रियाणामपि स एव। वैश्यानां फट् इति सेतुर्भवति। शू
द्राणां तु माया बीजं सेतुर्भवति। क्लीं इति कामेश्वराणां महासेतुर्भवति। हूं इति तारायाः महासेतुर्भवति। अन्येषां तु स्त्रीं इति महासेतुर्भवति। ऐं अं मूलं ऐं अं ऐं। ऐं अं मूलं ऐं
अं ऐं। ऐं हूं मू- ऐं हूं ऐं। इत्यादि प्रत्यक्षर संपुटित मूलं निर्कीलमित्युच्यते। केचित्तु अं आं मूलं ऐं अं समस्तमातृका अंते ऐं इति मणिपूरके सप्तवारं जपेदिति वदंति॥
अत्र यथा गुरूपदेशं कार्यमिति॥ अथैतस्य प्रयोगः॥ मूलेन प्राणायामत्रयं कृत्वा अस्याः श्रीमहात्रिपुरसुंदरीविद्यायाः शिरसि अमुकाय ऋषये नमः मुखे अमुक छंद
से नमः हृदये श्रीमहात्रिपुरसुंदर्यै देवतायै नमः गुह्ये अमुकबीजाय नमः पादयोः अमुकशक्तये नमः नाभौ अमुककीलकाय नमः इति विन्यस्य ऐं क्लीं ह्रौं ऐं क्लीं सौः
भगवति स्वाहा इति कुल्लिकां मूर्ध्नि सप्तधा त्रिधा वा जपेत्। ऐं इति सेतुं हृदि तथैव स्मरेत्। ह्रीं इति महासेतुं सहस्रारे तथैव स्मरेत्। ओं अं मूलं ऐं अं पं ओं इति निर्वाणं म
णिपूरके तथैव स्मरेत्। लिंगे क्लीं इति तथैव स्मरेत्। जिह्वायां मूलविद्यां तथैव स्मरेत्। मूर्ध्नि सहस्रारे ॐ ऐं क्लीं श्रीं रां रीं रूं रैं रौं रः रमलवरयं डाकिनी मां रक्ष रक्ष स
र्वसत्ववशंकरि देव्यागच्छागच्छ इमां पूजां गृह्ण गृह्ण ऐं घोरे देवि क्लीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे इति
डाकिनीं मूर्ध्नि स्मरेदिति॥ इति कुल्लुकादिविधिः॥ अथ प्राणप्रतिष्ठाविधानं॥ कुलार्णवे॥ तारं नारायणं सेंदुं मर्यामं कुशमुद्धरेत्। यान्सविंदुन्समाणोन्नुद्धृत्य वियदे यी।
युतं। विंदुयुक्तं वाजपाख्यं परमात्ममनुं वदेत्। अमुष्य शब्दमुच्चस्य प्राणा इह इतीरयेत्। प्राणाः पाशादिकान्वर्णांस्त्रिः सर्वाणि पुनर्वदेत्। अमुष्य जीव इह स्थित
इत्युद्धरेत्ततः पुनः पंचदशार्णांते अमुष्येति पदं वदेत्। सर्वेन्द्रियाणि च ततः पुनः पंचदशार्णकान्॥ अमुष्य वाङ्मनश्चक्षुःश्रोत्रघ्राणपदादथ। प्राणा इहागत्य
सुखं चिरं तिष्ठंतु वह्नि ठः॥ इत्थं प्राणप्रतिष्ठाख्य मनुः प्रोक्तो मनीषिभिः। चतुर्दशोत्तरचत्वारिंशैः सर्वार्थसिद्धिदः॥ तारः प्रणवः॥ नारायणः आकारः सेंदुः सानुस्वारः माया भुवने
श्वरीबीजं। अंकुशः क्रों बीजं। वियत् हकारः। औ स्वरूपं। विंदुरनुस्वारः॥ तेन हौं इति॥ अजपा हंस इति॥ परमात्ममनुः सोहमिति॥ द्वि ठः स्वाहाकारः॥ अमुष्य पदस्थाने
साध्यपदं षष्ठ्यंतं योज्यं। स्वयं साध्यश्चेन्ममेति योज्यं। अत्र केचित्पाशबीजादि पंचदशवर्णानामसावेवोच्चारणं। न स्थाने नान्तरेषु काम्यप्रयोगकाले तेषां स्थानस्थाने पूर्वो
क्त जपपृष्ठादेषु नास्तीत्याहुः। अस्यामुष्यपदं पूर्वं पाशाद्यानि प्रयोजयेदिति शारदातिलकव्याख्यानात्॥ तत्र स्वगुरुमतं प्रमाणं॥ तथा। ऋष्यो ब्रह्मविष्णुमहेशा मंत्रस्यास्य
समीरिताः॥ छंदांसि ऋग्यजुःसामान्याकृतानामपरागाः प्राणशक्तिर्देवतास्याः सर्वप्राणिहृदिस्थिता॥ पाशो बीजं शक्तिरेव शक्तिः कीलकमंकुशं॥ विनियोग कुर्विहेत्यः

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२५३

253

वदेद्यंति रेमंत्रस्य मरेखां सविंदुकां॥८२

प्राणस्थापनकर्मणि॥ श्रीकंठविंदुसंयुक्तं कवर्णविंदुसंयुतं। आकाशवाय्वग्निजलपृथिव्यात्मवचने वदेत्। सविंदुर्नंतो हृल्लेखः सूक्ष्मांबिंदुयुतं वदेत्। विंदुयुतं च
वर्गांतेः शब्दस्पर्शवरूपचारसगंधात्मने संते त्रिमूर्त्तिशंसे बिंदुकं। वर्णचतथोद्भवस्थ्रोत्रवाक्चक्षुरित्यथा। जिह्वाघ्राणात्मने ङघीशो बिंदुयुक्तः शिखामनुः ऊं टीषां बिंदु
संयुक्तं तवर्गांता दश वदेत्। वाक्पाणिपादपायूपस्थात्मने बिंदुभौतिके। वर्मा घुर्बिंदुयुक्सचः पवर्गो बिंदुसंयुतः। वचनादानविसर्गागमनानंदवात्मने। अनुग्रहो बिंदुयुक्तो
नेत्रमंत्र उदाहृतः। तिथिस्वस्वरांतेया घर्णान् दशविंदुविभूषितान्। उक्तामनोबुध्यहंकारांते चित्तात्मने पदं। विसर्गएषसे क्रोकोमनुरस्त्राभिधानकः। एवं षडंगमनवस्ता तंते
रबीजत्रयादिकाः। न्यस्तव्यानातियुक्ताभ्यमंत्रिभिः स्वकरांगयोः। नाभितः पादयुग्मांतं कंठादानाभिमस्तकान्। कंठांतमिति बीजानि पाशादीनि प्रविन्यसेत्। हृत्पद्ममध्ये नुच्या
त्वावसुदलांबुजांतस्य वाय्वग्निपूर्वेषु पश्चिमेशानयोरपि। नैर्ऋत्ये तस्यामेषु कर्णिकायां दलेषु वायादिक्षांतान्यक्षराणि विंदुयुक्तानि विन्यसेत्। एकैकं कोलवर्ण्यानि
त्वा शिरसि ब्रह्मविष्णुशिवेभ्य ऋषिभ्यो नमः। मुखे ऋग्यजुःसामाथर्वच्छंदोभ्यो नमः। हृदये। पराप्रा
ततो देवी हृदि स्मरेत्॥ अस्य प्रयोगस्तु॥ अस्य प्राणप्रतिष्ठामंत्रस्य। इति विन्यस्यामुष्य प्राणप्रतिष्ठार्थे विनियोग इति कृतांजलिर्वदेत्।
णशक्त्यै देवतायै नमः। गुह्ये आं बीजाय नमः। पादयोः क्रौं शक्तये नमः। नाभौ। क्रौं कीलकाय नमः। आं ह्रीं क्रों इं चं पं ईं शब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा। ओं आं
ततः ओं आं ह्रीं क्रों अं कं पं आं आकाशवाय्वग्निसलिलपृथिव्यात्मने आं हृदयाय नमः। आं ओं ह्रीं क्रों इं तं पं ऐं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं। आं ओं ह्रीं क्रों ओं यं
ह्रीं क्रों उं टं पं ऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्। ओं आं ह्रीं क्रों इं तं पं ऐं
वचनादानविसर्गागमानंदात्मने औं नेत्रत्रयाय वौषट्। ओं आं ह्रीं क्रों अं यं १० मनोबुध्यहंकारचित्तात्मने अः अस्त्राय फट्॥ इति षडंगमंत्रान् गुष्ठादिकरतलो
तकरयोर्विन्यस्य हृदयादिषडंगेष्वपि न्यसेत्। ततो नाभ्यादिपादद्वयांतं आं नमः। कंठादिनाभ्यंतं ह्रीं नमः। मूर्धादिकंठांतं क्रों नमः। ततो हृदयकमले वायव्याद
ले यं नमः। आग्नेये रं नमः। पूर्वे लं नमः। पश्चिमे वं नमः। ईशाने शं नमः। नैर्ऋत्ये षं नमः। उत्तरे सं नमः। दक्षिणे हं नमः। कर्णिकायां क्षं नमः। इति विन्यस्य। ओं आं
ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः सोहं अमुष्य प्राणा इह प्राणाः। १५ अमुष्य जीव इह स्थितः। १५ अमुष्य सर्वेन्द्रियाणि। १५ अमुष्य वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण
प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। ओं इति मंत्रेण सर्वांगे व्यापकं त्रिधा विन्यस्य ध्यायेत्॥ रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशाविक्षुशरासबाणान्
शूलं कपालं दधती कराग्रै रक्तां त्रिनेत्रां प्रणमामि देवीं॥ एवं ध्यात्वा जगद्धात्रीं लक्षमेकं जपेन्मनुं॥ जुहुयात्तद्दशांशेन च मधुरत्रयसंयुतैः। बंधूकैर्वा दशांशेन

श्री
२५२

© Dharmartha Trust J&K. Digitized by eGangotri

पीठविधानेन पूजयेत्। अर्चयेत्तद्बहिः सुकोणेषु ब्रह्माणीं विष्णुमीश्वरं। वाणीं लक्ष्मीं रमां पश्चात् षडंगानि प्रपूजयेत्। दलेषु मातरः पूज्यास्तद्बाह्ये लोकनायकाः॥
एवं संपूजयेद्देवीं मुद्रां गंधकुसुमादिभिः। इति संसाधितो मंत्रः षट्कर्मफलदो भवेत्। स्थापयेन्मनुनानेन प्राणान् सर्वत्र देशिकः॥ अथ तदुपासनाविधिमुच्यते
त्प्रातः कृत्यादियोगपीठन्यासांतं कृत्वा मूलेन प्राणायामत्रयं ऋष्यादिकरषडंगन्यासान्विधाय अंतर्यागोत्तरं स्वपुरतः सिंदूरादिना त्र्यश्रषट्कोणाष्टदलभूपुरात्मकं य
त्रायंत्रं विलिख्य पुरतः संस्थाप्याभ्यर्चार्घ्यादिस्थापनाद्यात्मपूजांतं तेन मंडूकादिपरतत्त्वांतं योगपीठं संपूज्य केसरेषु ॐ जयायै नमः। विजयायै। अजितायै। अप
राजितायै। नित्यायै। विलासिन्यै। दोग्ध्र्यै। अघोरायै। मंगलायै। इति संपूज्य ह्रीं सर्वशक्तिकमलासनाय नमः इति समस्तं पीठं संपूज्य मूलमंत्रेणावाहनादि परिक
ल्प्यावाहनादिपुष्पांजलिदानांतं षट्कोणेषु देवीं अग्रे देवीपृष्ठदक्षिणवामकोणेषु ॐ ब्रह्मणे। ॐ विष्णवे। ॐ रुद्राय नमः। दक्षिणाग्रे देवीपृष्ठवामभागेषु सरस्व
त्यै। लक्ष्म्यै। गौर्यै। षट्कोणसंधिषु प्राग्वदंगानि संपूज्याष्टसुपत्रेषु दक्ष्यमाद्यादि प्रादक्षिण्येन प्रागुक्ता ब्राह्म्याद्याः संपूज्य चतुरस्रे लोकपालांस्तदस्त्राणि च
संपूज्य धूपदीपादिकं सर्वं प्राग्वत्समापयेदिति॥ तथा। लक्षमेकं जपेन्मंत्रं जुहुयान्न दशांशतः। साज्येन वरुणं पश्चात्तर्पणादि समाचरेत्॥ शारदायां। वी ग
जांतेक्षुमुख्यशर्करानामादौ हृतीः प्रपूजयेत्। ततो वैवस्वता भूयो जीवह्रीप्राणहापुनः। आकृष्यायसना पश्चात् भ्रमदाविस्फुलिंगनीं। क्षेत्रप्रतिहृतीस्तेताः श्रा
एणहत्यानवस्मृताः। पाशेन बद्ध्वा वेष्ट्य स्पृशंत्याः सीकृततेजसः॥ अंकुशेन हृतस्यापि साध्यस्यासून् समाहरेत्। द्वादशांगुलमानं कृत्वा साध्यस्य पुत्तलीं। तस्याः प्रा
णात्मकं यंत्रं सकीरं हृदये न्यसेत्। निशीथसमये साध्ये सुप्ते तस्या हृदंबुजे। दलेषु गायुव ह्रीं द्वकरुणा नामतः परं। दृशोराक्षसकशी तां शुयमां तां कर्णिकांतरे।
यादीन् हंससमायुक्तान् भृंगाकारान् नु संस्मरेत्। शिरोबिंदुसमुद्भूतं तं तु संवद्धविग्रहान्। एवमात्महृदंभोजे भृंगीरूपान् धिया स्मरेत्। आत्महृत्पद्मगाभंभीः
प्रस्थाप्य श्वासवर्त्मना। एकैकं साध्यहृत्पद्माङ्गानेकैकमानयेत्। पुत्तल्यां स्थापयेन्मंत्री स्वचित्तो वा विधानवित्। तं तु छेदं प्रकुर्वीत वह्निबीजेन संयुतः। आ
कृष्यान्साध्यहृदंगान् भुवा संस्तंभयेत्ततः। एवमेकादशादीनि कुर्यात्सर्वेषु कर्मसु। वश्याकर्षणयोर्यादीन् अरुणान् संस्मरेत् सुधीः॥ मोहविद्वेषयोर्धूम्रान् कृष्णान्
मारणकर्मणि। पीतान् संस्तंभने ध्यायेत्प्राणाकर्षणकर्मवित्॥ आकृष्य न्साध्यहृत्प्राणान् स्थापयेदात्मनो हृदि। क्रूरकर्मसु पुत्तल्यां तेषां स्थापनमीरितं। प्राणान्

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्ण
२५४

254

साध्यस्य मंडूकान् आत्मनस्तु भुजंगमैंत्। संस्मरेत्तत्र निपुणः सदा क्रूरेषु कर्मसु। वाय्वग्निशक्रवरुणेश्वरराक्षसेंदुप्रेतेशपत्रलिखितैरथ यादिवर्णैः। बिंदुतैः
स्वगतहंससमेते मध्यं प्राणात्मयंत्रमथ वर्णचक्रं धरास्थं। इत्थं प्रयोगकुशलो मनुनानेन मंत्रवित्। वशयेत्सकलान्देवान् किं पुनः पार्थिवान् जनान्। इति। अत्र पु
रश्चरणविधिमुक्त्वा विशेषो ब्रह्मयामले। अत्र नित्यं कुर्वीत मंत्री जपाकिंशुकसंभवैः। पुष्पै रक्तोत्पलैर्वापि मूले नवनवाकुतीः। कुल्लाबीजत्रयेणाथ कुर्वीत दैवकृशः
कमात्। यादिहंसांतवर्णौघाः प्राणरूपेण वस्थिताः। अमृतावेव सन्ताव जीवहाप्रालहान्तथा। आकर्षणी वश्यसन्ता भ्रमदा विस्फुलिंगिनी। धूम्रेत्रहृहारिलीये
त्रिसंप्रोक्तास्ता यथाक्रमं। तत्तद्वर्णादिनामानस्तासां चैव कुर्वीत क्रमात्। आं क्रीं क्रौं यं अमृतायै स्वाहा। इत्यादि प्रयोगः। ध्यानं वक्ष्ये प्रयोगेषु यथा ध्येया महेश्वरि।
गत्वा साध्यं हृदं बध्वा पाशबीजेन सुंदरि। शक्तिबीजेन तत्कृत्वा गृहीत्वा कुशबीजतः। प्राणमाकृष्य साध्यस्य यानयती सदा स्मरेत्। निशीथसमये साध्ये सुप्ते त
स्य हृदंबुजे। दलेषु वायुवक्रीडवरुणानां सुरेश्वरि। ईशराक्षससोम्येषु दक्षिणे कर्णिकांतरे। यादीन्हंससमायुक्तान् भंगाकारान्नु स्मरेत्। शिरोबिंदुसमायु
ततं तु संबद्धु चिरग्राहान्। एवमात्महृदंभोजे भृंगीरूपान्धिया स्मरेत्। आत्महृत्पद्मगा भृंगीः प्रस्थाप्य श्वासवर्त्मना। एकैकान्साध्यहृत्पद्मभृंगान्नेकैकमानये
त्। पुनस्त्वं स्थापयेत्क्रूरे स्वचित्तेतरकर्मसु। तं तु बद्धं प्रकुर्वीत वह्निबीजेन पार्वति। आकृष्टान्साध्यहृद्भृंगान्स्तंभये भूमिबीजतः। एवमेकादशावृत्तिं कुर्यात्स
र्वेषु कर्मसु। वश्याकर्षणयोर्यादीनरुणान्संस्मरेत्प्रिये। मोहविद्वेषयोर्धूम्रान्कृष्णान्मारणकर्मणि। पीतान्संस्तंभने देवि प्राणकर्षणकर्मवित्। आकृष्टे
साध्यहृत्प्राणान्स्थापयेदात्मनो हृदि। क्रूरकर्मसु पुत्तल्यां तेषां स्थापनमीरितं। प्राणान्साध्यस्य मंडूकान् आत्मनस्तु भुजंगमान्। संस्मरेद्देवदेवेशि सदा
क्रूरेषु कर्मसु। इत्थं प्रयोगकुशलो मनुनानेन सुंदरि। वशयेत्सकलान्देवान् किं पुनः पार्थिवान् जनान्। वाय्वग्निशक्रवरुणशिवराक्षससोमगान्। दक्षिणां
तान्लिखेद्यादीन् हंतान् तानष्टसु पार्वति। दलेषु बिंदुसंयुक्तान् सकारं कर्णिकांतरे। विलिखेत्तस्य मध्ये तु हंसद्वंद्वाक्षरद्वयं। साध्यनामसमोपेतं विलिखेद्वि
रिसंभवैः। विलिखेच्चतुरस्रेण मंत्रं प्राणमनोहरं। क्रूरकर्मसु संप्रोक्तं द्वैरष्टविधादिभिः। कृतां पुत्तलिकां साध्यनरकेशसमन्वितां। द्वादशांगुल
मानेन स्पृष्टां गोमयुक्ति मंत्रलो। तस्यास्तु हृदये देवि प्राणयंत्रं विनिःक्षिपेत्॥ लिखितं शववस्त्रे च सकीरं चरवर्णिनि। प्राणान्संस्थापयेत्तस्या

श्री
२५४

© Dharmartha Trust J&K. Digitized by eGangotri

साध्यस्य प्रोक्तरूपतः । छित्वा तां तु कुर्याद्धात्री साध्यं स्मृत्वा च विनानले । सप्तरात्रप्रयोगेन मारयेद्रिपुमात्मनः । सकीदंसजीवे संस्थापितसाध्यप्राणमिति
यावत् । अष्टविषाणि तु रथ्याग्नि लोणपिंडा त्रिधत्तूरकरसस्तथा । ग ह धूमास्त्रि कटुके विषाष्टकमुदाहृतं । इत्युक्तानि शेषनः श्वेतविष्ठा । अग्निः चित्रके ।
लोणपिंडः कृत्रिमलवणं । अन्यत्सुगमं तथा । केचाऽस्त्रावाहयेत्कुंभे प्रतिमादिपु मंत्रवित् । शैवे च गाणपत्ये च षस्त्र वस्यः कलास्मृताः । पंचाशीतिकलाः सौरे चतुर्न
वतिर्वैष्णवे । शाक्ते तु सप्ततिप्रोक्ताः शैवाश्चेति च केचन । शैवाः षष्टयतिकलाः शाक्ते पियोऽप्याइति केचन वदन्ती त्यर्थः । शैवाः कलाश्चाह ॥ तत्र तत्त्वानि षट्त्रिंशत्तद्वा
त्रिंशत्कामसोमयोः । दृश्यो नवदप्राणायादयो नव वर्णकाः । कलाः शैवा वदाम्यत्राशिवशक्तिसदाशिवाः । ईश्वरः शुद्धविद्या च माया विद्या कला तथा । रागः काल
श्च नियतिः पुरुषः प्रकृतिस्ततः । अहंकारश्च बुद्धिश्च मनः श्रोत्रं त्वच ततः । जिह्वा घ्राणं श्च वाक्पाणिपादौ पायुस्ततः परं । उपस्थ शब्दो स्पर्शश्च रसो गंधो वि
यन्मरुतः । वह्निः सलिलं पृथ्वी चक्रद्वाश्रीतिरतिर्धृतिः । कान्तिर्मनोरमा चैव ततश्चैव मनोहरा मनोरथा च मदनोन्मादिनी मोहिनी तथा । शंखिनी शोषणी चैव वशं
करी वशिनी । सुतगास्स्वराश्चैव षोडशाश्च समीरिताः । पूषा चैव हासुमनसा रतिः प्रीतिर्धृतिस्तथा । ऋद्धिः सौम्या मरीचिश्च ततश्चाप्यंशुमालिनी । शशिनी
चांगिरा छाया तनःसंपूर्णमंडला तुष्टाऽमृतारव्या कथिताः कलाः सास्वराविधाः । अमृताद्या दश प्राणायादयो नव वर्णकाः । षस्त्र वस्यः कलाः प्रोक्ताः शैवेशा
के च गाणपे । अथ वक्ष्ये वैष्णवाख्याः कलाः शृणु वरानने । जीवप्राणौ बुद्धिमनः श्रोत्राद्याविंशतिस्तथा । हत्प्रसंसूर्यसोमाग्निगुरुदेवा कुमारस्ततः । संकर्षण
श्च प्रद्युम्नश्चानिरुद्धः ततः परं । अक्षराद्यो त्र विज्ञेयाः सौराः शृणु वदामिते । आकाशवाय्वग्निजलपृथिवी शब्द एव वा स्पर्शरूपैः सोगंधश्रोत्रत्वक्चक्षु
रेव च । जिह्वाघ्राणं च वाक्पाणिः पादपायूतथैव च । उपस्थं च मनोगर्वबुद्धिधीः प्रकृतिस्ततः । अक्षरादयो त्र विज्ञेयाः शाक्ताः शृणु वरानने । आ स्रवि घाशि
वाक्षैत प्रतिलोमक्रमात्पुनः । अनुलोमेन ततः स्यः सर्वतत्त्वं तथैव च । अक्षरादयोस्ततः प्रोक्ताः कलाः सर्वाः समीरिताः । अस्यार्थः । सौम्यकर्मसु प्रतिमादिप्वा
वाहयेत्तु साधकः कृतनित्यक्रियः । यथोक्तलक्षणप्रतिमायेस्नासने समुपवेश्य रिक्तोतरावाहितसमस्तकलापूर्णपूर्णकुंभजासनप्रतिमाचार्यध्येसाधारं
संस्थाप्य प्राणानायम्याद्येत्यादि तिथुलेखमोतेऽमुकाकृतिप्रतिमायाममुकदेवतासान्निध्यकारिण्या मुकसंख्याककला आवाहयिष्ये इति संकल्प्य प्रा
णयंत्रे प्राणप्रतिष्ठामंत्रेण प्रतिष्ठितं प्रतिमायाग्ले वध्वा आवाहयेत् । प्राणयंत्रप्रकारस्तु भर्जो । दो अष्टगं येनाष्टदलकमलं विलिख्य कर्णिका

© Dharmartha Trust J&K. Digitized by eGangotri

योसभाध्यं क्षकारं विलिख्य हंसः इत्यक्षरद्वयेन क्षकारं वेष्टयित्वा नाय अदले यं आग्नेये रं पूर्वे लं पश्चिमदले वं ईशान्यदले शं निरृतिदले षं उत्तरदले सं याम्य
दले हं इति वर्णाष्टकं विलिख्य वहिर्भूपुरं विलिख्य मातृकावर्णैर्वेष्टयित्वा तत्र तत्स्थानेषु दिक्पालबीजानि विलिखेदिति प्राणयंत्रं विलिख्य होमसंपातं कुर्या
दिति । ततः आहवनीयदेवतामंत्रेण प्राणायामऋष्यादिकरषडंगन्यासध्यानानि विधाय प्रतिमायां भूतशुद्धिमातृकान्यासांते विधाय प्रतिमाहृदये स्पृष्ट्वा प्रा
णप्रतिष्ठामंत्रेण अमुष्यपदस्थाने आहवनीयदेवतानाम षष्ठ्यंतं संस्थाप्य प्राणप्रतिष्ठामंत्रमष्टोत्तरशतवारं जपित्वा कला आवाहयेत् । यथा । सुगंधजलपुष्प
भरितपूर्णकुंभमुखपिधानवस्त्रं निष्काश्य मध्यस्थपुष्पमेकमुद्धृत्य ओं आं ह्रीं क्रों हंसः सोहं यरलवशषसहों अमुकदेवतायाः शिवतत्त्वरूपप्राणकला इ
ह शिवतत्त्वरूपप्राणकला १५ अमुकदेवतायाः शिवतत्त्वरूपजीवकला इह स्थिता १५ अमुकदेवतायाः शिवतत्त्वरूपसर्वेंद्रियकलाः १५ अमुकदेवतायाः शिवतत्त्व
रूपवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणकला इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इत्युच्चार्य प्रतिमाशिरसि निःक्षिपेत् । एवं शक्तितत्त्वरूप० ईश्वरतत्त्वरू० इत्यादि
क्रमरूपः ॥ अत्र संप्रदायस्तु प्रथमकलामेकवारमुच्चार्यावाहयेत् । द्वितीयां वारद्वयं । तृतीयां त्रिवारं । चतुर्थीं चतुर्वारं । एवं क्रमेणैकोत्तरवृद्ध्योच्चारणमि
ति ॥ तदनंतरं ॥ शुक्लप्रतिपदारंभाद्यावत्पूर्णातिथिर्भवेत् । कुर्यादावाहनं मंत्री प्रतिमादेषु भेतथा । आकर्षणी कलानां तु कृष्णे च प्रतिपदादितः ॥ कलानां क्रमसंवृद्धि दा
दाः कृष्णशुक्लप्रभेदतः ॥ तिथिक्रमेण जायेत तथैवात्र दिनक्रमः ॥ गुरुतः शास्त्रतः सम्यक् ज्ञात्वा कुर्वीत देशिकः ॥ अज्ञात्वा कुर्वते यस्तु म्रियते मंदधीः स्वयं ॥ अथ
नित्यहोमेऽग्निस्थापनविधिः ॥ पूजास्थानस्येशानभागे कुंडं स्थंडिलं वा यत्नतः गोमयेनोपलिप्ते मूले नवीक्ष्यास्त्रेणाभ्युक्ष्यास्त्रेणैव कुशैः संताड्य कवचमंत्रेण प्रोक्ष्य
हमंत्रेण विष्णुरुद्रेंद्रदेवताकास्तिस्रो रेखाः प्रागग्राः ब्रह्मयमचंद्रदेवताका उदगग्रास्तिस्रो रेखाः कुशमूलेनाविलिख्य कुशांबुनास्त्रमंत्रेण संप्रोक्ष्य ह्रीं सर्वशक्तिकम
लासनाय नमः इति तत्र ध्येयोगपीठं संपूज्य तत्र मध्ये वह्नेशीं ऋतुमतीं संचिंत्य तद्योनौ वा वसाध्यस्थाने शिवबीजतया सूर्यकांतादिभवमग्निं प्रणवेन संस्थाप्य ओं चित्पिं
गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहेति मंत्रेण कुशैर्मुखे फूत्कृत्याग्निं प्रज्वाल्य काष्ठैः प्रपूर्य ओं अग्निं प्रज्वालितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं
लं समिद्धं सर्वतोमुखमिति पठन् कृतांजलिरुपस्थायोपविश्य प्रांजलिः ओं हिरण्यायै नमः गुदे ओं कनकायै नमः । शिरसि ओं रक्तायै नमः मुखे ओं कृष्णायै नमः
नासिकायां ओं सुप्रभायै नमः नेत्रयोः ओं अतिरक्तायै नमः सर्वांगे ओं बहुरूपायै नमः इति सप्तजिह्वाविन्यस्य ओं सहस्रार्चिषे हृदयाय नमः । ओं स्वस्तिपूर्णा

© Dharmartha Trust J&K. Digitized by eGangotri

घोरिरसे स्वाहा। ॐ कृत्तिष्ठपुरुषायै शिखायै वषट्। ॐ धूम्रव्यापिने कवचाय हुं। ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट्। ॐ धनुर्धराय अस्त्राय फट्। इति षडंगानि वि

अग्नये धायशिरसि अग्नये जातवेदसे नमः वामांसे सप्तजिह्वाय नमः। वामपार्श्वे अग्नये हव्यवाहनाय नमः। वामकट्यां अग्नये अश्वोदराय नमः। लिंगे अग्नये वैश्वानराय नमः।

दक्षिणकट्यां। अग्नये कौमारतेजसे नमः। दक्षिणपार्श्वे अग्नये विश्वमुखाय नमः। दक्षांसे अग्नये देवमुखाय नमः। इत्यष्टौ मूर्तीर्विन्यस्य गर्भरहितैर्दर्भैरग्निं प्रा

गादिक्रमेणोत्तराग्रैः पूर्वाग्रैश्च परिस्तीर्य वह्नेर्मुखे षट्कोणं विभाव्य तत्र प्रागुक्तषडंगानि संपूज्य तद्बहिः अष्टदलेषु प्रागाद्यष्टमूर्तीः संपूज्य तद्बहिश्चतुरस्रे इंद्रादिक्पालो

स्तदायुधानि च संपूज्य मध्ये ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा। इत्यग्निं गंधादिभिः संपूज्यास्त्रमंत्रेण क्षालितायां भांडस्थाज्यमादाय नि

क्षिप्य मूले नाष्टधाभिमंत्र्य वसितस्य तीव्रालकायवेन प्रदीप्तदर्भद्वयेन नीराजनं दर्भद्वयमग्नौ निःक्षिप्य पुनर्दर्भाग्रं पश्चाल्लालास्त्रमंत्रेण घृते प्रदर्श्याग्नौ निःक्षिप्य स्रुक्

स्रुवौ तदभावे पलाशस्य मध्यपत्रद्वयमश्वत्थपत्रद्वयं वा गृहीत्वाऽग्नौ प्रताप्य कवचेन दर्भैः संमार्ज्य पुनः प्रताप्यास्त्रेण प्रोक्ष्य दर्भेषु निधाय मार्जनदर्भान् अद्भिः संस्कृत्याग्

ग्नौ निःक्षिप्य स्रुवेणाज्यमादायाग्ने दक्षिणनेत्रे अग्नये स्वाहा इति हुत्वा अग्नय इदं न मम। ततः स्रुवेणाज्यमादायाग्ने वामनेत्रे सोमाय स्वाहेति हुत्वा सोमायेदं न

मम। पुनरग्ने भालनेत्रे अग्नीषोमाभ्यां स्वाहा। वह्नेर्वक्त्रे अग्नये स्विष्टकृते स्वाहा। ततः ॐ भूः स्वाहा। अग्नय इदं न मम। भुवः स्वाहा। वायव इदं न मम। स्वः स्वाहा। सूर्याये द

न मम। ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं न मम। इत्याहुतिचतुष्टयं हुत्वा ओं वैश्वानर जातवेदेति मंत्रेण हुतित्रयं हुत्वाऽग्नेर्गर्भाधानं संपादयामि स्वाहेति गर्भाधा

नपुंसवनसीमंतोन्नयनजातकर्मान्नप्राशनचूडाकरणोपनयनसमावर्त्तनविवाहाख्यान् पृथक् पृथक् अष्टावष्टावाहुतीर्हुत्वा प्रागुक्तेजिह्वादिमूर्त्तिदेवताभ्यः स्वाहे

रण्याय स्वाहेत्यादि तत्तन्नामभिश्चतुर्थ्यंताभिः स्वाहा। गरेकैकामाहुतिं हुत्वा। ओं स्वाहा। ओं श्रीं स्वाहा। ओं श्रीं ह्रीं स्वाहा। ओं श्रीं ह्रीं क्लीं स्वाहा। ओं श्रीं ह्रीं क्लीं ग्लौं स्वाहा। ओं श्रीं

ह्रीं क्लीं ग्लौं गं स्वाहा। ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद स्वाहा। ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा। ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद

सर्वजनं मे वशमानय स्वाहा। इति गणपतिमंत्रैर्दशधा विभज्य हुत्वा पुनः समस्तेन महागणपतिमंत्रेण पंचविंशत्याहुतीर्हुत्वा मूलमंत्रस्य षडंगमंत्रैः षडाहुतीर्हुत्वा मूल

मंत्रेण पंचविंशत्याहुतीर्हुत्वा आवरणदेवतानामेकैकामाहुतिं हुत्वा ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा। ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा। ॐ स्वरादित्याय च

दिवे च महते च स्वाहा। ॐ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा। इति चतस्र आहुतीर्हुत्वा ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसु

षुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा।

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२५६
256

इत्यष्टावेकां वा त्वाहुतिं हुत्वा वह्निं संपूज्य पूजातिरिक्तं सिक्थार्थं ददामि सघृतं तिलं। ॐ हूं सांगं कुरु कुरु स्वाहेति हुत्वा ॐ सहस्रार्चिर्महातेजा नमस्ते च कृ-
रूपधृक्। सर्वाशिने सर्वगत पावकाय नमोस्तु ते। त्वं रौद्र घोरकर्मा च घोररूपस्त्वं नमोस्तु ते। विष्णुस्त्वं लोकपालेशः शिवोसि मन्त्र प्रयच्छ मे॥ इत्यग्निं प्रार्थ्य घृतेन
स्रुवमापूर्य तदुपरि पुष्पं दत्वाऽधोमुखेन स्रुवेण तन्मुखं पिधाय मूलमन्त्रेण वौषडन्तेनाहुतित्रयं हुत्वा प्रोक्षणीयजलेन वह्निं परिषिच्य स्वेष्टदेव-
तत्र संपूज्य संहारमुद्रया स्वहृत्पुष्पस्थाप्याग्निं संपूज्य भो भो वह्ने महाप्राज्ञ सर्वकर्मप्रसाधक। कर्मान्तरेपि संप्राप्ते सान्निध्यं कुरु सादरं। इत्यग्निं प्रार्थ्य संहारमु-
द्रया स्वहृत्पुष्पे संयदिति नित्यहोमेऽग्निस्थापनविधिः॥ ॥ अत्र निजपूजाविधिस्तु श्रीविद्यायाः प्रागेव निरूपितः सांप्रतं सामान्यतः सर्वेषां मन्त्राणां नि-
त्यपूजाविधिः प्रदर्श्यते॥ पूजा द्विविधा। अनिर्माल्या सनिर्माल्या चेति। अनिर्माल्या मानसपूजा। सनिर्माल्या बाह्यपूजा। तदुक्तं तत्वसारे॥ अनिर्माल्यं सनि-
र्माल्यमर्चनं द्विविधं मतं। देवे मनो भवेद्येन गन्धपुष्पैः स्रगादिभिः। यदर्चनमनिर्माल्यं दिव्यभोगापवर्गदं। आधारे हृदयादिसंस्थे ते योगाद्वै मनो [illegible] मनःके-
येत क्रियते सम्यक् सनिर्माल्यं तदर्चनं। जातमात्राणि पुष्पाणि घ्राताम्येव च निसर्गतः। पंचभिश्च महाभूतैर्भुक्ताशं शिंशानि तथा॥ प्राणिभिश्चाद्विरेफाद्यैश्चोद्यैरे-
वन्न संशयः। अतो निर्माल्यमित्युक्तमिति॥ अत्र वादे यतीनामधिकारः॥ यदाहागस्त्यः॥ द्विविधं स्याद्ब्रह्म मनो बाह्यान्तरमुपासनं। न्यासिनामान्तरं प्रोक्तमि-
ति॥ यत्तु मनसा पूजयेत्कामी पुष्पैर्वारणसंभवैः। शिवार्थं पुष्पहिंसायां न भवेत्सुतरां हिंसकः। तदाज्ञितं द्विजयतिपरं॥ परिव्राड्ध्यानमात्रेण होमदानादिभिर्वि-
नासवे दुःखपिशाचेभ्यो भुक्तो भवति नान्यथा। पुष्पाणि स्त्रियो गृहस्थाश्च मंगलैर्मंगलार्थिनः। पूजोपकरणैः कुर्युरद्युर्दानानि वा हेलां। वानप्रस्थाश्रमयतयो यद्व-
यं कुर्युरन्वहं। संस्कारान्न निवर्तेत विध्यतिक्रमदोषतः। आरूढपतिता ह्येते भवेयुर्दुःखभाजनमिति। कुंभसंभवोक्तेः॥ देवयतीनां संयतेन्द्रियत्वे दोषायैवेदो
तस्तेषां मानसपूजनमेव विहितमिति॥ यद्वा सर्वेषामेवाधिकारः॥ यदुक्तं पद्मपुराणे॥ स्मरणे पूजने विष्णोस्तथा मानसपूजने। सदाधिकारः सर्वेषां पापहापात-
किनामपीति॥ अत्र तु गृहस्थानामेवाधिकारः॥ यदुक्तमगस्त्येन॥ अत्र येषामुभयं तथेति। अत एव गृहस्थानामुभयं आभ्यन्तरं बाह्यं चात्र तन्त्रान्तरेपि तन्त्रे
बाह्यार्चनस्यांगत्वेनोक्तं। न केवलं मानसार्चनं निषेधदर्शनाद्गृहस्थस्य स्वयमेव॥ न गृहीतान्नमात्रेण परत्रेह च मंगलं। प्राप्नोतीति च इदं दने तानहो मानसिर्विना
गृहस्थायादिदानादि दद्यान्न तु कुर्यादपि। पूजयेद्विधिनानेन कः कुर्यादेतदन्वहं। न ब्रह्मचारिणो दानमधिकारोस्ति भामिनि। नारण्यवासिनो शक्तिर्वै ते संति

श्री
२५६

© Dharmartha Trust J&K. Digitized by eGangotri

कलौ युगे॥ गुरुभ्योपि च सर्वेभ्यः केशवादात्तुमपीक्षत इति। अत्र च घ्रातपुष्पा फलं सिद्धदलं नो मानसा यथा तस्मादपरिहार्यत्वादन्यथा वानुपायतः। अ
त्वत्यबुद्धित्वतो नृणां बाह्यपुष्पैर्भवेत्क्रियेति। यत्तत्वसारवचनं तत्तदंगभूतस्याभ्यंतरयजनस्यात्यंतमावश्यकत्वात्। गृहस्थानामुपपादयतीति। तस्माद्गृहे
स्थानां बाह्यपूजैव नित्या सा च पंचविधा॥ उक्तं च मंत्रतंत्रप्रकाशे॥ पूजापि च विधा प्रोक्ता पांचरात्रादितंत्रके। ताश्चाभिगमनबोपादानेज्याध्याययोगकाः। तत्राभि
गमनानामंत्रिभिः परिकीर्त्यते। समार्जनोपलेपादिसंस्कारो देवमंदिरे। उपादानं भवेद्देवपूजासाधनमेलनं। ततश्चापि भवेदित्यागंधपुष्पादिभिः पुनः। पीठ
पूजाव देवस्य सांगावरणपूजनं। मंत्रार्थभावनापूर्वं जपो मंत्रस्य कीर्तितः। तत्कास्त्राध्ययनं सम्यक्स्वाध्यायो मंत्रिभिः स्मृतः। गुरुदेवात्मनामैक्यभावनायो
गउच्यते। सालोक्यमपि सारूप्यं सामीप्यं राष्टिनामकं। सायुज्यमपि पंचानां फलान्येवं विदुः क्रमादिति॥ तत्रादावित्यानि रूपलेन सर्वासामपि नित्यरूपलं स्या
दित्यतः प्रधानभूतेज्याति रूप्यते॥ तत्र श्रीनारदपंचरात्रे॥ निशावसानेशयनात्स्मृत्वा नारायणं प्रभुं। उत्थाय दक्षिणांगेन भूमौ पादं न्यसेद्बुधः। निशावसाने
पश्चिमे यामे। कश्चिद्यामध्यमौ यामौ रात्रौ सुप्त्वा विशांपते। संचिंतयंति धर्मार्थौ यामे तूत्थाय पश्चिम इति भारते चोक्तः। दक्षिणांगेनोत्थायणं स्मृत्वेति संबंधः। नारा
यणमित्युपलक्षणं। तेन स्वेष्टदेवतां स्मृत्वेत्यर्थः॥ उत्तरतंत्रे॥ रात्रिशेषे समुत्थाय कृत्वावश्यकमादरात्। रात्रिवासः परित्यज्य वाससी परिधाय वा। आचम्य
शुद्धदेहः सन्देवतायागमंदिरं। मार्जयित्वोपलिप्याथ भक्तियुक्तस्य शक्तिभिः। उपविश्य शुचौ देशे प्राङ्मुखो वाप्युदङ्मुखः आसने। प्राणायामत्रयं कृत्वा कृत्वा न्या
संविधानतः। न्यासं चक्रष्यादिन्यासं निर्माल्यमपकृष्याथ दद्यात्पुष्पांजलिं तथा। अर्घ्यपाद्यनिवेद्याथ दद्याद्दंतधावनं। मुखप्रक्षालनं दत्वा दद्यादाचम
नीयकं। करास्यप्रोंछनायाथ दद्याद्वासो मलं शुभं। दक्षिणामूर्तिसंहितायां। प्रातरुत्थाय देवेशि संस्मरेत्परमं कुलं। कर्पूरगौरं संस्मरेत्तत्र श्रीगुरुं देवरूपिणं सु
प्रसन्नं लसद्भूषामंडितं शांतिभूषितं। भैरवतंत्रे॥ ब्रह्मांबुजे कर्णिकमध्यसंस्थे सिंहासने संस्थितदिव्यमूर्तिं। ध्यायेद्गुरुं चंद्रशिलाप्रकाशं चित्पुस्तकाभीतिवरान्
दधानं। श्वेतांबरं श्वेतविलेपपुष्पमुक्ताविभूषं मुदितं त्रिनेत्रं। वामांकपीठस्थितरक्तशक्तिं मंदस्मितं सांद्रकृपानिधानं। रक्तांगरागाभरणां वराढ्यां स्मेराननां
पीनकुचां प्रियांके। वामेन निघ्नत्समतिरक्तकांतिं वामेन लीलाकमलं करेण। ध्यायेद्वामामपरेण नाथमाश्लिष्य गाढं त्रिभुजां त्रिनेत्रां। पद्मे शिरसि गुरुरूपा
दांबुजहृद्दे संस्मरेन्निजमूर्धनि। उत्तरतंत्रे च वचनात्। अर्चयेद्गंधपुष्पाद्यैर्वैहिकैर्मानसैस्तथा। नाममंत्रस्य संकेतसंसिद्धेर्गुरुकीर्तितैः। न दद्यात्तु गुरुभ्यो

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰धार्णव
२५७
257

यजनमंते वै समर्पयेत्॥ स्तुवीत स्तुतिभिः प्रीतस्त्वाचार्यः सर्वसिद्धये॥ प्रातः स्मरणातिरिक्तकाले स्वगुरुध्यानमाह॥ शैवागमे॥ दीक्षाकाले यथारूपं स्वस्यानुग्रहकर्म
णि। दृष्टं तत्तेन भावेन ध्यायन्नाह्निकमाचरेदिति॥ वैखानसपंचरात्रे॥ मध्ये वा रात्रिशेषे तु काले सूर्योदयावधि। अरुणोदयावधीत्यर्थः। तस्यैव स्नानकालत्वात्। कर्त्तव्यं
सजपध्यानं नित्यमाराधकेन वै॥ कपिलपंचरात्रे॥ विमृश्य पंचधा रात्रिशेषे देवार्चनादिकं। तथैव होमं तथा ध्यानं नित्यं कुर्वीत साधकः॥ उत्तरतंत्रे॥ इति स्मृत्वा हृदि स्थीयं ध्याये
दिष्टां च देवतां गुरुदेवतयोरैक्यं भावयेच्च निराकुलः॥ इष्टार्थं प्रार्थनां कृत्वा त्वां संप्रार्थयेत्ततः। इष्टदेवस्य भक्तेश्च तत्साम्यात्सानुसारतः। विन्यस्य पादमुत्थाय कुर्याद्दावश्यकीं
क्रियां॥ प्रार्थनाश्लोकस्त्वग्रे वक्ष्यते॥ दृष्टमुच्चार्य लब्ध्वा ज्ञातो दिशिकः शौचमाचरेत्॥ नारदपंचरात्रे॥ पदे पदे स्मरेद्विष्णुं दूरे यायाद्गृहालयात्। ततः उद्धृत्य देवा मंत्रेणानेन संदे
शिकः॥ तृणलोष्ठप्रक्षेपेण दत्त्वा तालत्रयं पुनः। उत्तिष्ठंतु पयो देवा गंधर्वा यक्षराक्षसाः। परितस्त्यजतां स्थानं विण्मूत्रोत्सर्जनाय मे। कृत्वा मलं श्रुतिं तत्र वा ससा... प्रक्षेप्य
वा कं मस्तकं। रवं दिशं च नवीक्षेत ततो यायाज्जलाशयं। शौचं कृत्वा यथाशास्त्रविधिनाचमनं ततः। दंतकाष्ठं ततो भुंक्त्वा स्नायात्तदनु नारद॥ द्विजेति नारदसंबोधनं। ओं ल
यात् हरेः। इषुक्षेपं दूरमतीत्य निर्ऋत्यामिषुनिक्षेपमतीत्याभ्यधिकां भुवमिति विष्णुवचनात्॥ शौचमाह नारदपंचरात्रे॥ तिस्रो लिंगे मृदा देया एकैकांतरमृत्तिकाः। पंच वा
मकरे देयाः तिस्रः पाण्योर्विशुद्धये॥ मूत्रोत्सर्गे विशुद्धिः स्यात्पुरीषस्यापनेतरे। पंचापाने मृत्तिकाः स्युरेकैकांतरमृत्तिका। दशवामकरे देयाः सप्त तूभयहस्तयोः। पादयो
स्तिस्रभिः शुद्धिर्न घ्राणशुद्धिस्तु पंचभिः॥ निर्घोतये ततो विप्रकच्छौ वै सप्तमृत्तिकाः। स्वेदे हे स्वेददोषघ्नं ब्राह्मणः कर्मसिद्धये। मत्कातो क्षत्रियोऽर्धोच वर्षो शक्ये वे निरूपिता। प्राव
णमुक्ता वयेत्तस्मादेकमन्त्रवर्जितं। शरद्ग्रीष्मवसंतेषु नित्यं कार्यं क्रियापरैः॥ एतस्मादपि चैकैकां पममृत्तिकां परिलोपयेत्॥ हेमंते शिशिरे चैव श्रोत्रियः संयतः स्थितः। पथि
शौचविधानं च देशकालानुरोधतः। गंधलेपमपास्यैव मनः शुद्धाविशुद्ध्यतीति। एकैकांतरमृत्तिका इत्यस्यायमर्थः॥ प्रथममेकवारं मृज्जलैर्लिंगं प्रक्षाल्य ततो वामकरमे
लैः प्रक्षाल्य पुनर्लिंगमिति क्रमेणेति॥ कपिलपंचरात्रे॥ यदिवा रात्रिशेषं शौचं तदर्धं निशि कीर्तितं। तदर्धमातुरे प्रोक्तं मातुरस्यार्धमध्वनीति। दंतकाष्ठमप्याह दक्षिणामू
र्त्तिः॥ क्लीं मंते कामदेवाय सर्वजनं बालिखेत्। प्रियायेति हृदंतोयं मंत्रं दंतविशुद्धये॥ तथा पंचमीश्वरतंत्रे॥ प्रत्यहं दंतकाष्ठं तु ...क्षकाष्ठे तु मा... एल। मोहजे त्वादिरं
प्रोक्तं स्तंभने वृलपल्लवं। वश्ये वाश्वत्थकाष्ठं तु रक्षार्थं वजुनस्य हि। न्यग्रोधं मो महादेवि त्रिलोकेषु न विद्यते॥ उत्तरतंत्रे॥ वक्रं मल्लाणुनाभिः प्रक्षालयेत्सिद्धहेतवे॥ अ
थ स्नानं॥ तच्च त्रिविधं॥ औदकं मंत्रध्यानभेदात्। तत्रौदके स्नानं॥ नारदपंचरात्रे॥ अथाधिकारसिध्यर्थं स्नानं वक्ष्यामि पर्वतः। येन मनसो निर्विकल्पस्य पापहोमार्हतां व्रजेत्॥

श्री
२५७

© Dharmartha Trust J&K. Digitized by eGangotri

शंकुनास्त्राभिजप्तेन भुवि स्थाप्य मृत्तिकां । गृहीत्वास्त्रेण संचित्य यायाज्जलनिकेतनं । तत्रादौ जलकूलं तु क्षालयेदस्त्रवारिणा । मृदं कृत्वा द्विधा तत्र एकं
ना गोपर्णं नतः । निधाय गोमयं दर्भास्तिलोद्धाप्य अभिमंत्रितान् । लौकिकं गौणमध्येन भागेनैकेन यत्नतः । मलस्नानं पुरा कृत्वा विधिस्नानं समाचरेत् । अ
भिमंत्रितानस्त्रेण । विधिस्नानं वैदिकं स्नानं स्मृतिसमुच्चये । न प्रातर्मृत्तिकास्नानं कुर्यात्त्रिशिखागोमध्ये । वसिष्ठसंहितायां कृत्वादौ वैदिकं स्नानं ततस्तां
त्रिकमाचरेत् । विन्यस्यांगेषडंगानि प्राणायामपुरःसरं । श्रीसूर्यमंडलात्तीर्थमाकृष्यांकुशमुद्रया । आत्मरक्षां ततः कुर्याद्दिग्रक्षेपेण वास्त्रतः । निमज्य त
त्र श्रीदेवं ध्यायन् शक्त्या मंत्रं जपेत् । अन्यकुंभमुद्रां च बध्वा सिंचेत् स्वमूर्धनि । तीर्थावाहनमंत्रास्तु प्रयोगे वक्ष्यते । एतत्तीर्थं पि फुल्लानि शयार्घ्यं सावाहनं स्ना
नमभिध्याय । वह्निपुराणे । योनेन विधिना स्नायात् यत्र कुत्र जले द्विजः । स तीर्थफलमाप्नोति तीर्थे दशगुणं फलमिति । सिंचेत् स्नात्रिर्वाधो । सप्तकृत्वोभिषिच्या-
थ मनुना मंत्रितैर्जलैरिति कपिलपंचरात्रात् । त्रिधाभिषिच्य मूलेनेति उत्तरतंत्रात् । तथा ततः संक्षेपतो देवान्मनुष्यांस्तर्पयेत्पितॄन् । स्नात्रे विशेषमाह त्रिपुरार्ण
वे । विधाय वैदिकं स्नानं ततस्तांत्रिकमाचरेत् । मृदमस्त्रेण वा यतेन तामभिमंत्र्य वा । शिखामंत्रेण संशोध्य मंत्रयेन्मूलमंत्रतः । मूर्धादिपादपर्यंतं विलिप्य च
तया वपुः संमुखीकरिणीं मुद्रां बध्वा प्राणान्निरुध्य वा । निमज्य तत्र हृष्टीमुत्थाय नाभिमात्रजले स्थितः । प्राणानायम्य ततः कृत्वा मूलमंत्रेण मंत्रवित् । विन्यस्य च षडंगा
नि कल्पयेत्तीर्थमग्रतः । ततः संप्रार्थयेत्तीर्थं सूर्यात्तन्मंडलं ततः । सृणिमंत्रेण मंत्रज्ञो मिलितांकुशमुद्रया । तीर्थावाहनमंत्रेण तीर्थमावाहयेत्प्रिये । मूलमंत्रेण सं
योज्य कल्पिते तीर्थमंडले । तीर्थशक्तिं च तत्रैव समावाह्यार्कमंडलात् । ध्यात्वा तन्मनुनाभ्यर्च्य गंगामंत्रेण मंत्रयेत् । सप्तकृत्वः शिवेन चाभिमंत्रणमंत्रद्वयं प्रिये जलं करे
व्योमषट्दीर्घस्वरभिन्नं सबिंदुकं । सर्वानंदमये तीर्थशक्तिं चेहि युगं द्विठः । जलं वकारः । व्योम हकारः । तेन क्षाए तल षट्दीर्घस्वरभिन्नो क्रां क्रीं क्रूं क्रैं क्रौं क्रः इति द्विठः स्वाहाकारः
तथा । एकविंशाक्षरः प्रोक्तस्तीर्थशक्तिमनुः प्रिये । अत्र त्रिशक्तीति सर्वोधनपदं दीर्घत्वात् । वकारो विसर्गिप्लुतकः । एकविंशाक्षर इत्युक्तेः । तारं नमो भगवति कुर्यादेवं ततो विको
अंबालिके महामालिके ह्येहि भगवत्यथ । अशेषतीर्थजलवाले मायाश्रीबीजयोरथ । शिवजटाधिरूढे च गंगे गंगांबिके द्विठः । गंगाविद्येयमाख्याता त्रिपंचाशदक्षरैः । तारः
प्रणवः । माया ह्रीं द्विठः स्वाहाकारः । अत्रैवेति दिव्यत्वात् । सुगममन्यत् । तथा । भुवनेश्याः समालोक्य अमृतीकृत्य सुधांशुना । कवचेनावगुंठ्याथ संरक्ष्यास्त्रेण मंत्रयेत् । मू
लेन देवतां तत्र सांगां सावरणां प्रिये । समावाह्य जले ध्यात्वा तद्रूपं निर्गतां । ध्यात्वा तीर्थं स्मरन्मूलं मंत्रं मंत्रेण तर्पयेत् । त्रिधा देवीं समुत्तीर्य जलाद्धौते शुभांशुके । परिधा

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्णे
२५८

258

मार्थतिलकं कृत्वा संध्यां समाचरेत्। तीर्थशक्तिध्याने प्रयोगे वक्ष्यते। अथैत च्छारुणस्नानाशक्तानां मंत्रस्नानविधिमाह। नारदपंचरात्रे। अथ मंत्रं प्रवक्ष्यामि लोपामा
वेतु यत्कार्यं दुर्गे काले तु शीतले। तमन्वेक्षि प्रसिध्यर्थं गुरुकार्ये धनं द्विजः। प्राप्य पद्यथविघ्ने द्विनिशाभागे तथा मुने। घक्षाल्य पादाववाचम्य प्रोक्ष्य के नतु वारिणा। स्थानं दश
दिशः प्राग्वक्त्रसंशोध्योपविश्य ततः। अस्त्रं हस्ततले न्यस्य क्रमान्न्यासोस्ततस्तु वै। मूलमंत्रादितः सर्वमंत्रगणेनैव। केवलोदकस्नाना संस्कारपवित्रितात्मा प्र
भासादिषु तीर्थेषु यत्फलं स्नातकस्य तु। तेषां दशगुणं स्नाना मंत्रस्नानस्य नारद। ध्यानस्नानमथो वक्ष्ये ध्यानमपि परं च यत्। रवास्थितं पुंडरीकाक्षं मंत्रमूर्तिं प्रभुरमृत
तत्पादोदकजां धारां निपतंतीं स्वमूर्धनि। चिंतयेत् सूक्ष्मरंध्रेण प्रविशंतीं स्वकां तनुं। तया संक्षालयेत् सर्वमंतर्देहगतं मलं। तत्क्षणाद्विरजा मंत्री जायते स्फटिकोपमः।
इदं स्नानं वरं भात्रात् स्नानेश तगुणं स्मृतं। तस्मादेकतमे स्नाने कार्यं श्रद्धापरेण तु। स्नानपूर्वाः क्रियाः सर्वा यतः सम्यास्तु नारद। तस्मात् स्नानं पुरा कुर्यात् ... कू
आत्मनः। शैवागमे॥ मनसा मूलमंत्रेण प्राणायामपुरःसरं। कुर्वीत मानसं स्नानं सर्वत्र विहितं च तत्। पुंडरीकाक्षमित्युपलक्षणं। तेन स्वेष्टदेवतां स्मरेदिति। मंत्र
सुस्नेष्वप्यशक्तेषु। ततः शिवात्मकैर्मंत्रैः कृत्वा तीर्थं शिवात्मकं। माहेन्द्रे सहितामंत्रैः स्ततो यसमाचरेदिति॥ शैवागमात्॥ संहिताणु। व्योमव्यापी च यो मंत्रः पंच ब्रह्म
यानि वा ये मंत्राः शिवगायत्र्या रुद्रं वेति यथाक्रमं। सर्वपापहराः प्रोक्ता विद्येयं शिवसंहितेति। व्योमव्यापी तु। ओं नमो भगवते व्योमव्यापी चैव प्रकीर्त्यते। ...
तत्र द्व्येयं व्योमव्यापी प्रकीर्तितं इति। नारदपंचरात्रे॥ सुधौतं परिधायाथ वस्त्रयुग्ममखंडदं। तदभावाद् धःशाटीयोगपट्टकसंयुतं। नवैकवाससा यस्मात्कवित
नेकदा चन। नृसिंहपुराणे॥ तक्रांतिकं समासाद्य शुक्ले धौते च वाससी। परिधायोत्तरीयं च न कुर्यात्केशधूननं। स्मृतिसमुच्चये। बहिःस्नानस्तु न यादे स्नानवस्त्र
मधस्यजेत्। ऊर्ध्वं त्यजेत् स्नानवस्त्रं गृहस्नातो यदा भवेत्। उत्तरोम दक्षिण्यं सालये शुद्धिहेतवे। निष्पीड्य स्नानवस्त्रं तु प्रातःसंध्यां समाचरेत्। मध्याह्ने तर्पणादूर्ध्वं
वस्त्रनिष्पीडनं भवेत्। यामले। विधाय वाससी शुद्धे तिलकं वर्णभेदतः। वसिष्ठः। ऊर्ध्वपुंड्रं त्रिपुंड्रं वा कृत्वा संध्यां समाचरेत्। अत्र वाशब्दः ऊर्ध्वपुंड्र... परलो
परलोपस्थापकः। अत एव नारदपंचरात्रे॥ ब्राह्मणस्योर्ध्वपुंड्रं स्यात् क्षत्रियस्य त्रिपुंड्रकं। वैश्यपुंड्रमर्धचंद्रं शूद्राणां वर्तुलाकृतीति। ऊर्ध्वपुंड्रलक्षणं तु कूर्मपुराणे।
यस्तु नारायणं देवं प्रपन्नः परमं पदं। धारयेत् सर्वदा शूलं ललाटे गंधवारिभिः। यत् तत्प्रधानं त्रिगुणं ब्रह्मविष्णुशिवात्मकं। धृतं तेन भवेत् ... सशयः।
शेष यथाशक्तानां तु यानुवर्णिकानामपि त्रिपुंड्रधारणमावश्यकं। विना भस्म त्रिपुंड्रेण भक्षणात् सर्वपापानां भस्मेति परिकीर्तितं। अत एव कार्ये ... स्नानं कृत्वा

श्री
२५८

© Dharmartha Trust J&K. Digitized by eGangotri

यः स्नाति भस्मना तत्सर्वं भगते भस्मयथाग्निस्तेजसा वनमिति लिंगपुराणवचनात्। भस्मत्रिपुंड्रधारणविधिस्तु बोधायनीयसंहितायां। शिवाग्नेर्भस्मसंग्राह्यमग्निहोत्रो[illegible]द्भवं तु वा।
वैवाह्याग्नुद्भवं वापि पक्वं शुचि सुगंधि वा। कपिलायाः शकृच्छस्तं गृहीतं गगने पतत्। न क्लिन्नं नातिकठिनं न दुर्गन्धि न चोषितं। उपर्यधः परित्यज्य गृह्णीयात्तं यदा खंडीकृ
त्य शिवाग्नौ तु निक्षिपेन्मूलमंत्रतः। अपक्वमतिपक्वं च संत्यज्य भसितं सितं। आदाय वाससा लोढ्य भस्माधारे विनिःक्षिपेत्। भस्मसंग्रहणं कुर्यो द्व[illegible]तिसातिउ
हासने कृते यस्माद्यद्भस्म प्रजायते। गोमयापहरणादेर्विशेषमाह तत्रैव। यद्वा धरामसंस्पृष्टं सद्य एवानीय गोमयं। गोमेन पात्रे संशोष्य त्रपोरणविनिर्दहेत्। पुरुष
णसमुद्धृत्य शान्तेन विशोधयेत्। इत्थं तु संस्कृतं भस्म अग्निरित्यादिमंत्रतः। तस्मात्कुलेति यजुषा मंत्रेण रुद्रसंख्यया। प्रणवाद्यैस्तुर्यो हृदंते नामभिः शीर्षकैः पंचवर्ण
द्यक्षराद्वैभीलांकोदरहस्तु वा। त्रिपुंड्रधारणं कुर्यान्मूर्ध्नि पंचाक्षरेण वा। त्रिपुंड्रं धारयेन्मंत्री साक्षाच्छिव इवापरः। नामभिः सद्योजातादिभिः असरावत् असद्यवाव
कः नामपंचकत्वात्। अत्र त्रिपुंड्रधारणेऽङ्गुलिनियमो जाबालोपनिषज्जलेन॥ त्रिपुंड्रं धारयेत्सश्वा कुलविष्णुशिवात्मकं। मध्यांगुलिभिरादाय तिसृभिर्मूलमंत्रितो।
अनामामध्यमाङ्गुष्ठैरथवा स्यात्त्रिपुंड्रकं॥ स्कंदपुराणे॥ सनत्कुमारं प्रति श्रीशिववचनं॥ सद्यादिभिर्[illegible]ब्रह्ममये महामंत्रैश्च पंचभिः परिगृह्याग्निरित्यादिमंत्रैर्भ ना
स्माभिमंत्रयेत्। मानस्तोकेन संमर्द्य शिरोललिपेत्त्रियंबकं। त्रिस्रो रेखा भवंत्येषु स्थानेषु मुनिपुंगव। भ्रुवोर्मध्यं समारभ्य यावद्दन्तो भवेत्तु वा। मध्यमानामिकांगुल्यो मध्ये न प्र
तिलोमतः। अंगुष्ठेन कृता रेखा त्रिपुंड्रस्याभिधीयते। तिसृणामपि रेखाणां प्रत्येकं नवदेवताः। अकारो गार्हपत्योऽग्निर्भूर्धर्मात्मा रजोगुणः। ऋग्वेदश्च क्रियाशक्तिः प्रात
तः सवनमेव च। महादेवश्च रेखायाः प्रथमायाः प्रकीर्तितः। उकारो दक्षिणाग्निश्च नभः सत्त्वं यजुस्तथा। माध्यंदिनं तु सवनं इच्छाशक्त्यंतरात्मकः। महेश्वरश्च रेखाया द्वितीया
यास्तु देवताः। मकारो हवनीयश्च परमात्मा तमो दिवौ। ज्ञानशक्तिः सामवेदस्तृतीयसवनं तथा। शिवश्चेति तृतीयाया रेखायास्त्वधिदेवताः। एतानि नित्यं नमस्कृत्य त्रिपुंड्रधा
रयेत्तु विगमहेश्वरव्रतमिदं सर्ववेदेषु कीर्तितं। मुमुक्षुभिर्मनुष्यैः सेव्यं पुनस्तेषामसंभवः। त्रिपुंड्रं धारयेद्यस्तु भस्मना विधिपूर्वकं। ब्रह्मचारी गृहस्थो वा वानप्रस्थो यति
रेव वा। महापातकसंघातैर्मुच्यते चोपपातकैः। तथान्यैः क्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः। वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशय इत्यादि। अथ प्रकारांतरेण तिलक
प्रकारस्तु। इत्थं तु संस्कृतं भस्म अग्निरित्यादिमंत्रतः। विमृज्यांगानि संस्पृश्य पुनरादाय मंत्रतः। तस्मात्कुलेति यजुषा मंत्रेण रुद्रसंख्यया। ललाटे ब्रह्म चिह्नेयं हृदये मह
वाहनं नाभौ स्कंदो गले पूषा रुद्रो दक्षिणबाहुके। आदित्यो बाहुमध्ये वशी शीघ्रमणिबंधके। वामदेवो वामबाहौ राहुमध्ये[illegible]नमः मणिबंधे च वसवः पृष्ठे द

© Dharmartha Trust J&K. Digitized by eGangotri

शेहरः स्मृतः। शंभुः कुकुदि संप्रोक्तः परमात्मा शिरः स्मृतम्। अमंत्रकं वा प्रवीयसंहितायां। पुनर्न्यस्तकरो मंत्री त्रिपुंड्रं भस्मना लिखेदिति। एतत्‌ऊर्द्ध्वादि विषयं।
अत्र भस्मधारणे ये विशेषास्ते वक्ष्यंते॥ श्यामा वामकेश्वरतंत्रे षट्शत्यां। श्रीविद्यायजनप्रकरणे।। त्रिपुंड्रकविधारी चेति। एतत्त्रिपुंड्रधारणं चंदनादि सुगंध
द्रव्येण कार्यं। रम्यं त्रिपुंड्रं दधज्जाले नेदनं चंदनेन जननि ध्यायामि ते मंगलमिति भवेगता श्री ह्रीं सेख्लेलात्। अथ संध्या।। तत्र महाकपिलपंचरात्रे गुप
विश्यभुवौ देशे प्राणायामत्रयं क्रमात्। मूलमंत्रेण कृत्वा तु देहे कुर्वीत मार्जनं। शैवागमे प्राणायामत्रयं कृत्वा मूलमंत्रेण मंत्रवित्। अंगानि विन्यसेद्देहे करन्या
सपुरःसरं। अमृतीकृतपुरतोऽज्जलं वै धेनुमुद्रया। अभिमंत्र्य च मूलेन सप्तवारं च साधकः। अकारादिक्षकारांतैर्मातृकार्णैः सबिंदुभिः। प्रसन्नं प्रोक्षये
न्मूर्द्ध्नि कुशैर्मूलेन च त्रिधा। देवं ध्यात्वाथ मनुवित् भानुमंडलसंस्थितं। आदाय तोयमामंत्र्य बीजैर्भूतात्मकैस्तथा। लं वं रं यं हमिति वतान्युक्तानि सुरार्चिता। समस्त
कृत्वा ततो मूलमंत्रेण त्रिः पुनश्च ततः। वामहस्ते निधायाथ गलितैर्जलबिंदुभिः। संप्रोक्ष्य मूलमंत्रेण दक्षहस्तेन मूर्द्धनि। नासयाकृष्य शिष्टेन तेजोरूपेण
ते ततः। प्रविश्यांतर्गतं सर्वं मलं संशोध्य निर्गतं। दक्षनासापुटेनैव ततस्तत्वा दक्षिणहस्तगं। वामभागे वज्रशिलां ध्यात्वास्त्रेण च ततः क्षिपेत्। प्रक्षाल्य हस्ता
वाचम्य मूलमंत्रेण मंत्रवित्। गायत्र्याथ च मूलेन दद्यादर्घ्यत्रयं बुधः। शिवाय मंडलस्थाय रवेर्मूलेन तर्पयेत्। त्रिधा ततस्तु गायत्रीमष्टाविंशतिवारकं ज
जपित्वा मूलमंत्रं च शतमष्टोत्तरं ततः। समर्प्य तज्जपं मंत्री देवमुद्रास्य मंडलात्। निधाय स्वीयहृदये ततस्तर्पणमाचरेत्। इति। मूलेनार्घ्यदानं तु गायत्री रहितं मं
अपरं तु ये।। तथा शैवागमे।। संध्योपासनकर्त्तव्यः शंभोराज्ञैवमेव हि। दीक्षितः संध्ययाहीनो न दीक्षाफलमश्नुते। संध्याहीनो न्यसं ध्यायां पूर्वसंध्याक्रियामथ।
विधायोत्तरसंध्यायाः क्रियां कुर्याद्दतं द्वितः। अत्र त्वप्राधान्येनापि कर्तव्यं यद्युक्तं तंत्रराजे।। स्नानसंध्यार्चनालोपे जपेद्विंशोत्तरं शतं इति। तथा। ध्यात्वा देवं जले
सम्यक् पूजयित्वाथ मूलतः। अष्टोत्तरशतावृत्त्या तर्पयेन्मूलमंत्रतः। तदर्धेन ततो दशधा वाथ तर्पयेत्। ततस्तदंगावरणदेवतास्तर्पयेत्क्रमात्। एकैकांजलिना
ततस्तन्नाममंत्रेण मंत्रवित्। पुनः संपूज्य देवेशं सांगावरणकं ततः। समुद्वास्य हृदि स्वीये स्वात्मानं तन्मयं स्मरेत्। इति।। नारदपंचरात्रे।। ततस्तोयादके संपूर्णभांड
मादाय पापाशिनी। एकांते निर्जने याया अन्नोत्तं दोषवर्जितं। हृन्मध्यस्थं स्मरन् विष्णुं प्रबुद्धानंदविग्रहं। दिगंतरं तु वीक्षेत मौनी संरोधितो च तथा महाकपिलपंचरा
त्रे।। मूलमंत्रं जपन् गच्छेद्यावत्प्राप्नोति वै गृहं। प्राप्य हस्तौ च पादौ च प्रक्षाल्याचम्य यत्नतः। यागमंडपमासाद्य विशेत्कृत्वा प्रदक्षिणं।। डमरतंत्रे।। स्नात्वा तु शुचि

© Dharmartha Trust J&K. Digitized by eGangotri

तां प्राप्तः सुस्नातो देवपूजने पूजावेद्या बहिः स्थित्वा चतुर्हस्तान्तरे धिष्ण्यागृहे वे द्वारदेशस्थः प्रणम्य मनसा गुरुं। प्रणमेद्दिक्षु देवं स्वं दिक्पालानपि चेतसा। यत्पूर्वमर्जितं
पापं तद्दिने न्यद्दिने पि वा। प्रायश्चित्तेनोपवृद्धं तत्पापं स्मरेद्धिया। तत्पापस्यापस्थापनार्थं मन्त्रद्वयमुदीरयेत्। मन्त्रद्वयं तु प्रयोगे वक्ष्यते। तथा। एवं कृते प्रथमतः पा
पो ह्यारणे कर्मणि। यत्स्याद्दृढतरं पापं न दूरे चावतिष्ठते। अतीते पूजने स्नाने स्वं प्रयाति पुनश्च न तत्। यत्स्यादल्पतरं पापं तन्नाशमुपगच्छति। पूतये न्ये कृपापस्य काम
मिष्टं क्षालयेद्वत्॥ तन्त्रान्तरे॥ प्रक्षाल्य पादौ च हस्तौ चाचम्य यत्नतः। दद्यादर्घ्यं दिनेशाय तत्र कारणमिहोच्यते। गोमयेनोपलिप्तायां भूमौ कृत्वा तु मण्डलं। सिन्दूरेण तन्तः
पश्चादुपविश्य निजासने। प्राङ्मुखः प्रणमेद्दिक्षु देवतां भक्तितत्परः। प्राणायामत्रयं कृत्वा सूर्यमन्त्रेण मन्त्रवित्। विन्यस्य च तत्र ध्यात्वा दीनं ध्यात्वा सूर्यमनन्यधीः। तत्कौ
त्वा कृतविधानेन पूजयेदुपचारकैः। पुरतो मण्डले कृत्वा जलेन चतुरस्रकं। निधाय तत्र साधारं सजलं ताम्रपात्रकं। गन्धपुष्पाक्षतान् दत्त्वा [illegible] दूर्वा सर्षपसंयुतान्। रक्ति
ला रक्तपुष्पाणि दूर्वाश्चापि प्रविन्यसेत्। सूर्यमन्त्रेण तत्पात्रं स्पृशन्नष्टोत्तरं शतं। अभिमन्त्र्य च तत्पात्रं समुत्थाप्य करद्वयात्। मूर्ध्नि तं सूर्यमन्त्रेण दद्यादर्घ्यं विच
क्षणः। जपेत्ततो यथाशक्ति सूर्यमन्त्रमनन्यधीः। तदर्घ्याम्बुप्लुतं सूर्यं ध्यायन्न देशिकसत्तमः। स्मृत्वा प्रणम्य विसृजेन्मण्डलेन दिवाकरं। सूर्यमन्त्रं त्र्यक्षरं। तन्तुत
न्त्रके रणे दृष्टं यावन्न दीयते चार्घ्यं भास्कराय दिने दिने॥ तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरीमिति। अर्घ्यदानमिदं श्री [illegible] पुरारोग्यवर्धनं। धनधान्यप
शुक्षेत्रपुत्रमित्रकलत्रदं। तेजोवीर्ययशःशक्तिविद्याविभवभाग्यदं। ततः स्थाय विधिवत् द्वारपूजां समाचरेत्। परमपर्याम्बु नाप्रोक्ष्य विघ्नान् [illegible] समर्चयेत्। न
दक्षिणे महालक्ष्मीं वामे चैव सरस्वतीं। द्वारश्रियं च तन्मध्ये शाखयोर्दक्षिणान्ययोः। गणपं क्षेत्रपालं च शंखपद्मनिधी क्रमात्। मायाशक्तिं च विघ्नशक्तिं गङ्गां च य
मुनां ततः। धातारं च विधातारं ऊर्ध्वादिक्रमतो यजेत्। अधश्च देहलीमिष्ट्वा द्वारपालान् समर्चयेत्। पश्चिमद्वारमारभ्य द्वारपाला अमी क्रमात्। नन्दी चैव महा
कालो गणेशो वृषभस्तथा। ततो भृङ्गिरिटिः स्कन्दो उमाचण्डेश्वरौ ततः। एते वा सोमहेशस्य द्वारपालाः प्रकीर्तिताः। नंदः सुनंदश्चण्डो प्रचण्डो बलसेनकौ। प्रबलो भद्रनामा च
सुभद्रश्चाष्टमः स्मृतः। क्रमादमी समभ्यर्च्या वैष्णवद्वारपालकाः। वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ। लम्बोदरश्च विकटो विघ्नराजस्ततः परं। धूम्रवर्णश्च संप्रोक्ता
विघ्नेशद्वारपालकाः। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथैन्द्राणी चामुण्डा चण्डिका महा। एता देव्यः क्रमाद् घोषा क्रमयो द्वारपालिकाः। एता एव सौ
रद्वारपालिका अपि हि ज्ञेयाः। सौरशक्तिमहोविगायते सौन्दर्यसीमास्पदमिति नामदेवतन्त्रवचनात्। आकृष्य शिशिरे विश्वे श्रीकांपावपुः॥ इति तन्त्रान्तरवचनात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्ण
२६०
260

अत्र द्वारदेवतानां ध्यानानि प्रागेवोक्तानि ॥ तथा पश्चिमद्वारमासाद्य तालत्रितयपूर्वकं । द्वारमुद्घाट्य चास्त्रेण मंत्रितां सर्षपाक्षतान् । पुष्पपुञ्जांश्च विकिरेन्मंडपाभ्यंत
रे बुधः । नाराचमुद्रया सम्यगस्त्रमंत्रेण देशिकः । पूर्णायागे । सिद्धार्थाक्षतपुष्पाणि नाराचास्त्रधिया बुधः । अस्त्रमंत्रं समुच्चार्य मंडपांतर्विनिक्षिपेत् ॥ नाराचमुद्र
या । अपक्रामंतु भूतानि त्येतन्मंत्रद्वयं पुनः । पठित्वाक्षतसिद्धार्थपुष्पाणि विकिरेत्ततः । अस्त्रमंत्रेण मंत्रज्ञो मंडपाभ्यंतरे बुधः । मंत्रद्वयं प्रयोगे वक्ष्यते । अस्त्रम
स्वोपास्यमंत्रांगभूतेन । यदुक्तं पारिजाते ॥ हकाररेफौ च विसर्गवन्तावस्त्राय यः फट् द्विकारवच्च संददेत । उक्तांतरे सर्षपमक्षतांश्च पुष्पाणि मुंचेदिति ॥ ...
गोक्षतांस्तु विघ्नानां वर्णोदद्याच्च वामतः । सोमशंभुः । मंडपाभ्यंतरे विघ्नान्न्यामपादपुरःसरं । प्रविश्य विघ्नांस्त्रिविधान्... तालभ्यंतरिक्षगान् ...
समुच्चार्य पार्ष्णिघातादिभिस्त्रिभिः । विघ्नानुत्सारयेदिति ॥ तूर्णयागे । पार्ष्णिघातैस्त्रिभिर्भूमौ स्तालैस्तानंतरिक्षगान् । दिव्यान् विघ्नानुत्सारयेद् ...
क्षणावलोकनात् । पार्ष्णिघातैर्वामपादस्य वामपार्ष्णिस्त्रिभिर्घातैर्भूमिष्ठानिति सोमशंभुवचनात् । उत्तरतंत्रे ॥ विघ्नानुत्सार्य विधिवद्द्वारमाकीर्य वास्तसा
पंचगव्यार्घ्यतोयाभ्यां प्रोक्षयेन्मंडपांतरं । श्रीकुलार्णवे । संमार्जनोपलेपाद्यैर्दर्पणोदरवत्कृतं । वितानधूपदीपादिपुष्पमालादिशोभितं । पंचवर्णरजश्चि
त्रं स्थानशुद्धिरितीयं मता ॥ नैवेद्यास्ति मिवेच द्वास्तु पुरुषं चंदनादिभिः । ईशाने दीपनाथं वक्ष्ये त्रपालाहयाततः । संविशेदासने मंत्री ... क्षेत्रपालस्यार्थं नमंत्रः
प्रयोगे वक्ष्यते । उत्तरतंत्रे ॥ अस्त्रः फडिति च मंत्रेण पूजावेदीं ततो विशेत् । संस्कुर्यादासनस्थानं च तलभिवीक्षणादिभिः । संस्कारैस्तत्र संपूज्य वेधातः पीठदेवताः । आधा
रशक्तिमारभ्य स्वासने तत्र विन्यसेत् ॥ आपस्तंबः ॥ पूजामध्यसनमथापीयवेला जिनकुशोत्तरं । तत्रोपविश्य विधिवत्स्मरेद्दिग्गुरुपादुकां ॥ योगिनीतंत्रे ॥ पृथ्वीमंत्रे
णासने सन्निविष्टा इति । मंत्रः प्रयोगे वक्ष्यते । भैरवीतंत्रे ॥ मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छंद ईरितं । पृथ्वी देवता प्रोक्ता विनियोगो निजासने ॥ उत्तरतंत्रे ॥ आस
नेनु चलुत्कोणगलेशं च सरस्वतीं । दुर्गां क्षेत्रपतिं चापि वास्त्वादिषु समर्चयेत् ॥ गौतमीतंत्रे ॥ प्राङ्मुखो वोदङ्मुखो वापि स्वस्तिकासनमास्थितः ॥ उत्तरतंत्रे ॥ उदङ्मुखः प्रा
ङ्मुखो वा भूत्वा प्रयतमानसः । स्वस्तिकासनमासीनः पद्मासनमथापि वा ॥ तंत्रांतरे ॥ स्वस्तिकादिक्रमेणैव कृत्वा कायविशेधुधः । स्थापयेद्दक्षिणे भागे पूजाद्रव्या
णि वामतस्तथा । सुकल्पितांबुसंपूर्णं सव्ये कुंभं सुशोभनं । प्रक्षालनाय करयोः पात्रं पृष्ठे निधापयेत् । घृतादिज्वलितान्दीपान् स्थापयेत्परितः शुभान् । दर्पणं वाम
रत्नं तालवृंतं च पादुके । यथायथं तु संस्थाप्य संस्कुर्यात्तानि वा लयवान् ॥ उत्तरतंत्रे ॥ पुष्पनैवेद्यगंधादि फ्रां फ्रूं फडिति मंत्रकैः । नाराचमुद्रया द्रव्यासमया

श्री
२६०

© Dharmartha Trust J&K. Digitized by eGangotri

व विलोकयेत्। यदा त्वनानेन विज्ञातं सम्यक्पुष्पादिदूषणं। अस्पृश्यस्पर्शनं दुर्यं नैवापि यदन्यायार्जितं च वा। तथा निर्माल्यसंस्पृष्टं कीटाद्याघ्रातदूषणं च यत्। तत्सर्वं
नाशमायाति नैवेद्यावलोकनात्। ततोऽरमिति मंत्रेण शिरकां दीपस्य संस्पृशेत्। सनुल्काकुम्भदीपानि निष्कासादःसुखप्रदः। पतंगकेशकीटादि दाहात्केश्यादेसं
हतो वसामज्जादिसंभूते यज्ञादावुपयोजने। अज्ञातदूषितं सर्वं दोषः स्पर्शादिनश्यति। नारसिंहेन मंत्रेण देवतीर्थेन संस्पृशेत्। पानीये च समभ्यसेद्वीक्ष्य गुह्यं च पात्रे
कः। वामेन पाणिना धृत्वा वामपार्श्वस्थितं तदा पात्रमाधारमंत्रेण संस्कुर्वन् संस्पृशेत्कलं। यदृष्टानादेयपयादि संसृष्टिरिह संगतात्। द्रव्यदूषणं पात्रे तोये वाद्यान
तो भवेत्। जलाशयस्थावस्पर्शे ज्ञानस्याद्य संगतं। दूषणानि विनश्यंति तानि वै देवपूजने। नृसिंहमंत्र एकाक्षरः सतत्वाकरणे हि यः। आधारमंत्रस्तु स्यात्संहारबीजाक्षरं
विंदुयं दृश्यर्ध्वपरि येऽज्ञिमिति स्वयमस्तु क्रमः। संहारबीजाक्षरे नामाद्य बीजाक्षरमित्यर्थः॥ पुष्परत्तेत्र॥ कृत्वांजलिपुटे भृत्वा वामदक्षिणपार्श्वयोः। नत्वा गुरुं गणेशानं पुरतः स्व
इष्टदेवतां। सुगंधपुष्पाण्यादाय वंदनाकाय मंत्रवित्। मर्दयित्वा करे सम्यक् सुरभीकृत्य साधकः। वामहस्ते समादाय निर्मथ्याघ्राय तत्पुनः। उद्भूय मालामने त्वेशा
शान्यां हरत्स्यजेत्। यजेत्तारायमुद्रया। क्षिपेदुत्तरतः पुष्पं मंत्री नाराचमुद्रया। इति तंत्रान्तरवचनात्। कालिकापुराणे॥ कुसुमं विष्णुमंत्रेण स्वांगुल्याग्रेण साधकः
विमर्दनार्थं गृह्णीयात्करशोधनकर्मणि। निर्मथ्य रोमबीजेन जिघ्रन्घ्राणेन तत्पुनः। प्रासादेन परित्यागो दिश्यैशान्यां विशेषतः। एवं कृते तु करयोर्विशु
द्धिरतुला भवेत्। अंगुल्यग्राणि शुद्धानि पुष्पाणां ग्रहणे कुर्वेत्। तलद्वयं मर्दनात्तु विशुद्धमपि जायते। निर्मथनाघ्राणे एषु प्राणानासाग्रमुन्नमं। नीर्यानि
वसमायांति नासिकाग्रं करं प्रतिपुष्पं स्पृशः। साग्निवंदेणरंजितः शून्यसंयुतः रुद्रांतोपरि संस्थाप्य मंत्रोऽयं वै ध्रुवः स्मृतः। आगादिर्वासुदेवांतमंत्रो... संस्थित
शं भुचूडाशिखाविंदुयुक्तः प्रासाद उच्यते। ङपांते हकारः अत्र हकारस्योपांत्यत्वं तु मातृकायाः पंचाशदक्षरत्वेन द्वितीयलकारस्याग्रहणात्। अग्नी रप
वं द्रुः सकारः शून्यं विंदुः रुद्रांतः ऐकारः। एतेन भैरवा वाग्भवबीजमुक्तं। आगादिर्हकारः वासुदेवांतः औकारः शंभुचूडाशिखा अर्धचंद्रः विंदुरनुस्वारः। एतेन
प्रासादबीजं सिद्धं शेषबीजं तेरां ऽस्मीति। मंत्रः प्रयोगे वक्ष्यते॥ नृसिंहकल्पे। करशुद्धिं समासाद्य कुर्यात्तालत्रयं ततः। ऊर्ध्वोर्ध्वं मूलमंत्रेण दिग्बंधमपि दक्षिणे
तेन संजनितं तेजो रक्षां कुर्यात्समंततः। अस्त्रमंत्रेणेति करशुद्ध्यादिषु त्रिषु संबंधः। पाणिं विशोधयेदस्त्रमंत्रेणानुवितमस्ति दक्षिणामूर्तिकल्पवचनात्। अ
स्त्रमंत्रस्तु तत्तदंगभूतः। न तु केवलं फट्कारः। रः अस्त्राय फट् प्रोक्तमामयेद्दक्षिणं करमिति कुमसंभववचनात्। अतएव यत्र यत्रास्त्रादिपदं नामि स्यात् त

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णं
२६३

तत्र तत्र तदंगभूतास्त्वादिमंत्राः कृत्वाः। न तु पृथक् हकारसमं त्रोक्तं वचनात्। नचैवं पाद्यं याद्यं वक्ते द्याद्देवस्य हृदयाग्नेस्त्यादावप्यंगमंत्रदानप्रसंगः॥ निराकांक्षत्वात्। तत्राऽऽ
ज्ञोह्वारे स्ति प्रसंगात्। अंगमंत्रग्राहकाभावात्। मंत्रो ह्वारान्तरमेवांगमंत्रो ह्वारात्। क्वचिदस्त्रपदेनके वित्कृ हृत्पदेनोह्वारान्वेति। दिग्बंधस्तु स्वरूपमुक्तं प्रयोगसारे च
अंगुष्ठाद्यदिक्षु तर्जन्याऽऽग्नेयाद्यस्त्रवलिताग्न्येति॥ उत्तरतंत्रे॥ प्राकारत्रितयं वह्नेः कृत्वास्त्रेणास्त्रमुद्रया। स्वमुद्रयाऽथवा प्राकारमुद्रया॥ सा तु वक्ष्यते॥ सन
कुमारीये गोपालकल्पे॥ सुखासने नोपविश्य प्राणायामं विधाय वै। भूतशुद्धिं ततः कृत्वा न्यासं कुर्यादनंतरं। न्याससंपातकायाः॥ उत्तरतंत्रे। भूतशुद्धिं ततः कुर्या
त्प्राणायामपुरःसरं। पादादिजानुपर्यंतं चतुरस्रं सवज्रकं। लं पुटं पीतवर्णं च भुवः स्थानं प्रचिंतयेत्। जान्वोरानाभिवं द्रार्धनिभं पद्मेन लांछितं शुभ्रवर्णं स्वबी
जेन युक्तं ध्यायेदपां स्थलं। नाभितः कंठपर्यंतं त्रिकोणं रक्तवर्णकं। स्वस्तिकाभं स्वबीजेन युक्तं वह्नेः स्थमंडलं। कंठाद्भ्रूमध्यपर्यंतं वृत्तं षट्कं वायोः समंडलं षट्
कोणं बिंदुभिः षड्भिर्युक्तं बीजेन चिंतयेत्। भ्रूमध्याद्ब्रह्मरंध्रांतं वर्तुलं ध्वजलांछितं। धूम्रवर्णं स्वबीजेन युक्तं ध्यायेन्नभःस्थलं। इति ध्यात्वा भूतानि स्वकीये
देशिकोत्तमः। धर्मकंदसमुद्भूतं ज्ञाननालं सुशोभनं। ऐश्वर्याष्टदलं वैराग्यकर्णिकं। स्वीयहृत्कमलं ध्यायेत्प्रणवेन प्रकाशितं। कृत्वा तत्कर्णिकास
स्थं प्रदीपकलिकानिभं। सुषुम्णावर्त्मनाऽऽत्मानं परमात्मनि योजयेत्। योगयुक्तेन विधिना सोऽहंमंत्रेण साधकः। तत्रैव सर्वतत्वानि विलीनानि विचिंतयेत्।
ततः पुरुषनिभं पापमित्यादिप्रागेवोक्तं। ततः संशोषयेद्देहं यकारादिक्रमेण वै। विधाय प्राणसंरोधं वायुबीजेन वायुना। वह्निबीजेन तेनैव संदहेत्स्वकलौ
ततनुं। भस्म तद्वातमार्गेण निर्गतं चिंतयेत्सुधीः। ततो वमितिबीजेन प्लावयेत्स्वकलां तनुं। संजाते सकले देहे देवतोपासनक्षमे। आत्मलीलानि तानि स्व
स्थाने प्रापयेत्ततः। आत्मानं हृदयांभोजमानयेत्परमात्मनः। हंसमंत्रेण विधिवत्तेजोरूपं कलेवरं। देवताराधने योग्यमुत्पन्नमिति भावयेदिति। अत्र केचि
त्स्वं संयोज्य जीवमथ दुर्गमप नाडीमार्गेण पुष्करनिविष्ट शिवे सुसूक्ष्मो हंसेन देहममरेन्द्रपुरोगमेनेति योगिनीतंत्रवचनात्। सोहंमंत्रेण तथाऽप्याना
ले सिद्धिभावित्वात्। ध्यात्वैवं ब्रह्मरंध्रात्तु हृदि जीवकलां न्यसेदिति वसिष्ठसंहितावचनाच्च। हंसमंत्रेण जीवस्थानयनं सोहंमंत्रेण पुनरानयनं वदंति। यथा
गुरूपदेशमत्र विधयमिति। अत्र वायुबीजादिजपे तत्तन्मस्यादिसंख्याकांक्षः। तत्र प्रमाणं चिंत्यं। वस्तुतस्तु तत्तत्कर्मभावनावधि रेव जपो वायुबीजादीनां गा
दुक्तं कात्यायनीयसंहितायां। ततो भूतात्मकं देहं वायुबीजेन वायुना। वायुमुद्गोत्यसंशोष्य ज्ञात्वा मुद्दक्षयाऽयतेदिति। तथा योगिनीतंत्रे। दक्षिणे वह्निबी

२६३

© Dharmartha Trust J&K. Digitized by eGangotri

जेन प्राग्द्यमिति भावयेदिति ॥ कुंभसंभवः ॥ भूतशुद्धिविहीनेन कृता पूजाभिचारवत् । विपरीतफलं दद्यादभक्त्या पूजनं यथेति । अत एव यामलादयः कीर्तिः । केचित्तु
श्रीमच्छंकराचार्यवरलिखितयोगप्रकरणोक्तप्रकारं कृत्वा योगिपरमिति वदन्ति । तन्न प्रसवाप्यश्रवणात् ॥ श्रीकुलार्णवे ॥ आत्मस्थानमतो रुद्रं यो देहशुद्धिश्च पंचभी ...
कुरुते देवितावदेवार्चने न हि । सुस्नानभूतसंशुद्धिप्राणायामादिभिः प्रिये । षडंगाद्यखिलन्यासैर्देहशुद्धिरितीरितेति । उत्तरतंत्रे ॥ भूतशुद्धिं विधायेत्थं ततो वै स्थापयेद्
सून् । अथ सन्प्राणान् । प्राणप्रतिष्ठाविधानं तु प्रागेवोक्तं । त्रैलोक्यमोहनतंत्रे ॥ प्राणायामं ततः कृत्वा मातृकान्यासमाचरेदिति ॥ प्राणायामलक्षणं तु प्रागेवाभिहितं ॥ अ
तः परं स्वोपास्यमंत्रस्य ऋष्यादिकरषडंगन्यासान् कृत्वा योगपीठन्यासं कुर्यात् । तत्र ऋष्यादिपदार्थाज्ञानं न्यासासंभवात् तद्वाचकपदानामेव कार्यः ॥ तथा दक्षिणामूर्तिसं
हितायां । ऋषिस्तु दक्षिणामूर्तिरूहे शिरसि मां न्यसेत् । पंक्तिश्छंदस्तु विहेयं मुखे विन्यस्य पार्वति । देवतां हृदये वालां विन्यसेत् परमेश्वरीति । न्यासप्रकारस्तु योगिनीतं
त्रे । ऋष्यादीन् विन्यसेद्देवि मन्त्री हृदयान्वितानिति । ऋषये नमः छंदसे नमः इत्यादि ॥ प्रपंचसारे ॥ ऋषिर्गुरुत्वाच्छिरसा वधार्यश्छंदोक्षरत्वाद्रसनागतं स्यात् । धिया व
गतव्यमतयास्य देव हृदि प्रतिष्ठायामनु देवतायाः । ऋष्यादिपदार्थाः सूत्रतरतंत्रे ॥ ऋ वर्णादिसु गत्यर्थो धातुः ज्ञानस्यार्थकस्तथा । विषयादिसु विज्ञाने पतनस्त ... के च सः अ
न यो रूपसंपन्नो ऋषिर्गुरुरितीरितः । छंदः इति धातुरिच्छायां छादिधात्वर्थको भवेत् । छंदो यत्क्रिमतो वर्णान् ... रिच्छाप्रदानतः क्रीडार्थका द्युदानीति संपन्ना देवता
पदं । साधकाय ममत्रो भावं ददातीति जगुर्यतः इति ॥ ज्ञानार्णवे ॥ षडंगन्यासमाचरेत् । हृदयं च शिरो देवि शिखां च कवचं ततः । नेत्रमस्त्रं न्यसेत्तु ङे तेन नमः स्वाहा क्रमे
णतु । वषट् हुं वौषट् तेन तु फट् इभिः सह विन्यसेत् ॥ प्रपंचसारे ॥ हृदयशिरसोः शिखायां कवचाक्षास्त्रेषु सह चतुर्थीभिः । नमःस्वाहाव्यावषट् हुं वौषट् फडेभिरंगकावि
धिः ॥ नमः पदेनाकुत्वा स्वाहाकारेण ॥ शारदायां ॥ हृदयाय नमः ओं कं शिरसे वह्निवल्लभा । शिखायै वषडित्युक्तं कवचाय हुमीरितं । नेत्राय वौषडित्युक्तं अस्त्रा
य फडीरितं । अयं षडंगन्यासः करन्यासपूर्वकः कार्यः । आदौ कृत्वा करन्यासं षडंगेषु ततो न्यसेदिति तंत्रांतरवचनात् । अत्र केचित्करन्यासे अंगुष्ठाभ्यां नमः तर्जनी
भ्यां नमः इत्यादिन्यासान्वदंति । तन्न प्रमाणं विरोधाच्च स्मृतत्वात् सनातनादिनाम्नातं तद्दर्शनात् तज्ञाने जे भितमिति भाति ॥ यथा शारदातिलके ॥ अंगुष्ठादिद्वयंगुलीषु न्यसे
दंगैः सजातिभिः । अस्त्रं तु तलयोर्न्यसेदिति ॥ सजातिभिः नमः स्वाहेत्यादिसहितैः । अंगस्तनं तत्रे ... तेन हृदयाय नमः शिरसे स्वाहेत्यादिभिः इत्यर्थः । जातिल
क्षणं तु कारणागमे ॥ नमः स्वाहा वषट् हुं च वौषट् फडिति कारणे च जाति षट्क मिदं प्रोक्तं हृदयाद्यस्त्रान्तसंगतमिति ॥ नारदपंचरात्रेऽपि । अथ कंगाति ... पेत ॥

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२६२

कनिष्ठाद्यासु च ततो हृदयादिक्रमेण तु लिखेत्। हृदयादिक्रमेण हृदयाय नमः शिरसे स्वाहेत्यादिक्रमेणेत्यर्थः॥ योगिनीतंत्रे। उद्धरेत्प्रणवं पूर्वं मायां बिंदुस
मन्वितां। खड्गाय हृदयायेति तमोयुक्तं कनीयसी। ईकारं प्रणवाद्ये विबिंदुबिंबसमायुतं। सुखकृत्यं ततो वायं शिरसे तदनंतरं। स्वाहायुक्तं प्रविन्यसेच्च तर्जन्या
नामिकांगुलौ। ऊंकारं प्रणवाद्ये विबिंदुलांछितमस्तकं। श्रीवज्राय ततो वायं शिखायै च ततः परं। षडंतं प्रविन्यसेन्मध्यमामध्यमांगुलौ। मात्रा ह्र हृदि का ता
राद्बिंदुपाशाय संयुतां। कवचाय हुमित्येतत्तर्जन्यामध्यमानामिका। अकारादिविसर्गांतं योजयेत्प्रणवात्परं। फडक्षरसमायुक्तं विन्यसेत्तलयोर्द्वयोरिति स्मृतं
उक्तः॥ ॥इति श्रीविद्यार्णवेऽष्टादशाश्वासः॥ ॥नारदपंचरात्रे। मात्राभिस्त्रिषु योः पाण्योः पल्लवेंगानि विन्यसेत्। मूलं तु युगपद्व्याप्तं व्यापकत्वेन नारद।
अंगुष्ठे नावरेन्न्यासं मध्यांगुलिसमाश्रयं। अंगुष्ठविषयन्यासं तत्तेनी शिरसैव हि। षडंगमंत्राणां वासनानु प्रथमतंत्रे॥ कुब्जिकामंत्र हृन्मतो न त्वामध्यमाम ड
कोहि हृदा सौख्यपत्रे ध्रुवा। नमस्क्रियावुद्धिगम्या तुद्वेरर्थः शिरो मतं। स्वाहया वततः स्वस्याविषयाहरणं मतं। ततः शिरो पुनात सम्यक् प्रोक्तो वै विषका हृ
तिः। शिखामहोवषट् वांग शिखया तत्तनुमेहः। प्रोक्तः कवचस्या ह्रहणेन धुतं कवचं पदं। हुमहः कवचेनास्य महसा गलतेतनः शरीरं मंत्रिणस्तु ह्य नेत्रं दृ
ष्टिश्च दर्शने। वौषट् वा यं तत्र दृष्टितेनस्यान्महः स्मृतं॥ नेत्रं ह्यनुक्षेपकाजात मंत्रसुखनार्थकः। फट् कारेण त्वानवाति ह्यस्त्रक्षिप्य पापरिपालयेत्। जोतमी
ये। हृत्प्रमानो हरात्मायं हृदये स्याच्छिरा त्मनः। क्रियते तत्परं तु हृन्मंत्रेण ततः परं। सर्वे शादिगुणोपेते सविद्रूपे विदात्मनि। क्रियतो विषयाहारः शिरोमं
त्रेण धीमता। हाब्धिरो रूपविद्रूपमयता भावना दृढा। क्रियते निजदेहस्य। शिखामंत्रेण सादरं॥ मंत्रात्मकस्य देहस्य मंत्रवायेनेतसा। सर्वतो वर्ममंत्रे
णा क्रियते तत्र संवृतिः। यद्दृतिपरं ज्ञानं संविद्रूपे परात्मनि। हृदयादिमयं तेजः स्याद्नेत्रसंज्ञकं। आध्यात्मिकादिरूपं यत्साधकस्य विनाशयेत्। आवि
धामस्त्रात्मनं परं धामसमीरितं। इति। अत्र केचित् षडंगन्यासे नेत्रत्रयाय वौषडिति प्रयोगं वदंति॥ तत्र प्रमाणं विलं। वस्तुतस्तु हृदयशिरसोः शिखायां क
वचास्त्रयोश्च सह चतुर्थी निरिति प्रपंचसारवचनात्। षडंगविन्यासे मंत्री हृच्छिरश्च शिखा ततः। कवचं नेत्रमस्त्रं चेति दक्षिणामूर्तिसंहितावचनात्। हृद
यं च शिरो देवि शिखा च कवचं ततः। नेत्रमस्त्रं न्यसेद्देवि तंत्रमितिहाना दर्पणवचनाच्च तुर्थ्येकवचनस्यैव दर्शनात्। नेत्राय इति तत्वं। अतएव प्रपंचसारटीकायां
लक्ष्मणपंडितो कितो केवलः शंकरश्चांते स्वसरूपं पश्चिमामुखं। आतितं वामतो धारसंस्कृतं प्रोक्तरे ततः। धरेशं केवलं दत्वा नेत्राय त्र्यक्षरं पदं। नदेतेवौषडि
युक्तं नेत्रमंत्रोऽयमस्मृत इति नारदपंचरात्रे स्पष्ट एवोक्तः। अन्यथा द्विनेत्रे देवतेषु षष्ठेन नेत्राभ्यामिति सादिपदं तत्र प्रक्षेपापत्तिः। प्रपंचसारे॥ संदी श्री.
२६२

© Dharmartha Trust J&K. Digitized by eGangotri

क्षितो मन्तुमिमं प्रतिजप्तुमिच्छन्कुर्यान्निजेन वपुषैव सुयोगपीठं। अंसोरुयुग्मपदमानन [illegible] नाभिमूलपार्श्वद्वये विहितगात्रसमुच्चलं वा मध्ये नंताद्यैरपि सं
हाम्नेति केयं तेन मंत्री। पीठाख्यं मंत्र पश्चिममिति। आननं वामपार्श्वं नाभिमूलं दक्षपार्श्वैरिति पममपादौ वार्योः ईशानशिवः आधाराख्यं यजे छक्तिं हृदये सव्यदक्षि
णे। धर्मज्ञानं वसव्यांसऊर्वोर्वामांसयोरिति। वैराग्यसंहमैश्वर्यमिति। अनंताद्यैरित्यादिपदं न पद्मसूर्यसोमवह्निसत्वरजस्तमआत्मांतरात्मपरमात्मज्ञानात्मज्ञान
त्वमायातत्वकलातत्वविद्यातत्वपरतत्वानां ग्रहणं। उत्तरतंत्रे। मूलाधारे स्थमंडके रुद्रे कालाग्निसंहकं। स्वाधिष्ठाने च समाप्य कूर्मरूतिमूलपूर्विकां। आधारशक्तिं हृद
यविन्यस्य साधकोत्तमः कूर्मानंतौ वराहं च धरणीं वसुधालेवां रत्नद्वीपं चापि न्यस्य तत्र स्वर्णमहीधरां तदूर्ध्वे नंदनोद्यानं तन्मध्ये मणिमंडपं। कोटिसूर्यप्रभं हेम
प्राकारपरिवेष्टितं। रत्नमंडपमध्यस्थं वेदिकां हेमनिर्मितां। तिं न्यस्य तत्स्याममध्यस्थं रत्नसिंहासनं शुभं। शरीरे स्वस्य धर्माद्यैः पीठकल्पनमाचरेत्। दक्षांसे न्यसेद्ध
र्मं ज्ञानं वामांसके न्यसेत्। वामोरुमूले वैराग्यमैश्वर्यं दक्षिणे न्यसेत्। गुरवे धर्मं वामपार्श्वे चाज्ञानं नाभिमंडले। अवैराग्यं दक्षपार्श्वे चानैश्वर्यं न्यसेत्क्रमात्। धर्मा
दीन् पीठपादांश्च गात्राण्येवमात्मप्रकल्पयेत्। हृद्यनंतं न्यसेत्तस्मिन् पद्मं तत्कर्णिकोपरि। अर्कं च केसरे सोमं पत्रे वह्निं ततो न्यसेत्। तेषां कला न्यसेत्तत्तन्मंडलेत
त्र तत्त्वे। तत्र तत्र तन्मंडलन्यासमयमेव तत्त्वतः। विशब्दस्त्वेककारार्थवाचकः। न्यसेद्गुणत्रयं पश्चात्सत्वादिकमतः परं। आत्मांतरात्म [illegible] परमात्मविद्या
नात्मकान्यसेत्। ज्ञानमायाकलाविद्यापरतत्वानि च क्रमात्। पीठमंत्रं प्रविन्यसेत्ततो देशिकसत्तमः। देहात्मके ततः पीठे ध्यायेदिष्टां च देवतां। अत्र पीठाख्यपश्चि
मामिति पीठमंत्रमनंतरमिति पीठमंत्रं प्रविन्यसेदिति च प्रपंचसारशारदातिलकादिग्रंथवचनैः पीठशक्तिन्यासो नास्तीति प्रतीयते॥ अथ मूलमंत्रन्यासः। तंत्र
श्रीकृष्णयामले। प्राणायामत्रयं कृत्वा मूलमंत्रेण साधकः। विन्यसेत् ऋषिछंदो दैवतानि यथाविधि। करांगन्यासमुख्यांस्तु न्यासान्न्यासान्समाचरेत्। ततस्तत्कल्पादि
ता मंत्री ततो मुद्राः प्रदर्शयेत्। नारदपंचरात्रे॥ एवं न्यासं पुरा कृत्वा करयोर्विरहन्ततः। मूलमंत्रादि सर्वस्य न्यस्तमंत्रगणस्य च। यस्य मंत्रस्य ये न्यासाः कर्तव्याः वि
ष्ठिमिकृत्वा। ततो मंत्रपुटे वर्णैर्मातृकायाः सबिंदुभिः॥ विन्यसेन्मंत्रवित्सम्यक् [illegible] देवतेनाथ। अथ यागं करन्यासं ततो मुद्राः प्रदर्शयेत्॥ श्रीकुलार्णवे॥ आ
गमोक्तेन मार्गेण न्यासान्नित्यं करोति यः। देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते। यो न्यासकवचच्छन्नो मंत्रं जपति तं प्रिये। दृष्ट्वा विघ्नाः पलायंते सिंहं दृष्ट्वा यथा गजाः
अकृत्वा न्यासजालं यो मूढात्मा कुरुते जपं। विघ्नैः स बाध्यते नूनं व्याघ्रैर्मृगशिशुर्यथा॥ कालिकापुराणे॥ न्यासानां प्रचुरत्वे हि फलानामपि दूरिता। उक्तन्यासो नरि

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२६२
263

यान्यत्त्वधिकं तु समाचरेत् ॥ उक्तं रत्नतंत्रे ॥ वाग्भवस्याद्वितीयेन कामराजेन भैरव । मुद्रया बंधनं कार्यं मूलमंत्रेण दर्शनं । परित्यागस्तु मुद्राया तारा बीजेन चाचरेत् ॥ ध्रांता
दिर्वं द्विबिंदु भांशषष्ठस्वरसमन्वितं । ताराबीजमिति प्रोक्तमिति । ध्रांतादिर्हकारः । अन्यत्सुगमं ॥ तथा । ध्यानं कुर्यात्ततो मंत्री तत्तत्कल्पोक्तवर्त्मना । ध्यानमालोक्य देवस्य वेदनं
मनसा मतं । तदेव द्विविधं प्रोक्तं सगुणं निर्गुणं तथा । आत्मनो हृदयांभोजे कर्णिकाके सरोज्वले । प्रफुल्लं सूर्यसोमाग्निमंडले नविराजितं । स्वीयेष्टदेवतां तत्र भाव्या
येदागमबोधिता । एवं यद्वेदनं तद्धि सगुणं ध्यानमुच्यते । यज्जीवब्रह्मणोरैक्यं सोहं स्यादिति वेदनं । तदेव निर्गुणं ध्यानमिति ब्रह्मविदो विदुः । ध्यानं कृत्वा ततः स्वके लैबुध
ध्यते ॥ योगिनीतंत्रे ॥ अथांतर्यजनं वक्ष्ये यथावदवधारय । वामनाडीसमारूढा कि. विदा कुंवयदूदं । अंतर्यागमिदं देवि कथितं च गुरुभाषितं ॥ डामरतंत्रे ॥ ...
फेत्कारितंत्रे ॥ आराध्यमतसाभक्त्या बाह्यपूजा समाचरेत् ॥ गौतमीये ॥ पूजां च मानसीं कुर्यात्ततो बाह्यं समाचरेत् ॥ डामरतंत्रे ॥ ध्यात्वा ह्यंतर्यजेत्पीठं न्याससमाप्ते
मंत्रवित् । तस्मिन्पीठे स्थितामिष्टदेवतामुक्तविग्रहां । ध्यात्वा यजेद्वंदना धर्मेमनसे भोजनोतिगैः । भोजनावसरे चांतर्वै भावदेवं समाचरेत् । मूलाधारे स्मरेत्कुंडं कुंड
त्याग्निसमुद्भवं । आत्मांतरात्मपरमज्ञानात्मचतुरस्रकं । धर्माधर्मान्वितेनात्र मूलमंत्रपुरःसरं । अमुं जुहोमि स्वाहेति प्रत्येकं तु हुनेत्ततः । अर्हताऽसत्यमेवान्यत्काम
कोधादिकं हविः । मन एव स्रुवः प्रोक्तः सुषुम्णा स्तु गुदारिता । तदंते तन्मयो भूत्वा यथाशक्ति जपेन्मनुं । तज्जपं सर्वसंपत्त्यै देवतायै समर्पयेत् । जपनिवेदनमंत्र स
गुह्यातीति प्रागेवोक्तः ॥ लक्ष्मीसागरे ॥ इत्थं जपं यथाशक्ति कृत्वा देवि समर्पयेत् । ततः प्रणम्य विधिवत्पूजां चक्रं समुद्धरेत् ॥ सिद्धेश्वरीतंत्रे ॥ प्रणम्य श्रीगुरुं पकौलिक
धकः कुंकुमादिभिः स्वर्णादिरचिते पीठे पूजाचक्रं समुद्धरेत् । संस्थाप्य पुरतो देवि विष्टभे पीठे सुरेश्वरि । दद्यात्पुष्पांजलिं तत्र मूलमंत्रेण साधकः ॥ अत्र पूजाचक्रं वि
भिन्नं प्रागेव प्रदर्शितं ॥ अथ कादिमतरीत्या पूजाचक्रयंत्रप्रतिष्ठाविधिः ॥ तत्र श्रीतंत्रराजे ॥ चक्रे देव्यां तथा शिष्ये प्रतिष्ठा त्रिविधोच्यते । सा च तत्त्वविदा कार्या सं
प्रदायानुरोधिना । चक्रे पूजाचक्रे देव्यां देवीमूर्तौ । देवी त्वुपलक्षणं । तेन स्वेष्टदेवतामूर्तौ । तत्त्वविदा वेदसर्वनाडीपथापद्धियादिपंचतत्त्वोदयकाले तत्कृत्यविदा ।
अथवा तत्त्वात्तत्त्वानविदा । संप्रदायानुरोधिना । गुरुपारंपर्यक्रमवेत्त्रा वेगुरुमंडलपूजकत्वनिमित्तमिति कोपास्तिनिरतत्वविशिष्टेनेत्यर्थः ॥ ... स्थिरे शुभग्र
हापेते । अनुकूले गुणशालिनि । मुहूर्ते कारयेद्विद्वान्मूर्णायां वा शुभे दिने । स्थिरे स्थिरलग्ने । दुष्टग्रहाक्रांतस्य निषेधस्ता आह शुभग्रहोपेते इति ॥ तत्राप्येकादश
गुणविशिष्टस्याष्टमचतुर्थद्वादशस्य प्रतिकूलतादोषदुष्टत्वादाह अनुकूले इति । तथापि निर्दिष्टमुहूर्तप्राप्त्यभावादाह गुणशालिनीति । तथाहत्वा दोषे

श्री
२६२

धिकयुले इत्यर्थः॥ मुहूर्तं कारयेदिति। तथा॥ क्षौद्राज्यदुग्धैः प्रथमं नारिकेलांभसा ततः॥ अभिषिच्याथ तोयेन दक्षिणे तिलाक्षतैः पयोधैः॥ आवाह्याभ्यर्च्य तत्र गते चक्रे संस्थाप्य पूजयेत्।
त्रिसप्ताह तत्प्राप्तिकालो यावद्यथाभ्यर्च्यतां क्रमात्। स्वर्णरत्नैः स्वल्पकरां गेलां श्रीचक्रं पूजयेद्धिया। एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत्। गंधैः पुष्पैर्नैवेद्यैर्धूपैर्दीपैर्नैवेद्यैर्दधिभिः त्रि
रात्रं पूजयेद्देवीं योगिनीयोगिभिः समं। एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारक इति॥ लक्षसागरे॥ आदावादितैर्मंत्रैः रश्मुनारचितां वरेत। धातुनिर्मितसकाणं मूर्तीनां च
विशेषतः॥ इति। अथ मूर्त्यंतरेण प्रकारस्तु प्रयोगो वक्ष्यते। अथ पात्रासादनं। तत्प्रकारस्तु प्रागेव प्रपंचितः॥ शारदातिलके॥ आत्मानं यागवस्तूनि मंडले प्रोक्षयेद्गुरुः॥ प्रो
क्षणीपात्रतोयेन मनुना न्यासपिक्रमात्॥ श्रीकुलार्णवे॥ पूजाद्रव्याणि संप्रोक्ष्य मूलास्त्राभ्यां विधानवित्। दर्शयेद्धेनुमुद्रां च द्रव्यशुद्धिः प्रकीर्तिता॥ रुद्रयामले॥
स्त्रप्रोक्षितं नैवेद्यं पात्रं प्रोक्षितः समर्चयेत्। शारदातिलके॥ न्यासक्रमेण देहे स्वे धर्मादीन्पूजयेत्ततः। पुष्पाद्यैः पीठमन्वेति तस्मिन्संपदेवतां। पंचदलैः पुनः
कार्यो पुष्पांजलिमतन्वधीः। उत्तमांगे हृदाधारे पादे सर्वांगके क्रमात्। विनाति वेद्यं गंधाद्यै रूपचारैः समर्पयेत्। गुरूपदिष्टविधिना शेषमभ्यर्च्य मापयेत्। सर्व
मेतत्प्रयुंजीत प्रोक्षणं पाभिः समाहितः॥ धर्मादीनीत्युपलक्षणं। तेन मंडूकादिपीठमन्वेताः योगपीठदेवताः योगपीठन्यासस्थाने पुष्पाद्यैरित्यर्थः। शंखपात्रादिकं॥
उत्तरतंत्रे॥ मूलाधारगते कुंडे पूर्वोक्ते चतुरस्रके। पूर्वे वज्रं कृत्वा मंत्री धर्माधर्मादिकं हविः॥ प्रकाशोदये॥ अथ वाभ्यंतरे कार्यमग्निकार्यं ब्रवीमि तत्। त्रिदग्नि मंडले दं
ड मूले कुंडलिरूपिणी। न्यस्तकुंडे कुने दुवत्सूर्यमंडलवर्तिनी। अत्र न्यस्तचतुरस्रयोः कुंड ज्योतिः कल्पः। वासनेन धर्मे... नसदीप्तं पवित्रसमीरणेन... सं
क्षिते प्रज्वलेत् कुर्यादक्षतामिमंतरं। मूलविद्यासमुच्चार्य कुंडे तस्मा कुती सतः। मन्त्ररूपं पठेत्स्लोकं परं गुरुतरं परात्। धर्माधर्मे हविर्दीप्त आत्माग्नौ मनसा स्रुचा। सुषु
म्णावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहं। स्वाहांतेनाहुतिं दत्वा कुर्वेत्पूर्णाहुतिं गुरुः। मूलविद्यां समुच्चार्य श्लोकमन्यपठन्नमुं। प्रकाशमर्शहस्ताभ्यामवलंब्योन्मनीस्रुचा।
धर्माधर्मकलास्नेहं पूर्णमग्नौ जुहोम्यहं॥ स्वाहांतेन कुतिं कृत्वा प्राणापाननिरोधतः। निरस्तानि...थितोपांत्रिमात्मानं वि... सोऽहं... हानार्णवेन पुण्यपापे हविर्दीवेत्
त्वा कृतलतो हविः श्रियेत॥ संकल्पविकल्पश्च धर्माधर्मो हविः श्रिये। हवनप्रकारस्तु प्रयोगे वक्ष्यते॥ मंत्रतंत्रप्रकाशे॥ अष्टोत्तरसहस्रं तु कृत्वा तर्पणमादरात्॥ जप
न्मातिदितं मंत्री ति। अंतःदेहयागः पूजा॥ आत्मपूजाविधायेत्थं यथाशक्तिजपं चरेत्। स्वेष्टदेवतमात्मानं भावयन्यतमानसः। एतेनाष्टोत्तरसहस्रं गुशकं परं। तथा॥
अर्घ्योदकेन संप्रोक्ष्य मूलमंत्रेण मंत्रवित्। पूजायंत्रं ततस्तत्र पीठपूजां समाचरेत्। देवस्यानतः पूजा गुरुरूपके ततः परं॥ महागणपतिः पूज्यो दक्षिणे देशाः...

© Dharmartha Trust J&K. Digitized by eGangotri

वि० धा०
२६४
264

उत्तरतः उत्तरदिशि।।लेनं देवस्य दक्षिणभुजसमीपतः दूर्वावाहनः। उत्तरस्ततथा वक्ष्यते। रुद्रयामले। सर्वाधो मंडुकाधारे रुद्रः कालानलो विभुः। रक्षां करोतु
पानि त्वं मे मूलप्रकृतिस्तथा। ततश्चाधारशक्तिर्यो मम रक्षां करोतु सा। कूर्मस्तु सततं पायाद् दत्तं तो रक्ष्ययेत्सदा। तस्य मूर्ध्नि स्थितश्चक्री वराहः परिरक्षतु।
दंतेन स्थापिता पृथ्वी पातु नित्यं वसुंधरा। समुद्रः सर्वदा पातु सुरत्नैरमृतैर्जलैः रत्नद्वीपस्तु मे रक्षां करोतु स्वर्णपर्वतः। पातु मां नंदनोद्यानं रक्षंतु कल्पपाद
पाः अधस्तेषां सदा तैर्पांहि विचित्रा रत्नभूमिका। श्रीरत्नमंदिरं पातु सनातनं पातु वेदिका।। भैरवयामले।। रत्नकवर्णं महाकायं मंडूकं प्रथमं यजेत्। तत्र कालाग्नि
रुद्रं दशबाहुसमन्वितं। पंचवक्त्रं रक्तकृष्णवर्णं दक्षापरांगकं। तदूर्ध्वं मूलप्रकृतिं बंधूकाभां वराभयां।। उत्तरतंत्रे।। अधःपीठस्य रक्ताभां पाशांकुश
वराभयाश्रीहस्तां कुर्वतीं सम्यक् यजेदाधारशक्तिकां। तस्या उपरि संपूज्य कूर्मः स्वर्णरुचिर्दृढः सहस्रशिरसं तत्र शुभ्रवर्णमलंकृतं। नीलवस्त्रं महा
कायमनंतं सम्यगर्चयेत्। पीतांबरधरं तत्र नीलवर्णं सुभूषणं। शंखचक्रगदापद्मधारिणं पोत्रिणं यजेत्। श्रीसागरं शुक्लहस्ताकुंभं वराभयधरां शुभां।
तदूर्ध्वोपरि नीलाभां धरां धीरः समर्चयेत्। रत्नद्वीपः नवरत्नमयद्वीपः।। उक्तं वा तत्र राजेन। नवरत्नमयं द्वीपे नवखंडविराजितं। पुष्पनीलं च वैडूर्यं विलो
मेत्र नवरत्नमयानि खंडानि मध्यांतानि ध्येयानीत्यर्थः।। तत्रैव कुरुकुल्लापटले।। पश्चिमं पुष्परागं तु संप्राप्यावर्तते ततः इति।। उक्तं बालात्। रत्नमंदिरं नवरत्न
मयं मालिकामयं वा। स्वर्णप्राकारवेष्टितं विचित्रमंडपान्वितमुत्तरतंत्रवचनात्। अथ बोमणिद्वीपे कल्पवृक्षवनोज्ज्वले। स्वर्णप्राकारसंवीतं समरमालिकं
कयमंडपान्वितं दीप्यामलवज्राच्छा वेदिका स्वर्णमयी। विचित्रमंडपं तत्र पूजये त्स्वर्णवेदिकेमिति उत्तरतंत्रात्। उत्तरतंत्रे।। रत्नसिंहासने तत्र पूजयेन्मंडला
न्वितं। मंडलान्वितं तत्पूजावसरे रूपमंडलसमन्वितमित्यर्थः। तत्पादेषु यजेत्सम्यगाग्नेय्यादिदिशिवांतकं। धर्मं विप्रतनुं रक्तवर्णमादौ समर्चयेत्। सिंह
कारं ततो ज्ञानं श्यामवर्णं समाहितः। भूताकारं चैव वैराग्यं पीतवर्णं यजेत्ततः। कृष्णवर्णं गजाकारमैश्वर्यं साधु पूजयेत्। अग्रदेशे समारभ्य चतुर्दिक्षु समर्चयेत्। श्री
अधर्मादींश्च पीठस्य विज्ञगात्राधिपापुनः।। वामकेश्वरतंत्रे।। मध्ये मायं तथा विद्यापूजये त्साधकोत्तमः।। उत्तरतंत्रे।। तत्त्वाकारं ततो नंतं पीठमध्ये सम २६४
र्चयेत्। तस्य मूर्ध्नि यजेत्पद्मं सर्वलक्षणसंयुतं। आनंदकंदमध्यस्थं सविंत्वालमचेतरे। प्रकेसरालकपत्रालि विकारात्मककेसरान्। तत्तद्रूपां कर्णिकां
च मातृकावर्णविग्रहं।। लिंगपुराणे।। तस्य पूर्वदले साक्षादणिमामयमक्षरं। लघिमा दक्षिणे चैव महिमा पश्चिमे तथा। प्राप्तिश्चैवोत्तरे पत्रे प्राकाम्यं पा

© Dharmartha Trust J&K. Digitized by eGangotri

वकस्यतु दिशत्वमैश्रीतेषपत्रे वशित्वं वायुगोचरं। सर्वज्ञत्वं तथैशाने कर्णिकासोममण्डले। सोमस्याधस्तथा सूर्यस्तस्याधः पावकः स्वयं॥ उत्तरतंत्रे गपत्रकोशे पुष्पमस्य
सत्वादीन्क्रमतो यजेत्। सत्वपूर्वान्गुणान्सूर्यवह्नीन्दुमंडलानि वा। ब्रह्मविष्णुमहेशाख्यान्वा धारादीस्त्रीन्यथाक्रमं॥ संमोहनतंत्रे॥ विधिरूपः सत्वगुणो रजः प्रकृति
रूपकं। तमोगुणो मोहरूपः प्रोक्तास्त्वेवं गुणास्त्रयः॥ वामकेश्वरतंत्रे॥ ज्ञानतत्वात्मकं यजेत्। कलातत्वात्मकं चैव विद्यातत्वात्मकं तथा परतत्वात्मकं चैव क्रमेणापरिपूज
येत्। चतुर्दिक्षु मध्ये चेति॥ प्रपंचसारे॥ मध्येऽनंतं पद्मं सिंह्यस्य सोमं वह्निं तारं वर्णैर्विभक्तैः सत्वादीश्चैव गुणानात्मपुक्तान् शक्तिः किंजल्केषु मध्ये यजेच्च
॥ उत्तरतंत्रे॥ केसरेषु ततो मध्ये पूर्वादिषु यथाक्रमं। तत्र मंत्रोक्तपीठस्य नव शक्तीः प्रपूजयेत्। पीठमंत्रेण गंधाद्यैः पीठमध्ये ततो यजेत्॥ सनत्कुमारः॥ प्रागा
द्यष्टसु पत्रेषु कर्णिकायां यजेन्मुने। चतुर्थ्या नमसा युक्तैः स्वैः स्वैरेव तु नामभिः। मध्ये पुष्पांजलिं दद्यात् पीठमंत्रेण मंत्रवित्। यजेत्प्रादक्षिण्येन एताः प्रदक्षिणं पूज्या इति
मंत्रे तत्र प्रकाशववमात्। पूर्वो दिक्सत्र पश्चिमस्यैव पूर्वतः। स्वराः षोडश देवि युग्मयुग्मक्रमेदलः। दलाष्टकेषु संलेख्याः पश्चिमादि प्रदक्षिणमिति ज्ञानार्णवे। यं
वर्णविन्यासदर्शनादात्र रणाद्वेनायां देवाग्रप्रायाभिधानाच्चापि तथा कल्पनात्। दक्षिणेच तथा गुरूमिति संकर्षणवचनाच्च॥ नारदपंचरात्रे॥ गुर्वी वीथी मंडले दे
वदेवस्य दक्षिणे मंडलोपरि। गुरू सम्यचे पदिति। अत एव देवदेवस्योत्तर इति पूर्वोक्तस्यापि पूजामंडलस्योपर्येव पूजा हेया। धर्मादिपूजायामप्यनमेव देवाग्रकल्पित
त्वाद्यनुसारेणैवाग्नेयादि कल्पयेत्। अत्र भावविनिर्भूतभूतवद्वुपचारः। आगामर्मंत्रेणमुने हृत्पनंतरं भावाहनो केनः भूताकारमिति भूतः देवयोनिः भूतो मीदवयो नघ
इति कोशात्। तस्य रूपं तु रक्तवस्त्रधराः कृष्णानखदंष्ट्रामु दंष्ट्रिकाः केशीखड्गहस्ताश्च राक्षसो घोररूपिणः भूतास्त्वेव दीनास्या इति भूतडामरोक्तस्वरूपाः॥ पीठस्थ
कथयः पीठमंत्रातनंतरं कल्पो वक्ष्यते॥ उत्तरतंत्रे। पीठशक्तीर्नमाभ्यर्च्य केसरेषु च मध्यमः। वरदाभयधारिण्यः पीठं पीठेषु वायजेत्। मूलमंत्रं समुच्चार्य प्रकल्पं तं देवनाम
मूर्तिं च कल्पयामीति मूर्तिं मध्ये विनिःक्षिपेत्। पुनर्मूलमुच्चार्य दिव्यामन पूर्ववत्। मूर्तिं च पूजयामीति ताः पुष्पेण समर्चयेत्। पूजामूर्तेः शिरः कुर्यात्कुसुमोपरि संस्थिताः
ज्ञाकालं विनातस्या नोपरि भ्रामयेत्करं॥ अथेष्टदेवताप्रीत्यै यजेद्वा दापर्तं वा अपि। आयतनानि प्रागेवोक्तानि॥ प्रागेव शिवलिंगप्रमाणविधिरपि च दर्शितः॥ अ
थ पार्थिवविधानं॥ नारद उवाच॥ धर्मार्थकाममोक्षाणां साधनं परमं हितं। तत्सर्वं कथयस्व त्वं मनुष्याणां लोकेऽस्मिन्विभो। सर्वपापक्षयकरं सर्वारिष्टनिवारणं। सर्वे
श्यकरं चैव कलौ सर्वत्र सिद्धिदं॥ ईश्वर उवाच॥ शृणु नारद वक्ष्यामि शिवपूजाविधानकं। यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः। अकृत्वा पार्थिवं लिंगं योऽन्यदेवं प्र

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ सार्णव
२६५
265

जयेत्। वृथा भवति सा पूजा स्नानदानादिकं वृथा। शुद्धं मृदं समानीय पुनः शोध्य विशेषतः। शिवलिंगाकारं ततः कुर्याद्यथोक्तविधिना सुमान्। पूजयेत्तद्विधानेन पार्थिवं लिंगमु
त्तमं। अखंडं कारयेद्यत्नाद्दृश्यमानोऽश्मनाम भिन्नमद हरणं संघट्ट प्रतिष्ठाकाजमेव चास्य पार्थिवपूजने नैव क्षमस्वेति विसर्जनं। हरो महेश्वरः शंभुः शूलपाणिः पिनाकधृक्। पशु
पतिः शिवश्चैव महादेव इति क्रमात्। दृढं खंडं यः करोत्येवं तस्य पूजापि निःफला। पक्वजंबूफलाकारं सर्वकामफलप्रदं शिवं। चिरं यः करोत्येवं हानिर्भवति नान्यथा। ऊं को हराक्षा
ह्यधीते नमः ल मंत्रेण पूजनं। चतुर्दशस्वरोपेतो हकारो विंदुसंयुतः। शिवप्रसादजनकः। शिवप्रसाद संज्ञकः। शर्वो भवश्च रुद्रोऽथो भीम ईशान संज्ञकः। महादेवः पशुपतिर्मूर्तिभि
श्चैव पूजयेत्। क्षितिरापोऽनलो वायुराकाशः सूर्यसोमकौ। यजमान इति ह्यष्टौ मूर्तयः परिकीर्तिताः॥ नारद उवाच॥ देवकेन विधानेन कर्तव्यं सर्वकामदं। यस्यानुष्ठानमात्रेण
कृतकृत्यो भवेन्नरः॥ ईश्वर उवाच॥ शृणु सर्वप्रयत्नेन पार्थिवलिंगमुत्तमं। कर्त्तव्यं हि नरैर्नित्यं काममुद्दिश्य यत्नतः। अखंडं पार्थिवं लिंगं दृढं खंडस्फाटवर्जितं। पूर्वोक्तेन विधा
नेन पूज्यं लिंगं तु पार्थिवं। संख्या पार्थिवलिंगानां यथाकामं निगद्यते॥ विद्यार्थी लिंगसाहस्रं धनार्थी शतपंचकं। पुत्रार्थी सार्धसाहस्रकं तावार्थी शतपंचकं। मोक्षार्थी कोटिगुणि
तं भूकामस्य सहस्रकं। रूपार्थी त्रिसहस्रं च तीर्थार्थी द्विसहस्रकं। सुहृत्कामी त्रिसहस्रं वस्त्रार्थी शतमष्टकं। मारणार्थी सप्तशते मोहनार्थी शताष्टकं। उच्चाटनपरश्चैव सह
स्रं यथोक्तितः। स्तंभनं तु सहस्रेण मारणे शतपंचकं॥ निगडमुक्तिकामस्तु सहस्रं सार्धमीरितं। महाराजभये पंचशतं कारादिसंकटे शतद्वयं तु डाकिन्यादिभये पंचशतं तु
कादारिद्र्ये पंचसाहस्रमयुतं सर्वकामदं। एकं पापहरं प्रोक्तं द्विलिंगं चार्थसिद्धिदं। त्रिलिंगं सर्वकामानां कारणं परमीरितं। उत्तरोत्तरमेवं स्यात्पूर्वोक्तगणना बुधैः॥ ग्रंथां
तरे॥ लिंगान्यामयुतं कृत्वा महाराजभयं हरेत्। सहस्राणि तथा पंच निगडान्मुक्तये ध्रुवं। कारागृहादिमुक्त्यर्थमयुतं कारयेद्बुधः। डाकिन्यादिभये सप्तसहस्रं कारयेन्नरः
सहस्रपंचपंचाशद्दुत्रोहि प्रकारयेत्। लिंगानामयुतेनैव कन्यकां सततं लभेत्। एवं लिंगार्चनेनैव मनुजः श्रियमाप्नुयात्। लक्षमेकं तु लिंगानां यः करोति नरो भुवि। शिव
व भवेत्सोऽपि नात्र कार्या विचारणा॥ अर्चा पार्थिवलिंगानां कोटियज्ञफलप्रदा। भुक्तिदा मुक्तिदा नित्यं ततः कामार्थदा नृणां। ब्रह्महत्यापरिहारार्थं सौवर्णं लिंगमर्चयेत्। लव
णेन च सौभाग्यं पार्थिवं सार्वकामिकं। अनेकगुणसंभूतं रेतोऽर्थं परिकीर्तितं। श्यामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतं। अन्नोत्थं अन्नदं प्रोक्तं गुडोत्थं प्रीतिवर्धनं। गंधोत्थं
भोगदं चैव वशीकरे धान्यं सुखप्रदं। यवपिष्टोद्भवं लिंगं वंशकामो यजेत्सुमान्। तंडुलानां च पिष्टेन पुत्रवान्कुलमाप्नुयात्। सर्वरोगविनाशाय गोमयोत्थं प्रपूजयेत्। केश
स्थिसंभवं लिंगं सर्वशत्रुविनाशनं। आसुरेऽर्जवणोत्थं च सर्वलोकवशंकरं। स्तंभने रजनीपिष्टं संभवं लिंगमुत्तमं। तंडुलोद्भवपिष्टानां लिंगं विद्याप्रदं स्मृतं। दधिदुग्धो

श्री
२६५

© Dharmartha Trust J&K. Digitized by eGangotri

ऽन्नवं लिंगं कीर्त्तिलक्ष्मीसुखप्रदं। धान्यदं धान्यजं लिंगं फलोत्थं फलदं भवेत्॥ पुण्यार्थं सर्वसौभाग्यमुक्ताधात्रीफलोद्भवं। नवनीतोद्भवं लिंगं कीर्त्तिसाम्राज्यदायकं। दूर्वासु
दूर्वासंभूतमपमृत्युनिवारणं। इक्षुदंडोद्भवं लिंगं स्फुटमुद्घाटयेत्परं। इंद्रनीलमयं लिंगं बहुपापघ्नकामकृत्। स्फाटिकं बहुस्वामित्वफलदं मुनिभिः स्मृतं। पित्तलोत्थमुक्तये
लज्यं लिंगं रजतसंभवं। हेमजं सत्यलोकस्य प्राप्तये पूजयेत्सुमान्। पूजयेत्ताम्रजं लिंगं पुष्टिकामो हि मानवः। कृषिकामस्तु सततं लिंगं पित्तलसंभवं। कीर्त्तिकामोर्चयेल्लिंगं सदा
कांस्यसमुद्भवं। शत्रुमारणकामस्तु लिंगं लोहमयं सदा। ज्वरघ्नं त्वैवंदनजमर्चयेद्बुधिर्वत्सदा। कर्पूरसंभवं लिंगं शांतिकामोर्चयेत्सदा। कस्तूरीसंभवं लिंगं गंधकामो हि पूजयेत्।
लिंगं गोरोचनोत्थं च रूपकामस्तु पूजयेत्। कांतिकामस्तु सततं लिंगं कुंकुमकेसरं। श्वेतागरुसमुद्भूतं महाबुद्धिविवर्धनं। धारणाशक्तिदं लिंगं कृष्णागरुसमुद्भवं। यक्षक-
र्दमसंभूतं लिंगं प्रीतिविवर्धनं। बुद्धिविवर्द्धनं लिंगं श्रीहिममयं पूज्य धान्यकामेन नित्यशः। यवधान्यमयं लिंगं सर्वारिष्टनिवारणं। यः करोति तिलैर्यैतैस्त दीपवमही
पते। यः कृष्णैश्च तिलैः सम्यक् लिंगं कृत्वार्चयेन्नरः। कामशत्रुप्रियो नित्यं भवेत्स्त्रीणां हि मानवः। ग्रीष्मे च मल्लिकापुष्पसंभवं लिंगमुत्तमं। पूजयित्वा नरो भक्त्या
प्राप्नोति महतीं कृषिं। वर्षासु पूजयेद्भक्त्या लिंगं कनकपुष्पजं। इहैव चामुष्मिके लोके सुखी भवति मानवः। नीलोत्पलमयं लिंगं कृत्वा शरदि मानवः। पूजयेत्स
र्वां सिद्धिमवाप्नोति नित्यशः। हेमंते चैत्रकुसुमैर्लिंगं कृत्वा मनोरमं। भक्त्याभ्यर्च्य मतिमान्नूनं शिवेन सह मोदते। शिशिरे सर्वपुष्पोत्थं लिंगमभ्यर्च्य मानवः स
र्वपापं विहायाशु ब्रह्मणा सह मोदते। येन केन प्रकारेण यस्य कस्यापि वस्तुना। कृत्वा लिंगं समभ्यर्च्य राज्यं प्राप्नुयात्। विना लिंगार्चनं यस्य कालो गच्छति नि
त्यशः। महाहानिर्भवेत्तस्य सर्वत्रास्य दुरात्मनः। कृतसर्वाणि दानानि व्रतानि विविधानि वा। तीर्थानि नियमा यज्ञा लिंगार्चनतः कृताः स्मृताः। कलौ लिंगार्चनं श्रेष्ठं
यथा लोके प्रदृश्यते। ततोऽन्यं नास्ति नास्तीति शास्त्राणामेव निश्चितं। भुक्तिमुक्तिप्रदं लिंगं विविधापन्निवारणं। पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात्। लिं
गानामपि सर्वेषां पार्थिवं लिंगमुत्तमं। कृत्वा संपूज्य विधिवत्सर्वान्कामान्नवाप्नुयात्। पाषाणसंभवं लिंगं संपूज्य परया मुदा। इह कामानवाप्नोति स [illegible]
पाषाणात्स्फाटिकं श्रेष्ठं स्फाटिकात्पद्मरागजं। पद्मरागाच्च काश्मीरं काश्मीरात्पुष्परागजं। पुष्परागादिंद्रनीलं इंद्रनीलं च गोमेदं। न ते एतारूपमते [illegible]
भवं। माणिक्याद्विद्रुमं श्रेष्ठं विद्रुमान्मौक्तिकं परं। मौक्तिकाद्राजतं श्रेष्ठं सौवर्णं राजतात्परं। सौवर्णाद्धीरकं श्रेष्ठं हीरकात्पारदं परं। पारदाद्बाणजं श्रेष्ठं [illegible]
च्यते। नर्मदाजलमध्यस्थं बाणलिंगमिति स्मृतं। सर्वतीर्थाभिषेकाश्च सर्वदानानि व्रतानि वा। त्रिसंध्ययोगसिद्धा वदि बाणलिंगे नसंस्थितो [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धर्मो॰ २६६ 266

लिंगं बाणलिंगं तदुच्यते॥ अभ्यर्च्य विधिवत्कृत्वा शिवे लोके महीयते। बाणलिंगानि वै देवि नच निर्माल्यं ना। सर्वबाणार्चनेनैव ह्येशक्त्या भक्त्या नचान्यथा॥ बाणलिंगस्य
यं भूते चंद्रकांते हृदि स्थिते। चांद्रायणशतं तेयं शंभुनैवच भक्षणं। ग्राह्याग्राह्यविभागोयं बाणलिंगे विधीयते। तदर्पितं तिलं विद्धि ग्राह्यं प्रासादसंहृया। वारवरजले रत्ने स्फाटि
के हेमनिर्मिते। काश्मीरे चंद्रकांते च लिंगे स्वायंभुवे तथा। सदा सन्निहितो देवः सत्यं सत्यं न संशयः। शिवनाभिमयं लिंगं नित्यं पूज्यं महात्मभिः। एतद्ब्रह्म सर्वलिंगेभ्यः श्रेष्ठं संपूज्य
विधानकैः। उत्तमं मध्यमं नीचं त्रिविधं लिंगमीरितं। चतुरंगुलमुच्छ्रायं रम्यं वेदिकया दिवं। उत्तमं लिंगमाख्यातं मुनिभिस्तत्त्वकोविदैः। तदर्धं मध्यमं प्रोक्तं तस्यार्धं चाधमं स्मृ
तं। एवं लिंगं समासाद्य श्रद्धाभक्तिसमन्वितः। पूजयित्वा लभेत्कामान्मनसा चाभिलाषितान्। शास्त्रार्यणो लोकेऽस्य सर्वाणि तदर्थी नारिभाग्यवान्। पुरुषार्थप्रदं तल्लिंगं निष्ठितं
लिंगपूजनं। सर्वमूर्तीः परित्यज्य कर्मजातं विशेषतः। भक्त्या परमया विद्वान् लिंगमेव प्रपूजयेत्। लिंगार्चनेनार्चितं सर्वं जगत्स्थावरजंगमं। संसारार्णवमग्नानां नानाश्रुतं
रणसाधनं। अज्ञानतिमिरांधानां विषयासक्तचेतसां। प्लवो नान्योऽस्ति जगतां लिंगाराधनं तरां। ब्रह्मादयः सुराः सर्वे मुनयो यक्षराक्षसाः। गंधर्वाश्चारणाः सिद्धा दैत
पादानवास्थिता। पूजयित्वा महाभक्त्या लिंगं सर्वार्थसिद्धिदं। अपि राज्ञोऽपि राज्यं सर्वं प्राप्नुवन्ति समीहितान्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्य
नुलोमजः। पूजयेत्सततं लिंगं तत्तन्मंत्रेण साधकः। द्विजानां वैदिकेनापि मार्गेणाराधनं परं। अन्येषामपि जंतूनां वैदिकेनापि मंत्रतः। तंत्रोक्तदीक्षितानां
तंत्रेणापि विधानतः। स्मृतमाराधनं शंभोर्नैव वैदिकवर्त्मना। वैदिकानां च सर्वेषां पूजा वैदिकमार्गतः। कर्तव्याराधनप्रमार्गेण विल्वा हि भगवान् शिवः। दधीचिगौतमादीनां
शतसंबद्धवत्सरां। न जायते। न्यवर्णापि शूर्वो वैदिकवर्त्मना। यो वैदिकमनादृत्य कर्मस्मार्तं तथापि वा। अन्यत्समाचरन्मर्त्यो न स कर्मफलं लभेत्। तत्रापि पार्थिवं लिंगं क्षिप्रसि
द्धिप्रदं भवेत्। पार्थिवेन तु लिंगेन वकुसिद्धिमवाप्नुयुः। कृते रत्नमयं लिंगं त्रेतायां हेमसंभवं। द्वापरे पारदं प्रोक्तं पार्थिवं तु कलौ युगे। अष्टमूर्तिषु सर्वासु मूर्तिर्वै पार्थिवी परा। एवं पा
र्थिवलिंगे तु नित्यं संनिहितः शिवः। यथा सर्वेषु देवेषु ज्येष्ठः श्रेष्ठो महेश्वरः। तथा सर्वेषु लिंगेषु पार्थिवं श्रेष्ठमुच्यते। यथा सर्वेषु वेदेषु प्रणवः श्रेष्ठ उच्यते महास्मृतः। तथैव पार्थिवं श्रेष्ठं श्री
प्राराध्यं पूज्यमेव हि। पार्थिवाराधनं पुण्यमायुर्धनविवर्धनं। प्रसन्नं तुष्टिदं श्रीदं कार्यसाधनसिद्धिदं। यथा सर्वोपचारैश्च भक्तिश्रद्धासमन्वितः। पूजयेत्पार्थिवं लिंगं शास्त्रोक्तविधि २६६
नानरः। पंचसूत्रविभागं च पार्थिवे न विचारयेत्। आकारमात्रं रचयेत्सर्वसिद्धिप्रदायकं। द्विखंडमत्र कुर्वीत नोतत्पूजाफलं लभेत्। रत्नजं हेमजं लिंगं पारदं स्फाटिकं तथा। भ
पार्थिवं पिष्टजं चोष्यं माषजं तु प्रकारयेत्। अखंडं तु वरं लिंगं द्विखंडमवरं स्मृतं। खंडाखंडविभागोयं चराचरतया स्मृतः। वेदिका तु महाविष्णुर्लिंगं ब्रह्मा महेश्वरः। अन्ये तोपि स्थावरे लिंगे स
गं

© Dharmartha Trust J&K. Digitized by eGangotri

तंशो वेद्विखंडजा। वेदिका तु महादेवी गिरिजा शिववल्लभा। पिंडिका तु महेशानो द्वयो योगो द्विखंडता। द्विखंडं स्थावरं लिंगं कर्तव्यं हि विधानतः। अखंडं जंगमं प्रोक्तं शैवसिद्धांतवेदिभिः। द्वि
खंडं तु चरे लिंगे कुर्वन्नज्ञानमोहितः। नैव सिद्धांतवेत्तारो मुनयः शास्त्रपारगाः॥ अखंडं स्थावरे लिंगे द्विखंडं चरमेव च। ये कुर्वन्ति नरा मूढा न पूजाफलमाप्नुयुः। तस्माच्छास्त्रोक्तविधिना ह्यखं
डं चरसंज्ञकं। द्विखंडं स्थावरं लिंगं कर्तव्यं परया मुदा। अखंडे तु चरे पूजा संपूर्णफलदा स्मृता। द्विखंडे स्थावरे पूजा संपूर्णफलदायिनी। द्विखंडे तु चरे पूजा महाहानिः प्रजायते। अखंडे स्थावरे पूजा न पू
जाफलदायिनी। अथ वैदिकभावानां पार्थिवार्चा निगद्यते। वेदोक्तविधिना सम्यक् संपूर्णफलसिद्धये। सूत्रोक्तविधिना स्नात्वा संध्यां कृत्वा यथाविधि। ब्रह्मयज्ञं विधायादौ ततस्तर्पणमा
चरेत्। नैमित्तिकं सकलकर्म विधायानंतरं पुमान्। पूजयेत्परया भक्त्या पार्थिवं लिंगमुत्तमं। नदीतीरे तडागे वा पर्वते कानने पि वा। शिवालये शुचौ देशे पार्थिवार्चा विधीयते। शुद्धप्रदेशसंभूतां मृदमाहृ
त्य यत्नतः। विप्रे गौरा स्मृता शोणा बाहुजे वैश्यजातिके। पीता शूद्रे तु कृष्णा स्यादथवा यत्र या भवेत्। संग्राह्या मृत्तिका लिंगनिर्माणार्थं प्रयत्नतः। आत्मीयपुरतः शुद्धदेशे तु संस्थाप्य मृदमुत्तमां। संशो
विधा ध्य जलैः शुद्धैः पिंडीकृत्य शनैः शनैः। पश्चाल्लिंगं [illegible] यथाशु क्रमेणानेन भक्तिमान्। आवाहनादिचतुर्थ्यंतैः पूर्वोक्तैर्नामभिः क्रमात्। कर्तव्यामत्रियो पूजा भक्त्या परमया मुदा। प्राणायामत्रयं कुर्यात्
न्मूलमंत्रेण देशिकः। भूतशुद्धिं विधायादौ विन्यसेन्मातृकामयं। पंचब्रह्ममयं न्यासमष्टत्रिंशत्कलात्मकं। अत्र दशविधमातृकान्यासकरणाशक्तौ अंतर्मातृका बहिर्मातृका
कंठादिमातृका ऽष्टत्रिंशत्कलान्यास इति न्यासचतुष्टयमावश्यकं। तथा॥ अर्घ्यादिपात्राण्यासाद्य शेषं पीठे शिवं यजेत्। उपचारैः प्रयत्नेन शैवमुद्राः प्रदर्शयेत्। पुष्पांजलित्रयं
दत्वा प्राणायामत्रयं चरेत्। प्रणवं पूर्वमुद्धृत्य महाप्रासादमुद्धरेत्। चिंतारत्नं समुद्धृत्य भुवनेशीं निरंतरं। पंचाक्षरो महेशस्य मूलमंत्रो नवाक्षरः। ॐ क्रौं क्ष्म्रीं ह्रीं नमः शिवाय। इति
नवाक्षरः। वामदेवो ऋषिश्छंदो गायत्री निवृदन्वितं। पार्थिवेश्वरनामादि चिंतामणिरितीरिता। देवता कथिता बीजं महाप्रासादसंज्ञकं। शक्तिस्तु भुवनेशानी नतिः कीलकमुच्यते। वि
नियोगः समाख्यातः पुरुषार्थचतुष्टये। चत्वारि बीजान्युच्चार्य सर्वज्ञाय हृदीरितं। नित्यतृप्ताय शिरसे वह्निवल्लभा। वदेदनादिबोधाय शिखायै वषडिति तथा। स्वतंत्रशक्तये नो
कवचाय हुं ईरितं। अलुप्तशक्तये नेत्रत्रयाय वौषडुच्चरेत्। अनंतशक्तये प्रोक्ता अस्त्राय फडिति क्रमात्। एवं षडंगं विन्यस्य ध्यायेद्देवमतंद्रितः। कर्पूरगौरं करुणावतारं संसारसा
रं भुजगेंद्रहारं। सदा रमंतं हृदयारविंदे भवं भवानीसहितं नमामि। वंदे महेशं सुरसिद्धसेवितं भक्तैः सदा पूजितपादपद्मं। ब्रह्मेंद्रविष्णुप्रमुखैश्च वंद्यं ध्यायेत्सदा कामदुघं प्रसन्नं।
ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वबीजं
निखिलभयहरं पंचवक्त्रं त्रिनेत्रं॥ एवं ध्यात्वा महामंत्रं जपेन्नियतमानसः॥ यथाशक्ति ततः कुर्यात् प्राणायामं षडंगकं॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु
मे देव त्वत्प्रसादात्त्वयि स्थिता। इत्युच्चार्य जपं हस्ते दक्षे देवस्य चार्पयेत्। प्रदक्षिणनमस्कारैः परितोष्य मुहुर्मुहुः। प्रार्थयेत्त्वरया भक्त्या देवदेवं जगद्गुरुं। जयदेव जगन्नाथ जय शं

© Dharmartha Trust J&K. Digitized by eGangotri

शिवार्णव
२६७

भक्तशंकर। जय सर्वसुराध्यक्ष जय सर्वसुरार्चित। जय सर्वगुणातीत जय सर्ववरप्रद। जय नित्य निराधार जय विश्वंभराव्यय। जय विश्वैकवंद्येश जय नागेंद्रभूषण। जय गौरी
पते शंभो जय चंद्रार्धशेखर। जय कोट्यर्कसंकाश जयानंदगुणालय। जय रुद्र विरूपाक्ष जयाचिंत्य निरंजन। जय नाथ कृपासिंधो जय दुःखार्तिभंजन। जय दुस्तरसंसारसागरोत्तारण
प्रभो। प्रसीद मम देवेश संसारार्तस्य विह्वलतः। सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर। महादारिद्र्यमग्नस्य महापापहतस्य च। महाशोकनिविष्टस्य महारोगातुरस्य च। ऋणभारप
रातस्य दह्यमानस्य कर्मभिः। ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंकर। दीर्घमायुः सदारोग्यं यशो वृद्धिर्बलोन्नतिः। ममास्तु नित्यमानंदं प्रसादात्तव शंकर। शत्रवः संक्षयं
यांतु प्रसीदंतु नव[…]हाः। नंदंतु दस्यवो राष्ट्रे जनाः संतु निरामयाः। दुर्भिक्षमारीसंतापाः शमयंतु महीतले। वसुसस्यसमृद्धिं च मम मानं सदा दिश। प्रदेशे वापि पूजांते प्रा
र्थयेत्कृतिलतरः। प्रसन्नोऽभीप्सितं देवो ददाति गिरिजापतिः। एवं संप्रार्थ्य तन्नेत्रो व हन्त्वा सापुटाध्वना। समाश्रीयस्य हृदये महासंसारमुद्रया। शिवलिंगं तु नद्यादौ संस्थाप्य
विहरेत्सुखी। अत्र प्रागुक्तपार्थिवेश्वरचिंतामणिमंत्रो वा जप्तव्यः कामदुघामंत्रो वा। कामदुघामंत्रस्तु। षडक्षरं समुच्चार्य प्रसन्नेति पदं तथा। पारिजाताय चोच्चार्य वह्नि
मायां समुद्धरेत्। योऽष्टार्णो महेश्वरस्य मंत्रः कामदुघा ऋषयः। ॐ नमः शिवाय प्रसन्नपारिजाताय स्वाहा। एतस्य न्यासध्यानादिकं प्राग्वत्॥ अथ वैदिकमार्गेण पूजाव
श्योऽपि न स्पृशेत्। सद्योजातेति मंत्रेण मृत्तिकाग्रहणं भवेत्। वामदेवेति मंत्रेण जलैः संशोध्य यत्नतः। अघोरेणाथ मंत्रेण लिंगीकरणमुत्तमं। ततस्तत्पुरुषायेति वा
णं कुर्याद् द्विजसत्तमः। ईशान इति मंत्रेण वेदीबालं समाचरेत्। पंचाक्षरेण मंत्रेण उपचारैः समर्चयेत्। भवाय भवनाशाय महादेवाय धीमहि। उग्राय उग्रनाशाय शर्वाय
शशिमौलिने। एभिर्मंत्रैः कृत्वा पूजा कर्तव्या शुभमिच्छता। यः कृत्वा पार्थिवं लिंगं पूजयेच्छुभवेदिकां। इहैव पुत्रवान् श्रीमान् ततो रुद्रत्वमाप्नुयात्। त्रिसंध्यं योऽर्चयेल्लिंगं
कृत्वा बिल्वैस्तु पार्थिवं। दशैकादशकं यावत्तस्य पुण्यफलं शृणु। अनेनैव स्वदेहेन रुद्रतुल्यो भवेन्नरः। अथ पारदलिंगस्य विधानं वच्मि नारद। निराशंकं दक्षा
को प्रकारोऽत्र उच्यते। निष्कत्रयं हेमपत्रं रसेंद्रं नवनिष्ककं। अम्लेन मर्दयेद्यामं तेन लिंगं तु कारयेत्। दोलायंत्रे सारनाले जंबीरस्कं दिने पचेत्। तल्लिंगं पूजयेन्नित्यं सु
शुभैरुपचारकैः। लिंगकोटिसहस्रस्य यत्फलं सम्यगर्चनात्। तत्फलं कोटिगुणितं रसलिंगार्चनाद्भवेत्। ब्रह्महत्यासहस्राणि गोहत्यानियुतानि च। तत्क्षणाद्विलयं
यांति रसलिंगस्य दर्शनात्। स्पर्शनात्प्राप्यते मुक्तिरिति सत्यं शिवोदितं। वाङ्मायाश्रीअघोरेण मंत्रराजेन चार्चयेत्। अष्टादशभुजं शुभ्रं पंचवक्त्रं त्रिलोचनं। प्रेतास
नं नीलकंठं रसलिंगं विचिंतयेत्। तस्योत्संगे महादेवीमेकवक्त्रां चतुर्भुजां। अक्षमालांकुशौ दक्षे वामे पाशाभये शुभे। दधतीं नत्तहेमाभां पीतवस्त्रां विभावयेत्। वाङ्मा

श्री
२६७

© Dharmartha Trust J&K. Digitized by eGangotri

याश्री कामराजशक्तिबीजरसांकुशा। ये नमो द्वादशार्णोघा जया विद्या रसांकुशी। अनया पूजयेद्देवीं गंधपुष्पाक्षतादिभिः। नंदिभृंगिमहाकालान् कुमारान्सर्वेदिक्षु सात्। पू
जयेन्नाममंत्रैस्तु प्रणवादिनमोंतकैः। सर्वान्कामानवाप्नोति पुत्रवान्धनवान्भवेत्। पराप्रासाददीक्षां च पारदेश्वरपूजनं। महिम्नस्तुतिपाठश्च नान्यस्य तपसः फलं। पराप्रासा
दमंत्रेण रसलिंगं समर्चयेत्। षण्मासाभ्यंतरेणैव सर्वसिद्धीश्वरो भवेदिति। हयशीर्षपंचरात्रे।। आदिमूर्त्तिर्वासुदेवः संकर्षणस्तथा स्मृतः। प्रद्युम्नश्चानिरुद्धश्च व्यूहस्वयमेव स प्र
भुरिति। चतुर्मूर्त्तिः परः प्रोक्त एकैकोपि पृथक् त्रिधा। केशवादिप्रभेदेन मूर्त्तिर्द्वादशकं स्मृतं। पंकजं दक्षिणे दद्यात्पांचजन्यं तथोपरि। वामोपरि गदा यस्य चक्रं चाधो व्यवस्थितं। आदि
मूर्त्तेस्तु भेदोयं केशवेति प्रकीर्त्यते। अधरोत्तरभावेन रूपमेतत्तु यत्र वै। नारायणाख्या सा मूर्त्तिः स्थापिता भुक्तिमुक्तिदा। सव्याधः पंकजं यस्य पांचजन्यं तथोपरि। दक्षिणोर्ध्वे गदा य
स्य चक्रं चाधो व्यवस्थितं। आदिमूर्त्तेस्तु भेदोयं माधवेति प्रकीर्त्तितः। दक्षिणाधः स्थितं चक्रं गदा यस्योपरि स्थिता। वामोर्ध्वे संस्थितं पद्मं शंखं चाधो व्यवस्थितं। संकर्षणस्य भेदोयं गो
विंदेति प्रकीर्त्तितः। दक्षिणोपरि पद्मं तु गदा याधो व्यवस्थिता। वामोर्ध्वे पांचजन्यं च चक्रं याधो व्यवस्थितं। संकर्षणस्य भेदोयं विष्णुरित्यभिधीयते। दक्षिणोपरि शंखं च चक्रं चाधः
प्रदर्श्यते। वामोर्ध्वे पंकजं यस्य गदा चाधो व्यवस्थिता। मधुसूदननामायं भेदः संकर्षणस्य तु। दक्षिणोर्ध्वे गदा यस्य पंकजं चाप्यधः स्थितं। वामोर्ध्वे संस्थितं चक्रमधः शंखः प्रदर्श्यते।
ब्रह्मांडगं वामपादं दक्षिणं शेषपृष्ठके। बलिबंधनसंसक्तं वामनं चाप्यधः स्थितं। वामोर्ध्वे कौमुदी यस्य पुंडरीकमधः स्थितं। दक्षिणोर्ध्वे सहस्रारं पांचजन्यमधः स्थितं। सतता
ऊप्रमाणेन वामनं कारयेत्सदा। ऊर्ध्वे दक्षिणतश्चक्रमधः पद्मं व्यवस्थितं। वामोर्ध्वे कौमुदी यस्य पांचजन्यमधः स्थितं। पद्मा पद्मकरा वामपार्श्वे यस्य व्यवस्थिता। व्यवस्थितो वासुप
विष्वो वासानुरागो विलासवान्। प्रद्युम्नस्य तु भेदोयं श्रीधरेति प्रकीर्त्यते। दक्षिणोर्ध्वे महाचक्रं कौमुदी तदधः स्थिता। वामोर्ध्वे नलिनं यस्य तदधः शंखो विराजते। हृषीकेशश
होयः स्थापितः सर्वकामदः। दक्षिणोर्ध्वे पुंडरीकं पांचजन्यमधस्तथा। वामोर्ध्वे संस्थितं चक्रं कौमोदकी तदधः स्थिता। पद्मनाभेति सा मूर्त्तिः स्थापिता मोक्षदायिनी। दक्षिणोर्ध्वे पांचजन्य
मधस्तात्तु कुशेशयं।। सव्योर्ध्वे कौमुदी यस्य हेतिराजमधः स्थितं। अनिरुद्धस्य भेदोयं दामोदर इति स्मृतः। एतेषां तु स्त्रियः कार्याः पद्मवीणाधराः शुभाः। सिद्धार्थसंहितायां तु च
तुर्विंशतिमूर्त्तयः स्मृताः। वासुदेवो गदां शंखं चक्रं पद्मधरो मतः। पद्मं शंखं तथा चक्रं गदां वहति केशवः। शंखं चक्रं गदां पद्मं धत्ते नारायणः सदा। गदां चक्रं तथा शंखं पद्मं वहति मा
धवः। चक्रपद्मे तथा शंखं गदां च पुरुषोत्तमः। पद्मं कौमोदकीं शंखं चक्रं धत्तेप्यधोक्षजः। संकर्षणो गदां शंखं पद्मं चक्रधरः स्मृतः। चक्रं गदां पद्मशंखौ गोविंदो धरते भुजैः। गदां पद्मं
तथा शंखं चक्रं विष्णुर्बिभर्त्ति यः। चक्रं शंखं तथा पद्मं गदां च मधुसूदनः। गदे सरोजे चक्रं च शंखं धत्तेऽच्युतः सदा। शंखं कौमोदकीं चक्रमुपेंद्रः पद्मसमुद्वहेत्। चक्रं श
खगदापद्मधरः प्रद्युम्न उच्यते। पद्मं कौमोदकीं चक्रं शंखं धत्ते त्रिविक्रमः। शंखं चक्रं गदां पद्मं वामनो मतो महतो [illegible]। पद्मं चक्रं गदां शंखं [illegible]धरो वहते सस्तोप

© Dharmartha Trust J&K. Digitized by eGangotri

भुजेन चक्रं पद्मं गदां शार्ङ्गं च नरसिंहो विभर्ति यः। पद्मं सुदर्शनं शंखं गदां धत्ते जनार्दनः॥ अनिरुद्धश्च क्रमाद् गदां शंखपद्मसंयुतः। हृषीकेशो गदां शंखं चक्रं पद्मं च धारयन्॥ प्र-
द्युम्नो मोदकं शंखं पद्मं चक्रं गदां तथा। पद्मं च चक्रं गदां शंखं धत्ते दामोदरः सदा॥ शंखं चक्रं सरोजं च गदां च हलियो हरिः। शंखं कौमोदकीं पद्मं चक्रं कृष्णो विभर्ति यः। एताश्च मूर्तयो
ज्ञेया दक्षिणाधः करक्रमात्। इति। एवमेता विष्णुमूर्तयः। शिवलिंगं वा भक्तैः पूजिताः। ब्राह्मणादिभिर्नित्यं पूज्या नन्नमस्याश्चोत्सुकः॥ वह्न्यारदीये॥ धर्मभगीरथसंवादे धर्मवाक्या-
नि॥ प्रायश्चित्तानि हीनानि पापानि शृणु भूपते। सर्वपापानि यान्यत्र तानि सर्वं भूपते। समस्तपापतुल्यानि महानरकदानि च। यः शूद्रेणार्चितं लिंगं विष्णुं वा प्रणमेद् द्विजः। न तस्य
स्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि। नमेद्यः शूद्रसंस्पृष्टं लिंगं वा हरमेव वा। स सर्वयातनाभोगी यावदाहूतनारकी। पाखंडपूजितं लिंगं लोपाखंडं नाभ्यर्चयेत्। सर्ववेदविदां वापि स-
वशास्त्रविदोपि वा। आभीरपूजितं लिंगं नत्वा नरकमश्नुते। यो विप्रैः पूजितं लिंगं विष्णुं वापि नमेत्तु यः। स कोटिकुलसंयुक्त आकल्पं रौरवं व्रजेत्। यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथा-
विधि। तदा प्रभृति शूद्रश्च योषितो वा न संस्पृशेत्। स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर। स्थापने नाधिकारोस्ति विष्णोर्वा शंकरस्य च। अर्चितं तत्र शार्दूल स्वप्ने वापि न पूजयेत्। यः शू-
द्रसंस्कृतं लिंगं विष्णुं वापि नमेद् द्विजः। इहैव सोतं दुःखानि पश्यंत्यामुष्मिके किमु। शूद्रो वानुपनीतो वा स्त्रियो वा पतितोपि वा। केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते। कौद्गल यं वि-
शाख्यस्तु महायाध्यापि च द्विजः। न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि। यो द्विजः पाखंडिनः ओं कौ यतो वेदविनिंदकाः। तस्माद् द्विजस्तान्वेक्षेत यदि देवेषु भक्तिमान्। यस्तु सेतस्य शं-
खारिलिंगांकिततनुर्नरः। संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश। चक्रांकिततनुर्यत्र तत्र त्रिदिवसं वसेत्। यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत्। गंगास्नानरतो वापि अश्व-
मेधरतोपि वा। चक्रांकिततनुं दृष्ट्वा पश्येत् सूर्यं जपन्नरः। जपेत् सप्तैककं सूक्तं मन्त्रं वा पावनं रौरवं व्रजेत्। लिंगांकिततनुं दृष्ट्वा पश्येत् सूर्यं नरेश्वर। जपेच्च शतरुद्रियमन्यथा रौरवं व्रजेत्।
ब्राह्मणस्य तनुर्ह्येषा सर्वदेवसमाश्रया। सा चेद् दग्धा तापिता रात्मनः किं वक्ष्यामितदेतत्सः। चक्रांकिततनुर्वापि राजन् लिंगांकितोपि वा। नाधिकारी परिज्ञेयः श्रौतस्मार्तेषु कर्मसु द्विज॥
॥ अथ शालग्रामलक्षणानि॥ स्कांदे॥ स्निग्धा कृष्णा पांडुरा च पीता नीला तथैव च। वा रक्ता रूक्षा च वक्रा च महास्थूला च लांछिता। कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका।
बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः। बद्धचक्राथवा काचिद् भग्नचक्रा पाषोमुखी। अपि तासां वर्णादिभेदेन गुणदोषौ तत्रैव। स्निग्धा सिद्धकरी मंत्रे कृष्णा कीर्तिं ददाति
च। पांडुरा पापदमनी पीता पुत्रफलप्रदा। नीला संदिशते लक्ष्मीं रक्ता राज्यप्रदायिनी। रूक्षा चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिनी। स्थूला त्रिहेतिर्वेधा मुक्तिफलानां तु अलांछिता। श्री
कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका। बृहन्मुखी बृहच्चक्री लग्नचक्राथवा पुनः। भग्नचक्राथवा यास्या भग्नचक्राप्यधोमुखी। पूजयेद्यः प्रमादेन दुःखमेतल्लभेत सः। २६८
अग्निपुराणे॥ तथा ज्वालमुखी भग्ना विषमा बहुचक्रिका। विकारा वर्तनाभिश्च नारसिंही तथैव च। कपिला भग्नावर्ता रेखावर्ता च पाशिला। दुःखदा सा तु विज्ञेया सु-

© Dharmartha Trust J&K. Digitized by eGangotri

रवहानकदाचन। स्निग्धा श्यामा तथा मुक्ता पीता वा समवक्रिका। घोणीमूर्त्तिरनंताख्या गंभीरा संपुटा तथा। सूक्ष्मा मूर्त्तिश्च सुमुखी पूजिता सिद्धिदायका। धात्रीफल
मा २ प्रमाणा या करेणोभयसंपुटा। पूजनीया प्रयत्नेन भक्त्या तां तु प्रपूजयेत्। पूजिते फलमाप्नोति इह लोके परत्र वै। दोषाश्चैते सकामानां न निष्कामस्य। अत ऊर्द्ध्वं श्रीभगवता स्कांदे। खं
डितं स्फुटितं भग्नं शालग्रामे न दोषभाक्। दृष्टा तु यस्य या मूर्त्तिः स तां यत्नेन पूजयेत्। चक्रं रोकेवलं तत्र पद्मेन सहसंयुतं। केवलो वनमालाया हरिर्लक्ष्म्या सहस्थितः। मुख्यास्ति
ग्धादयस्तत्र मुख्याः स्युक्ता दयोमताः। मुख्याभावे त्वमुख्यापि पूज्या इत्युच्यते परैरिति। अथैतासामेव लक्षणविशेषेण संज्ञाविशेषः ब्राह्मे श्रीभगवद्ब्रह्मसंवादे। निवसामि
सदा ब्रह्मन् शालग्रामाख्यवेश्मनि। तत्र मुख्यचक्रांकभेदनामानि मे शृणु। द्वारदेशे समे चक्रे दृश्यते नांतरायके। वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः। प्रद्युम्नः
सूक्ष्मचक्रस्तु पीतद्युतिस्तथैव च। सुषिरे छिद्रबहुले दीर्घाकारं तु तत्र वै। अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः। रेखात्रयं तु तत्र द्वारि पृष्ठं पद्मेन लांछितं। सौभाग्यकेश
वो द्वयानुक्तोणे भवेत्तु यः। श्यामं नारायणं विंद्यान्नाभिचक्रं तथोन्नतं। दीर्घरेखासमोपेतं दक्षिणे सुषिरं पृथु। ऊर्द्ध्वमुखं विजानीयाद्द्वारे च हरिरूपिणं। कामदं मोक्षदं देवं वल
दं वा विशेषतः। परमेष्ठी शुक्लाभः पद्मचक्रसमन्वितः। बिंदुकृतिस्तथा पृष्ठे सुषिरं वापि पुष्कलं। कृष्णवर्णस्तथा बिंदुः स्थूले चक्रे सुशोभने। द्वारोपरि तथा रेखा दृश्यते मध्यदेश
तः कपिलो नारसिंहस्तु पृथुचक्रः सुशोभनः। ब्रह्मचर्येऽधिकारी स्यात् पूजा नान्यथा भवेत्। ब्रह्मचर्येण पूज्योऽसावन्यथा विघ्नदो भवेत्। कपिलाः कपिलो बिंदुः स्यात् कपिलः
पंचबिंदुकः। ब्रह्मचर्येण पूज्यः स्यादन्यथा सर्वविघ्नदः। स्थूले चक्रद्वये मध्ये गुडलाक्षासवर्णकं। द्वारोपरि तथा रेखा पूजा कार्या सुशोभना। स्फुटितं विषमं चक्रं नारसिंहं तु कपिलं
संपूज्य मुक्तिमाप्नोति संग्रामे विजयी भवेत्। पाद्मे। कार्त्तिकमाहात्म्ये। यस्य दीर्घमुखे पूर्वं कास्थिते लक्षणैर्युतं। केसराकारिकारेखा नारसिंहो मतः स्मृतः। ब्राह्मे। वराहं शक्ति
लिंगे च यच्चक्रे च विषमे स्मृतं। इंद्रनीलनिभं स्थूलं त्रिरेखालांछितं शुभं। पाद्मे। वाराहाकृतिरा भुग्नश्चक्रेरेखा स्थूलं कृतः। वाराह इति संप्रोक्त इति। ब्राह्मे। दीर्घाकारं च न वर्णं आर्विं
दुत्रयविभूषितं। मत्स्याख्या सा शिला ह्येषा भुक्तिमुक्तिफलप्रदा। कूर्मस्तथोन्नतः पृष्ठे वर्तुलः परिपूरितः। हरितं वर्णमाधत्ते कौस्तुभेन च चिह्नितः। कूर्माकारा च चक्रांका शिला
कूर्मः प्रकीर्त्तितः। ब्राह्मे। हयग्रीवोंकुशाकारो रेखाः पंच भवंति हि। बहुबिंदुसमाकीर्णो दृश्यते नीलरूपकः। पाद्मे। हयग्रीवाय पालं वा रेखां वा या शिलो भवेत्। तथा सोम्ने हयग्री
वः पूजितो ज्ञानदो भवेत्। अश्वाकृतिर्मुखं यस्य साक्षमालं शिरस्तथा। पद्माकृतिर्भवेद्वापि हयशीर्षस्तु सो मतः। वैकुंठं नीलवर्णाभं चक्रमेकं तथा ध्वजा। द्वारोपरि तथा रेखा पूजा
कार्या सुशोभना। श्रीधरस्तु तथा देवश्चिह्नितो वनमालया। कदंबकुसुमाकारो रेखापंचकभूषितः। वर्तुलश्चाति ह्रस्वश्च वामनः परिकीर्त्तितः। अतसीकुसुमप्रख्यो बिंदुना
परिशोभितः। अन्यत्र। वामनाख्यो भवेद्देवो ह्रस्वो यस्तु महाद्युतिः। वामपार्श्वे गदा चक्रे रेखा वै वलु दक्षिणे। पाद्मे। चक्राकारेण पंक्तिः स्यात् यत्र रेखामयी भवेत्। स सुदर्शन

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धर्मो॰
२६९

269

इत्येवं स्मातः पूज्याफलप्रदः॥ दामोदरः स्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितं। दूर्वाभं द्वारि संकीर्णं पीता रेखा तथैव च॥ उपर्यधस्तु चक्रे द्वे जाति दीर्घं मुखे बिलं। मध्ये तु रे
स्थूलं वै कासाव दामोदरः स्मृतः॥ अनंतश्चापि स्थूलो दामोदरो हेयः सूक्ष्मरंध्रो भवेत्तु यः चक्रे च मध्यदेशस्थे पूजितः सुसुखः सदा। नानावर्णो ह्यनेकाभो नागभोगेन
विकृतः। अनेकवक्त्रसंभिन्नः सर्वकामफलप्रदः। अनेकवक्त्रो बहुभिश्चक्रैरप्युपलक्षितः। अनंतः स तु विज्ञेयः सर्वपूजाफलप्रदः॥ विदिक्षु दिक्षु सर्वासु [illegible]
श्यते मुखं। पुरुषोत्तमः स विज्ञेयो भुक्तिमुक्तिफलप्रदः। दृश्यते शिखरे लिंगं शालग्रामसमुद्भवात्। स योगेश्वरो नाम ब्रह्महत्यां व्यपोहति। आरक्तं [illegible]
छत्रसंयुतं। तुलस्याः पूजयेन्नित्यं दरिद्रत्वीकरो भवेत्। चंद्राकृतिर्हिरण्याभो रश्मिजालं विनिर्दिशेत्। सुवर्णरेखाबहुलं स्फटिकद्युतिशोभितं। पापघ्नो [illegible]
खाः पंक्तिभूताश्च यत्र वै। शालग्रामशिलायां सा विष्णुपंजरसंज्ञिता। नागवत्कुंडलीभूतरेखापंक्तिः सशेषकः। पद्माकारे तु पंक्तौ द्वे मध्ये लंबा च रेखिका। गरुडः समु
चितेयः श्चतुश्चक्रो जनार्दनः। चतुश्चक्रः सूक्ष्मद्वारि वनमालांकितोदरः। लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्तिफलप्रदः। ऊर्ध्वचंद्राकृतिर्ज्ञेयो हृषीकेश उदाहृतः। ताम
र्धं लभते स्वर्गो विषयांश्च समीहितान्। वामपार्श्वे समे चक्रे कृष्णवर्णः सविंदुकः। लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिफलप्रदः। त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्यु
तिः॥ वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे। प्रदक्षिणावर्तकृतवनमालाविभूषिता। या शिला कृष्णसंज्ञा सा धनधान्यसमृद्धिदा। वत्सो यस्य दृश्यंते रेखाः पार्श्वे समीप
गाः द्वे चक्रे मध्यदेशे तु सा शिला तु चतुर्मुखेति॥ एतल्लक्षणयुक्तास्तु शालग्रामशिलाः शुभाः। याश्चैतास्वपि सूक्ष्मास्तु सूक्ष्मास्ताः प्रशस्ततराः स्मृताः॥ तथा च श्रीभगवत्तुलसं
वादे तत्रैव॥ यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा। तस्मात्संपूजयेन्नित्यं धर्मकामार्थसिद्धये। तत्राप्यामलकीतुल्या सूक्ष्मा यातीव या भवेत्। तस्यामेव सदा ब्रह्मन् श्रिय
सह वसाम्यहं॥ अथ शालग्रामशिलायां हरिपूजामाहात्म्यं पाद्मे माघमाहात्म्ये। यः पूजयेद्धरिं चक्रे शालग्रामशिलोद्भवे। राजसूयसहस्रेण तेनेष्टं प्रतिवासरं। यदामनं
तिवेदांता ब्रह्म निर्गुणमच्युतं। तत्प्रसादं भवेन्नृणां शालग्रामशिलार्चनात्। महाकाष्ठस्थितो वह्निर्मथ्यमानः प्रकाशते। अपि पापसमाचाराः कर्मण्यनधिकारिणः। शा
लग्रामार्चका वैश्य नैव यांति यमालयं। न तथा रमते लक्ष्म्यां न तथा स्वपुरे हरिः। शालग्रामशिलाचक्रे यथा स रमते सदा। अग्निहोत्रं हुतं तेन दत्ता पृथ्वी ससागरा। येनार्चि
तो हरिश्चक्रे शालग्रामशिलोद्भवे। कामक्रोधमदैर्लोभैर्व्याप्तो योत्र नराधमः सोपि याति हरेर्लोकं शालग्रामशिलार्चनात्। यः स्नापयति गोविंदं शालग्रामे सदा नरः। आ
त संकल्पं यावन्न सप्रश्नते दिवः। विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मखैः। मुक्तिं यांति नरा वैश्य शालग्रामशिलार्चनात्। नरकं गर्भवासं च तिर्यक्त्वं कृमियोनिकं। न याति
वैश्य पापोपि शालग्रामशिलार्चकः। दीक्षाविधानमंत्रज्ञश्चक्रे यो बलिमाहरेत्। स याति वैष्णवं धाम सत्यं सत्यं मयोदितं। नैवेद्यैर्विविधैः पुष्पैर्धूपदीपविलेपनैः। गी

श्री
२६९

© Dharmartha Trust J&K. Digitized by eGangotri

तवादित्रस्तोत्रैर्यैः शालग्रामशिलार्चनं कुरुते मानवो यस्तु कलौ भक्तिपरायणः। कल्पकोटिसहस्राणि रमते सन्निधौ हरेः। लिंगैस्तु कोटिभिर्दृष्टैर्यत्फलं
पूजितैश्चैतैः। शालग्रामशिलायस्तु एकेनापीह तत्फलं। शालग्रामशिलारूपे यत्र तिष्ठति केशवः। तत्र देवासुरा यक्षा भुवनानि चतुर्दश। शालग्रामशिलायां
यः श्राद्धं कुरुते नरः। पितरस्तत्र तिष्ठन्ति तृप्ताः कल्पशतं दिवि। शालग्रामसमीपे तु क्रोशमात्रं समंततः। कीटकोपि मृतो याति वैकुंठभवनं नरः। शालग्रामशिलाग्रे
यो दद्याद्दानमुत्तमं। भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं। स्कांदे शिवस्कंदसंवादे॥ शालग्रामशिलायां तु त्रैलोक्यं सचराचरं। मया सह महासेन लीनं तिष्ठति सर्वदा।
दृष्टा प्रणामिता येन स्नापिता पूजिता तथा। पुण्यकोटिसमं पुण्यं गवां कोटिफलं भवेत्। कामासक्तोपि यो नित्यं भक्तिभावविवर्जितः। शालग्रामशिलां पुत्र संपूज्यैवाच्यु
तो भवेत्। शालग्रामशिलाविवे हत्याकोटिविनाशनं। स्मृतं संकीर्तितं ध्यातं पूजितं वा नमस्कृतं। शालग्रामशिलां दृष्ट्वा यांति पापान्यनेकशः। सिंहं दृष्ट्वा यथा यांति वने मृ
गगणा भयात्। मनः करोति मनुजः शालग्रामशिलार्चने। पापानि विलयं यांति तमः सूर्योदये यथा। कामासक्तोथवा क्रुद्धः शालग्रामशिलार्चने। भक्त्या वा यदि वा भ
रुत्या मुक्तिमवाप्नुयात्। वैवस्वतभयं नास्ति तथा मरणजन्मनोः। यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः। गीतिर्वाद्यैस्तथा स्तोत्रैः शालग्रामशिलार्चनं कुरुते
मानवो यस्तु कलौ भक्तिपरायणः। कल्पकोटिसहस्राणि रमते विष्णुसद्मनि। शालग्रामे नमस्कारो भावेनापि नरैः कृतः। कालः भयं नैव करिष्यंति तत्कृताय नरा भुवि म
क्तिवलदर्पिष्ठा मस्त्रंखुं न नमंति ये वासुदेवं नते हयामकृताः पापिनो हते। शालग्रामशिलायां तु सदा पुत्र वसाम्यहं। दत्तं देवेन दुष्टेन स्वस्थानं मम भक्तितः। पद्मकोटिसह
स्रैस्तु पूजिते मयि यत्फलं। तत्फलं कोटिगुणितं शालग्रामशिलार्चने। पूजितोहं न तैर्मंत्रैर्नमितोहं न तैर्नरैः। न कृतं मर्त्यलोके यैः शालग्रामशिलार्चनं। शालग्रामशिलायां तु
यः करोति ममार्चनं। तेनार्चितोहं सततं युगानामेकसप्ततिः। किमर्चितैर्लिंगशतैर्विष्णुभक्तिविवर्जितैः। शालग्रामशिलाबिंबं नार्चितं यदि पुत्रक। अनर्हं मम नैवेद्यं पत्रं पु
फजलं। शालग्रामशिलालग्नं सर्वं याति पवित्रतां। यो हि माहेश्वरो भूत्वा वैष्णवं लिंगमुत्तमं। द्वेष्टि वै याति नरकं यावदिंद्राश्चतुर्दश। सकृदभ्यर्चिते विष्णौ शालग्रामसमुद्भवे मु
क्तिं यांति मनुजा नूनं सांख्येन वर्जिताः। मल्लिंगैः कोटिभिर्दृष्टैर्यत्फलं पूजितैस्तु तैः। शालग्रामशिलायां तु एकेनापीह तत्फलं। तस्मात्कृत्वा च मत्कृते श्रीसर्वं मम पुत्रक। कर्त
व्यं सततं पुत्र शालग्रामशिलार्चनं। शालग्रामशिलारूपे यत्र तिष्ठति केशवः। तत्र देवाः सुरा यक्षा भुवनानि चतुर्दश। सकृदभ्यर्चिते विष्णौ दृष्टे शालग्रामशिलागते सकृत्पिंडेन
लार्पिताः। वसंति पितरस्तस्य न संख्या तत्र विद्यते। प्रमाणमस्ति सर्वस्य सुकृतस्य हि पुत्रक। फलं प्रमाणहीनं तु शालग्रामशिलार्चने। यो ददाति शिलां विष्णोः शालग्रामस
मुद्भवां। विप्राय विष्णुभक्ताय तेनेष्टं वसुभिर्मखैः। मानुष्ये दुर्लभे लोके शालग्रामशिला नरैः। प्राप्यते न विना पुण्यैः कलिकाले विशेषतः। सधनाः पुरुषा लोके सत्कुलेन स

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ धा॰ लो॰ च
२७०
270

जीविते। शालग्रामशिलाप्सु ब्रह्मगृहे यस्य च पूजिता। सन्नियम्याङ्घ्रिपद्मा मे शालग्रामशिलार्चने नायः कुर्यात्स्नानमेव भक्त्या स याति परमं पदं। भक्त्या वा यदि वाभक्त्या यः करो
ति स पुण्यभाक्। दृष्ट्वापि चलो भेनदं भेनकपटे न वा। शालग्रामोद्भवं देवं दृष्ट्वा पापात्प्रमुच्यते। अशुचिर्वा दुराचारः सत्यशौचविवर्जितः। शालग्रामशिलां स्पृष्ट्वा सद्य एव
शुचिर्भवेत्। तिलप्रस्थशतं भक्त्या यो ददाति दिने दिने। तत्फलं समवाप्नोति शालग्रामशिलार्चने। पत्रं पुष्पं फलं मूलं तोयं दूर्वाक्षताः सुत जायते मेरुणा मनुः तेषां शालग्राम
शिलार्पितं। विधिहीनोऽपि यः कुर्यात्क्रियामन्त्रविवर्जितां। चक्रे पूजामवाप्नोति सम्यक्शास्त्रोदितं फलं। तत्रैवान्यत्र। स्कन्धे कृत्वा तु यो ध्यानं वहते शैलनायकं मनोऽर्चं तु भवे
त्सर्वं त्रैलोक्यं सचराचरं। ब्रह्महत्यादिकं पापं यत्किंचित्कुरुते नरः। तत्सर्वं निर्दहत्याशु शालग्रामशिलार्चने। न पूजने न मन्त्राश्च न जपो न च भावना। न स्तुतिर्नोपचाराश्च शालग्रा
मशिलार्चने। शालग्रामशिला यत्र तत्तीर्थं योजनत्रयं। तत्र दानं च होमश्च सर्वं कोटिगुणं भवेत्। शालग्रामशिलायां तु यः श्राद्धं कुरुते नरः। पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पश
तं दिवि। शालग्रामसमीपे तु क्रोशमात्रं समन्ततः। कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः। शालग्रामशिलाचक्रे यो दद्याद्दानमुत्तमं। भूचक्रे तेन दत्तं स्यात्सशैलवनकाननं॥
गरुडपुराणे॥ तिष्ठन्ति नित्यं पितरो मनुष्याः तीर्थान्यग्निगंगागयापुष्कराणि पद्माश्रमे धाम विपुल्याशैलाश्च चक्राङ्किता यस्य वसति गेहे॥ पाद्मे॥ शालग्रामशिलायां तु ये नैवेद्यं प्र
तेषां जिता हरिः। संशोध्य पापानि मुक्तये बुद्धिदो भवेत्। कार्त्तिके मथुरायां तु सारूप्यं दृश्यते हरिः। शालग्रामशिलायां वै पितृनुद्दिश्य पूजितः। केशवः समुद्धरेत्तस्य पितॄन्नरकात्सलोक
तो॥ बृहन्नारदीये॥ शालग्रामशिलारूपी यत्र तिष्ठति केशवः। न बाधन्ते सुरास्तत्र भूतवेतालकादयः। शालग्रामशिला यत्र तत्तीर्थं तत्तपोवनं। शतं वा पूजितं भक्त्या तदा स्याद्दधि
कं फलं॥ अथ तासां वा कुल्यं फलविशेषः। पाद्मे॥ शालग्रामा युग्माः पूज्या युग्मेषु द्वितयं न हि। अयुग्मा नैव पूज्यन्ते अयुग्मेष्वेक एव हि। शिला द्वादश भो वैश्य शालग्रामसमुद्भ
वाः। विधिवत्पूजिता येन तस्य पुण्यं वदामि ते। कोटिद्वादशलिङ्गेषु पूजितेषु स्वर्णपंकजैः। यत्स्याद्द्वादशकल्पेषु दिनेनैकेन तद्भवेत्। यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतं
तत्फलं नैव शक्नोमि वक्तुं कल्पशतैरपि॥ इत्याद्यास्तीर्णविस्तरः। अत्र केचित् शालग्रामे विष्णोर्नावाहनं कार्यमिति वदन्ति। तत्र प्रमाणं चिन्त्यं। वस्तुतस्तु स्कन्दपुराणादिदर्शनादाव
हनमवश्यं कार्यमिति प्रतीयते॥ यथा स्कन्दपुराणे॥ विप्रः प्रवर्तिते देहे स्मृत्युक्तेन न्यासेन तु। ततस्तु प्रतिमायां वा शालग्रामे विशेषतः। क्रमेण ततः पश्चात्कुर्यादावाहनादिकं। श्री
आवाहयेद्यत्पुरतो ध्यानसंस्थं द्विजोत्तम इति। अत एवावाहनं बुद्धा सनातनमभिधायोक्तं बोधायनेन। शालग्रामे प्रतिमासु स्वस्थानाव्याप्यावाहनादिविसर्जनमिति॥ त्रैलोक्य २७०
संमोहनतन्त्रे॥ शालग्रामद्युपक्रम्य पविसर्जनं ता पूजा नात। अत्र शालग्रामशिलायां तु प्रतिष्ठां नैव कारयेदिति प्रतिष्ठामात्रनिषेधात् आवाहनमावश्यकं किं स्यादेवता
नो वा ऽविरुद्धमिति। आवाहनाद्यादिषु षष्ठस्य व्युत्क्रमो प्रपूजयेदिति भागवतेऽपि भगवता स्वयमभिधानात्। आदिपदेन मन्त्रादयो गृह्यन्ते। आवाहनस्वरूपमुक्तं सि

© Dharmartha Trust J&K. Digitized by eGangotri

क्रान्तशेखरे॥ स च तत एव प्रफुल्लस्य तत्तस्यैवार्चनादिषु सादरं संमुखीभावस्तदावाहनमिष्यत इति। तत्पर्यायमाह शारदातिलके॥ मूलमंत्रं समुच्चार्य कुसुमाञ्जलिना सुधीः॥
आनीयते ततः स्वस्थानान्नासिकारन्ध्रनिर्गतं। करस्थमालकाम्भोजे चैतन्यं पुष्पसंचये। संयोज्यावाहनं ध्येयमर्जीवावाहयेत्सुधीः सुषुम्णावर्त्मनाकृष्टं ध्येयं दक्षिणनासारन्ध्रनिर्गतं
मिति॥ गरुडपुराणे॥ आगच्छेति प्रयोगेण मूलमंत्रेण शंकर। आवाहनं प्रकुर्वीत मिति॥ नृसिंहपुराणे॥ आगच्छ नरसिंहेति गतान्तरे॥ आवाहनं स्थापनं च सन्निधापनमेव च॥
सन्निरोधनमित्युक्तं संमुखीकरणं ततः॥ अथावगुण्ठनं प्रोक्तं सकलीकरणं ततः। अमृतीकरणं चैव परमीकरणं तथा। विधाय स्वस्वमुद्राभिः प्राणस्थापनमाचरेत्। सकलीकर
णस्वरूपं च सिद्धान्तशेखरे॥ अविभिन्नस्वभावानां पदभिन्नप्रयोजनं। अंगानामंगिनां सार्धं सकलीकरणं विदुः॥ श्रीकुलार्णवे॥ पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मंत्रवित्।
मूलमंत्रेण दीपिन्या मालिन्या ओदकेन वा। त्रिवारं प्रोक्षयेद्दिव्यैर्द्रव्यैः शुद्धिरयं प्रिये। पंचशुद्धिं विधायाथ संपश्चाद्धनं समारभेत्। सा पूजा सफला देवि वान्यथा निःफला भवे
त्। तथा। वाग्भवं च द्युग्मांते वाग्वादिनि च वाग्भवं। कामराजं ततः क्लिन्ने क्लेदिनि क्लेदयेति च। महाक्षोभं कुरुयुग्मं कामराजमतः परं। तार्तीयं मोक्षयद्वंते कुरुयुग्मं वदेत्ततः स्वा
हा सा दीपनी तु सप्तत्रिंशद्भिरक्षरैः। दीपिनीमनुरित्युक्तः सर्वसिद्धिकरः प्रिये। वकारान्तकुरुयुग्मो तेन तार्तीयं तदनु परा प्रासादबीजमित्यर्थः। सप्तत्रिंशदक्षरैरित्युक्तः। वाग्भ
वकामराजतार्तीया बालाविद्याया एव॥ सा त्वग्रे वक्ष्यते॥ पराप्रासादबीजं तु पुरस्तात्प्रयोगे अस्यैव मंत्रस्यांते द्रष्टव्यं। तथा। सकलीकृत्य तत्प्राणांत दीप्नीं द्वियाति वा प्रति
ष्ठाप्यार्चयेद्देवमन्यथा निःफलं भवेत्। अत्र केचिदस्मिन् प्राणप्रतिष्ठां तु प्रतिमापूजनमाहुः। न कश्चिद्बुधः कुर्यात्फलाप्त सुमवाप्नुयादिति उत्तरतंत्रवचनात् प्राणप्रति
ष्ठानकार्यत्वात् कुरुतन्त्रात् तस्य वचनस्यावाहनादिरहितस्य स्थंडिलादेः पूजनविषयत्वात्। अत एवोक्तं तत्रैव प्रतिमापूजनादृत इति। प्रतिमामूर्तिः। तस्यां मंत्रमप्यापि
तथात्वात्। अन्यथा कथं सकलीकरणमिति। उत्तरतंत्रे॥ मुद्रां प्रदर्शयेद्विधिवदुपचारान्प्रकल्पयेत्। मुद्रास्तत्तत्कल्पोक्ता सा त्वग्रे वक्ष्यते॥ कुलमूलावतारे॥ मुदं स्व रू
पलाभाभ्यां देहद्वारेण वा ततः। यावदर्पयंत्यपले नमुद्रास्ताः परिकीर्तिताः। मोदयंति गृहादिव्यो पापौघं द्रावयंति च। मोदनं द्रावणं यस्मात् मुद्राशास्त्रेषु वर्णिता इति॥
मुद्राप्रदर्शनानि रूपान्तिकाः॥ प्रपंचसारे॥ आसनस्वागतेवार्घ्यपाद्यसाचमनीयकं। मधुपर्कोसनस्नानवसनाभरणान्यपि। सुगंधसुमनोधूपदीपनैवेद्यवंदनं। प्रयोजये
द्वेनायामुपचारांस्तु षोडश। अर्घ्यपाद्ये साचमने मधुपर्काचमान्यपि। गंधाद्यो निवेद्यांता उपचारा दशक्रमात्। गंधाद्यो निवेद्यांता पूजा पंचोपचारिका। सपर्यास्त्रि
विधा प्रोक्ता तासामेकतमां श्रयेत्। अत्र पंचोपचारपूजापक्षे स्नानार्घ्यादिस्थापनं नास्ति प्रयोजनाभावात्॥ भैरवीतंत्रे॥ एकैकस्यां ततो मंत्री प्राणाद्यष्टानि वेदयेत्। नान्नि
वेदनप्रकारमाह नारदपंचरात्रे॥ प्रणवांते त्रिधाकृत्वा प्रणवं व्योमविभूषितं। इदं मिदं मिदं पश्चात् परं दत्ता षडक्षरे। गहाणेव ततः स्वाहा मंत्रः पंचदशाक्षरः। यो

© Dharmartha Trust J&K. Digitized by eGangotri

विधानपा० २७१

271

ॐः सर्वोपचारेषु पाद्यादिषु सदेव हि। आणं हकारः। व्योमबिंदुः। अत्र तृतीयहकारोपरिस्थितबिंदोरिकारेण सह संधिः कार्यः। तदा तु भवति। उत्तरतंत्रे। मूलेनै
वासनं दद्यात्तेन स्वांतेगतमीरयेत्। ततोऽर्घ्यं मूर्ध्नि दद्याच्च स्वाहामंत्रेण मंत्रवित्। पादाब्जे देवतायास्तु हृदा पाद्यं प्रकल्पयेत्। दद्यादाचमनं वक्त्रे देवतायाः सुधात्म
ना। सुधामंत्रेण दद्यात्तु मधुपर्कं मुखांबुजे। अत्राद्योऽचमनीयमधुपर्कं मुख्यमष्टविभूषे नमः पदमेव स्वाहादिष्का नेपथ्योक्तं वा। प्रागुक्तपुष्पैः। अथानवैदिके मिश्रि
तेवापि शिखादीनां विधीयते। तांत्रिको विप्रभक्तस्य शूद्रस्यापि प्रकीर्तितः। इति पद्मपुराणवचनाद्ब्राह्मणक्षत्रियवैश्यैर्गणेशादिपंचदेवतानां तत्तद्वैदिकमंत्रेणापू
धर्मे पूजां कृत्वा ततस्तांत्रिकमंत्रेण पूजा कार्या। केवलतांत्रिकयजनस्य शूद्रविषयत्वाद्गुरुके नवचनात्। तत्र वैदिकमंत्रास्तु गणानां त्वा गणपतेः। गोभिर्मायेति भुवन
भार्यादि गौरीभेदानां। यच्चागितिरस्याः। श्रीसूक्तं लक्ष्म्याः। जातवेदसे सुनवामेति दुर्गायाः। विष्णोः पुरुषसूक्तं। रवेराकृष्णेनेति। शिवस्य नमः शंभवे इति। त्र्यंब
कं यजामहे इति वा। गणानां त्वेति गृत्समदो गणपतिर्जगती। गौरीर्मिमायेति जगती दीर्घतमः। आकृष्णेनेति हिरण्यस्तूपः सविता त्रिष्टुप्। अथोपचाराः। तत्रा
दावासनानि। देवस्य वामभागे तु दद्यान्मूलेन वासनं। पौष्टं दारुमयं वास्त्रं वामे कौशेयतेजसं। षड्विधं वासनं प्रोक्तमिति। उत्तरतंत्रे। पौष्टं पुष्पादिरचितं कुशसू
त्रादि संयुतं। अतिप्रीतिकरं दद्याम मायाम्नस्य भैरवे। यत्तद्दारुसमुद्भूतमासनं वा व्रणं शुभं। अन्यदारुभवं वापि दद्यादासनमुत्तमं। सकीटकक्षीरयुते दारुसार
विवर्जितं। चैत्यश्मशानसंभूतं वर्जयित्वा बिभीतकं। चैत्यः ग्रामप्रसिद्धिहेतुर्भूतो महावृक्षस्तद्दारुमयासने विशेषमाह रुद्रयामले। शांडिल्यभद्रसारस्य चास
नं हस्तमात्रकं। सप्तांगुलोच्छ्रितं दद्यात् विष्टरं वा विचक्षणः। शांडिल्यो विल्वः। विल्वः शांडिल्यशैलूषौ मालूरश्रीफलावपीत्यमरः। भद्रसारः श्रीचन्दनः। भद्र
सारो मलयजो भद्रश्रीश्चंदनोऽस्त्रियामित्यमरः। विष्टरो दर्भमुष्टिः। सप्तविंशतिदर्भाणां वेण्यग्रे ग्रंथिभूषितां विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितमित्यमरस्त
यद्वा विष्टरश्चर्मरत्नासनश्च बद्धमात्रवाचि। विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमिति हि कोशः। उत्तरतंत्रे। कौशजं वाल्कलं शाणं वस्त्रमेतच्चतुष्टयं स्मृतं रोमजं
कंबलं चैव बादरं च चतुष्टयं। वस्त्रेषु केवलं श्रेष्ठमासनं देवतुष्टये। वास्त्रमास्त्रमासनं चतुष्टयमित्यर्थः। बादरं कार्पासं। कार्पासं बादरं च तदिति विश्वप्रका २७१
शकोशात्। तथा। सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य वा। गजानां च तुरंगाणां कृष्णसारस्य चर्मणि। रांकवे रोममतं श्रेष्ठं क्षारवं चंदनोद्भवं। रांकुर्वै रंकुनामा मृगः
काश्मीरदेशे प्रसिद्धः। तज्जो मजं पश्मरीति लोके प्रसिद्धः। केवलविशेषः। तथा। यच्चासनं कुशमयं तदासनमनुत्तमं। योगपीठस्य सदृशमासनं कौशमुच्यते।

© Dharmartha Trust J&K. Digitized by eGangotri

तथा सर्वे चांतैजसानो वाप्यासनम् श्रेष्ठमुच्यते। वर्जयेत्तिलालोहमये कांस्यं सीसकमेव चेति॥ अतःपरमर्घ्यदानं॥ तच्च देवस्य शिरो हेमाद्येव शिरसि देयं। न वै वंपि त्र्यर्घ्येण व्याप्तिः।
विप्रकेरदानादिति वाच्यं। तस्य पितृणां शिरो हेमाद्येव तत्र दानादिति। सोमशंभुः। आगतायतथार्घ्यो स्नानसुमासनगाग्यवा। पूजितागंतुकामाय दद्यादर्घ्यं विचक्षणः। आगते स्ना
नकाले वनैवेद्योपक्रमे तथा। पाद्यस्यापि समुद्दिष्टं: समयास्त्रिविधो बुधैः। पाद्येवमधुपर्के वस्त्राने वस्त्रोपवीतयोः। भोजने चाचमनं दद्यादिति। तूर्णीयामे। सुगंधतैलेरभ्य
र्क्ष सुगंधामलकादिभिः। उद्वर्तनं विधायाथ स्नापयेल्लोष्णवारिणा। गंधोदकेश्च मूलेन यथाशक्त्याभिषेचयेत्। महाभिषेके सर्वत्र शंखेनैव प्रकल्पयेत्। सर्वमंत्रप्रशस्तोऽकुः शिवसू
योश्च मंविना। अंकुः शंखः। आगमस्थः स्नानं पुरुषसूक्तेन शुद्धशंखोदकेन वा। क्षीरदध्याज्यमधुभिः खंडेन च पंचपंचकृत्पंचकं। नारिकेलोदकेनापि तथा तालफलांबुना। गंधपुष्पे
श्च मधुभिस्तथा गंधोदकेन वा। ऐक्षवेनोदकेनापि सकर्पूरादिगंधिना। कदलीपत्रसाम्राश्च जलेनापि सुगंधिना। शतं सहस्रमयुतं शक्त्या वाप्यभिषेचयेत्। शंखं संपूज्य तेनैव सु
पुष्पेण रघृतमं। सकृच्छागरुधूपेन धूपयेदंतरांतरा। ततः शुद्धजलेनैव स्नापयेत्तमनन्यधीः। अत्राभिषेकस्य शंखेन स्नापनं निषिद्धं। पुराणेषु तु शंखेन स्नापने प्रशस्तमभ्
यते। स्कांदे॥ सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतेरपि। अभिषिच्य महादेवं रुद्रसूक्तैः समाहित इति॥ यामले॥ पीतकौशेयवसनं विष्णुप्रीतिप्रकीर्तितं। रक्तं शक्तेः विद्या
नां शिवस्य च सितं प्रियं। मलहीनं तथाक्लिष्टं क्षौमं कार्पासमेव वा। मंत्रान्ते त्रप्रकाशे॥ तैलादिदूषितारोगः सच्छिद्राच्छाद्यता भवेत्। जीर्णेदरिद्रताकर्तृ मंजिनाकीर्तिहीनता॥
कालिकापुराणे॥ निर्दशं मलिनं जीर्णं छिन्नं गात्रावलंबितं। परकीयं चाखुदुष्टं सूचीविद्धं तथा सितं। उपकेशमधौतं च श्लेष्मसूत्रादिदूषितं। प्रदाने देवताभ्यश्च दैवे पित्र्ये
व कर्मणि। वर्जयेत्सर्वोपयोगं च यज्ञादावुपयोजने। उत्तरतंत्रे॥ यज्ञोपवीतं दत्वाथ भूषणानि समर्पयेत्। तानि नानाविधानि स्युर्मुकुटादिप्रभेदतः। स्त्रीपुंप्रभेदतश्चापि विहि
यानि विचक्षणैः। योगिनीतंत्रे॥ गंधः पुष्पं तथा धूपो दीपो नैवेद्यमेव च। यस्य यद्दीयते वस्त्रमलंकारादिकं च यत्। तेषां दैवतमुच्चार्य कलाप्रोक्षणपूजने। उत्सृज्य मूलमं
त्रेण प्रतिमाग्रे निवेदयेत्। वरुणेन स्यात्तु बीजमंते पांप्रोक्षणमाचरेत्। अन्नस्य देवता लक्ष्मीरथवापि प्रजापतिः। सुवर्णस्याग्निर्दैवत्यं रजतं चंद्रदैवतं। हीरकं वारुणं से
यं रसानां पृथिवी तथा। तेजस्य वरुणो देवः पेयानां वरुणस्तथा। कृसरस्य रमा देवी परमान्नस्य वै वह्निः। घृतप्रदीपके विष्णुस्तैलयोगे वनस्पतिः। गांधर्वश्च तथा धूपो
घ्राणं वै वाग्निदैवतं। मधु वै वारुणं ज्ञेयं दधिक्षीरं च वैष्णवं। वानस्पत्यं तथा पुष्पं वैष्णवो गंध ईरितः। मालायाश्च तथा दुर्गा सर्वं वा विष्णुदैवतं। अत्र पूजनाए व देवतो द्यो
रः। तेषां दैवतमुच्चार्य पूजयेच्च विचक्षण इति स्वयमभिधानात्। उत्सर्गस्तु मूलमंत्रेण तत्पोत्सर्गनिवेदने इति स्वयमभिधानात्॥ कालिकापुराणे॥ चूर्णीकृतो वा घृष्टो
वा दाहकर्षित एव च॥ सान्निगंधाढ्या निसृतो रसः समर्घं तं वापि प्राण्यंगो रूप एव च। गंधः पंचविधः प्रोक्तो देवानां प्रीतिकारकः। गंधचूर्णं घषचूर्णं समनस

© Dharmartha Trust J&K. Digitized by eGangotri

स्तथा। प्रशस्तगंधपुष्पाणां यत्र चूर्णानि यानि चात्र तानि गंधाह्वयानि स्युश्चूर्णीकृतः प्रथमः स्मृतः तत्र घृष्टो मलयजो गंधः स कलश्यतनेमेरुणा। अगरुप्रभृतिभिर्द्रव्यैर्यस्य स्याप्यं कल्प
नीयते। घृष्टेन घृष्टो गंधो यं द्वितीयः परिकीर्तितः। शारदातिलके। गंधश्चंदनकर्पूरकालागुरुमिरीरितः देवदारुविगरुब्रह्मसारसाराजुचंदनात्। तियादीनां [illegible]
गृह्यते दारुजो रसः सदा हरकाङ्क्षितागंधस्तृतीयः परिकीर्तितः। सुगंधकरवीरादौ सुगंधललितां तथा। सुगंधात्परसो यो सौ निष्पीड्य परिगृह्यते स संमर्दज उच्यते गंधः [illegible]
जइ ईतीर्यते। मृगनाभिसमुद्भूतस्तको नेव एव वामंधः प्राण्यंगजो ज्ञेयः सो दद्दः स्वर्गवासिनां। मंत्रतंत्रप्रकाशे। पुष्पं पंचविधं प्रोक्तं मुनिभिर्नारदादिभिः [illegible]
मध्यमं च तथाधमं। सौवर्णं परमित्युक्तमपरं चित्रवस्त्रजं। वृक्षगुल्मलताजातं पुष्पमुत्तमं परिकीर्तितं। अधमं पत्रतोप्यादि मध्यमं तु फलात्मकं। उत्कृष्टेन क्रियायोग्यं सदा [illegible]
एषु यदुत्कृष्टं देवेभ्यो दत्तं तत्पुनः क्रियायोग्यं न भवतीत्यर्थः। परापरे इति। परं सौवर्णं। अपरं वास्त्रं। तच्च अनुत्कृष्टं च सदा योग्यं भवेत्। देवतोपरि सदा धार्यं इत्यर्थः। नव्यार
कृतमप्युत्कृष्टं यदि भवति तद्दत्तं पुनः क्रियायोग्यं देवपूजायोग्यं न भवतीत्यर्थः। ज्ञानमालायां। पुष्पैः पर्युषितैर्देवि नार्चयेत्स्वर्णजैरपि। निर्माल्यभूतैः कुसुमैरुत्कृष्टैः परमे
श्वरीति। निर्माल्यभूते उत्कृष्टे दत्तैरिति यावत्। उत्कृष्टैः पूजाविशेषैः। [illegible] नमपुष्पाण्युत्तरतंत्रे। शुक्लारक्ता च तुलसी शुक्लार्कं रक्तपंकजं केतकी पुन्नागो जाती दूर्वे द्वे हयारि
तं पुष्पाण्येदशकं ह्येतत्प्रशस्तं परिकीर्तितं। रक्तनीलोत्पले शस्तं मल्लिका कुमुदं तथा। कुंदं कल्हारकं चैव मंदारं तगरं पुनः। अर्जुनं किंशुकं रक्तं मंदारं नागचंपकं। अशोकं बिल्व
पुष्पाणि पाटलानवमल्लिका। चंपकं कर्णिकारं च पारिजाततरूद्भवं। शतवर्णं द्रवं पुष्पं कोरंटकुसुमानि च। इत्यादीनि सुपुष्पाणि गंधवंति लसंति च। ततम्नं [illegible] पुष्पाणि हिता
ता नि समर्पयेत्। म्लानानि वा कुत्सानि वा जीर्णानि विक्षतानि वा। यानि पर्युषितानि स्युः कृमिभिर्भक्षितानि वा। कोरकानि च दुष्टानि समाघ्राणि नार्पयेत्। मंत्रतंत्रप्रकाशे। पत्रेषु
व तुलसी श्रेष्ठा बिल्वं दामनकं शुभं। मरुवो देवकल्हारि विष्णुक्रांता तथैव च। अपामार्गं धात्रीपत्री सुरभिसंज्ञिका। नागवल्लीदलं दूर्वा कुशापत्रं तथा मतं। पत्रं [illegible]
पुण्यं धात्रीफलं तथा। ज्ञानमालायां। नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपं। न दूर्वया यजेद्दुर्गां बिल्वपत्रैर्दिवाकरं। देवीनामर्कमंदारौ [illegible] तगरं [illegible]
परक्तपुष्पमतिप्रियं। शिवे मंदकुंदंती वय्यूथिवंधूककमकं। जपारक्तात्रिसंध्येह्यसिंदूरं कुरकान्तिवामालती घुसृणे रक्तहयारिवर्वरीस तेन [illegible] उग्रगंध [illegible] केशा
म्यादिदूषितं। अशुद्धपात्रपाण्यं वा यासोभिः कुत्सितात्मभिः। आनीतं नार्पयेद्धीमान् प्रमादादपि दोषकृत्। कलिकापि तथा नेष्या विना पंकजचंपके। [illegible] पूजयेद्धीमान्
पत्रैः पुष्पैः फलैरपि। स्नात्वानीतैः पर्युषितैर्याविकैः कूटवर्णकैः। स्वयं विकाशितैः पुष्पैः स्वयंपतितैर्भुवि। वर्जयेद्बृहतीपुष्पं काञ्चनारं कुरंटकं। सर्वपुष्पैः सदा पूजा विहि
ताविहितैरपि। कर्तव्यैव सर्वदेवानां भक्तिरेवात्र कारणं। अत्र स्नात्वानीतैः मध्याह्नस्नानोत्तरमाहृत्यानीतैरित्यर्थः। प्रातरुत्थानादि प्रातःकालीनपूजांतं प्रथमं

श्री। २७२

© Dharmartha Trust J&K. Digitized by eGangotri

म हरकृत्यं प्रयत्नमहरं मुक्ता ततः पुष्पफलादीनामुत्थापयेत् वैन्नमावरेदिति द्वितीयप्रहरकृत्यत्वेन नारदपंचरात्रे पुष्पाहरणस्योक्तत्वात् तथा । पत्रं वा यदि वा पुष्पं
फलं नेष्टमधोमुखं । दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं । विरूपजातकुसुमं सर्वेसु नविरूढस्य दूषणं । अधोमुखार्पणं नेष्टं पुष्पांजलिविधौ न तत् । लक्षपू
जासु सर्वासु पुष्पमेकं समर्पयेत् । समुदायेन वै तत्‌ज्ञा लक्ष्यपूजार्पणं ततः । न पर्युषितदोषोस्ति जलजोत्पलचंपके । तुलस्यगस्त्यबकुले बिल्वगंगाजले तथा । अत्र केचि
त्पलपदं दर्शनाज्जलजपदेन कमलमात्रं ग्राह्यमिति वदंति । तन्न तुलस्या विल्वपत्रवज्जलजेषु सर्वेष्वपि न पर्युषितदोषोस्ति मालाकारगृहेष्वेति । भविष्यपुराणे [illegible]
उत्तरतंत्रे ॥ परारोपितवृक्षेभ्यः पुष्पाण्यानीय वार्चयेत् । अविज्ञाप्य वर्तेयं स्तु निष्फलं तत्र स्य पूजनं ॥ ज्ञानमालायां ॥ फलेष्वामलकं श्रेष्ठं वादरं तिंतिणीफलं [illegible] मंमातुलं
गं वज्जं वीरं पनसोद्रवं । कदलीवृंतसंभवं श्रेष्ठं जंवूफलं तथा । यत्नेर्दोत्तैः सह विष्णुपत्रैः पुष्पैः फलैरपि । विष्णुमित्युपलक्षणं । दिवसे दिवसो स्कूलैः पुष्पैः पूजा तथा [illegible]
श्रि । पुष्पाभावे प्रवालैर्वा कारयेद्धनकोरकैः ॥ अत्र ततः परमावरणपूजा तत्र पुष्पोपचारांते उत्तरतंत्रे ॥ मंत्रसंपुटितैः [illegible] वैर्णमातृकायाः सबिंदुकैः [illegible] क्रमेणांग
पुष्पाद्यैर्देवस्यांगे समर्चयेत् । लयांगमर्चयेद्देहे देवस्य मनुवित्तमः ॥ ज्ञानार्णवे ॥ लयांगमर्चयेद्देहे न्यासस्थाने षु मंत्रवित् ॥ शारदातिलके ॥ अंगानि दिक्षु कोणेषु तं
पत्रे दलवरणान्यपि । केसरेष्वग्निकोणादि हृदयादीनि पूजयेत् । नेत्रमग्रे दिशास्वस्त्रं ध्यातव्याश्चांगदेवताः । तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः । वरदाभय
पाणि[illegible] धारिण्यः प्रधानतनवस्त्रियः । अंगादीनि विशेषानमिधाने लोकपालशब्देन तदस्त्राणामप्यादानं । तत्राग्निकोणादीत्यादिपदस्य क्रमस्याहितत्वाद् दग्नि
राक्षसवायव्येशानकोणेष्वंगचतुष्टयं यजेदिति वदंति । तन्न । आग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनमिति ज्ञानार्णव दक्षिणामूर्तिसंहितावचनात् । हृदयं वाग्निदि
ग्भागे ईशान्यां च शिरो यजेत् । शिखां निर्ऋतिदिग्भागे वायव्ये कवचं तथा । अस्त्रमंत्रं तथा दिक्षु नेत्रं मंत्रे प्रपूजयेदिति दक्षिणामूर्तिकल्पवचनात् । वक्रो हृदयम
ग्न्यां शिरोरात्रिचरे शिखां । वायौ वर्म पुरो नेत्रं अस्त्रं दिक्षु चतुष्वपीति कपिलपंचरात्रवचनात् । चतुर्ष्वपीति दिग्मात्रात् । चतस्रष्विति यथार्थः । इष्ट्वा हृदयमाग्नेय्यां मीश
न्यां वा शिरो यजेत् । निर्ऋत्यां वा शिखां पूज्या वायव्यां कवचं यजेत् । मध्ये वा पुरतो नेत्रमस्त्रं दिक्षु समर्चयेत् । इति सोमशंभुवचनात् । पूर्वयाम्यांतरे [illegible]
वेशयेत् । शिरः पूर्वोत्तरे दद्यात् शिखां पश्चिमदक्षिणे । पश्चिमोत्तरदिग्भागे कवचं विन्यसेद्बुधः । अग्रतः केसरोद्देशे नेत्रं दिक्ष्वस्त्रराजकं [illegible]
स्विति । अत्र । अथावरणपूजा स्यात् पुरः प्राचीं प्रकल्पयेत् । तदादि परिवाराणां प्रादक्षिण्येन पूजनमिति नृसिंहकल्पवचनात् । यष्टुरभिमुखा [illegible]
रवतो दशा । प्राच्यादिरहितो ह्येषा पूजा होमादिकर्मसु स्मृता इत्युत्तरतंत्रवचनात् । यत्रैव भास्वानुदयं प्रयाति प्राचीमिमां वेदविदो वदंति । मध्ये नु सा पूजक [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२७३

श्यसदागमहैः सततं विधिवित्सेति भैरवीतन्त्रवचनात्। देवाग्रं प्राचीं परिकल्प्य तदनुसारेणाग्नेयादिकं कल्पयित्वाङ्गानि पूजयेत्॥ आवरणदेवताश्चैवमेव प्रपूजयेदिति॥ महाक
पिलपंचरात्रे॥ शिरःप्रभृतिमंत्रेषु पूजायां वनमोंततः॥ शिरोभिन्नेषु मंत्रेषु होमे स्वाहां ततो भवेदिति॥ आवरणदेवतास्तत्तल्लोकेषु दृष्ट्वा ग्रामाक्षिनीतंत्रे॥ स्वे स्वे स्थाने वा
भिमुखान्पूजयेत्प्रोक्षणादिभिः। अभिमुखान्देवस्य। श्रीविद्यावरणपूजायां दक्षिणामूर्तिसंहितायां श्रीविद्यासंमुखीः स्मरेदिसुकेः। तथा सिद्धेश्वरीतंत्रे। अस्य ध्याये
४ सम[?]ध्यमार्तोऽः स्वमरीचिभिः वृत हृदंगैर्निजैर्देवो ध्यातव्याः स्वरीचिभिः। तूर्णायोगा॥ देवीं ध्यात्वा तच्छरीरान्मयूखनिकरैर्बहिः। विनिःसृत्य स्थिरीभूतं परितोऽभिविचिंत
र। अभ्यर्च्यावरणे लाद्यं मूलमुच्चार्य मंत्रवित्। संपूज्य देवीं संबोध्य वदेन्मंत्रमिमं ततः। अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्। इति पु
ष्पांजलिं दत्वा प्रणमेदिति भक्तितः। प्रत्यावरणमेवं तु तत्तन्नाम्ना समर्पयेत्। द्वितीयावरणं सम्यगभ्यर्च्य मनुवित्तमः। ओं लं यजेल्लोकपालांस्तेषामस्त्राणि च क्रमात्। इंद्रं सु
राधिपतिं पीतं वज्रहस्तं सवाहनं। अग्निं तेजोऽधिपं रक्तं शक्तिहस्तं सुभूषणं। यमं प्रेताधिपं कृष्णं दंडहस्तं समर्चयेत्। रक्षोऽधिपं निर्ऋतिं च खड्गहस्तं सुधूम्रकं। पाशहस्तं सु
शुभ्रांगं वारुणं यादसांपतिं। वायुं प्राणाधिपं धूम्रं अंकुशाढ्यकरं यजेत्। यक्षाधिपं कुबेरं च गदाहस्तं सितं यजेत्। विद्याधिपं शूलहस्तं स्फटिकाभं शिवं यजेत्। नागाधिप
मनंतं च गौरं चक्रायुधं यजेत्। लोकाधिपं विधातारं रक्तं पद्मकरं यजेत्। ऐरावतं तथा मेषं महिषं धूम्रपूरुषं मकरं मृगमश्वं च वृषं च विपहंसकौ। इंद्रादिलोकपालानां वाह
नान्निविदुर्बुधाः। वज्रं पीतं सितां शक्तिं दंडं कृष्णं समर्चयेत्। खड्गमाकाशसंकाशं पाशं विषनिभं यजेत्। अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत्। त्रिशूलं नीलवर्णं च यजेन्ने
त्री ततः परं। रथांगे कुरुविंदाभं पद्मं रक्तं समर्चयेत्। लोकपालायुधान्येवं क्रमेण परिपूजयेत्। अत्र केचित्। अंते यजेल्लोकपालान् भूतपारिषदान्वितान्। आहेतिनामायुधोपेता
न्दिक्षु पूर्वादितः क्रमादिति शारदातिलकवचनात् यथाधिस्थितपूर्वादिदिक्षु इंद्रादिपूजनमिति वदंति। तन्न। चतुरायतनदेवतास्थापनप्रकारेण क्रमयुक्तेः। सर्वेषामावरणानां देवा
यत। आरंभाल्लोकपालावरणस्य पंचावरणताद्या। कल्पितप्राच्यनुसारेणैव पूजनं युक्तमिति भाति विचारतद्दति। पुनर्मूलं समुच्चार्य सांगायै सपरीवारायै नामदं [illegible] वनुर्थर्पल
मुदीर्य वा। गमहत्यर्चयेद्गंधपुष्पाद्यैः सायकस्त्रिधा। ततो यजेद्धूपदीपनैवेद्यैः सुमनोहरैः॥ धूपं वसोरः। सगुग्गुलुं गजश्रीरसिताज्यमधुवर्त्तृदर्तैः सारांगारविनिःक्षिप्त[illegible]वैः
प्रधूपयेत्॥ कुंकुमलाचतारा॥ प्रालेयं मणयो रुचां जतुलाक्षा। नखं सर्ज्जं च कुष्ठं समांसिल्हारक्तागरुयुजं पद्मिगुराणि नाथलेकसंपूर्तिता। षड्भागावरमाक्षिकन्यस्तचिता २७२
र्धाष्टभागान्विता धूपोऽयं भुवि शंकरेण कथितः श्रीसुंदरीवल्लभः॥ शैवागमे॥ धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदा पुनः। अस्त्रेण पूजितो घंटां वादयन् गुग्गुलुं दहेत्। ना
रदपंचरात्रे॥ आवाहने अर्घ्ये धूपे च दीपनैवेद्ययोः। निसमर्थं प्रयुंजीत तत्तन्मंत्रामंत्रितामपि। चकारा दीपेऽपि। तथा। पूजाकाले विनानामेन हितेनास्याः प्रचालनं। नानय

273

© Dharmartha Trust J&K. Digitized by eGangotri

व विना पूजां कारयेत्सिद्धिकालसः दद्यात्तारावसानेन जगद्ध्वनिपदं ततः। मंत्रमातः पदं चैव स्वाहाक्षरसमन्वितं। एकादशाक्षरो मंत्रो घंटायाः सर्वसिद्धिदः।
उद्धारः सुगमः। कालिकापुराणे॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे। न धूपं वितरेदूर्ध्वं नासनेन घटे तथा। यथा तथा धारणं कृत्वा तं विनिवेदयेत्। मेदोमज्जा
समायुक्तान्न धूपान्विनिवेदयेत्। न यक्षधूपं वितरेत्साधकाय कदाचन। यक्षधूपं तु राळेति लोके प्रसिद्धं विष्णुः। धूपार्थेन जीवितानमिति। प्रपंचसारे। गोसर्पिषा
वा तैलेन वर्त्या च जलपुग्गर्भया। दीपितं सुरभिं शुभ्रं दीपमुच्चैः प्रदर्शयेत्। वाशब्देनाभयोरमिश्रणमुक्तं। न निश्री कृत्य दद्याद्गुद्दीपं स्नेह... हा न प... [illegible]
न्या कु सामिश्री कृतं स्नेहं तामिस्त्रं नरकं व्रजेत्॥ इति कालिकापुराणवचनात्। तूर्णो यागे। पारावतभ्रमाकारे दीपं नेत्रादि दर्शयेत्। दक्षिणे सार्पवा दीपं ति
लतैलेन वामतः। सितवर्त्ति दक्षिणतो रक्तवर्त्तिस्तु वामतः। कालिकापुराणे॥ वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन। कुर्वंस्तु पृथिवीतापं पोदीप्रमुल्लनेन्नरः। स
ताम्रतापं नरकं प्राप्नोत्येव न संशयः। शतं समाः। रुद्रयामले॥ नैव निर्वापयेद्दीपं साधकस्तु कदाचन। यस्तु निर्वापयेद्दीपं तस्य लक्ष्मीर्विनश्यति। कूष्मांडकेदिक
नारी दीपनिर्वापकः पुमान्। विधवा च दरिद्रश्च भवेत्सप्तसु जन्मसु। मंत्रतंत्रप्रकाशे। पाद्यमाचमनीयं च दद्यान्नैवेद्यमर्पयेत्। सनत्कुमारकल्पे। इत्थं कृत्वा स
मभ्यर्च्य पंचावरणसंयुतं। कदलीफलसंयुक्तं पायसं विनिवेदयेत्। ज्ञानार्णवे। शुद्धस्फटिकसंकाशं चंद्ररश्मिसमप्रभं। जलसत्तुवर्णेन पात्रे वा रुमक्रदन्नैत्रिपये
हिंगुली मरीचा चैव राई केरवितः शुभः। बटुकः कुंकुमाकारः पायसं हिमसंन्निभं। दुग्धमावर्त्तितं सम्यक् शर्करासारपूरितं। कपिलाघृतसंयुक्तं भर्जितं कोमिभंड
कोः। शर्करा फाणिताश्चैव सूपं मुद्गाज्यं तथा। नानाविधानि पेयानि व्यंजनानि बहूनि च। उत्तरं तत्रो। निधाय स्वर्णजे पात्रे साधारं तत्र मंडले। संस्थाप्य च पुरस्तस्य संर
क्कुर्यो ज्ञास्त्रमार्गतः। अस्त्रमंत्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितं। वायुबीजेन संशोध्य वह्निबीजेन संदहेत्। स्पृशन् दक्षकराग्रेण सुधाबीजेन मंत्रवित्। अमृतीकृत्य
तत्सर्वं मूलमंत्रेण तत्पुनः। स्पृशन् कराभ्यां विधिवदष्टधा वाभिमंत्रयेत्। धेनुमुद्रां प्रदर्श्याथ गंधपुष्पैः समर्चयेत्। देवमभ्यर्च्य कुर्यात्पुष्पांजलिमनन्यधीः। हे मयात्र
स्थितं दिव्यं परमान्नं सुसंस्कृतं। पंचधा षड्रसोपेतं गृहाण मम सिद्धये। मूलमंत्रं समुच्चार्य स्वाहांतं तज्जलमर्पयेत्। कराभ्यां तत्समुद्धृत्य पूजितं वसुधात्मकं। निवेद्यामिमवं
ते सानुगाय जुषाणतत्। सर्वपूजासु तन्मात्रान्नैवेद्यस्य मनुस्त्वयं। प्राणसंतत्तपापानो व्यानोदानसमन्ततः। समानोड्युताः सर्वे प्रणवाद्या द्विठांतकाः। पंचमंत्रा भवंती
हक्रमेण परिकीर्त्तिताः। प्राणादीनां मुद्रास्त्वग्रे वक्ष्यंते। नैवेद्यसंस्कारस्तन्निवेदनप्रकारश्च प्रयोगे वक्ष्यते॥ स्मृतिसमुच्चये। त्रिषु वर्णेषु दातव्या विष्णवे पाकभोजनं।

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२७४
274

खंडाद्युक्तमादिकृतं यायंत दृष्येकूद्वत स्नानतः॥ श्राद्धकल्पे॥ शूद्रैस्वामान्ते नैव दशाहादिकं पिंडं देयमित्युक्तं तेन देवतानैवेद्यमप्यन्ते नैव देयं तुल्यन्यायादिति॥ [illegible]
सीवे॥ संकल्प्य परमेशान्यै नित्यहोमविधिं चरेत्॥ संकल्प्य नैवेद्यं [illegible] उत्तरतंत्रे॥ इत्थं तु संस्कृते वह्नौ देवमावाह्य मंत्रवित्॥ संपूज्य मूलमनुना पंचविंशतिमाहु
तीः कुर्वेदाज्येन हविषा तिलैर्वा पायसैः शुभैः॥ तंडुलैस्तिलमिश्रैर्वा केवलैर्वा पापपुष्पकैः॥ अंगावरणदेवानामेकैकामाहुतिं कुर्यात्॥ उद्वास्य वह्निदेवं च पूजास्थानं प्रवे
ततः उपविश्यासने मंत्री दद्याद्भूतबलिं ततः॥ ईशानमंडले कुलासाधारं तत्र निक्षिपेत्॥ अन्नव्यंजनतोयाढ्यं पात्रे पुष्पादिपूजितं॥ ध्यात्वा भूतानि संपूज्य ततस्तेभ्यो ब
लिं हरेत्॥ भूतानां ध्यानं पीठपूजाप्रकरणेप्युक्तं॥ बल्युमंत्रा बल्युत्सर्गप्रकारस्य प्रागेवोक्तः॥ उद्वास्य पूजां च केदं देवं स्वात्मनि वह्निके चेति॥ अग्निसंस्कारः प्रागेवाभिहितः॥
संक्षेपप्रकारोपि वसिष्ठः॥ अग्न्याधानादिकं कर्म नित्यहोमे न विद्यत इति नारदीये॥ पुनराचमनं दद्यात्करोद्वर्तनमेव च॥ पुनराचमनीयमुत्तरापोशनं॥ नकारादि [illegible] दं
तधावनादीन्युक्तानि॥ प्रपंचसारे॥ पुनर्नैवेद्यमुद्धृत्य पुरोवत्परिपूज्य च॥ मुखवासादिकं दत्वेति॥ नारायणीये॥ सकर्पूरं च तांबूलं दद्यान्नीराजनं तथा॥ समर्प्य मुकुंदे दी
त्रिभुवनानि विवस्वतः॥ आदर्शं पितथादर्शं कल्पये छत्रचामरे॥ आगत्य॥ कर्पूरशकलोन्मिश्रं नागवल्लीदलैर्युतं॥ सुधाविंदुसमायुक्तं पूगीफलसमाहरं॥ तांबूलं दे
रघुनाथाय दत्वा कामानवाप्नुयात्॥ सुधाविंदुश्चूर्णं॥ नीराजनमाह सोमशंभुः॥ शिरस्यारोप्य देयस्य दूर्वाक्षतपवित्रकमिति॥ नीराजनं शंखेनारात्रिकमप्युक्तानि [illegible] सा
नाथवि॥ आरात्रिकं ततः कुर्यात्सर्वकामार्थसिद्धये॥ सौवर्णे राजते कांस्ये लोके नेत्रमनोरमे॥ कुंकुमे नालिकेले वा [illegible] वरानने॥ दीपमेकं कलिकायां वसुपत्रे रदी
पक्वान्॥ यवगोधूमरचितान् शर्करादुग्धसंयुतान्॥ बलयांकितशोभाभिः कोपितान्घृतपूरितान्॥ अपि मंत्रपततो मंत्री रक्तेश्वर्यो ततः परं॥ मूलमंत्रेण वामे [illegible] ततश्चा
रात्रिकं चरेत्॥ तत्पात्रं तु समुद्धृत्य मस्तकोपरि पुनः पुनः॥ नववारं महादेव्यास्ततो नीराजनं चरेत्॥ आरात्रिकं महादेव्याश्चक्रमुद्रां प्रदर्शयेत्॥ रक्तेश्वरीमंत्रः [illegible]
कासायनीतं चैव॥ इत्थमारात्रिकं कृत्वा प्रणम्य परदेवतां॥ प्राणायामत्रयं कृत्वा मूलमंत्रेण साधकः॥ न्यासं कृत्वा यथापूर्वं देवीं ध्यात्वा हृदंबुजे॥ मूलमं [illegible]
जपेत्तत्र तमानसः॥ श्रीकुलार्णवे॥ ग्रथिलामातृकावर्णैर्मूलमंत्राक्षराणि वा॥ क्रमोत्क्रमान्नितरां त्वामंत्रशुद्धिरितीरिता॥ शारदातिलके॥ सहस्रं [illegible] संजप
लमंत्रमनन्यधीः॥ तज्जपं सर्वसंपत्त्यै देवतायै समर्पयेत्॥ नित्यहोमे कालांतरमाह दक्षिणामूर्तिः॥ यथाशक्ति जपं कृत्वा नित्यहोमं समाचरेदिति॥ [illegible]॥ अष्टो
ते त्तरसहस्रं तु तदर्धं त्रिशतं तु वा॥ अष्टोत्तरशतं वापि जपेन्नित्यसमाहितः॥ जपो जपसमर्पणप्रकारश्च प्रयोगे वक्ष्यते॥ इत्थं जपं समर्प्याथ घंटानादसमन्वितं॥ स्तुवीत सु

श्री

© Dharmartha Trust J&K. Digitized by eGangotri

स्तुतिभिः सम्यक् साधको भक्तिसंयुतः ॥ उत्तरतन्त्रे ॥ घोरालिकैर्वैदिकैश्च मूलमन्त्रेण वै बलिः । प्रदक्षिणत्रमालं च कुर्याद्धर्मार्थसाधनं । ततः क्षमापयेन्मन्त्री देवं वक्ष्यमाणै
महेश्वरि । क्षमापनमन्त्राः प्रयोगे वक्ष्यन्ते ॥ अत्र घोरालिकैर्वैदिकैरिति । तन्त्रे वर्णितकं परं । मूलमन्त्रेणेति प्रकृतपरं हि वा । भूतानां घोरालिकस्तवपीठापि निबधाना ॥ यदुक्तं
कालिकापुराणे ॥ मोहाद्यः कामतः शूद्रः पुराणं संहितां स्मृतिं । पठन्नरकमाप्नोति पितृभिः सह पापकृदिति । पंचरात्राणि तु श्रवणे विनाधिकारः । यदुक्तं नारदपञ्चरा-
त्रे । ब्राह्मणक्षत्रियविशां पंचरात्रं विधीयते । शूद्रादीनां न तच्छ्रोत्रपदवीमधिरोहतीति । शैवागमे ॥ अर्घ्यपात्रं समुद्धृत्य मूलमुच्चार्य मन्त्रवित् । साधु वा साधु वा कर्म यद्यदाचरितं
मया । तत्सर्वं भगवन् शंभो गृहाणाराधनं परं । इत्यर्घोदकमुत्सृज्य त्वाकिंचिद्देवस्य दक्षिणे करे समर्पयेदिति । कृतमाराधनं । शिवे ॥ श्रीकुलार्णवे ॥ कृतार्चनादिकं सर्वं समन्त्रोद-
पुरःसरं । इतः पूर्वमिदमनुना देवताये समर्पयेत् । इतः पूर्वमिति मन्त्रः प्रागेव प्रदर्शितः । सनत्कुमारः ॥ उद्वासयेत्ततो देवं परिवारगणैः सह । जपं च मारे ॥ स्तुत्वेति रखंडपरिमंडि-
तमौलिमेवमुद्वासयेत्सुतरमुहृदयांबुजे स्वे । शिवरहस्ये । रश्मिरूपा महेशस्य पूजिता याश्च देवताः । श्रीशिवांगे विलीनास्ताः संतु सर्वाः प्रभावहाः । इति पुष्पांजलिं दत्वा प्रणाम्य
परिभावयेत् । चिदेवस्यांगे विलीनं तद्रश्मिवृंदमशेषतस्ततो रूपं शिवं ध्यात्वा क्षमस्वेति पुनः पुनः । क्षमापयित्वा रोपयेत् हृदीयहृदंभोजे महेश्वरं । गच्छ गच्छ परं स्थानं स्वस्थानं परमे-
श्वर । यत्र ब्रह्मादयो देवा न विदुः परमं पदं । विसर्जनेन मन्त्रेण ततः पूरकवायुना ध्यायंस्तु मन्त्रिणा तेन नलातं स्थापयेद्धृदि । तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर । यत्र ब्रह्मा-
दयः सर्वे सुरास्तिष्ठन्ति मे हृदि विसर्जे संहारमुद्रया ॥ संहारमुद्रां बध्वा यत्तेतेजो रूपं महेश्वरं । विभाव्य पुष्पेणोद्धृत्य वहन्त्या साधकः शिवे ॥ प्रवेश्य द्वादशांतस्थ सहस्रारसरो-
रुहे । विश्राम्य मध्यनाड्या तामानीय हृदयाम्बुजे । संस्थाप्य सम्यक् संपूज्य स्वात्मानं तन्मयं स्मरेदिति । हे सपारमेश्वरवचनात् । कुलमूलावतारे ॥ हेशान्यां मंडलं कुर्यात् [illegible]
च विवर्जितं । विलनार्थं निर्माल्यधारिण्याः पूजनाय वै । निक्षिप्य तस्मिन्निर्माल्यं मंत्रेणानुसमर्चयेत् । वं ऊं ध्वरिमहादेवि निर्माल्येश्वं दनादिभिः । लेह्यचोष्यान्नपानादि निर्माल्य-
स्रग्विलेपनं । निर्माल्यभोजि त्वं तुभ्यं ददामि श्रीशिवाज्ञया । इति नैवेद्यशेषं तु दत्वा नत्वा विसर्जयेत् । गणेश्वरपरामर्शिण्यै ॥ ठं वौ ददाय निर्माल्यमीशान्यां मंडले न्यसेत् ॥ संमोह-
नपंचरात्रे ॥ विष्वक्सेनाय निर्माल्यं नैवेद्यं च निवेदयेत् । शैवागमे ॥ पूर्वोत्तरदिशि प्राप्तश्चंडेशं मंडलेर्चयेत् । देवदत्तस्य निर्माल्यं धौपं तं चण्डेश्वरं । वामदेवतंत्रे ॥ तत्रांड्रेस
निर्माल्यभोक्ता देवेशि यस्तु तत्र तस्मै समर्पयन्नित्यं नातिघोरां क्रमेद्यतः । उत्तरतन्त्रे ॥ ततो भास्करवीजेन सहितेनाम्बुना ततः । मंत्रेण भास्करायार्घ्यमच्छिद्रार्थं निवेदयेत् [illegible]
यो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये सवित्रे कर्मदायिने । ततः कृतांजलिर्भूत्वा पठित्वा मंत्रमीरितं । एकाग्रमनसा वाक्शिरश्छिद्रं न चवधारयेत् [illegible]
तदपच्छिद्रं यच्छिद्रं पूजनेन मया । सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः । भास्करवीजेन अक्षरमंत्रः । समस्तसकरणे बोद्धव्यान विनयमालिनीतंत्रे । अर्घ्यं तोयेन देवेशि [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

रोपितं। स्नात्वा लोकाद्विविमुक्ते नर्मदायां दक्षिणाशिवे॥ प्रोक्षयेत्तेन तोयेन स्नात्वा लाभेन मूलमंत्रतः। निर्माल्यं मस्तके धार्यं मूलमंत्रेण मंत्रितं। प्राश्य पादोदकं देवि नैवेद्यं
विभज्य लिप्यात्तदकेभ्यः स्वयं भुक्त्वा तत्क्षणो विहरेत्सुखं। तत्तु शिवादप्रसादस्वीकारनिंदा च न विरोधः। तस्याशुचिपरत्वात्॥ स्कंदपुराणे॥ तन्निर्माल्यस्वीकारस्यो ...
यथा। ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते। स्नापयित्वा विधानेन यो लिंगस्नपनोदकं। त्रिः पिबेत्त्रिविधं पापं तस्येहाशु प्रणश्यति
ति। लिंगस्नपनवारिभिः कुर्यान्मूर्ध्नोभिषेचनं। गंगास्नानफलं तस्य जायते त्र विपाश्च न गतथा। निर्माल्यं हि तु यो भक्त्या शिरसा धारयिष्यति। अशुचिर्भिन्नमर्यादो नरः पापसमन्वि
तः। नरके पतते घोरे तिर्यग्योनौ प्रजायत इति॥ कालिकापुराणे॥ फलं पुष्पं च तांबूलं अन्नपानादिकं च यत्। अदत्वा तु महादेवे न भोक्तव्यं कदाचन। पार्थिवार्पवंतानेव सभाया
मपि साधकः। तथा तत्स्यान्न निवेद्येत स्वमर्थमुपकल्पयेत्॥ वराहपुराणे॥ विष्णुरूपांतरं सूक्ष्मा रूपा गुह्यगौर्यारं तरं तथा। नास्तिका नो हि मूर्खो नीचा वा कांक्षा स्वकिर्महिताः॥ भविष्य
पुराणे॥ यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा उमा। उमा यथा तथा गंगा चतूरूपं न भिद्यते। विष्णुरूपांतरं यस्तु श्रीगौर्यारं तरं तथा। गंगागौर्यान्तरं च यो ब्रूते मूढधीस्तु सः। रौ
रवादिषु घोरेषु नरकेषु पतत्यधः॥ भविष्योत्तरे॥ यो ब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्वरः। महेश्वरः स्मृतः सूर्यः सूर्यः पावक उच्यते। पावकः कार्तिकेयो सौ कार्तिकेयो वि
नायकः। गौरी लक्ष्मीश्च सावित्री शक्तिभेदाः प्रकीर्तिताः। देवं देवीं समुद्दिश्य यः करोति व्रतं नरः। न भेदस्तत्र मंतव्यः शिवशक्तिमयं जगत्॥ पद्मपुराणे॥ सौराश्च शैवगाणेशा
वैष्णवाः शक्तिपूजकाः। मामेव ते प्रपद्यंते वर्षापः सागरं यथा। एकोहं पंचधा जातः क्रीडया नामभिः किल। देवदत्तो यथा कश्चित्पुत्राद्याख्यानामभिरिति विष्णुवचने गीतासु
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। प्रभुः फलदाता॥ विष्णुपुराणे॥ यजन्यज्ञान्यजत्येनं जपत्येनं जपन्नृप। घ्नंस्तथान्यान्हिनस्त्येनं सर्वभूतो यतो हरिः। इत्थं सर्वत्र सर्वे
शाश्री विष्णोरवक्रीडितत्वात् स्वेष्टदेवतास्थोपाहारस्वीकारो न दोषाय हरिति भाति। विचारकारणमिति। अत्राद्दत्वाभदितेनैवे खेयेवत्तत्रतवकिं विदियंकिं विज्ञ ...
तिवाविधीयते। तत्र केचिद्विनियुक्तविनियोगदोषाद्दत्तापहारप्रसंगाच्च पूर्वः पक्षः श्लाघीय इति वदंति। वस्तुतस्तु किंचिद्गंधशेषादिवदभावात्कर्मोत्तरांगत्वेनैवेदत्तमो
नयोरेककर्मकत्वाच्छ्रुतिसंवादात्तत्र देशितत्वाच्चोत्तरपक्ष एव श्रेयानिति भाति। तस्माद्दिव्यं सौविष्णवं यद्वत्तं भक्ष्यं च सुरेति॥ नारदपंचरात्रे॥ यत्किंचिद्विहितपरमान्नं ...
विप्रानिवेदितं। विष्णोर्वो ... मनसा मूलेन साष्टशतं जपेदिति प्रायश्चित्तमप्युक्तमिति। विष्णोति नारदसंबोधनं। नित्यपूजायां संक्षेपप्रकारः प्रयोगे वक्ष्यते। अथ नैत्यकम
मामपिधाय तन्नाथस्य कीयानामाह॥ प्रपंचसारे॥ अथ पुनराचम्य गुरुः प्राग्वदङ्गोविष्टरोपविष्टः सन् प्राणायामं सलिपिन्यासं कृत्वा न्यासेत दृष्ट्यादीनिति। अत एव प्राणा
यामं सलिपिन्यासं मातृकान्यासं ऋष्यादिकरांगन्यासान् अभिधाय कंतत्रैव। जपारंभे मनूनां तु सामान्योयं प्रकल्पनेति। इयं प्राणायामादिक्रिया प्राकर्षेण कल्प्यते। सम

© Dharmartha Trust J&K. Digitized by eGangotri

र्च्यते। अधिकार्यपि। प्रकल्पना। अधिकारसंपादनात्समान्या सर्ववर्णाश्रमसाधारणात्। तेन तत्तैरेव सर्वैर्यां पूजाधिकारः। अत एवैतेषामकरणे निंदा श्रूयते। यथागस्त्य सं-
हितायां। प्राणायामैर्विना यद्यत्कृतं कर्म निरर्थकं। अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिरिति। दक्षिणामूर्तिकल्पे जपार्थं सर्वमंत्राणां विन्यासेन जपेद्विना। कृते तान्नि-
ष्फलं विद्यात्तस्मादादौ लिपिं न्यसेदिति। कपिलपंचरात्रे। ऋषिछंदोदेवतानां विन्यासेन विना यदा। जप्यते साधितो प्येष तत्र तुच्छं फलं भवेत्। गौतमीये। ध्यानं जपार्चनाहोमाः
सिद्धमंत्रकृता अपि। अंगविन्यासविधुरा न दास्यंति फलं त्वमी। अत एव विहितानुष्ठाने दोषमाह। याज्ञवल्क्यः। विधिदृष्टं तु यत्कर्म करोत्यविधिना नरः। फलं न किंचिदाप्नो-
ति क्लेशमात्रं हि तस्य तत्। उत्तरतंत्रे। प्रवासे पथि दुर्गे वा स्थाने प्राप्ते जलेपि वा। कारागारे निबद्धे वा प्रायो वेश्मगतोपि वा। मनोभये समुत्पन्ने सिंहव्याघ्रसमाकुले। परवश्यका-
मे चैव कुर्यान्मानसपूजनं। मनसा हृदयस्थाने ध्यात्वा योगासनपीठकं। तत्रेष्टदेवमभ्यर्च्य पूजां तत्र समाचरेत्। मंत्रप्रसाधनं स्नानं दंतधावनकर्म वै। अन्यत्सर्वं मनसा ध्या-
त्वा कुर्याच्च पूजनं। यथा पुष्पादिभिः पूजा बहिर्दृष्टा विधीयते। तथा हृदापि कर्तव्याः सर्वोपचारप्रतिपत्तयः। जले प्रवहणादौ प्रायो वेश्मगतः। गृहीत्वानशनव्रतः। अन्यत्र सर्वमिति-
मेत्र प्रसाधनं दंतधावनमप्यतिरिक्तमिति त्यर्थः। मे अत्रादीनां मानसासंभवात्। अत्र यः शौचनिरतो विप्रः स वै मैत्र उदाहृतः। इति भागुरिकृतसमुच्चयलिखितब्रह्मांडपुराणवच-
नात्। नारदपंचरात्रे। ब्राह्मे मुहूर्ते चोत्थाय प्रागेशं विप्र वासरात्। जपध्यानार्चनस्तोत्रैः कायवाङ्मनसा युतैः। अभिगच्छे जगद्योनिं तद्वाभिगमनं स्मृतं। ततः पुष्पफलादी-
नामुपादानं समाचरेत्। भगवद्यागनिष्पत्तिकरणं प्रहरं परे। ततो यजेत्स्वयं तात पूजयेत्परमेश्वरं। साधकः प्रहरं विप्र इज्याकालो हि स स्मृतः। श्रवणं चिंतनं व्याख्यातं ततः पाठ-
समन्विता। स्वाध्यायकालं तद्विद्धि कालं तं मुनिसत्तम। दिनावसाने संप्राप्ते पूजां कृत्वा समभ्यसेत्। योगं निशावसाने च विश्रामे रंतरं कृतौ। विद्धि त्विति नारद संबोधने। आ-
दिपदेन समदाद्याहरणं। समित्पुष्पकुशादीनां सकलः समुदाय हृत इति दक्षवचनात्। अगेनयागेनेति स्वयमेव विवृणोति। मध्याह्ने नद्यां स्नात्वा च पूजा वषट्भुजा च या। त्रि-
तयं तच्चयतां गं तुर्यमन्येव पूजनं। मध्याह्ने तस्य नेन मधुपर्केऽकः पश्चात्तदेशां। विष्णुधर्मोत्तरे। माधुपार्किकपञ्चार्थं ततोमाच्चानिवेदयेत्। स हिरण्यं बीजपात्रं द्रविणे-
न सदैव तु। पशुः काले न कर्तव्यः। दृत्वा शाहभगवान्भृगुः। द्रविणं दक्षिणा। एतन्मध्याह्नपूजानंतरं सति संभवे कार्यं। तथा तत्त्वसारसंहितायां। आतुरी सूतकी चैव ब्राह्मी दै-
वोधकी तथा। साधनाभावतो नीचेति पंच धा भिद्यते पुनः। यदि लंघनपर्यंतो व्याधिरान्नाति दृश्यते। तदा पूजा न कर्तव्या स्कंडितप्रतिमा भुवि। न स्नानं दंतकाष्ठं वा कुर्यात्क्रममथा-
पि वा। रविमंडलमालोक्य प्रतिमामथवा पुनः। मूलमंत्रं सकृज्जप्त्वा पुष्पं साक्षतमुत्क्षिपेत्। अंते व्याधिविनिर्मुक्तैः स्नात्वा तद्वेषोपवासकैः। न दोषस्तिति संप्रार्थ्य पुनः पूर्ववदाच-
रेत्। संप्रार्थ्य जपहोमादिकं कार्यं। यस्तु रोगवशान्मोहवशाद्दोषवशादपागतः। जपेन क्षालनीयः स्याद्दानेन हवनेन वा। ध्यानेनापि मुनिश्रेष्ठ शालाकर्म बलाबलमिति नारदपं-

© Dharmartha Trust J&K. Digitized by eGangotri

वरान्ववचनात्॥ तथा॥ अथ सूतकिनः पूजां वदाम्यागमबोधिनां। स्नात्वा नित्यं विनिर्वर्त्य मानसस्याक्रियया तु वै। बाह्यपूजाक्रमेणैव स्थानयोगेन पूजयेत्। यदि कामी [illegible] मीनितो ए
वेवदाचरेत्। चाशितो वक्ष्यते पूजा यथैवागमबोधिनां। लब्ध्वे दि बालकं मध्ये पात्रादिसाधनं। पूजां दके न कर्त्तव्या तद्दोषो यं न विद्यते। सदा संपूजयेद्देवं भवना कुसुमा[illegible] दोषो य
कीपु वक्ष्यामि पूजामागमबोधिनां। मूर्खे स्त्रीबालवृद्धाद्यदुर्बोधा इति भाविताः। रत्नमंडपधर्मादि वस्तु पुष्पमुरगं बुद्धं। मूलमूर्तिः षडंगानि तेषां पूजा विधीयते। अन्यथामपि सर्वेषां [illegible] कोकार्स
क्षेपकर्मणि। सर्वं जाप्यं वसूत्रं मलाभे भावनैव हि। निर्मले नोदके नाथ पूर्णे तेह्या हन्नारदः। तथा पुनाह्यधा पूजा उत्तमाधम्माधमा। पत्रपुष्पांबुनिष्पाद्या पूजा वा [illegible] कावित्रित्
खिलवेदार्थैर्विविधैर्विरकैल्पैः क्रियमाणा तु या पूजा सा सात्विकी साविमुक्तिदा। राजार्चिभिस्तपोनिष्ठैर्भगवन्तं यजेदिभिः। या पूजा क्रियते सम्यग्राजसी सा सुखप्रदा। स्त्री बालवृद्ध
मूर्खैर्घोरभक्तैरस्तु दम्भमानसैः। या पूजा क्रियते नित्यं तां तामसीं साधकीर्त्तिता॥ उत्तरतंत्रे॥ आराधना समर्थश्चेद्द्रव्याद्यैर्न साधनं। यो दातुं नैव शक्नोति कुर्याद्दैवं न दर्शनं। नैकेनुमस्य विद्ये
सोधोयात्विवना यथा। यत्तु भवाप्ययत्नेन सत्वं संपाद्य वाखिलं। साधनं वर्जयेद्विज्ञस्स समग्रफलं लभेत्॥ कुंभसंभवः॥ स्वयं समर्थः कुर्वीत वा तमेरेव साधनैः। मध्यमाम ध्य
मैरेव न्यूनैर्न्यूनैस्तपोधनः। आपन्नश्चेत्समर्थोपि पूजैरेव समाचरेत्। पूजाकर्मविशेषेण देशकालानुसारतः॥ भविष्यपुराणे॥ विभवे सति यो मोहान्न कुर्याद्विधिविस्तरं। न तत्फल
वाप्नोति फलं लोभाक्रांतमानसः॥ शिवयामले॥ शिवपितृयजनं केलिंगवृक्षो क्रवतलकासंगमवत्तरोस्माद्देशे॥ अपि श्रीयगादितं विभुमयास्तं तितगहएव तु पूजनं मुमुक्षोः॥ आरत्न
स्वल्पकामानां सिद्ध्यर्थं पूजनं हितं न त्रिषु कामानां मुमुक्षूणां गृहेरुक्तं सदाशिवेन॥ ॥ इति श्रीविद्यार्णवे एकोनविंशतितमः श्वासः॥ ॥ अथ नित्यपूजाप्रयोगः॥ तत्र श्रीनाथ
केंद्रो रजनीतुर्ययामे शयनाद्दक्षिणांगेन समुत्थाय स्वेष्टदेवतां स्मृत्वा वामपादं भुवि विन्यस्य ध्यायन् गृहाद्बहिर्निर्गत्यावश्यकं कृत्वा हस्तौ पादौ प्रक्षाल्य रात्रिवासः परित्यज्य धौ
तवाससी परिधायाराध्यदेवतागमे दिरेसमागत्य गोमयेनोपलिप्य वितानादिभिरलंकृत्य तत्र स्नात्वासने उपविश्य पूजामुहूर्ते निर्माल्यमपकृष्य प्रक्षाल्य संस्था[illegible]
मादि त्रयष्ष्वादिन्यासपूर्वकं पूर्वदिशि पूजावर्त्म शिष्टपत्रादिना मूर्त्तिं त्रिरभ्यर्च्य पाद्याचमनीये दत्वा देवाय कर्पूररशकलैर्दंतधावनं कारयित्वा सुगंधिजलैः [illegible] मुखप्र
क्षालनादि दत्वा पुनराचमनीयं निवेद्य करास्य प्रोंछनाय सूक्ष्मनिर्मलवस्त्रं दत्वा शिरसि श्वेतसहस्रदलकमलकर्णिकायां श्रीगुरुं श्वेतवस्त्राभरणभूषितं वराभयह
नमुद्रापुस्तककरं चंद्रकांतनिभं सुप्रसन्नं श्वेतगंधानुलेपनं श्वेतमाल्यविभूषितं वामांकगतया रक्तवर्णया रक्तवस्त्राभरणगंधमाल्यविभूषितया वामकरधृतली
तो लाकमलया देव्या दक्षिणभुजेनालिंगितं त्रिनेत्रं शांतमेतमुखं शांतरूपं ध्यात्वा तच्चरणारविंदयुगलसुलपीयूषधारया [illegible] देहमभिषिंच्य [illegible] श्रीअमुकानंदना श्री २७६
थश्रीपादुकां पूजयामीति तर्जुणाकृतसंकेतनाम्ना तद्ध्याने श्रीगुरुभ्यो नमः श्रीगुरुकृपापादुकाभ्यो नमः इति मंत्रेण वाग्धादिभिरुपचारैर्मनसा संपूज्य॥ आनंदमानंदक

© Dharmartha Trust J&K. Digitized by eGangotri

रंप्ररसत्वं ज्ञानस्वरूपं निजभावयुक्तं। योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमत्कुरुं नित्यमहं नमामि। इति प्रणम्य सहस्रदले ध्यायेत्। ततो मूलाधारादिब्रह्मरंध्रांतं उद्य
त्सूर्यसहस्राभं सुषुम्णांतस्तेजो दण्डनिभं मूलमंत्रं ध्यात्वा तत्तेजसा व्याप्तं स्वशरीरं संचिंत्य वक्ष्यमाणविधिना मूलमंत्रेण प्राणायामत्रयं कृत्वा वक्ष्यमाणऋष्यादिकर
षडंगन्यासान्विधाय हृदयकमले वक्ष्यमाणरूपं देवं ध्यात्वा मानसैरुपचारैः संपूज्य मूलमंत्रं यथाशक्ति जपित्वा जपं समर्प्य स्तुत्वा प्रणम्य त्रैलोक्यचैतन्यमयादिदेव
श्रीशंकर त्वच्चरणाज्ञयैव प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये। संसारयात्रामनुवर्तमानं त्वदाज्ञया शंकर देवदेव। स्पर्धातिरस्कारकलिप्रमाद
भयानि मां माभिभवंतु नाथ। जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः। त्वया हृषीकेश हृदिस्थितेन यथा नियुक्तोस्मि तथा करोमि। लोकेमाधे तमो का
गणेशाद्युपासकैर्यथायोग्यमूह्याः। इति प्रार्थ्य समुद्रमेखले देवि पर्वतस्तनमंडले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे। इति भूमिं प्रार्थ्य भास्यानुसरणेन त
स्यां पादत्रिधायेच्च देवतानामोदीर्याथायुपदेपदे स्वमंत्रं स्मरन् ग्रामाद्बहिर्याम्यां नैरृत्यां वा दिशि शरक्षेपद्वयमतीत्य दूरं गत्वा प्रमाणोक्तप्रकारेण स्नानादृष्टा
दीनुद्धास्य यथाविधि मलमूत्रोत्सर्गं प्रमाणोक्तविधिना शौचाचमनादिकं विधाय निषिद्धदिनेषु विहितं दंतकाष्ठमादाय क्लीं कामदेवाय सर्वजनप्रियाय नमः इति
मंत्रेण दंतधावनं विधाय दंतकाष्ठं प्रक्षाल्य पुरतः शुद्धदेशे परित्यज्य मूलमंत्रेण मुखं प्रक्षाल्य कुशतिलगंधाक्षतकुसुमधौतवस्त्रादयास्त्रादिमंत्रितशंकुमाद्य
तां शुचिस्थानात् मृत्तिकां च गृहीत्वा जलाशयं गत्वास्त्रमंत्रादिमंत्रितजलेन तीरं प्रक्षाल्य तत्रास्त्रमंत्रितं कुशादिकं निधायोद्धृतजलेन तीर्थाद्बहिः कटिस्नानं कृत्वा स्वशा
खोक्तविधिना वैदिकस्नानं विधाय तदंगतर्पणं कृत्वा तीरं गत्वास्त्रमंत्रेण मृत्तिकया मूर्धादिपादांतं विलिप्य आधारः सर्वभूतस्य विष्णोरतुलतेजसः। तद्रूपाश्च
ततो जातास्तास्ता आपः प्रणमाम्यहं। इति तीर्थजलं प्रणम्य संमुखीकरणमुद्रां बध्वा प्राणवायुं निरुध्य जलं ततः प्रविश्य तत्रैव त्रिमज्ज्योन्मज्ज्य नाभिमात्रे जले स्थि
त्वा घेस्वादिश्रीइष्टदेवताप्रीत्यर्थं तांत्रिकस्नानमहं करिष्ये इति संकल्प्य मूलमंत्रेण प्राणायामत्रयं कृत्वा मूलमंत्रस्य ऋष्यादिकरषडंगन्यासांश्च कृत्वा स्वपुरतो
जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन देवेश तीर्थं देहि दिवाकर। इति सूर्यात्तीर्थं प्रार्थ्य ... कमलमुद्र
या सूर्यमंडलं मिलानां गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधुकावेरि जलेस्मिन्संनिधिं कुरु। इति सूर्यमंडलात्तीर्थमावाह्य पुरः कल्पिततीर्थमंडले ... यमुद्र
या तीर्थशक्तिमंत्रेण तीर्थशक्तिमावाह्य तत्र तां ध्यायेत्। यथा। सर्वानंदमयीमशेषदुरितध्वंसां मृगांकप्रभां त्र्यक्षां वोर्ध्वे करद्वयेन दधतीं पाशांकुशौ ... माद

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२७७
277

र्घ्यावामृतहेमपूर्णकलशं मुक्ताक्षमालां वरं गंगासिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं भजे ॥ इति ध्यात्वा ओं क्रों क्रीं क्रूं क्रैं क्रौं क्रः सर्वानंदमये तीर्थशक्तिरूपे एह्येहि स्वाहा ॥ तीर्थ
शक्त्यै नमः इति तीर्थशक्तिं संपूज्य ओं नमो भगवति अंबे अंबालिके अंबिके महामालिन्ये एह्येहि भगवति अशेषतीर्थालवाले क्रीं श्रीं शिवजटाधिरूढे गंगे गांगालिके स्वा
हा इति मंत्रेणाष्टवारमभिमंत्र्य तज्जलं क्रींकारेणावलोक्य वमिति धेनुमुद्रयामृतीकृत्य कवचमंत्रेणावगुंठ्य मुद्रयाच्छाद्य अस्त्रमंत्रेण छोटिकाभिः संरक्ष्य तत्र सर्वं क्रमाव
रणं देवं ध्यात्वा जलमयैः पंचोपचारैः संपूज्य मूलमंत्रेणाष्टवारमभिमंत्र्य तत्र मूलमंत्रं जपन् हृदि देवं स्मरन् त्रिमज्जनं कृत्वा कुंभमुद्रां बध्वा मूलमंत्रेण स्वशिरसि त्रिर
भिषिच्य ॥ ओं सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजायते ॥ मातरः सर्वदेवानामापो देव्यः पुनंतु मां ॥ इति मंत्रेण वा नमस्कृत्य यन्मे केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु वो नमः ॥ इति प्रणम्य स्नात्वा तेन मूलमंत्रेण त्रिराचम्य मूलेन वज्रिः संतर्प्य देवं विसृज्य तीरमागत्य धौतवाससी परिधायाचम्य करौ च
प्रक्षाल्याचम्य प्रमाणोक्तस्थले विहिततिलकमादौ विधाय शिवभक्तांगभूतं भस्मत्रिपुंड्रधारणं कुर्यात् ॥ तत्र ब्राह्मणस्योर्ध्वपुंड्रं क्षत्रियस्य त्रिपुंड्रं वैश्यस्यार्धचंद्राका
रं शूद्रस्य वर्तुलाकारं ॥ अथ भस्मधारणविधिः ॥ तत्राग्निहोत्रोद्भवं वैवाह्याग्न्युद्भवं वा पूर्वोक्तविधिना वक्ष्यमाणविधिना वा संस्कृतं शिवाग्नेः प्रमाणोक्तविधिना तथा रक्षाग
हीतगोमयपिंडं शुष्कं मूलमंत्रेण दग्ध्वा देवोपासनापूर्वमेव गृहीतं भस्म पक्वातिपक्वरहितं वस्त्रेण शोधितं कर्पूरादिसुवासितं भस्म संगृह्य संस्थाप्य तेन वा त्रिपुंड्रधारणं कुर्यात् ॥
तत्प्रकारस्तु मूलमंत्रेणाभिमंत्र्य कृत्वा शिरसि पिप्पलाद ऋषये नमः मुखे गायत्री छंदसे नमः हृदि श्रीरुद्राय देवतायै नमः गुह्ये अग्निबीजाय नमः पादयोः भस्म
शक्तये नमः मम मोक्षार्थे भस्मधारणे विनियोग इति ऋष्यादिन्यासं विधाय ॥ अंगुष्ठयोः कालाय नमः हृदयाय नमः ॥ तर्जन्योः कलविकरणाय नमः शिरसे स्वाहा ॥ मध्य
मयोः बलविकरणाय नमः शिखायै वषट् ॥ अनामिकयोः बलप्रमथनाय नमः कवचाय हुं ॥ कनिष्ठयोः सर्वभूतदमनाय नमः नेत्रत्रयाय वौषट् ॥ करतलपृष्ठयोः
मनोन्मनाय नमः अस्त्राय फट् ॥ इति विन्यस्य हृदयाय शिरः शिखा कवच नेत्रेष्वाद्यक्रमं पंचमं चास्त्रं विन्यस्यास्त्रमंत्रेण तालत्रयं दत्वा दिग्बंधनं कृत्वा विभूतेर्म
तिमात्रासी वामदेवः सदाशिवः रक्षार्थं धस्त्रयादेविरक्षामामनघेसदेति विभूतिं प्रणम्य सद्योजातमिति पंचानुवाकानां संहितीर्देवतोपनिषद ऋषयः प्रथम
द्वितीयचतुर्थानुवाकानां अनुष्टुप् ॥ अघोरेभ्य इत्यस्य स्वराट् त्रिष्टुप् ॥ ओं त्र्यगायत्री छ सर्वेषां वा रुद्रो देवता ॥ इति ऋष्यादिकं स्मृत्वा विन्यस्य ओं सद्योजातं प्रपद्यामि सद्यो
जाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणा

श्री
२७७

© Dharmartha Trust J&K. Digitized by eGangotri

य नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररू
पेभ्यः ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा
शिवोम् ॥ इति मंत्रान् पठित्वा विभूतिमादाय वामकरे निधाय भस्माभिमंत्रणमंत्रस्य पूर्वोक्तं ऋष्यादिन्यासं कुर्यात् । अथर्वशिरसे ऋषये नमः मुखे गायत्री छंदसे नमः हृदये रु
द्र देवतायै नमः इति विन्यस्य । अग्निरिति भस्म वायुरिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मानीति इमं मंत्रम् आपो वा इदं सर्वं
प्रजापति ऋषिः यजुस्तपो देवता इति ऋष्यादिकं कृत्वा विन्यस्य ॐ आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापः सम्राडापो विराडापः स्वरा
डापः छंदांस्यापो ज्योतींष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः स्वराप ओम् इति मंत्रेणाभिमंत्रितं भस्म मानस्तोक इत्यस्य भगवान् ऋषिः जगती छंदो हिरण्यगर्भो देवता इ
ति ऋष्यादिकं स्मृत्वा विन्यस्य । मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते । इति मंत्रेण संम
र्द्य तस्माद्भस्मनो देवस्याशुपतं पशुपाशविमोक्षयेति मंत्रेणैकादशवारमभिमंत्र्य द्विधा कृत्वैकं नाभेर्नमः ईशानः सर्वविद्यानामिति प्रागुक्तमंत्रेण शिरसि तत्पुरुषाये
ति मुखे अघोरेभ्य इति वा कंठे वामदेवायेति कंठादि नाभ्यंतं सद्योजातमिति ऊरुमूलादि पादाग्र द्वयपर्यंतं । इति सर्वांगं भस्मोद्धूलनं कृत्वा हस्तौ प्रक्षाल्य द्वितीयभागं
मादाय शिरसि ॐ ह्रीं हर हर ॐ नमः शिवाय । ललाटे ब्रह्मणे नमः । हृदये हव्यवाहनाय नमः । नाभौ स्कंधाय नमः । कंठमूले नमः । दक्षबाहुमूले रुद्राय नमः । बाहुम
ध्ये त्र्यादित्याय नमः । मणिबंधे वंद्याय नमः । वामबाहुमूले वामदेवाय नमः । बाहुमध्ये प्रभंजनाय नमः । मणिबंधे वसुभ्यो नमः । कुक्षिदेशे भवे नमः । पृष्ठे हराय नमः । ब्रह्म
रंध्रे परमात्मने नमः इति त्रिपुंड्रधारणं कृत्वा वैदिकसंध्यां कृत्वा तांत्रिकसंध्यां कुर्यात् । अयं भस्मधारणविधिस्त्रैवर्णिकानामेव । अन्ये तु पंचाक्षरेण मूलमंत्रेण वा त्रिपुं
ड्रधारणं कार्यमिति । शाक्तैस्तु कुंकुमयुक्तं चंदनादिनैव मूलमंत्रेण त्रिपुंड्रधारणं कार्यमिति । अथ तांत्रिकसंध्या ॥ तत्र मूलमंत्रेणाचम्य शिरसि मध्यामूलेनैव प्राणाया
मत्रयं कृत्वा मूलमंत्रस्यर्ष्यादि करषडंग्यासान् विन्यस्य स्वपुरतो वामितिधेनुमुद्रया जलं ममती कृत्य मूलमंत्रेण सप्तवारमभिमंत्र्य तज्जलं बिंदुभिः कुंभकारादिक्ष
कारांतैरेकपंचाशदक्षरैः सबिंदुभिः प्रत्यक्षरं शिरः प्रोक्ष्य सूर्यमंडले यथोक्तरूपं ध्यात्वा देवं दक्षिणकरेण जलमादाय वामकराग्रेण त्रिः प्रोक्ष्य गलितं वामकरस्थं जलं
वामनासासमीपं नीत्वा तेजोमयं वामनासारंध्रेण स्वदेहांतः प्रविष्टं ध्यात्वा तेन जलेन स्वदेहांतस्थं सकलकलुषं प्रक्षाल्य कृष्णवर्णं तज्जलं दक्षिणनासारंध्रेण

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२०८
278

विनिर्गतं ध्यात्वा दक्षिणकरेणादाय स्ववामभागे वह्निशिखां ध्यात्वा ओं ग्लौं पशु हुं फट् इति पाशुपतास्त्रेण तस्यामास्फाल्य मूलमन्त्रेण त्रिरावर्त्यां गलितेनाञ्जलमादायोर्ध्व
स्वेष्टदेवतागायत्रीमुच्चार्य श्रीमहादेवेश्वराय सर्वं स्वाहा। महादेवेत्युपलक्षणं। इति त्रिरर्घ्याञ्जलिं सूर्याभिमुखमुत्क्षिप्य मूलमुच्चार्य श्रीमहादेवं तर्पयामि नमः इति त्रिः संतर्प्य पु
ग्व प्राणायामादिकं कृत्वा सूर्यमण्डले देवं ध्यायन् ॐ तत्पुरुषाय विद्महे वागिशुद्धाय धीमहि। तन्नः शिवः प्रचोदयात्। इति शिवगायत्री तत इष्टदेवतागायत्रीं यथाशक्ति जपित्वा मूलमं
त्रं वा वो नरशतं जपित्वा तत्समर्प्य स्तुत्वा जलम्य सूर्यमण्डलाद्देवं हृदि विसृज्य श्रीगुरुं प्रणम्येदिति त्रिषु कालेषूक्तो त्रिकसंध्याविधिः। गतो शाक्तोपासकैरप्युक्तं मुक्त्यात् ह्रीं ध्या
कार्या। तत्र गायत्र्या अर्घ्यदानं तपतर्पणं मूलजपश्च विशेषः। तत्र गायत्री तत्तत्कल्पे द्रष्टव्या। अत्र संध्यालोपो न कर्तव्यः शंभोराज्ञैवमेव हि। दीक्षितः संध्याहीनो न दीक्षाफल
मश्नुत इति शिवरहस्यवचनात्। ह्रीं ध्यात्वा त्रयमायश्चकमिति। स्वसमयेन कृता वे ह्रीं ध्यात्वा तदष्टोत्तरशतं जपं प्राणायामं त्रिरर्घ्यं नार्घ्यं कृत्वा पूर्वसंध्यां कृत्वा तत्तत्काले संध्यां कुर्यात्। तत्र
कृते त्रामः संध्यावंदनानन्तरं वैदिकं तर्पणं निर्वर्त्य मूलेन प्राणायामत्रयमृष्यादिन्यासपूर्वकं स्वपुरतो त्रिमिति धेनुमुद्रया जलममृतीकृत्य तत्र सवकं सां गावरणं ध्यात्वा मूलमन्त्र
मुच्चार्य श्रीअमुकदेवतां तर्पयामि नमः इत्यष्टोत्तरशतवारं तदर्धं वा पंचविंशतिवारं वा देवस्य मुखकमले परमामृतं ध्यात्वा तीर्थजलैः संतर्प्य वरणदेवताश्चामुकं तर्पयामि नमः इति
प्रत्येकमेकैकांजलिना संतर्प्य देवं स्वहृदि विसृज्य तीर्थं च सूर्ये विसृज्य गुरुदिक्पतिग्रहान् प्रणम्य शुद्धोदकपूर्णपात्रमादाय हृदि स्वेष्टदेवतां स्मरन् मौनी स्वपदमात्रदृष्टिः सं
त्रादिकं पठन् स्वगृहं गच्छेत्। ततो द्वारस्थितः स्वपापं मनसा संचिन्त्य ओं देवत्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम। तन्निःसारय चित्तात् पापं हुं फट् ते नमः। सूर्य सोमो य
मः कालो महाभूतानि पंच वै। एते शुभाशुभस्येह कर्मणो नव साक्षिणः इति पठित्वा हुं फडिति क्रोधदृष्ट्या पार्श्वद्वयमूर्ध्वं च धृष्ट्वावलोक्य कुसुमं नाम्ना तः ततः प्रविश्यां
गत्वा स्थिलापादौ प्रक्षाल्याचम्याङ्गणमृद्गोमयेनोपलिप्यायां सिन्दूरादिना रचितवृत्तमण्डले स्वासनमास्तीर्य ॐ आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य
तत्र प्राङ्मुख उपविश्य वक्ष्यमाणसूर्यमन्त्रेण प्राणायामत्रयं कृत्वा शिरसि अजाय ऋषये नमः मुखे गायत्री छन्दसे नमः हृदये श्री सूर्यदेवतायै नमः इति विन्यस्य सूर्यो देवता वि श्री
नियोग इति कृताञ्जलिर्वदेत्। ततः अंगुष्ठयोः क्रां हृदयाय नमः तर्जन्योः क्रीं शिरसे स्वाहा मध्यमयोः क्रूं शिखायै वषट् अनामिकयोः क्रैं कवचाय हुं कनिष्ठिकयोः क्रौं नेत्रत्र
याय वौषट् करतलपृष्ठयोः क्रः अस्त्राय फट् इति करयोर्विन्यस्य तथैव हृदयादिषु हृदयशिरःशिखाकवचनेत्रेषु विन्यस्यास्त्रमन्त्रेण तालत्रयं दश २०८
दिग्बंधनं च कृत्वा रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं नमामि। पद्मद्वयाभयवरान् दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रं। इति सूर्यं ध्या

© Dharmartha Trust J&K. Digitized by eGangotri

त्वार्च्य पुरतः पुरस्तात्प्रयोगप्रकरणे वक्ष्यमाणप्रयोजनतिलकाख्यत्र्यक्षरमंत्रोक्तविधिना सांगं सावरणं संपूज्य तदग्नौ तन्मंडले सांगावरणं ध्यात्वा संपूज्य स्वपुरतश्चतुरस्रं व
न त्रिकोणात्मके मंडले कृत्वा श्रीसूर्याधारमंडलाय नम इति मंडलं संपूज्य तत्र साधारं प्रस्थजलगन्धाहितताम्रपात्रं निधाय सूर्यमंत्रेण शुद्धोदकेन पूर्णं तिलयवसर्षपश्यामाककुशाग्रगं
धाक्षतरक्तपुष्पाणि रक्तचंदनं च निक्षिप्य कुशैराच्छाद्य तत्पात्रं कराभ्यामाच्छाद्य सूर्यमंत्रमष्टोत्तरशतं जपित्वा जानुभ्यामवनीं गत्वा तत्पात्रं कराभ्यां मस्तकमुकुलं पूर्वोक्तरूपं सूर्यवि
जेष्टदेवताभेदेन ध्यायन् ओं क्रां क्रीं सः सप्तग्रहराशिनक्षत्रयोगकरणपरिवृत श्रीसूर्याय एष तेऽर्घ्यः स्वाहा इति सूर्यायार्घ्यं दत्वा तदर्घ्याम्बु पूतं सूर्यं ध्यायन् तन्मंत्रेण पश्चाद्भक्तिनपिता स्व
यं नुत्वा प्रणम्य स्वपुरः पूजापक्षे तु विसृज्य पूजामंडपद्वारं गत्वा तत्र वक्ष्यमाणविधिना सामान्यार्घ्यं संस्थाप्य तदग्नौ ताम्रादिपात्रस्थं तज्जलं धेनुमुद्रयाऽमृतीकृत्य तेन जलेन बाह्य
ज्य मंडपस्य द्वारं प्रोक्ष्य द्वारस्योर्ध्वशाखायामधिविघ्नाय नमः तद्दक्षिणे महालक्ष्म्यै नमः वामे सरस्वत्यै नमः पुनर्मध्ये द्वारश्रियै नमः द्वारस्य वामदक्षिणशाखयोः गं गणपतये नमः
क्षं क्षेत्रपालाय नमः शं शंखनिधिवसुधाराभ्यां नमः पं पद्मनिधिवसुमतीभ्यां नमः मायाशक्त्यै नमः विं विघ्नशक्त्यै नमः गं गंगायै नमः यं यमुनायै नमः धं धात्रे नमः विं विधात्रे नमः
इति दक्षक्रमेणाधोधः संपूज्याधो देहल्यै नमः वामदक्षिणयोः नंदिने नमः महाकालाय नमः इति द्वारपालौ संपूज्योत्तरद्वारं गत्वा तदर्घ्याम्बुना प्रोक्ष्य आग्नेयविघ्नादिदेहल्यंतं प्रा
क्क्रमेण संपूज्य द्वारपार्श्वयोः गणेशाय नमः वृषभाय नमः इति द्वारपालौ संपूज्य पूर्वद्वारं गत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयोः भृं भृंगिरिटये नमः स्कंदाय न
मः इति द्वारपालौ संपूज्य दक्षिणद्वारं गत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयोः उमायै नमः चंडेश्वराय नमः इति द्वारपालौ संपूजयेत् । विष्वक्वेतुनंदसुनंदचंडप्रचं
ड बलप्रबल भद्र सुभद्राः प्रतिद्वारं द्विद्विक्रमेण पूजयेत् । गणेश वक्रतुंडैकदंष्ट्र महोदर गजानन लंबोदर विकट विघ्नराज धूम्रवर्णाः सप्तैव पूज्याः पश्चात्कौसारे सुब्राह्मण्य चप
क्रवत मारस्तु पूज्याः पुनः पश्चिमद्वारं गत्वाऽस्त्रमंत्रेण सप्तधाभिमंत्र्य अपक्रामंतु भूतानि पिशाचाः प्रेतगुह्यकाः ये चात्र निवसंत्यन्ये देवता भुवि संस्थिताः अपसर्पंतु ये भूता ये भूता भु
वि संस्थिताः ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया इत्यनेनाऽस्त्रमंत्रं जपन्नाराचमुद्रया मंडपांतः प्रक्षिप्य तस्मान्निर्गतान् विघ्नान् ज्ञात्वा स्वमांगसंकोचेन मार्गं दत्वाऽस्त्रमंत्रं
स्मरन् वामपार्ष्णिघातत्रयेण भूमान् ऊर्ध्वोर्ध्वतालत्रयेणांतरिक्षगान् तिग्मदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य दक्षिणपादपुरःसरं शाखे वामपादपुरःसरं देहलीमुल्लंघ्य
तः श्यामासाद्य रमाकाद्यपंचगव्यार्घ्यतोयाभ्यां घंटावादनपूर्वकं मंडपाभ्यंतरं प्रोक्ष्य मंडपस्य नैर्ऋत्यकोणे वास्तुपुरुषाय नमः तत्रैव वास्तुधीशाय ब्रह्मणे नमः इति संपूज्य
मंडपस्येशानकोणे रक्तद्वादशशक्तिसहिताय श्रीदीपनाथाय नम इति दीपनाथं संपूज्य अतितीक्ष्णमहाकाय कल्पांतदहनोपम भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसीति मे

© Dharmartha Trust J&K. Digitized by eGangotri

रवाहां प्रार्थ्य त्रः फट् इति मंत्र पस्य मध्यस्थां पृथ्वीं देवीं गलाशिरसि मेरुपृष्ठ ऋषये नमः मुखे सुतलाय छंदसे नमः हृदि पृथिवी देवतायै नमः इति विन्यस्य पृथिवी प्रार्थनेति
विनियोगः इति कृतांजलिः ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां नित्यं पवित्रं कुरु चासनं। इति पृथिवीं प्रार्थ्य स्वासनस्थानं मूलमंत्रेण हुं फडिति मंत्रि
तमस्त्रेण वीक्ष्यास्त्रमंत्रेण प्रोक्ष्य तेनैव मंत्रेण कुशैः संताड्य कवचमंत्रेणाभ्युक्ष्य तत्र मंडूकादिपीठदेवताः संपूज्य तत्र चेलाजिनकुशोत्तरं हस्तद्वयमात्रं चतुरस्रं चतुर
गुलोच्छ्रितं स्वासनं मायातीर्थं मूलमंत्रेण द्वादशाभिमंत्रितं जलेनाभ्युक्ष्य ह्रीं आधारशक्तिकमलासनाय नम इति संपूज्य तत्र प्राङ्मुख उदङ्मुखो वा स्वस्तिकवीरसिद्धासनेष्वन्यतमेनोपविश्य
आसनस्य स्वदक्षिणाग्रकोणादिचतुष्कोणेषु प्रादक्षिण्येन गं गणपतये नमः दुं दुर्गायै नमः सं सरस्वत्यै नमः क्षं क्षेत्रपालाय नम इति संपूज्य धूपपुष्पाक्षतादीनि पूजाद्रव्याणि स्व
दक्षिणभागे निधाय क्रों फट् इति मंत्रं स्मरन् दिव्यदृष्ट्यावलोकनं कर्पूरादिवासितशुद्धोदकपूर्णकलशं वामभागस्थं कुंभं इति वामपाणिना स्पृशन् दक्षिणकरांगुष्ठेन ... इति
कुंभस्थं जलं स्पृशेत् इति दीपशिखां सन्दीप्य करं प्रक्षाल्य कृतांजलिः वामे गुरुभ्यो नमः दक्षिणे गणपतये नमः अग्रे श्रीमहादेवाय नमः इति प्रणम्य चंदनसुगंधपुष्पाणि ह सौः
मितिमंत्रेण दापयस्त्रमंत्रेण मर्दयित्वा करौ सुरभी कृत्वा तत्पुष्पं वामकरेण स्वमूर्धानं परिगोरं मिति आघ्राय ... सर्वविघ्नकृद्भ्यो हुं ... हिंसकाः म सुर
 भयकृत्केशाः पतंतु रिपुमस्तके इति पठित्वा अस्त्रमंत्रेण नाराचमुद्रयेशान्यां दिशि दूरे प्रक्षिप्यास्त्रमंत्रेण पुनः करावभ्युक्ष्य मार्जनं संशोध्यास्त्रमंत्रेण ... तालत्रयं मंग
ष्टतर्जन्यंगुष्ठशब्देन दशदिग्बंधनं कृत्वा त्रिमूलमुद्रामुद्रितो ग्रस्तसोमे ... धेनान्योन्यसंपृक्तौ करौ स्वमूर्धानं परितोऽस्त्रमंत्रं स्मरन् प्रादक्षिण्येन त्रिर्भ्रामयन्नग्निप्राकारस्व
यं विधाय तन्मध्यगतमात्मानं संचिंत्य मूलमंत्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात्। अत्र प्रागुक्तपरिपाट्या भूतशुद्ध्यादिकं तु अथवातो भूतशुद्धिः॥ ततः प्राणप्रतिष्ठा। तत
तोऽन्तर्मातृकान्यासः॥ अत्रांतर्मातृकान्यासो मनसैव कार्यः। पुष्पे लोमयावापि मनसा वा न्यसेदपत्र निति दक्षिणामूर्तिसंहितावचनात्। एवमंतः प्रविन्यस्य मनसा हृतो बहि
न्यसेदिति कुंभसंभववचनात्। अत्र त्वाशब्दः समुच्चये। अत एवान्तरात्। अत्रैव व्यवस्था। पुष्पे देवतामूर्तौ। अनामयास्तु देहा मनसा मूलाधारादिषु चक्रेषु तत्र करस्पर्शासंभ
वात्। अनामयासांगुष्ठया। अंगुष्ठानामिकाभ्यां तु न्यासः सर्वत्र सम्मत इति पद्यवाहिनीवचनात्। ऋष्यादिकरषडंगन्यासव्यतिरिक्ते विधिं व्यवस्थाहेयात् तत्र अंगुष्ठानां स
र्वांगुलीनां विहितत्वात् तथैव संप्रदायात्। षडंगमंत्राणामपि पृथक् पृथक् प्रतिपादनादेवेति॥ ततो बहिर्मातृकान्यासः॥ अत्र बहिर्मातृकान्यासे केवलो बिंदुयुक्तवर्णमध्य
रार्णा वीर्ययोजनार्थमिति संप्रदायः॥ ततो बिंदुमातृकान्यासः॥ ततो विसर्गमातृकान्यासः॥ तत्र यति वान्त्रस्थे रादो स्पृष्टास्तुतः संह

© Dharmartha Trust J&K. Digitized by eGangotri

स्थितिस्ततः संहारस्तथान्ते इति कार्यः॥ गृहस्थैस्तु प्रथमं संहारस्ततः सृष्टिस्ततः स्थितिः कार्या। ब्रह्मचारिभिरादौ स्थितिस्ततः संहारस्ततः सृष्टिः कार्या। अत्र केचिद्गृह
स्थैः सृष्टिस्थितिसंहारानंतरं पुनः सृष्टिस्थिती च कार्ये ते नास्ति तयोर्मतत्वात्। एवं ब्रह्मचारिभिः सृष्टिस्थितिसंहारानंतरं पुनः सृष्टिन्यासः कार्यः॥ एवं कृते स्थित्यंततास्य पं
ततः संहारांतता भवतीत्याकूतं॥ अत्र यथागुरूपदेशं कार्यमिति॥ ततस्तारोपेतैकपंचाशत्कलामातृकान्यासः॥ ततः केशवादिमातृकान्यासः॥ ततः श्रीकंठमातृकान्यासः॥
ततो भुवनेश्वरीमातृकान्यासः॥ ततः श्रीबीजादिमातृकान्यासः॥ ततः कामबीजादिमातृकान्यासः॥ ततः श्रीशक्तिकामबीजादिमातृकान्यासः॥ ततः प्रपंचयागमातृ
कान्यासः॥ ततस्तद्देवतोपासकस्तद्देवतामातृकान्यासं कुर्यात्। मूलमंत्रेण प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात्॥ तत्र प्राणायामप्रयोगः॥ तत्र ऋष्यादिन्यासो क
सुकायः समुपवेश्य दक्षिणनासांगुष्ठेन दक्षिणनासापुटं निरुध्य वामनासापुटेन वायुमाकृष्य स्वोदरं पूरयित्वा कनिष्ठिकानामिकाभ्यां वामनासापुटं वन्निरुध्य हृदि देवं ध्या
यन्मूलमंत्रं जपन्यावच्छक्यं वायुं कुंभकेन धृत्वा पुनर्दक्षिणनासापुटेन शनैः शनैर्वायुं त्यजेदित्येकः प्राणायामः॥ पुनर्दक्षिणनासापुटेन वायुमाकृष्य तथैव कुंभयित्वा वायु
नर्वामनासारंध्रेण तं वायुं त्यजेदित्यन्यः॥ पुनर्वामनासारंध्रेणाग्र वायुमापूर्य तथैव कुंभयित्वा तथैव दक्षिणनासारंध्रेण तं वायुं त्यजेदित्यपरः॥ इत्थं प्राणायामत्रयं कृत्वा
मूलाधारे मंडूकाय नमः इत्यादि परतत्त्वांतं प्रागुक्तक्रमेण विन्यस्य ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठात्मने नमः इति मूर्धादिपादांतं व्यापक
त्वेन न्यसेदिति योगपीठन्यासः॥ अत्र योगपीठस्थाने गणेशैः सुधार्णवस्थाने इक्षुरससमुद्रोपि ह्युपास्योपासकैः क्षीरसमुद्रस्तत्र तत्तत्पीठमंत्रश्च न्यस्तव्य इति विशेषः॥
अथ मूलमंत्रन्यासः॥ स च तत्तत्कल्पेषु बोद्धव्यः॥ ततस्तत्तत्कल्पोक्तमुद्राविरचय्य स्वेष्टदेवताकल्पोक्तरूपं स्वात्मभेदेन ध्यात्वा स्वशिरसि मूलमंत्रेण पुष्पांजलिं दत्वा पुनर्हृदयक
मले ध्यात्वा योगपीठपूजापुरःसरं मानसैरुपचारैर्देवं सांगं सावरणं संपूज्य मानसमेव वन्हेवंद्यं दत्वा देवं भुंजानं ध्यायन्मूलाधारे आत्मांतरात्मपरमात्मज्ञानात्म● लेयो तं व
तुष्कोणाकारं वर्तुलं रस्वेकुंडमध्ये विश्वक्तिं कुंडलिनीं वह्निरूपां ध्यात्वा मूलमंत्रमुच्चार्याहं तानु होमि स्वाहा। पुनर्मूलमसत्येनुहोमि• इत्थमहंता सत्यमैश्वर्यं काम क्रोध लोभ मद
मोहमात्सर्यादीन्क्रमेण सुषुम्णामार्गेण चुक्तमनः सुवेणाकुल्ला प्राणायामष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरशतवारं जपित्वा गुह्यातिगुह्येत्यादिना समर्प्य श्रीगुरुं प्रणम्य
पुरस्थं दनांदिलिप्ते श्रीपर्ण्यादिपीठे सौधादिनिर्मिते स्थंडिले यौकुंकुमादिनात्मकल्पोक्त पूजाचक्रं निर्माय तत्र मूलमंत्रेण पुष्पांजलिं दत्वा॥ पदासनादिभिः क्षितिलिय
रचितं पूजाचक्रं वंदनादिमंडितं प्रागवत्पीठसंस्थाप्य पुष्पांजलिं दत्वा। तत्र स्वर्णरूप्यादिधातुनिर्मितस्य पूजाचक्रस्याम्लरसादिना संशुद्धस्यादौ वैदिकमंत्रेणाग्न्युत्ता

© Dharmartha Trust J&K. Digitized by eGangotri

वि धा र्त्त व
२८०

280

रणं कारयित्वा मधुघृतगोदुग्धनारिकेलजलैः पृथक्पृथगभिषिंच्य पंचामृतैः पंचविंशतिकाथजलैस्तत्तन्मंत्रवर्णैः पंचविंशतिकाथजलैर्वाभिषिंचेत्। तत्र मंत्रवर्णैः पंचविंशतिग्रहणे मंत्र
वर्णेषु पुनरुक्तवर्णानामेकधैव पयस्य वर्णस्य यावत्त्वमावर्तयामेवेदृश्यं तत्तस्यैव पंचविंशतावंतर्भाग ग्राह्यः। ततस्तु प्रागेव प्रदर्शितः। ततः शुद्धजलैः प्रक्षाल्य चंदनागरुक
र्पूरकस्तूरीकुंकुमादिपंकैरालिप्य पुरतः शुभे पीठे संस्थाप्य तच्चक्रं स्पृष्ट्वा मूलमंत्रमष्टोत्तरसहस्रं जपित्वा संशुद्धस्य तस्य चक्रस्य प्रागुक्तं प्राणप्रतिष्ठामंत्रेणामुकदेवतापू
जाचक्रस्येत्यादिना तत्र देवतानामपूर्वकं देवमावाह्य सांगं सावरणं संपूज्य महानैवेद्यं बलिदानादि पूर्वकं महोत्सवं प्रत्यहं दिनत्रयपर्यंतं कुर्यात्। दिनत्रयमपि प्रथमादिने आवा
हितं देवं न विसर्जयेत्। चतुर्दिने नित्यपूजांते देवं विसर्जयेत्। इति प्रतिष्ठिते चक्रे नित्यनैमित्तिकादिपूजनं च कुर्यात्। अनुसारेणानु ऋग्वेदः काग्निसूक्तेनैव वा कार्यः॥ सूक्तं तु
अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठां। अग्नी रोदसी विचरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरंधिं। अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आविवेश। अग्निरेकं चोदयत्
समत्स्वग्निर्वृत्राणि दयते पुरूणि। अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथं। अग्निरत्रिं घर्म उरुष्यदंतरग्निर्नृमेधं प्रजयासृजत्सं। अग्निर्दाद्द्रविणं वीरपेशा अ
ग्निरृषिं यः सहस्रा सनोति। अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा। अग्निं मुक्थैरृषयो विह्वयंतेऽग्निं नरो यामनि बाधितासः। अग्निं वयो अंतरिक्षे पतंतोऽग्निः
सहस्रा परियाति गोनां। अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो विजाताः। अग्निर्गांधर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आनिषत्ता। अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं मह
मवोचामा सुवृक्तिं॥ अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमायजस्व॥ अथैतस्य प्रयोगः॥ ततएभिर्मंत्रैः प्रथमप्रतिष्ठितस्य चक्रादिकर्माग्निशब्दरहितैः शतावृत्त्यासु शुद्ध
जलैरभिषिंच्यानंतरं अग्निशब्दसहितैः शतावृत्त्याभिषिंचेदित्यनुसारेण विधिः॥ ततः प्रत्यहं तु अस्मादग्निः शुद्धजलेन प्रक्षालनं धातुमयचक्रस्य स्फटिकस्य जलेनैव प्र
लनं कार्यमिति॥ अथ कालीमते चक्रप्रतिष्ठाविधिस्तु वामकेश्वरतंत्रे॥ भैरव उवाच॥ चक्रभेदं महादेव त्वत्प्रसादान्मयाश्रुतं। इदानीं श्रोतुमिच्छामि प्रतिष्ठाक्रमनिर्णयं॥ शंकर
उवाच॥ शृणु देवि महाभागे जगत्कारणकारिणि। तस्य स्थापनकर्माणं सर्वकार्यविनिर्णयं। स्नात्वा संकल्पयेन्मंत्री गुरोरर्चनमारभेत्। पंचगव्ये ततः कृत्वा शिवमंत्रेणमंत्रितं।
तत्र चक्रं क्षिपेन्मंत्री प्रणवेन समाकुलं। उद्धृत्य तत्तच्चक्रं स्थापयेत्पूर्णपात्रके॥ पंचामृतेन दुग्धेन शीतलेन जलेन च। चंदनेन सुगंधेन कस्तूरीकुंकुमेन च। पयो दधि घृतं क्षौद्र श
र्कराद्यैरनुक्रमात्। तोयधूपांतरैः कुर्यात्स्वापनं चाभिषिंचयेत्। हाटकैः कलशैर्देवी मधुमिश्रैरिपूरितैः। कषायजलसंपन्नैः कारयेत्स्नानमुत्तमं। स्नात्वा संस्थाप्य तां देवीं स्थापयेत्स्व
र्णपात्रके। यंत्रराजाय विद्महे महायंत्राय धीमहि। तन्नो यंत्रः प्रचोदयात्॥ स्पृष्ट्वा यंत्रं कुशाग्रेण गायत्र्याभिमंत्रयेत्। अष्टोत्तरशतं देवि देवताभावसिद्धये। आत्मशुद्धिं त

श्री
२८०

© Dharmartha Trust J&K. Digitized by eGangotri

तः कृत्वा षडङ्गैर्देवतां यजेत्। तत्रावाह्य महादेवीं जीवन्यासं च कारयेत्। उपचारैः षोडशभिर्महामुद्रादिभिः सदा। फलतांबूलनैवेद्यैर्देवीं तत्र समर्चयेत्। पद्मसूत्रादिकं
दद्याद्वस्त्रालंकारमेव च। अमुकं रं चामरं छत्रं यथायोग्यं महेश्वरि। सर्वमेतत्प्रयत्नेन दद्यादात्महिते रतः। ततो जपेन्महामन्त्रं च सकलेप्सितसिद्धये। बलिदानं ततः कृत्वा प्रण
मेच्चक्रराजकं। अष्टोत्तरशतं कृत्वा संपाताज्यं विनिक्षिपेत्। होमकर्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत्। धेनुमेकां समानीय स्वर्णशृंगां घृ(?)ले कृत्वा गुरवे दक्षिणां दद्यात्। ततो
देव्या विसर्जनं।। अथ प्रयोगः।। तत्र साधकः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्। ओं अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्मा अमुकदेवतायाः पूजार्थममुकयं
त्रसंस्कारमहं करिष्य इति संकल्प्य पंचगव्यमानीय हो(?)मियष्टोत्तरशतमभिमंत्र्य ओमिति यंत्रं तत्र निक्षिपेत्। तस्मादुद्धृत्य पात्रांतरे स्थापयेत्। ततः शीतजलचंदनकस्तूरीकुं
कुमैः स्नापयित्वा पंचामृतं ... हौं इति शोधयित्वा स्थापयेत्। तत्र क्रमस्तु क्षीरेण स्नाप्य पुनः शुद्धजलैः स्नाप्य धूपयेत्। एवं दधिघृतमधुशर्कराभिः। ततोऽष्टभिः कलशैः
कुंकुमरोचनाचंदनमिश्रिततोयैः स्नापयेन्मूलमंत्रेण सर्वत्र। ततो यंत्रमुत्तोल्य कुशाग्रेण स्पृशन् यंत्रराजाय विद्महे महायंत्राय धीमहि। ततो यंत्रं प्रचोदयादित्यष्टोत्तरशतम
भिमंत्र्य प्राणप्रतिष्ठां कुर्यात्। ततस्तत्रेष्टदेवतामावाह्य षोडशोपचारैः संपूज्य षडंगेन पूजयेत्। तत्र पद्मसूत्रादिकं दत्वा अष्टोत्तरसहस्रं जपेत्। शक्तश्चेत् बलिं दद्यात्। ततोऽ
ष्टोत्तरशतहोमं कृत्वा आज्याहुतिसंपातं कुर्यात्। होमासामर्थ्ये द्विगुणजपः कार्यः। ततो गुरवे सुवर्णालंकृतां गां दक्षिणां च दत्वा छिद्रावधारणं कुर्यादिति। इत्थं प्रतिष्ठितं प्रक्षालि
तं चंदनादिमंडितं पुरतः प्रोक्तपीठे संस्थाप्य तत्र मूलमंत्रेण पुष्पांजलिं दत्वा प्राग्वदर्घ्यादिपात्राण्यासाद्य अर्घ्यजलं किंचित्पात्रांतरेणोद्धृत्य तज्जलेन स्वात्मानं पूजाचक्रं पूजा
द्रव्याणि च मूलमंत्रेण प्रोक्ष्य तेषु धेनुमुद्रां प्रदर्श्य स्वदेहं गंधादिभिरलंकृत्य स्वेष्टदेवतारूपं संचिंत्य स्वशिरसि श्रीगुरुं मूलाधारे गणपतिं च संपूज्य प्रागुक्तयोगपीठदेव
तास्तत्तन्न्यासस्थानेषु संपूज्य हृदयकमलकेसरेषु तन्नलीठ(?)शक्तीश्च संपूज्य तन्नलीठ(?)मंत्रेण सर्वांगेषु पुष्पांजलिं दत्वा स्वेष्टदेवतारूपं स्वात्मानं ध्यायन् मूलमंत्रेण मूर्ध्नि
हृदये गुह्ये पादयोः सर्वांगेषु पंचस्थानेषु पंच पुष्पांजलीन् दत्वा धूपदीपनैवेद्यैरभ्यर्च्य प्राग्वन्मूलाधारे चतुरस्रं कुंडं संचिंत्य तत्र कुंडस्थानलकपरमात्मवह्निं संचिंत्य मूलमंत्रमु
च्चार्य धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं। पुण्यं जुहोमि स्वाहा। पुनर्मूलं प्रागुक्तं प्रोक्तक्रमेण च पापं जुहोमि स्वाहा। इत्थं पुण्य
पापे हुत्वा कृत्वा संकल्पविकल्पौ धर्मवत्पृथक् कृत्वा पुनर्मूलं प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा धर्माधर्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा। इति धर्माधर्मौ
कं सकलप्रपंचं पूर्णाहुतिलीनं कृत्वा निरस्तनिखिलोपाधितया निरतिशयसुखानंदचिद्घनं स्वात्मानं ध्यायन् प्राणायाममृष्यादिकरषडंगन्यासं सर्वं कृत्वा मूलमंत्रम

© Dharmartha Trust J&K. Digitized by eGangotri

घ्रोत्तरशतवारं जपित्वा तत्पं समर्प्य पीठतले न पूजाचक्रमभ्युक्ष्य चक्रस्योत्तरभागे ऐं गुरुभ्यो नमः दक्षिणे गं गणपतये नमः इति संपूज्य पूजाचक्रस्याधस्ता
द्भूतलादि सप्तपाताल भावनया क्रों मंडूकाय नमः एवं कालाग्निरुद्राय· मूलप्रकृत्यै· आधारशक्त्यै· कूर्माय· अनंताय· वराहाय· इति संपूज्य वराहस्य दंष्ट्रोपरि
पृथिव्यै नमः। तस्यां सुधार्णवाय· तस्मिन्नवरत्नमयद्वीपाय· तन्मध्ये स्वर्णपर्वताय· तदुपरि नंदनोद्यानाय· तन्मध्ये कल्पवृक्षेभ्यो· तेषां मध्ये विचित्ररत्नभूम्यै·
तन्मध्ये स्वर्णप्राकाराय· तन्मध्ये रत्नमंडपाय· तस्यांतः स्वर्णवेदिकायै· तदुपरि रत्नसिंहासनाय· इति तत्र भावनया संपूज्य पूजाचक्राधारपीठसिंहासनरत्नमंडपरिक
ल्प्य तस्याग्नेय्यादिकोणचतुष्टये सपादचतुष्टये धर्माय· ज्ञानाय· वैराग्याय· ऐश्वर्याय· इति प्रादक्षिण्येन संपूज्य पूर्वाद्यादि पीठस्य गात्रचतुष्टये अधर्माय· अ
ज्ञानाय· अवैराग्याय· अनैश्वर्याय· इति प्रादक्षिण्येन संपूजयेत्। ततः सिंहासनस्य मध्ये मायायै· विद्यायै· इति मायाविद्ये पद्मसूत्रमयपट्टिकारूपेणालौकि
कमंचवदेतत्प्रोतरूपेण ग्रथिता स्थिते ध्यात्वा संपूज्य तदुपरि अनंताय नमः इति तल्पाकारमनंतं संपूज्य तस्य मूर्ध्नि पद्माय नमः आनंदकंदाय· संविन्नालाय· तद्द
लेषु प्रकृतिमयपत्रेभ्यो· तत्केसरेषु विकृतिमयकेसरेभ्यो· तत्कर्णिकायां पञ्चत्रिंशद्वीजाढ्यतत्त्वरूपायै कर्णिकायै· केसरेषु अं अर्कमंडलाय· कर्णिकायां उं सो
ममंडलाय· पत्रेषु मं वह्निमंडलाय· तथैव ब्रह्मणे। विष्णवे· रुद्राय· तत्रैव संप्रबोधात्मने सत्त्वाय· रं प्रकृत्यात्मने रजसे· तमोहात्मने तमसे· ओं आत्मने· अ
न्तरात्मने· पं परमात्मने· ह्रीं ज्ञानात्मने· सिंहासनस्य स्वाग्न्यादि चतुर्दिक्षु मध्ये च ज्ञानतत्त्वात्मने· मायातत्त्वात्मने· कलातत्त्वात्मने· विद्यातत्त्वात्मने·
परतत्त्वात्मने नमः इति संपूज्य तत्केसरेषु स्वाग्न्यादिप्रादक्षिण्येन गणेशादि तत्र पीठस्य नवशक्तीः पीठमंत्रेण समस्तं पीठं च संपूज्य तत्र मूलमंत्रमुच्चार्य श्रीवादि
मूर्तिं परिकल्पयामीति पीठमध्ये शिवलिंगादि तदभावे पुष्पादिकं वा निक्षिप्य ध्यानोक्तां मूर्तिं विभावयेन्नमः इति कल्पितां मूर्तिं पूजयेत्॥ अथ पंचायतनीये
मध्ये शिवपूजायां देवस्याग्नेय्यादिकोणचतुष्टये सूर्यगणेशदुर्गाविष्णून् संस्थाप्य गणेशादिक्रमेण तत्तत्कल्पोक्तविधिना तत्तद्यन्त्रे तत्तत्पीठपूजापुरःसरं पृथक्
पृथक् सांगावरणान् सर्वोपचारैः संपूज्य तत्तन्मंत्रजपस्तोत्रपाठप्रणामैः समापयन्नादिभिः परितोषयेत्। एवं विष्ण्वादिपूजायां प्रमाणोक्तप्रकारेण कोणेषु दे
वताः संस्थाप्य प्रमाणोक्तप्रकारेणायतनदेवताः पूजयेत्। अत्र च पंचायतनपूजायामपि पूज्यपूजकयोर्मध्ये प्राचीं दिशं परिकल्प्य तदनुसारेणाग्नेय्यादिकं कल्प
येदिति। ततः पुनर्मूलमंत्रेण प्राणायामत्रयं मूलमंत्रस्यर्ष्यादिकांश्च कृत्वा कराभ्यां पुष्पांजलिमादाय पद्ममुद्रां बद्ध्वा पूर्वोक्तमानसकांभोजत्वेन ध्यात्वा पद्मास

© Dharmartha Trust J&K. Digitized by eGangotri

तेनोपविष्टोऽनुकायांतर्मुखो गुदमेढ्रयोरंतराले सुषुम्णांतश्चतुरस्रमध्यस्थचतुर्दलपंकजदले षु चिद्योतद्राघसार्धत्रिवलयवेष्टितं सकेसरं पीतवर्णं मूलाधारे संचिंत्य तन्मध्ये सो
मसूर्याग्निमयाकथादित्रिरेखं त्रिकोणं विभाव्य तन्मध्ये सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं जपाकुसुमसन्निभं ज्योतिर्लिंगं ध्यात्वा तदुपरि विद्युत्कोटिप्रभादीप्तां बिसतंतुतनु
नीयसीं प्रसुप्तभुजगीं शिवं सार्धत्रिवलयत्रिकोटिवलयेन सर्वांतर्यामितया स्थितां परब्रह्मविनाभूतां कुंडलिनीं शक्तिं चिरं विभाव्य गुरूपदिष्टविधिना गुदाकुंचनपूर्वकं हंसकारणे
न तां कुंडलिनीमुत्थाप्य सुषुम्णावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्रभेदनक्रमात् ब्रह्मरंध्रं नीत्वा तत्रस्थपरमात्मना तां तु धीपरमात्मनि संयोज्य
शिवशक्त्यात्मकं तत्तेजो वहन्नासाध्वना निःसार्य करस्थपुष्पांजलौ संयोज्य मूलमंत्रमुच्चार्य श्रीशिवेहागच्छागच्छेति वक्त्रमध्यस्थितमूर्तेः शिरसि पुष्पांजलिप्रक्षेपणेन तते
जआवाहनीमुद्रया समावाह्य तत्कुलरंध्रेणानुप्रविष्टं संचिंत्य श्रीशिवादिरूपेण परिणतं ध्यानोक्तरूपं तं ध्यायन् मूलमंत्रमुच्चार्य श्रीशिवेह तिष्ठेति स्थापनीमुद्रां प्रदर्श्य देवश्र
भक्तसुलभ सर्वावरणसंयुता यावत्त्वां पूजयिष्यामि तावदत्र स्थिरो भव। इति प्रार्थ्य पुनर्मूलमंत्रमुच्चार्य श्रीशिवेह सन्निधेहीह सन्निधेहीति सान्निधापनमुद्रया सन्निधा
प्य मूलमुच्चार्य श्रीशिवे सन्निधेहीह सन्निधेहीति सन्निधापनमुद्रया सन्निधाप्य मूलमुच्चार्य श्रीशिव इह सन्निरुद्धो भव इह सन्निरुद्धो भव पुनर्मूलं श्रीशिवेह संमुखो भवेह
संमुखो भवेति तत्संमुखीमुद्रया विधाय पुनर्मूलं श्रीशिवेहावगुंठितो भवेहावगुंठितो भवेत्यवगुंठ्य देवस्य हृदयादिषडंगन्यासस्थानेषु षडंगमंत्रान्विन्यस्य मूलमुच्चार्य श्रीशिव स
कलीकृतो भव परमीकृतो भवेति सकलीकृतो भवेति सकलीकृत्य धेनुमुद्रां बध्वा देवस्य मूर्ध्न्यमृतवर्षिं धारयन् मूलमुच्चार्य श्रीशिवामृतीकृतो भवामृतीकृतो भवेत्यमृ
तीकृत्य महामुद्रां बध्वा मूलमुच्चार्य श्रीशिव परमीकृतो भव परमीकृतो भवेति देवस्य मूर्ध्नि परमामृतवर्षिं ध्यात्वा मूलेमंत्रेण ततः ऐं वद वद वाग्वादिनि ह्रीं क्लिन्ने क्लेदिनि क्ले
दय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु सौः ह्सौः इति दीपिनीमकारादिक्षकारांतां मातृकां वोच्चार्य पर्यादकेन देवं त्रिः प्रोक्ष्य देवस्य हृदयं स्पृशन् पूर्वोक्तप्राण
प्रतिष्ठामंत्रेऽमुकपदस्थाने शिवस्येति पदं प्रक्षिप्य प्राणप्रतिष्ठामंत्रं जपन् देवस्य प्राणप्रतिष्ठां विधाय मूलमंत्रमुच्चार्य श्रीशिवाय नम इति त्रिः पुष्पांजलिं दत्वा लिं
गयोनित्रिशूलाक्षमालावराभयमृगखट्वांगकपालडमरुकाख्या दशमुद्राः प्रत्येकं कामबीजेन विरच्य मूलमंत्रेण प्रदर्श्य हूं इति मुंचेदिति योक्तदशमुद्राः प्रदर्श्य
मूलमुच्चार्य श्रीशिव एतत्ते आसनं नमः इति वाक्यार्घ्यं वा स्वर्णं वा रौप्यं पैत्तलं वा यथासंभवमासनं देवस्य वामभागे विन्यस्य ह्रं ह्रं ह्रं ह्रं दामि दामि दं गृहाण स्वाहेति निवेद्य
मूलेन पद्ममुद्रां प्रदर्श्य पुनर्मूलमुच्चार्य श्रीशिवाय नम इति पुष्पांजलिं दत्वा मूलमुच्चार्य श्रीशिव कुशलं स्वागतमिति कुशलस्वागतं कुशलप्रश्नं कृत्वा कुशलस्वागत

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२८२

प्रश्नमुद्रे प्रदर्श्य पुनर्मूलमुच्चार्य श्रीशिवाय एष तेऽर्घः स्वाहा। इति पूर्वं स्थापितार्घ्यपात्राद्गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वान्वितं जलं पात्रांतरे गृहीत्वा देवस्य
शिरसि दत्वा क्रों हं हं हं दं दमिदं दमिदं गृहाण स्वाहेति निवेद्यार्घ्यमुद्रां प्रदर्श्य मूलमुच्चार्य श्रीशिवाय नमः इति पुष्पांजलिं दत्वा पुनर्मूलमुच्चार्य श्रीशिवे तत्ते पाद्यं नमः इति पाद्य
पात्रात् श्यामाकदूर्वाब्जविष्णुक्रांतान्वितं जलं पात्रांतरे गृहीत्वा देवस्य पादयोर्दत्वा क्रों हं हं हं इति मंत्रेण प्राग्वन्निवेद्य पाद्यमुद्रां प्रदर्श्य मूलं प्राग्वत्पुष्पांजलिं दत्वा। अत्र सर्वोपचा
रेषु प्रोक्तमंत्रेण निवेदनं मूलमंत्रेण पुष्पांजलिं च प्रत्युपचारं कुर्यात्। ततः आचमनीयपात्राज्जातीफललवंगकक्कोलचूर्णयुतं जलं पात्रांतरे गृहीत्वा मूलमुच्चार्य श्रीशिवे तत्ते
पर्के आचमनीयं सुधेति देवस्य मुखकमले दत्वा प्राग्वन्निवेद्याचमनीयमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा मधुपात्रमुद्धृत्य मूलमुच्चार्य श्रीशिवे एष ते मधुपर्कः सुधेति देवस्य मुखकमले
दत्वा प्राग्वन्निवेद्य मधुपर्कमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा पुनराचमनीयपात्रात् पात्रांतरे जलमुद्धृत्य मूलमुच्चार्य श्रीशिवे तत्ते पुनराचमनीयं सुधेति पुनराचमनीयं दत्वा प्राग्वन्नि
वेद्याचमनीयमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा रत्नपादुके उपनीय पादुकायुगमारुह्य भगवन् गृहे रत्ननिर्मिते। स्नानमंडपमायाहि स्नानार्थं शंकर दिग्गतमिति पाद्यपूर्वं स्नानादिदिशि निरवि
तं स्नानमंडपं नीत्वा प्राग्वदासनं दत्वार्घ्यपाद्याचमनीयानि प्राग्वन्निवेद्य सुगंधतैलादिकमुपनीय श्रीशिवे तत्ते सुगंधतैलाभ्यंगसुगंधामलकाद्युद्वर्तनादिकं नमः इति सुगंध
तैलाभ्यंगसुगंधामलकाद्युद्वर्तनादिकं च निधाय महाराजोपचारवन्नानाविधैर्जलैरभिषिच्य गंगादितीर्थादाहृतजलपूर्णकनककलशसहस्राभिरिदं वक्ष्यामिरभिषिंचेत् ॐ मलया
प्राग्वन्निवेद्य स्नानमुद्रां प्रदर्श्य मूलेन पुष्पांजलिं दत्वा प्राग्वदाचमनीयं दत्वा जलापकर्षणार्थं वस्त्रं दत्वा गात्रं प्रोञ्छ्य परिकल्प्य श्वेतदुकूलयुग्ममानीय वमिति वरुणबीजेनाभिमं
त्रितजलेनास्त्रमंत्रेण प्रोक्ष्य बृहस्पतिदेवताभ्यां वासोभ्यां नमः इति संपूज्य मूलमुच्चार्य श्रीशिवे तत्ते वाससी नमः इति वाससी परिधाप्य पूर्ववन्निवेद्य वस्त्रमुद्रां प्रदर्श्य पुष्पांज
लिं दत्वा पूर्ववदाचमनीयं दत्वा स्वर्णादिनिर्मितं यज्ञोपवीतमानीय मूलमुच्चार्य श्रीशिवे तत्ते यज्ञोपवीतं नमः इति यज्ञोपवीतं दत्वा प्राग्वन्निवेद्य पुष्पांजलिं दत्वा यज्ञोपवीतमुद्रां प्र
दर्श्य प्राग्वदाचमनीयं निवेद्य रत्नपादुके उपनीय पादुकायुगमारुह्य भगवन् रत्ननिर्मितं। आगच्छ निर्मितं याग्यमलंकारस्य मंदिरं। इति दक्षिणदिशि तमलंकारमंडपं नी
त्वा तत्र सिंहासने उपविश्य नानाविधालंकरणानि समुपनीय प्राग्वत्प्रोक्ष्य नानादेवतेभ्यो मुकुटाभरणेभ्यो नमः इति संपूज्य मूलमुच्चार्य श्रीशिवे तत्ते मुकुटं नमः एतत्ते । श्री
कुंडले नमः। इति नानाभरणानि तत्तन्मंत्रैः समर्प्य निवेद्याभरणमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा पादुके उपनीय पादुकोपरि ध्यायेत् शंखवाद्यपुरःसरं यागमंडपमायाहि पारिगा २८२
स्ना रणेभ्यः स्वाहा। इति अर्घ्यप्रधानमंडपे नीत्वा तत्र तत्राकल्पितयोगपीठे देवं समुपवेश्य छत्रचामरादिनानाविधोपकरणं गृह्य सपरिवारदेवताभ्यः सूर्यालिकिरणास

© Dharmartha Trust J&K. Digitized by eGangotri

मूहमिव देवशरीराद्विनिर्गत्य स्वे स्वे स्थाने समुपविष्टं विशेषानन्ताः प्रधानदेवतासदृशाकाराभरणायुधादिशोभितं स्थिरीभूतं परितश्च क्रमध्ये ध्यात्वा वेदनाग
रुकर्पूरादिना नागंधमानीय प्राग्वत्प्रोक्ष्य गंधर्वदेवतायै गंधायनमः इति संपूज्य मूलमुच्चार्य श्रीशिवे चलेत गंधोनमः इति देवायगंधं समर्प्य शरीरं तेन नामि वेष्टां
नैवचनैवचा मयानिवेदिता त्वग्गंधानातिग्रह्याविलिप्यतां। इति प्रपूज्य मूलमुच्चार्य श्रीशिवमान्त्रित पुष्पाणि पवौषट् इति नानाविधानि सुगंधसुमन मुद्रा समर्प्य
न्यास प्राग्वन्निवेद्य पुष्पमुद्रां प्रदर्श्य देवं संपूज्य देवहृदयादिषु षडंगस्थानेषु षडंगानि लिंगांगत्वेन संपूज्य श्रीशिवपरिवारदेवता पूजनार्थमनुज्ञां देहीति देवं आर्घ्यं तं लो
लोकांवरणदेवताः पूजयेदिति। इत्थमंगावरणदेवताः संपूज्य तद्बाह्ये देवाग्रादष्टसु दिक्षु क्रमेण लं इंद्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नमः।
रं अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नमः। टं यमाय प्रेताधिपतये कृष्णवर्णाय दंडहस्ताय महिषवाहनाय नमः। क्षं निर्ऋतये रक्षोधिपतये
धूम्रवर्णाय खड्गहस्ताय प्रेतवाहनाय नमः। वं वरुणाय जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नमः। यं वायवे प्राणाधिपतये कृष्णवर्णाय अंकुशहस्ता
य मृगवाहनाय नमः। सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नमः। हं ईशानाय विद्याधिपतये स्फटिकवर्णाय शूलहस्ताय वृषवाहनाय नमः।
संपूज्य ईशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये रक्तवर्णाय पद्महस्ताय हंसवाहनाय नमः। नैर्ऋतिवरुणयोर्मध्ये ह्रीं अनंताय नागाधिपतये गौरवर्णाय चक्रह
स्ताय गरुडवाहनाय नमः इति पूजयेत्। एवं विस्ताराशक्तौ लं इंद्राय नमः। रं अग्नये। टं यमाय। क्षं निर्ऋतये। वं वरुणाय। यं वायवे। सं कुबेराय। हं ईशानाय। आं ब्र
ह्मणे। ह्रीं अनंताय नमः इति प्राग्वत्संपूज्य इंद्रादीनां समीपे वं वज्राय नमः एवं शक्तये। दंडाय। खं खड्गाय। पं पाशाय। अं अंकुशाय। गं गदायै। शं त्रिशूलाय। पं पद्माय। चं च
क्राय नमः इति लोकपालानामायुधानि च पूजयेत्। अत्र सर्वत्रावरणपूजायां प्रथमावरणपूजांते मूलमंत्रेण देवं संपूज्य संबोध्य मूलमुच्चार्य अभीष्टसिद्धिं मे देहि
शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं इति देवस्य चरणयोरर्घोदकं पुष्पादिकं दद्यात्। एवं द्वितीयावरणादिष्वपि ऊहनीयं। ततो मूलमुच्चार्य सांगाय सा
वरणाय शिवाय नमः इति त्रिः पुष्पांजलिनासंपूज्य अस्त्रमंत्रेण धूपभाजनं संप्रोक्ष्य हृदयमंत्रेण धूपभाजनं गंधादिभिरभ्यर्च्य तत्र सांगारान्निधाय यमिति धेनु
मुद्रया अमृती कृत्य ह्रीं सुरभितेजसे स्वाहेति मंत्रेण गुग्गुलादि धूपान्निक्षिप्य गंधर्वदेवताय धूपाय नमः इति धूपं संपूज्य मूलमुच्चार्य वनस्पतिरसोत्पन्नो गंधाढ्यो धू
प उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यतां। इति धूपमुत्सृज्य स्ववामभागे घंटां निधाय अस्त्रमंत्रेण प्रोक्ष्य तेनैव मंत्रेण घंटायै नमः इत्यभ्यर्च्य आगजध्वनिमं

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२८३

283

त्रमातः स्वाहेति घंटां मंत्रेणतां त्रिभिरभिमंत्र्य वामकरेण तां घंटां वादयन् ओं हं हं हं हं दमि दमि दं गं हां णं स्वाहेति मंत्रेणैवैव धूपं निवेद्य धूपपात्रं देवस्य वामभागे निवेश्य धूपमुद्रां
प्रदर्श्य देवं संपूज्य दीपमाहृत्य गोघृतैस्तिलस्नेहैर्वा निक्षिप्य तत्र कर्पूरगर्भितां वर्त्तिं निधाय क्लीं इति प्रज्वाल्य विष्णुदैवत्याय घृतप्रदीपाय नमः। वनस्पतिदैवत्याय तैलदीपाय न
मः इति तैलदीपश्चोत्संपूज्य वमिति धेनुमुद्रयामृतीकृत्य मूलमुच्चार्य सुप्रकाशो महादीपः सर्वत्र तिमिरापहः। सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां इत्युच्चार्य श्रीशिवैवते दीपोन
मः इति दीपमुत्सृज्य प्राग्वत् घंटां वादयन् देवस्य पादादिमूर्धांतं दीपमुच्चैः प्रदर्श्य घृतैः ओं दक्षभागे तैलदीपश्च देवस्य वामभागे दीपं निवेश्य दीपमुद्रां प्रदर्श्य देवं संपूज्य प्रागुक्तदेवस्याग्रा
घावमत्रीये द्वावास्वली दीपान्त्र अक्षभोज्याले ह्यचोष्यपेयात्मकं पंचविधमन्नं कटुम्लजवणतिक्तकषायमधुरात्मकषड्रसोपेतं नानाविधव्यंजनसमेतं नैवेद्यमानीय विष्णुदैवत्याय नैवेद्या
य नमः इति संपूज्य देवस्य चतुरस्रमंडले साधारं संस्थाप्य निधाय मूलेन वीक्ष्यास्त्रेण [?] प्रोक्षणीयजलेन प्रोक्ष्य ते नैवेद्यमंत्रेण कुशैरस्त्रिः संताड्य कवचमंत्रेणाभ्युक्ष्य धेनुमुद्रां दक्षिण
हस्तोपरि तादृशं वामहस्तं निधाय यमिति वायुबीजं नाष्टवारमभिमंत्र्य [?] गतस्पर्शादिदोषान् परिशोषयित्वा पुनर्वामस्योपरि दक्षिणकरं [?] वह्निं धाय्या [?] मुखं वामहस्ते
नाच्छादयन् रमिति वह्निबीजं मष्टवारं जपन् तत्कृतदोषान् दग्ध्वा धेनुमुद्रां प्रदर्श्यामृतं वमिति यमलबीजमष्टधा जपन् नैवेद्यममृतीकृत्यास्त्रमंत्रेण नैवेद्यस्योपरि चक्रमुद्रां प्र
दर्शयन् तत्संरक्ष्य मूलमंत्रेणाष्टवारमभिमंत्र्य दक्षिणहस्तेन जलं गृहीत्वा हेमपात्रगतेदिव्यं परमान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृहाण परमेश्वर। इति नैवेद्यस्योपरि चुलुकोदकं
निक्षिप्य मूलमुच्चार्य श्रीशिवैवतत्ते नैवेद्यं नमः इत्युत्सृज्य कराभ्यां तत्पात्रं स्पृशन् पूर्वोक्तमंत्रेण नैवेद्यपात्रांतरे धेनुमुद्रयामृतीकृत्य देवस्य दक्षिणहस्ते तज्जलं किंचिद्दत्वा अमृतो
पस्तरणमसि स्वाहेति देवमापोशयित्वा वामकरेण विकचोत्पलसन्निभां ग्रासमुद्रां दर्शयन् दक्षिणकरस्य कनिष्ठानामिकांगुष्ठयोगेन ओं प्राणाय स्वाहा। एवं पुनस्तर्जनीमध्यमानामिकांगु
ष्ठयोगेन व्यानाय स्वाहा। एवं प्रागुक्तपंचमुद्राभिः पंचग्रासान् ग्राहयित्वा स्वर्णादिपात्रे जलं धेनुमुद्रयामृतीकृत्य नमस्ते देवदेवेश सर्वतृप्तिकरं परं। अन्यानि वेदितं भुंक्ष्व प्रकृतिस्थं सुशी
तलं। परमानंदसंपूर्णं गृहाण जलमुत्तमं। इति देवस्य वामभागे जलपात्रं निवेश्य नैवेद्यपुष्पांजलिं दत्वा स्वमंत्रेणादिगंधं धनं कुर्यात्। देवं परितो जवनिकां विभाव्य अवालकनैवेद्यं नमः इत्यं
गुष्ठानामिकायोगरूपां करद्वयेन नैवेद्यमुद्रां प्रदर्श्य देवं भुंजानं ध्यायेत्॥ यथा॥ ब्रह्मेंद्राद्यैः सुरसमभितः सूपविष्टैः समंताद्देवासीनं हृदयं करयासादरे वीरुद्गमान्नः नर्मक्रीडासहस्र
न परोहासयंतां शिक्षो भोज्यान्न भुंक्ते पात्रे कनककघटिते षड्रसान् देवदेवः इति ध्यायन् मूलमंत्रं दशधा जपित्वा तृप्तं समर्प्य नित्यहोमं कुर्यात्॥ अत्र नित्यहोमविधानं तु अग्रे वदर्शितं। अत्रै श्री
वं विस्तारात्र्यतो अग्न्याधानादिकं कर्म नित्यहोमे न विद्यत इति वासिष्ठसंहितावचनात् लौकिकाग्नावेव देवदेवं ध्यात्वा संपूज्य मूलमंत्रेण पंचविंशत्याहुतीः षडंगमंत्रैः षडाहुतीरावरणदेवता २८३
नामेकैकामाहुतिं वा जुहुयात्। आवरणहोमाशक्तौ मूलमंत्रेण षडंगमंत्रैश्चोक्तसंख्ययाहुत्याहुतिं कुर्यादिति नित्यहोमं विधाय पूजास्थानं गत्वा स्वासने उपविश्य मूलमंत्रेण प्राणायामत्रयं कृ

© Dharmartha Trust J&K. Digitized by eGangotri

त्वा ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रेण पुष्पांजलित्रयं दत्वा पूजां आवरकस्य ईशानकोणे चतुरस्रवृत्तत्रिकोणमंडलं कृत्वा साधारं शंखं संस्थाप्य जलगन्धोदकपूरितं तत्पात्रं त्रिति

त्वा धाय सर्वभूतानां हानिकृतदृहतिष्ठन्त इहैव सर्वभूतेभ्यो नम इति पुष्पांजलिभिः संपूज्य ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः योगिन्योऽप्युग्ररूपाश्च गणानामधिपाश्च

या भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः सर्वे ते प्रीतमनसो भूताः गृह्णन्तु इमं बलिं। इति वामकरांगुलिभिः प्रपात्रात्पात्रांतरेण कृत्वा जलधारां बलिपात्रे निक्षिपेत्। बलिभुजस्ते

पुष्पांजलिमादाय भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तं संतोषमासाद्य व्रजंतु सर्वे क्षमंतु तान्यत्र नमोऽस्तु तेभ्यः इति पुष्पांजलिं दत्वा प्रणम्य प्रयान्तु खे वि

हरंतु भूतानीति नाराचमुद्रया विसर्ज्य अस्त्रमंत्रेण भुवं जलैः स्नात्वा तं प्रोक्ष्य देवं नत्वा पात्रांतरे वमिति धेनुमुद्रया जलममृतीकृत्य ममतापिधानमसि स्वाहेति देवायोन्नतं पा

श्त्रं दत्वा तेनैव गंधसारमुद्धृत्य नैवेद्यं तेनैव पात्रे निधाय यो मयार्चितस्त्वं मंत्रेण तत्त्वानि शोधयित्वा तस्मात् विक्षेपमादाय निर्माल्यभोजिने नमः इत्यैशान्यां निक्षिप्य हस्तौ प्रक्षाल्य

देवाय करशोधनार्थं सुगंधचूर्णादिकं करक्षालनाय च दत्वा करं प्रक्षालयित्वा हस्तशोधनार्थं कर्पूरश्वेतकलानि दत्वा पुनर्गण्डूषजलं दत्वा पादौ प्रक्षाल्य आचमनीयं दत्वा सूक्ष्मवस्त्रेण

हस्तौ पादौ प्रमृज्य सुगंधिचूर्णादिभिः करौ सुरभितौ कृत्वा तांबूलमादाय मूलमुच्चार्य श्रीशिवतमालदलकर्पूरपूगमागतरोजितं संशोधितं सुगंधवत्तांबूलं प्रतिगृह्यतां। एतत्तांबूलं

नमः इति तांबूलं समर्प्य प्रागुक्तनिवेदनमंत्रेण निवेद्य मूलमंत्रमुच्चार्य सुप्रसन्नाय श्रीशिवाय नमः इति त्रिः पुष्पांजलिना संपूज्य पुनर्मूलमुच्चार्य सुप्रसन्नाय शिवाय एष गंधो नमः

एवं गंधपुष्पधूपदीपैराराधयेदिति प्रसन्नपूजां कृत्वा मुकुरं परिधाप्यादर्शं दर्शयित्वा छत्रचामरव्यजनादिनानाविधराजोपचारान् परिकल्प्य दूर्वाक्षतजलान्यादाय मूलमुच्चार्य श्रीशि

वतत्त्वनीराजनं नमः इति देवस्य मुकुटोपरि दूर्वादिकं निक्षिपेत्। ततः कांस्यादिबहुस्थाल्यां चंदनादिनाष्टदलकमलं कृत्वा तन्मध्येऽष्टसु दलेषु च पिष्टमयान् नव दीपान् घृतपूर्णान् कर्पू

रगर्भवर्त्तिसहितान् त्रिः क्षिप्य ह्रीं इति प्रज्वाल्य ह्रीं चतुरस्रमंडले निधाय धेनुमुद्रयाऽमृतीकृत्य अस्त्रमंत्रेण अवकुंठनमुद्रया संरक्ष्य श्रीं क्लीं ग्लूं स्लूं प्लूं म्लूं न्लूं ह्रीं श्रीं इति रक्षेपरी

विधाय मूलमंत्रेण चपथकृत्पथगमपर्यंतं तत्पात्रं कराभ्यामादाय मूलमुच्चरन् देवस्य चरणाम्बुजं तं मूर्धादि चरणांतं पुनः पुनर्भ्रामयन् नव कृत्वो नीराजयेदिति नीराजनविधिः। ततः प्राणाय

मूलमंत्रस्य प्राणायामत्रयं कृत्वा ऋष्यादिन्यासपूर्वकं जपमालां प्राक्प्रोक्तविधिना शिरसि निधाय घर्षोदकमादाय ओं गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देव त्वत्प्र

सादात्त्वयि स्थिता इति देवस्य दक्षिणहस्ते गृहीतोदकदानेन जपं समर्प्य प्राक्प्रोक्तविधानेन जपमालां संपूज्य रहसि निधापयेत्॥ अत्र जपमालाभावे अंगुलिभिर्वा जपगणना कार्या। इत्थं

जपं विधाय घंटावादनपूर्वकं शिवसहस्रनामशतनामस्तोत्रादिभिर्देवं स्तुत्वा प्रदक्षिणनमस्कारैः परितोष्य। ओं यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं। निवेदितं च नैवेद्यं तद्गृहाणा

नुकंपया। आवाहनं न जानामि न जानामि विसर्जनं। पूजां चैव न जानामि त्वं गतिः परमेश्वर। कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम। अंतश्चारेण भूतानां द्रष्टा त्वं परमेश्वर। नाथयोनि

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२९४

सहस्रेषु येषु येषु प्रजाम्यहं तेषु तेष्वचला भक्तिरच्युतास्तु सदा त्वयि। देवो दाता च भोक्ता च देवः सर्वमिदं जगत्। स देवो जयति सर्वत्र यो देवः सोऽहमेव हि। इति चंडं नत्वा ...
र्घ्यं पुनः पुनः। अनेन स्वेष्टार्थं प्रार्थनां कृत्वा दद्यात्। पापमुच्यं साधु वा साधु वा कर्म यद्यदाचरितं मया। तत्सर्वं भगवन् शंभो गृहाणाराधनं परमिति कृत्वा धूपं दद्यात्
दकदानेन समर्प्य पुनः प्राग्वदर्घ्यं दत्वा ततः स्वस्थाने निवेश्य पुष्पांजलिमादाय इतः पूर्वमिति मंत्रेण देवपादयोर्दत्वा ... पुनः पुष्पांजलिमादाय मूलमुच्चार्य शिरसि
हृदयस्थपूजिता याश्च देवताः। श्रीशिवांगे विलीनास्ताः संतुष्टा वै सुरा वहाः। इति पुष्पांजलिं निःक्षिप्य द्वारदेवताश्चतुरायतनदेवताश्च देवस्यांगे विलीना इति विभाव्य देवतां तेजोरूपां वि
भाव्य श्रीशिव क्षमस्वेति तालत्रयं दत्वा संहारमुद्रां बध्वा ओं गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर। यत्र ब्रह्मादयो देवा न विदुः परमं पदं। इति पठित्वा निर्माल्यपुष्पेण सह तेजः समुद्धृ
त्याघ्राय नासापथेन ततो ब्रह्मरंध्रं नीत्वा सुषुम्णामार्गेण हृदयकमलमानीय ओं तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर। यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंति मे हृदि। इति हृदि संस्थाप्य
... नासाग्रे ... चतुरस्रवेष्टितं त्रिकोणमंडलं कृत्वा पद्मासनं दद्यात्
तत्र यथोक्तरूपं देवं ध्यात्वा मानसैरुपचारैः संपूज्य स्वात्मभेदेन ध्यायन् प्राणायामत्रयषडंगादिकरषडंगन्यासान् विधाय ईशानकोणे वर्तुलं ... देवस्य निर्माल्यपुष्पादिकं निःक्षिप्य ...
नादिकोणचतुष्के प्रादक्षिण्येन ओं वोदराय वं ... चंडेश्वराय नम इति ... निर्माल्येन संपूज्य ... श्रीशिवाज्ञया। इति तत्रैव निःक्षिप्य करौ प्रक्षालयेत्। अन्यदेवतापात्रे ... देवतां ...
पंकिंचिदासीयले ... नादितांबूलं ... निर्माल्यभोजिने तुभ्यं ददामि श्रीशिवाज्ञया। ... तलमापूर्य सूर्याभिमुखः स्थित्वा ओं नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
सर्वोक्तस्थापनक्रमेण गणेशादीनां निर्माल्यदेवताः पूज्याः। ततस्ताम्रादिपात्रे गंधपुष्पान्वितं ... स्वाहा इति सूर्यायार्घ्यं दत्वा कृतांजलिः। यच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम। सर्वं तदच्छिद्रमस्तु भास्क
नमः सवित्रे शुचये सवित्रे कर्मदायिने। इति पठित्वा क्रों ह्रीं सः श्रीसूर्याय एष ते ऽर्घ्यः ... निधाय तत्रार्घ्यपात्रोदकं किंचिन्निःक्षिप्य ... मूलमंत्रेण ... अभिमंत्र्य ...
रस्य प्रसादतः। इत्युक्त्वा ... गंधं किंचित् ... निधाय ... निर्माल्य ... श्रीशिवरूपः सुखी ... इति नि
र्माल्यमूलमंत्रेण निर्माल्यपुष्पं शिरसि निधाय मूलेनैव चरणोदकं प्राश्य नैवेद्यं शिवनिर्माल्यं ... भक्ष्याणि ... विधि ... अवश्यकार्यमिति। यत्तु शिवनिर्माल्यधारणं ... भक्षणादि ...
स्यपूजाविधिना ... स्कंदपुराणे शिवनिर्माल्यधारणं तन्निवेदितभक्षणं ... अथैवं विस्तरतो नित्यपूजां कर्तुमशक्तश्चेत् तदा यश्रीगुरुं स्मृत्वा प्रणम्य ... विधाय ... स्नात्वा स्नानं
दशुचि परेऽन्यत्राशुचिरनधिकारी अदीक्षित इति याज्ञवल्क्यः। अथ वा ... विधिना त्रिपुंड्रं विधाय तत्राविविक्तासाराशक्तो मूलमंत्रेणाभिमंत्रित भक्तनात्विधाय ...
विस्तराशक्तो निर्मलादिस्नानानंतरं ... मुद्रया ... शिरसि त्रिरपि ... विधिना त्रिपुंड्रं विधाय तत्राविविक्तासाराशक्तो केवलं सूर्यमंत्रेणैवार्घ्यं दत्वा ... प्राग्वत् ...
ध्यानतर्पण सूर्योर्घ्यदानानि कृत्वा तर्पणे पिविस्ताराशक्तो मूलमंत्रेणाष्टाविंशति वारं देवं संतर्प्य सूर्यार्घ्यदानाविस्ताराशक्तो केवलं सूर्यमंत्रेणैवार्घ्यं दत्वा ... प्राग्वत् ...

२९४

© Dharmartha Trust J&K. Digitized by eGangotri

दत्तं कृत्वा प्राग्गुक्तविधिना पश्चिमद्वारमेवं संपूज्य प्राग्वत् विशेषन्यासं कल्पयित्वा आसनेऽपि विस्ताराशक्तौ क्लीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्योपविश्य प्राग्व
दूत्वाल्पासाद्यभूतशुद्धिं विधाय तत्रापि विस्ताराशक्तौ प्राग्वद्धृदये जीवात्मानं ध्यात्वा तथैव ब्रह्मरन्ध्रे संयोज्य प्राग्वत् पापपुरुषं ध्यात्वा तथैव यं बीजेन संशोष्य रं बीजेन संदह्य वं बीजेनाप्ला
व्य पुनर्ब्रह्मरन्ध्राज्जीवात्मानं हृदयमानीय प्राग्वत् प्राणप्रतिष्ठामातृकान्यासांश्च कृत्वा समस्तमातृकान्यासकरणाशक्तौ केवलमातृकान्यासं श्रीकण्ठादिन्यासं वा तत्राशक्तौ केवलमातृ
कान्यासमेव कृत्वा प्राणायामयोगपीठन्यासं मूलमन्त्रन्यासांश्च कृत्वा ध्यानार्घ्यस्थापनादि सर्वं प्राग्वत् समापयेत्। पाद्यादिपात्रस्थापनाशक्तौ अर्घ्यपात्रं प्रोक्षणीपात्रं च संस्थाप्य प्रोक्ष
णीजलेनैव पाद्याद्यादीनि कल्पयेत्। इत्येषोऽपि संक्षेपप्रकारः शास्त्राद्गुरुमुखाद् ज्ञात्वा तव्यः। इदं संक्षेपपूजाविस्तरतः कर्तुमशक्तानामेवाशक्तौ वेदितव्यं स्यादिति नाविस्तारं शक्तः संक्षेपेण क्रि
यते तत्तद्दोषाय भवतीति॥ उत्तरतन्त्रे॥ स्वरूपं मन्त्रयन्त्राणां देवतानां विशेषतः। अज्ञात्वा भजते मूढो न सिद्धिं प्राप्नुयात् क्वचित्। मन्त्रविग्रहे निर्णये स्वरव्यञ्जनभेदतः पृथक् पृथक् कवि
भज्येवं पार्थिवाद्याश्च षड्विधाः रश्मयोऽपि समाले ख्यातेषु पार्थिवसंचयात् तथैवाप्यं तैजसं च वायव्यं नाभसं क्रमात्। मानसं रश्मिवृन्दं वक्तुं दासंयोज्य संलिखेत्। षड्विधेषु च भूतसंचय
स्य ततस्तत्स्वरूपकमिति॥ अस्यार्थः॥ मन्त्रे यावन्तो वर्णास्तान् स्वरव्यञ्जनरूपेण पृथक् पृथग्विलिख्य प्राक्क्रमवीर्यप्रकरणोक्तेषु चतुर्विधेषु राशिषु यथा तन्मेषु रश्मिक्रमं गृहीत्वा प्रत्य
क्षरस्य षड्विधरश्मीन् पृथक् पृथक् विलिख्य ततः इयन्तः पार्थिवाः इयन्त आप्याः इयन्तस्तैजसाः इयन्तो वायव्याः इयन्तो नाभसाः इयन्तो मानसाः एवं प्रदृष्टं दानिकवान्ते पुनस्त्या
धिकं दृश्यते। तत्स्वरूपं मन्त्रयन्त्रदेवतानां ज्ञातव्यमिति। कालीमते प्रकाशितं रश्मिवृन्दं एतस्यापि विवेको विविधाग्रे वक्ष्यते। कालीमते तु मातृकाणां वा ऊर्ध्वाम्नायादीति व्याख्याता ऊ
र्ध्वपञ्चाद्दिनिर्गताः। पूर्वाम्नायास्तु संज्ञा क्रमशः। पूर्वमुखोत्थाः। दक्षिणास्यात्तु समुत्थाः दक्षिणाम्नायसंज्ञकाः पश्चिमाननसंभूताः पश्चिमाम्नायसंज्ञकाः। उत्तरास्यात्तु संजाता उत्त
राम्नायसंज्ञकाः। ऊर्ध्ववक्त्रात्तु संभूता ह्यूर्ध्वाम्नायाभिधाः स्मृताः। पृथिवी जलं तेजो सिवायुराकाशमेव वा क्रमेणात्र तु विज्ञेयं धरादीन् भूतपञ्चकं। मानसा रश्मयो ज्ञेयाः भूतग्रामे
दि सर्वतः। ऊर्ध्वाम्नायक्रमे व्यक्तरश्मिवृन्दं तु षड्विधं। आकाशगतेषु दशसु पार्थिवाद्याश्च रश्मयः। एकादशपर्यन्तं क्रमात् पार्थिवरश्मयः। एकसप्ततितोऽशीतिजलान्तं तूलरश्मयः।
एकादशोत्तरशतात् द्विशोत्तरशतावधि तैजसश्चैकपञ्चाशदुत्तरात्ततः क्रमात्। षष्ठ्युत्तरशतं यावत् वायव्याः परिकीर्तिताः। नाभसा रश्मयः सैकचत्वारिंशाच्छतद्वयात्। पं
चाशदुत्तरशतद्वयं यावत् प्रकीर्तिताः। प्रत्यक्षरं तु द्वात्रिंशद्द्वात्रिंशन्मानसोऽशवः। दशानां वायुवर्णानां वक्ष्ये रश्मिक्रमं शृणु। रुद्राद्विंशति पर्यन्तं पार्थिवा रश्मयः स्मृताः। एकपञ्चवि
मिता त्वसप्तत्यन्तमाप्याः प्रकीर्तिताः। एकोत्तरशताच्चैव दशोत्तरशतावधि तैजसाः। सैकनवतिशताद्यावच्छतद्वयं। वायव्या रश्मयो ज्ञेयाः सैकत्रिंशच्छतद्वयात्। चत्वारिंशोत्तरश
तद्वयं नाभसरश्मयः। मानससारश्मयः प्राग्वत् द्वात्रिंशत्संमिताश्च ते। तैजसेषु दशार्णेषु पार्थिवाद्याश्च रश्मयः। एकविंशात् क्रमात् त्रिंशत्यावत् पार्थिवरश्मयः। एकपञ्चाश

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२८५
285

तः अष्टिर्योगदप्याख्यरश्मयः। सैकचत्वारिंशच्छता यावत्सार्धशतं तथा। तैजससारश्मयः सैकाशीत्युत्तरशताक्रमात्। सनवत्युत्तरशतं वायव्याः संप्रकीर्तिताः। शतद्व
यात्सैकविंशात्त्रिंशद्द्विशतं क्रमात्। नाभसारश्मयो ज्ञेयाः। प्राग्वन्मानसरश्मयः। आप्येषु दशवर्णेषु क्रमाद्दक्षिणक्रमं विदुः। सैकत्रिंशान्तश्चत्वारिंश यावत्पार्थि
वाः। तथैकनवतेर्यावच्छतमाप्याः प्रकीर्तिताः। सैकत्रिंशच्छता यावच्चत्वारिंशच्छतांततः। तैजसारश्मयः श्चैकसप्तत्यर्धशताक्रमात्। साशीतिशतकं यावद्वायव्याः परिकीर्ति
ताः। एकादशोत्तरशतद्व्याद्द्विशच्छतद्वयं। नाभसारश्मयो ज्ञेयाः। प्राग्वन्मानसरश्मयः। पार्थिवार्णेषु दशसु क्रमाद्दक्षिणक्रमं ध्रुवे। एकचत्वारिंशदंकाद्यावत्पंचाशता भवेत्।
पार्थिवारश्मयो ज्ञेयास्तथैकाशीतितः परे। यावन्नवतिवाप्यास्तत्सैकत्रिंशच्छतात्परे। सत्रिंशच्छतकं यावत्तैजसाः संप्रकीर्तिताः। सैकषष्ट्युत्तरशतात्सप्तत्यर्धशतं तथा।
वायव्यारश्मयो ज्ञेया एकोत्तरशतद्व्यात्। दशोत्तरद्विशतकं नाभसाः पूर्ववत्परे। परेमानसाः पूर्ववद्द्वात्रिंशत्सूर्यवर्णज्ञेयाद्वत्सर्वथा। तत्र द्वयथामले। ऊर्ध्वाम्नाये नभो मूले मो
अग्नेर्धराशवः। पूर्वाम्नाये पृथिव्यंबुतेजोनिलनभः क्रमः। दक्षिणे। निलतेजोंबुपृथिवीनभसां क्रमः। पश्चिमे पृथिव्यप्पवनानलरश्मयः। उत्तरे। नलवायुपृथ्वीनभोंबु
क्रमः स्मृतः। मातृकार्णवे। षट्पंचाशच्छकारस्याधोरपार्थिवांशवः। स्वाधिष्ठाने तु षष्टिस्तेन सोयांबुरश्मयः। मणिपूरे द्विपंचाशद्वांतस्यामतसंहकाः। अनाहतेयका
रस्यवलुः पंचाशदानिलाः। द्व्यसप्ततिर्विशुद्धेतु हकारवन्नाभसाः। आज्ञायां तु चतुःषष्टिश्चांतेमानसरश्मयः। विसर्गस्थे विसर्गस्य कलाशतकमानसाः। अस्यार्थः। ऊर्ध्वाम्नाये
आकाशानलकेशानमुखोद्भूते देवतामंत्रयंत्राणां स्वरूपज्ञानार्थं पञ्चभूतरश्मयः प्रदर्श्यंते। तत्राद्यवाकाशवर्णानां ल व त ड ल मम ग्रहाणां क्रमेण। १।२।३।४।५।६।७।
८।९।१०। एवं क्रमेण पार्थिवरश्मयो ज्ञेयाः। अथाप्यरश्मयः। ७१।७२।७३।७४।७५।७६।७७।७८।७९।८०। अथ तैजसरश्मयः। १११।११२।११३।११४।११५।११६।
११७।११८।११९।१२०। अथ वायव्यरश्मयः। १५१।१५२।१५३।१५४।१५५।१५६।१५७।१५८।१५९।१६०। अथाकाशरश्मयः। २४१।२४२।२४३।२४४।२४५।२४६।२४७।
२४८।२४९।२५०। अथ मानसरश्मयः। ३२।३२।३२।३२।३२।३२।३२।३२।३२।३२।। अथ वायुवर्णानां अ आ ए क च ट त प य शानां दशानां क्रमेण पार्थिवरश्मयः। ११।१२। श्री
१३।१४।१५।१६।१७।१८।१९।२०। अथाप्यरश्मयः। ६१।६२।६३।६४।६५।६६।६७।६८।६९।७०। अथ तैजसरश्मयः। १०१।१०२।१०३।१०४।१०५।१०६।१०७।१०८।१०९। २८५
११०। अथ वायव्यरश्मयः। १९१।१९२।१९३।१९४।१९५।१९६।१९७।१९८।१९९।२००। अथाकाशरश्मयः। २३१।२३२।२३३।२३४।२३५।२३६।२३७।२३८।२३९।२४०।
मानसरश्मयः। प्राग्वत्त्रयं द्वात्रिंशत् द्वात्रिंशत् क्रमेणाज्ञेयाः। अथ तैजसवर्णानां इ ई ऐ ख छ ठ थ फ र क्षाणां पार्थिवादिरश्मयः। तत्रादौ पार्थिवाः। २१।२२।२३।२४।२५।

© Dharmartha Trust J&K. Digitized by eGangotri

२६।२७।२८।२९।३० अथाप्य रश्मयः।।५१।५२।५३।५४।५५।५६।५७।५८।५९।६० अथ तैजस रश्मयः।।१४१।१४२।१४३।१४४।१४५।१४६।१४७।१४८।१४९
१५० अथ वायव्यरश्मयः।।१८१।१८२।१८३।१८४।१८५।१८६।१८७।१८८।१८९।१९० अथाकाशरश्मयः क्रमेण २२१।२२२।२२३।२२४।२२५।२२६।२२७।२२८।२२९
२३० अथाप्य वर्णानां दशानां ऋ ॠ औ घ ढ ध भ व सानां दशानां क्रमेण पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।३१।३२।३३।३४।३५।३६।३७।३८।३९।४० अथाप्याः।९१।९२।
९३।९४।९५।९६।९७।९८।९९।१०० अथ तैजसाः।१३१।१३२।१३३।१३४।१३५।१३६।१३७।१३८।१३९।१४०। अथ वायव्याः।१७१।१७२।१७३।१७४।१७५।१७६।
१७७।१७८।१७९।१८०। अथ नाभसाः।२११।२१२।२१३।२१४।२१५।२१६।२१७।२१८।२१९।२२० मानसाः प्रागवत्। अथ पार्थिव वर्णानां दशानां ङ ऋ ओ ग
ज ड द ब ल ळानां क्रमेण पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।४१।४२।४३।४४।४५।४६।४७।४८।४९।५० अथाप्याः।८१।८२।८३।८४।८५।८६।८७।८८।८९।
९०। अथ तैजसाः।१२१।१२२।१२३।१२४।१२५।१२६।१२७।१२८।१२९।१३० अथ वायव्याः।१६१।१६२।१६३।१६४।१६५।१६६।१६७।१६८।१६९।१७० अथ नाभसाः।२०१।
२०२।२०३।२०४।२०५।२०६।२०७।२०८।२०९।२१०। मानसाः प्रागवत्। एषां हृल्लू ऊर्ध्वाम्नाय क्रमे रश्मिक्रमः। अथ पूर्वाम्नाये रश्मिक्रमः। तत्रादौ पार्थिवानां दशार्णानां क्रमे
ण पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।२४१।२४२।२४३।२४४।२४५।२४६।२४७।२४८।२४९।२५० अथाप्याः।१५१।१५२।१५३।१५४।१५५।१५६।१५७।१५८।१५९।१६०
अथ तैजसाः।१११।११२।११३।११४।११५।११६।११७।११८।११९।१२० अथ वायव्याः।७१।७२।७३।७४।७५।७६।७७।७८।७९।८० अथ नाभसाः।१।२।३।४।५।६।७।८
९।१० अथाप्यानां दशार्णानां पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।२३१।२३२।२३३।२३४।२३५।२३६।२३७।२३८।२३९।२४० अथाप्याः।१९१।१९२।१९३।१९४।१९५।
१९६।१९७।१९८।१९९।२००। अथ तैजसाः।१०१।१०२।१०३।१०४।१०५।१०६।१०७।१०८।१०९।११० अथ वायव्याः।६१।६२।६३।६४।६५।६६।६७।६८।६९।७० अथ नाभ
साः।११।१२।१३।१४।१५।१६।१७।१८।१९।२०। अथ मानसाः प्रागवत्। अथ तैजसानां दशार्णानां क्रमेण पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।२२१।२२२।२२३।२२४।२२५।
२२६।२२७।२२८।२२९।२३० अथाप्याः।१८१।१८२।१८३।१८४।१८५।१८६।१८७।१८८।१८९।१९० अथ तैजसाः।१४१।१४२।१४३।१४४।१४५।१४६।१४७।१४८।
१४९।१५० अथ वायव्याः।५१।५२।५३।५४।५५।५६।५७।५८।५९।६० अथ नाभसाः।२१।२२।२३।२४।२५।२६।२७।२८।२९।३० अथ मानसाः प्रागवत्। अथ वायव्यानां
दशार्णानां पार्थिवादि रश्मयः। तत्रादौ पार्थिवाः।२११।२१२।२१३।२१४।२१५।२१६।२१७।२१८।२१९।२२० अथाप्याः।१७१।१७२।१७३।१७४।१७५।१७६।१७७।१७८।
१७९।१८० अथ तैजसाः।१३१।१३२।१३३।१३४।१३५।१३६।१३७।१३८।१३९।१४० अथ वायव्याः।९१।९२।९३।९४।९५।९६।९७।९८।९९।१०० अथ नाभसाः।

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
२८६

286

३११।३१२।३१३।३१४।३१५।३१६।३१७।३१८।३१९।३२०। अत्र मानसाः प्राग्वत्। अथ नाभसानां दशार्णानां पार्थिवादिरश्मयः। तत्रादौ पार्थिवाः। २०१।२०२।२०३।२०४।२०५।२०६।२०७।२०
८।२०९।२१०। अथ आप्याः। १६१।१६२।१६३।१६४।१६५।१६६।१६७।१६८।१६९।१७०। अथ तैजसाः। १२१।१२२।१२३।१२४।१२५।१२६।१२७। अ १२८।१२९।१३०।
अथ वायव्याः। १८१।१८२।१८३।१८४।१८५।१८६।१८७।१८८।१८९।१९०। अथ नाभसाः। ४१।४२।४३।४४।४५।४६।४७।४८।४९।५०। अत्रापि मानसाः प्राग्वत्। इति पूर्वाम्नाये रश्मिक्र
मः। अथ दक्षिणाम्नाये रश्मिक्रमः। दक्षिणेऽनिलतेजोम्बुपृथिवीनभसां क्रमः। अत्रायमर्थः। पूर्वाम्नाये ये पार्थिवादिरश्मयः पार्थिवदशार्णानामभिहितास्ते दक्षिणाम्नाये
वायव्यानां दशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। अथ च पूर्वाम्नाये आप्यदशार्णानां पार्थिवादिरश्मयः प्रोक्तास्ते दक्षिणाम्नाये तैजसानां दशार्णानां पार्थिवादिरश्मयो ज्ञेयाः।
अथ पूर्वाम्नाये तैजसानां दशार्णानां ये पार्थिवादिरश्मयः प्रोक्तास्तेऽत्र दक्षिणाम्नाये आप्यानां दशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। अथ च पूर्वाम्नाये वायव्यदशार्णानां
ये पार्थिवादिरश्मयः प्रोक्तास्तेऽत्र दक्षिणाम्नाये पार्थिवदशार्णानां पार्थिवादिरश्मयो ज्ञेयाः। नाभसास्तूभयत्र समाना इत्यर्थः। एवं क्रमेण पश्चिमे तु पृथिव्यम्बुपवनानल
रश्मयः। उत्तरे जलवाः पृथिवी अम्बु नभो वायुक्रमः स्मृतः। एतदुक्तं पश्चिमाम्नाय उत्तराम्नाययो रश्मिक्रमः। अत्र पञ्चाम्नायेषु क्रमशः मरश्मिभ्यो
ऽधिकरश्मयो लक्षव्यक्तानां वर्णानां षट्पञ्चाशत् ये लोकायुरास्मा मानसामात् कार्णो वो क्रीत्या ज्ञेयाः। तथा मूलाधारे चतुर्दलकमलकर्णिकामध्यस्थवका
रस्य द्विपञ्चाशदाप्यरश्मयो ज्ञेयाः। अनाहते द्वादशकदलकमलकर्णिकामध्यस्थरेफस्य द्वाषष्टिस्तैजसरश्मयो ज्ञेयाः। विशुद्धौ षोडशदलकमलकर्णिकामध्य
स्थहकारस्य द्वासप्ततिर्नाभसरश्मयो ज्ञेयाः। आज्ञायां द्विदलकमलकर्णिकामध्यस्थक्षकारस्य चतुःषष्टिर्मानसरश्मयो ज्ञेयाः। ततो ब्रह्मरन्ध्रे सहस्रदलकमल
कर्णिकोपरि षष्ठ्यधिकसर्गस्थानस्थितस्य अःकारस्य षोडशशतमानसरश्मयो बोध्याः। श्रीतन्त्रराजे॥ अथ षोडशनित्यानां ध्यानानि विविधानि ते। कथयामि शृणु प्राज्ञे
काङ्क्षितार्थसुरद्रुमान्॥ एकैकमेवं गामित्वेन तासां तच्छक्तिभिस्तथा। प्रयोगेषु समस्तेषु वा ध्यायं तरलः क्रमात्॥ श्रियै कीर्त्यै जयायायुष्ये वश्याकर्षणसिद्धये। ध्यायेद्दूरी
समस्तास्त्वालोहिताकारमण्डलाः। व्यापिनीः शान्तिके मुक्ताविन्दुकर्पूरसन्निभाः। विद्वेषोच्चाटनिधनेष्वग्रहेष्वसिताः स्मरेत्। क्षित्यादिभूतैः सत्वादिगुणैः केकसंहतैः
एतद्ध्यानसमाख्ये वर्णाकारैस्तु शक्तयः। अत्र क्षितिवर्णानां दशानां सत्वादियोजनाप्रकारस्तु सात्विकवर्णाः राजसवर्णाः। तामसवर्णाः। सात्विकसात्विकाः। राजस
राजसाः। तामसतामसाः। सात्विकराजसाः। राजससात्विकाः। सात्विकतामसाः। तामससात्विकाः। राजसतामसाः। तामसराजसाः। एवं द्वादशधा क्षितिवर्णाः १२० एवं
माप्यवर्णाः १२० तैजसाः १२० वायव्याः १२० नाभसाः १२० एवं मानसा अपि ज्ञेयाः। तथा। धूम्रा भास्वित्तये सर्वाः प्रोक्ता दृष्यादिसिद्धये। सर्वत्र समाकारवर्णशक्तिभि

श्री
२८६

© Dharmartha Trust J&K. Digitized by eGangotri

रावृताः। असंख्याता भवं त्वासां का हृत्यों ध्यानं तु को वदेत्। कोवाभ्यणोति साकल्यात् ततः किं विद्धदमिते। भौमाकृपाः पीतवर्णाः सर्वास्तंभनकारकाः। आप्याः सत्त्वगु
णाः सर्वाः सिताकाराः समीरिताः। ताः सर्वाः शान्तिश्रीकीर्तिसौभाग्यमुक्तिदाः। आग्नेयाः राजसाः सर्वा लोहितारसंयुताः। वश्याकर्षणशक्तिश्रीसौभाग्यविजयदाः।
वायुरूपा धूम्रवर्णाः सर्वा द्वेषादिकारकाः। नाभसा नीलवर्णास्ता मारणोच्चाटयोः स्मृताः। आसां मुखभुजादेहविधानं शृणु पार्वति। एवं कोट्यश्चतुर्वक्त्रा नववक्त्रास्तथा
पराः। षोडशास्याः पंचविंशद्वक्त्रास्या अपि काश्चन। षट्त्रिंशद्वदनाः काश्चिच्चत्वारिंशन्नवाननाः। चतुःषष्टिमुखास्तद्वदशीतिशताननाः। बहुनात्र किमुक्तेन भुजसंख्या
साधकं वा कथा। तथापि दर्शितं किंचिद्दक्षे वामे भुजद्वये। नामरूपाणि गायन्ते ते न साक्षात्तद्विग्रहाः। न सन्ति नानारूपाश्च भवेयुर्भक्तवांछया। अंबा याल्लोलिताख्यासु रन्याः
३२५ संवेष्ट्य तद्बहिर्वज्रान्तराले कादिक्षान्तवर्णैरावेष्ट्य तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु श्रीबीजं लिखेदेतद्यंत्रमुक्तफलदायालक्ष्मीर्धुसंभवा भूति धेनुपुत्र सुगप स्वा
स्वावसुदेवी सदा नो जुषतां गृहे। इति क्रमः। तथा। सघायं बिंदुसहितं द्वितीयं भुवनेश्वरी। तृतीयं च रमाबीजं चतुर्थं कामराजकं। समुद्भवर्णो धर्मार्थकाममोक्षफलो मनुः स
1 घाघं ए बिंदुयुतं तं तेन ऐं अन्यत प्रसिद्धं। तथा। ऋषिर्भृगुर्निचृच्छन्दो मनुरुच्यते। ओं ईं ईरितं देवता कमला प्रोक्ता सर्वसंपत्करी शुभा। पूर्वमंत्रवद्देवास्य षडंगानि प्रकल्पयेत्। सा
लिक्याभाहरान्तिसिरिविभैः कुंतरं दृश्य तुर्यतीसागो घमालिमयघटं सिरासिञ्चमानां। अंभोजस्था वरसरसिजद्वंद्वकां भीतिहस्तां लक्ष्मीं पायात् दमरनिकरैः सेवितां घ्रप
पुजासा। आयुधध्यानं प्राग्वत्। पूर्वोदिते रमापीठे यजेद्देवीं च पूर्ववत्। अर्कलक्षं जपेन्मंत्री त्रिमध्वाक्ताश्च संजुहेत्। तत्सहस्रं सरोजैश्च रक्तैस्त्रिस्वादुसंप्लुतैः। एवं यो नु कुरुते प्रयोगं
स्य कुर्यान्मंत्री यथाविधिः। साधको मनुवर्यस्यानाधिभिः सेव्यते स्वयं। प्रयोगः सुगमः। तथा। कामिकापंचमं कालो हलं तः स्वरविभूषितं। वर्गादिक्षेदुमबलायरूपणा दीर्घयुक्तम
गुः। सा। अक्षियुक्छांतपवन सघाघद्वियवधिः। दशाक्षरो निगदितो मंत्रः श्रोक्तफलप्रदः। कामिकापंचमं। नकालो मा। अंत्यस्वरो विसर्गः तेन मः। वर्गादिः कः क्षेदं। मा। अ
वलाल वरुणो वा दीर्घयुक्। गा। मगुः। सा। अक्षियुक् सि। प्रांतो। न। यवल। सघाघा। ऐ। तेन न्मे। द्विठः स्वाहा। तथा। ऋष्याद्यादक्षस्स विराट् कमलाः समुदीरिताः। देवी च पवित्री
विष्णुपत्नी च वरदा मता। रूपांता कमला चाभिर्डे नमोंतानभिर्विरुक्तवत्। पंचांगानि मनोरस्य यातिमुक्ताति कल्पयेत्। शारदायां। नमोंताः प्रणवादिकाः इत्यंगमंत्राः। तद्धि
भुजा माकमलयुगदानाभयकराशरीरे च ज्ञासाक्षुवनवि वरं भासयंतिया। सरोजस्था कांचीमणिमुकुटमंजीरसविराश्रियेभया लक्ष्मीः कुचकलशभारानवतनुः। आयुध श्री
ध्यानं प्राग्वत्। रमापीठे पुरा प्रोक्ते यजेल्लक्ष्मीं यथाविधि। आदावंगानि तद्बहिर्बलाकाद्यष्टशक्तयः। तद्बाह्ये लोकपालाश्च तदस्त्राणि ततो बहिः। एवमभ्यर्चयेल्लक्ष्मीं भवेत्सा
क्षाद्धनाधिपः। अथ प्रयोगः। प्रागवद्योगपीठन्यासांतं मूलेन प्राणायामत्रयं कृत्वा शिरसि। दक्षाय ऋषये नमः मुखे विराट्छंदसे। हृदि श्री कमलायै देवतायै। इति विन्यस्य ३२५

© Dharmartha Trust J&K. Digitized by eGangotri

प्राग्वद्विनियोगमुक्त्वा मूलमंत्रे करयोर्व्यापकं ॐ ऐं हृदयाय। पद्मिन्यै। विष्णुपत्न्यै। वरदायै कं कमलरूपायै। इति पंचांगमंत्रानंगुष्ठादिकनिष्ठिकांतं करयोर्विन्यसेत्
नेत्रवर्जं हृदयादिपंचांगेष्वपि विन्यस्य ध्यात्वा योगपूजांते प्राग्वदष्टदले। वलोक्ताद्यष्टशक्तिः संपूज्यं ज्ञाद्यर्वादि सर्वं प्राग्वत्समापयेत्। तथा। पंक्तिलक्षं जपेन्मंत्रं हविष्या
शीजितेंद्रियः। तद्दशांशं सरसिजैः त्रिस्वादुयुक्तैर्जुहुयात्सुधीः। नत्वा समुद्रगामिन्यां कंठदघ्ने जले स्थितः। लक्षत्रयं जपेन्मंत्री भवेद्दर्शानीतो नरः। नैघार्घं प्रसन्नैश्च जुहुया
दुत्तरां क्रियां। रमां संपूज्य सहस्रं तावद्द्वे मधुप्लुतैः। फलैर्द्रुमस्य मासत्रयं पंचशतं वा सितांबुजैः। मधुरक्तैर्वा रेभ्यो तत्पुष्पैर्वा मासं संख्यया जयां सुधीः। संवत्सरादूर्ध्वं नैसर्गं लभते नो
न्संशयमकिं वहृत्कै न भजते मनुमेनं जितेंद्रियः सर्वांछितार्थान् लभते वसुधान्यसमर्द्धियुक्। तथा। वाक्शक्तिः श्रीकामतः स्वसाग्नि सद्योन सर्गयुक् तृतीयं व
वर्णादि तृतीयं केवलं स्यात्तथा लोहितो ८ ग्नियुक्तो वामश्रुतियुक् भृगुरंतरितः। तुर्यवर्णादि पवन सद्याद्या हृदयाग्नि द्वादशार्णो महालक्ष्मीमंत्रः प्रोक्तस्तु सूरिभिः। प्रण
वाद्यो ऽयमेवस्या सर्वसिद्धिकरो मनुः। वाग्भवः। वाग्बीजं। शक्तिः भुवनेश्वरी बीजं। कामास्तद्बीजं। स्वां। हा। सा। स्वरूपं। अग्निः। रेफः। सद्योंतः। ओ। सर्गो। विसर्गो। एभिः पिंडितः।
ह्रौः तृतीयं ज्ञा। वर्णादि तृतीयं गकेवलं स्यात्तत्कारस्वररहितः। लोहितए। अग्नियुक्तं तं। आ। ग्रा। मश्रुतियुक् भृगुः। तेन स। तुर्यवर्णादि। तपवनः। य। सद्याद्यं एं। ते न
त्यै हृदयं। नमः प्रणवाद्यास्तु त्रयोदशाक्षराः। तथा। ऋष्याद्याश्च लागायत्रमहालक्ष्म्यः प्रकीर्तिताः। संपूज्य मनुनापालीप्रणवाद्ये हृदंतकं। अंगुष्ठलीचु क्रमा
न्मंत्री विन्यसेद्बीजपंचकं। मंत्रशेषं न्यसेन्मंत्री चिंतयेदिष्टदेवतां। आदौ स्मरेत्समुद्रांतं सर्वर्तुप्रतिशोभितं। वंजुलैरागरैर्नागैश्च रसालैः श्रीद्रुमैरपि। तालैस्तमालैर्हिं
तालैः शालैश्च बकुलैरपि। कर्कंधुजीवैश्च चंपकैरुपशोभितं। मंदांदोलितकर्पूरकदलीदलमंडितं। अशोकपाटलानागकोविदारमनोरमं। मल्लिकायूथिकाकुंदमंदा
यंतीसुगंधिकं। द्राक्षावल्लीनागवल्लीमाधवीदेवदारुभिः। नमेरुभिर्लवंगैश्च बकुलैस्तिलकैस्तथा। शोभितं कर्णिकारैश्च वंदनैरकवंदनैः। वंजुलैर्मातुलुंगैश्च दाडिमै
र्लकुचैः शुभैः। नारिकेलैश्च खर्जूरैः पूगैः कुरबकैः शुभैः तामालललितकैतकीजातीपारिजाततुलसीवृतं। नैकावर्त्तैर्दमनकैः सर्वर्तुकुसुमोज्ज्वलं। अमंदैः पिचुमंदैश्च मं
दारैरुपशोभितं। विशिष्टैः पनसैस्तद्वैः शाखोटैः कुटजैर्गलैः। आवेगपवनस्पृष्टसुमनोगंधमंजुलं। महासरस्तस्य मध्ये स्मरेन्मंत्री मनोरमं। भ्रमद्भ्रमरमालाभि
रलंकृतचतुर्दिशं। केकिकेकारवाकीर्णलक्ष्मणासारसंवृतं। गरटाहंससंघाश्च चक्रवाकारंडकोज्ज्वलं। स्फुरद्भिः सरसिजैरम्यैः कल्हारैः कैरवैरपि। नीलेंदीवर
वैश्च सुगंधिकुसुमैर्वृतं। सर्वर्तुशोभिकल्पद्रुवनमंडितमुज्ज्वलं। पुलिनतन्वतन्मध्ये मंडपं रत्नकुट्टिमं। समुद्यदर्कसंदोहकिरणद्युतिभास्वरं। हिमरश्मि

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
३२६

करक्रान्तसितकामृतसुशीतले। प्रोच्छ्रसत्फालितस्वर्णप्राकारसुमनोहरे। नानारत्नौघरचितैश्चतुर्द्वारसमायुतं। नवरत्नमयप्रोद्यद्दमरस्तरारकशोभितं। आरर‍ः कपाटः मूलमे
यन्महारत्नैर्विरचितं गोपुरं। तत्प्रगालितहेमाघण्टाध्वजसमूहकं। वैडूर्यादिमहारत्नैर्विरचितस्तंभराजितं। संतप्तस्वर्णरचितगवाक्षशतसंकुलं। हेमरत्नस्फुरद्दीपसहस्र
सुमनोहरं। नानाविधक्षौमवस्त्ररचितामिश्रकैर्वितानैः सक्षुद्रघंटिकायुक्तपताकाभिरथावृतं। शरद्राकासुधारश्मिदुकूलरचितैः शुभैः। विचित्ररत्नो... लम्बैर्दामतपरपिकां
वनाभीमणिव्रातकृतहेममालैः कृतं। शुभैर्घनसारागुरुस्वेदकस्तूरीकुंकुमैरपि। तमालैर्द्रव्यजातैश्च सुगंधिभिरथोत्तमैः। आमोदितं चतुर्द्वारं मंडपं प्रविशेत्... बालभास्करसं
काशं शशिशेखरमंडितां। मुक्ताहारोज्ज्वलद्रम्यां रत्नाकल्पविभूषितां। हस्ताम्भोजैष्टाभिर्विभ्राणां नूतनां बालिमं अंशी। पद्मद्वयके सुभंच सुस्मितां स्यसरोरुहां... कबोल्लसरोचि
लोचनत्रयसंयुतां। कम्रनूपुरसंस्फुरत्कोमलपदद्वयां। नितंबबिंबविलसद्रशनादाममंजुलां। वलित्रयलसद्दिव्यप्रदेशसुशोभितां। गंभीरनाभिहृदसंशोभितमंडितां।
यक्षकर्दमसंलिप्तपीनोन्नतघनस्तनीं। कुंभिकुंभोद्भवप्रोद्यत्सुमदामविराजितां। क्षौमांतरासंगवीतां पुष्पदामसुभूषितां। गालितस्वर्णरचितवैडूर्याङ्गदलसल्लां। कांचनोघ
रत्नपरागमणिसंबद्धकंकणां। नानाविधलसद्रत्नमुद्रिकालंकृतांगुलीं। कंचुकेठकलारावीस्वर्णग्रैवेयराजितां। विचित्रनानालंकारालंकृतांगीं शुचिस्मितां। उद्यदर्केंदुमा
भास्वद्रत्नताटंकशोभितां। कर्णपूरीकृतस्वर्णबद्धरत्नांकुशांशुभां। प्रवालविलसत्कांतिसुचिराधरपल्लवां। शेखरप्रोल्लसद्दम्यद्दशनावलिशोभितां। निर्लोठनश्शारत्नकान्
कांताराधिपप्रभुभाननां। पंचसायककोदंडविलासादिकभ्रूयुगां। विभ्राणां नासिकाप्रोद्यत्तिलपुष्पाद्यबलौघलांछितां भुककलाकाररुचिरालकराजितां। घनसौगंधसंपन्न
मृगनाभिविशेषकां। मनाककुंचितसुस्निग्धनीलमंजुलमूर्द्धजां। वारिजातद्रुकुसुमगंधवाहिसुमूर्द्धजां। तमहाटकसंबद्धनानारत्नौघशोभितां। सौंदर्यभूमरवधिं तेजसां
मभ्यविकां। विलासलक्ष्मीभवनं महालक्ष्मीं विचिंतयेत्। ... वामाधः करमारभ्य दक्षाधः करपर्यंतमायुधध्यानं। पुराप्रोक्तरमापीठे देवीसम्यक्प्रपूजयेत्। देव्याद्यैर्जनास
वस्त्राणुनामहांत्रिकल्पना। दक्षभागयजेद्देवान् गणपं चां न्यतः स्तथा। सुमनोंजलिहस्तं च पुष्पधन्वानमर्चयेत्। अंगानि पूजयेद्दादौ यथास्थाने सुमंत्रवित्। अष्टपत्रे श्रिमाः स
न्याः दुर्माश्रीश्च सरस्वती। दुर्गाधरणिगायत्र्यो देव्युषावेति शक्तयः। नानालंकरणाद्याः सुरंभोजच्छयपाणयः। अंघ्रिप्रक्षालनार्थं च प्रोद्यत्तेजुकृत्सूर्यजे। पूजनीया प्रयत्नेनं
कराभ्यां धृतवामरे। निधी पद्मोपाव गरूलं पश्चिमे छत्रधारिणं। परितश्चायजेद्वाशीर्महान्नवतत्तार्चयेत्। चतुर्दंतं दिग्गजांश्च पद्मेदाशासुमंत्रवित्। लोकपालांतदस्त्राणि तन्नि
कालेपजेत्सुधीः। ऐरावतः पुंडरीको वामनः कुमुदोंजनः। पुष्पदंतः सार्वभौमः सुप्रतीकश्च तेक्रमात्॥ अथ प्रयोगः॥ तत्रागवस्थातः कल्यादियोगपीठन्यासांतमूलेनप्रा

श्री
३२६

© Dharmartha Trust J&K. Digitized by eGangotri

णायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः हृदि श्रीमहालक्ष्मी देवतायै। इति विन्यस्य प्राग्वद्द्वितीयोगमु क्लीं ऐं ह्रां हृदयाय। क्लीं ऐं श्रौं
य। शिरः श्रीं शक्त्यै शिखायै। क्लीं कवचाय। ह्रौं नेत्राय। जो जगत्प्रसूत्यै नमः तेजसे अस्त्राय फट्। इति षडंगमंत्रानंगुष्ठादितलांतमेव मंत्रानिमान् प्रयोः करयोर्विन्यस्य हृ
दयादि षडंगेष्वपि विन्यसेत्। ततः सकेसरमष्टदलकमलं तद्बहिर्द्वादशदलकमलं तद्बहिर्नवदलकमलं तद्बहिश्च तुर्द्वारयुतं चतुरस्रत्रयं इति पत्रावके निर्माय ताम्र पुर
तः संस्थाप्य ध्यानादि पुष्पोपचारांतं कर्णिकायां देव्याः दक्षिणे गणपतये। वामे कामदेवाय। इति संपूज्याष्टदले। उमायै। श्रियै। सरस्वत्यै। दुर्गायै। धरित्र्यै। गायत्र्यै। देव्यै उ
षायै। इति स्वाग्रादि प्रादक्षिण्येन संपूज्य देव्या दक्षिणे वरणसमीपे गंगायै। वामसमीपे यमुनायै। देवी दक्षिणे शंखनिधये। वामे पद्मनिधये। इति संपूज्य द्वादशदले
मेषाय। वृषाय। मिथुनाय। कर्कटाय। सिंहाय। कन्यायै। तुलायै। वृश्चिकाय। धनुषे। मकराय। कुंभाय। मीनाय। तद्बहिर्नवदले। रवये। सोमाय। मंगलाय। बुधाय। बृह
स्पतये। शुक्राय। शनैश्चराय। राहवे। केतुभ्यो नमः। तद्बहिश्चतुरस्रकमलयोरंतराले दक्षपश्चाष्टदिक्षु ऐरावताय। पुंडरीकाय। वामनाय। कुमुदाय। अंजनाय। पु
ष्पदंताय। सार्वभौमाय। सुप्रतीकाय। इति प्रादक्षिण्येन संपूज्य प्राग्वद्वीथीद्वये दिगीशानंतदस्त्राणि च समभ्यर्च्य धूपदीपादिकं शेषं प्राग्वत्समर्पयेदिति। तथा।
जपेज्जातस्करलक्षं च नियताशी यतव्रतः। तद्दशांशं प्रजुहुयात् घृतैस्त्रिस्वादुसंयुतैः। पद्मैरमाकुसुमफलैः प्रत्येकमयुतं जुहुयात् वासितैः श्रीबिल्वसमिद्भिः तर्पयेद्युतहूयो। अत्र
घृतैर्दशांशहोमं विधाय तद्दशांशतर्पणादि निर्वर्त्य पश्चाद्युतहोमे द्रव्ये युतद्रव्यतर्पणं च विदध्यात्। इत्यन्यमंत्रेभ्यो विशेषः। तथा। एवं सिद्धमनुर्मंत्री गुरुमभ्यर्च्य दद्
व्रतः। कुर्यात्कामान्ति कर्माणि स्वाभीष्टानि च मंत्रवित्। आज्याप्लुताभिर्दूर्वाभिरायुःकामो जुहोति नरः। सहस्रं दशाराणं वसमिद्भिर्हव्यवाहने। शताकाभिर्गुडूचीमयष्टी
नरसहस्रकं। शताकाभिर्दूर्वाभिः। समाहं जुहुयाज्जीवेद्वत्सराणां शतं सुधीः। दीर्घायुश्च घृताभ्यक्तैस्तिलैः प्रजुहुयाद् बुधः। आरोग्यकामो जुहुयाद्दारम्भार्कादिके बु
धीः। दशांशं प्रत्यहं वापि सर्पिरक्ताल्पमुद्रतां समिद्भिरानकेनानकं दद्यज्जलेऽञ्जलिं त्वां महालक्ष्मीमिति स्मरन्। अष्टाधिकसहस्रं वा प्रोद्भवां जुहु[illegible]संवत्सरान्तं
लभते आरोग्यमपि साधकः। अन्वहं जुहुयादष्टसहस्रं शालिभिर्ध्रुवं। अष्टाधिकसहस्रमित्यर्थः। सोऽचिराल्लभते लक्ष्मीं महतीं साधकोत्तमः। रसालतास्रसमैर्बिल्वैर्हु
त्वावर्त्तसमुद्भवैः। श्वेतसर्षपकै राज्यप्लुतैर्वा जुहुयाद् बुधः। प्रथीयसीं रमामाप्नोत्यचिरात्साधको ध्रुवं। प्राप्नोति च तथा सर्वं जंतुभिर्नो यथा त्रयं। नारिकेलजलोपेतैर्मरीचैर्जी
रकान्वितैः। गुडयुक्तैर्घृतैः पद्मैः रक्तैर्जुहुयात्सुधीः। संयतः प्रत्यहं चाष्टशतं पायसमश्नुते द्विजः। मंडलाच्च धनं वं साक्षात्कुबेरत्वमाप्नुयात्। गुडमिश्रं हविर्यस्तु होमादन्न

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव ३२७

327

समृद्धिमान्॥ अष्टोत्तरसहस्रं च जपतः सुलांति संकुलेन तु। संगृह्य तत्समं त्रीनागवल्लीरसेन वा सहितैस्तिलकं कुर्यात् सर्ववश्यं भवेत्क्षणात्। पलाशोत्थसमिद्भिश्च कु-
सुमैर्वा कुर्यात्तथा। वश्या भवेयुर्भुवि जातवश्यं नसत्सयमं त्रिलोकः। जातिकाकुसुमैर्मन्त्री राजानं वशमानयेत्॥ कुर्यादरुणांभोजैर्वश्याय सुस्तनैर्नरपगाः। नीलोत्पलानां होमेन
वश्याश्च रणसे भवाः। वश्याय लभते विद्वान् मधूककुसुमैर्घृतैः॥ नवकोष्ठात्मकं सम्यक् मंडलं रचयेत्सुधीः। मध्ये यंत्रं वक्तुं चिरं कल्पयेत् यथाविधि। यन्त्रगव्यमाणं।
तेषु कोष्ठेषु नव सुविन्यसेत्कलशान्नव। शुभां वं चनकाश्मीरलिप्त सर्वांगिकान्नवान्॥ कूर्चतंडुलसंयुक्तान् सर्वदृष्टिमनोहरान्। पूजयेच्च यथावत्तान्वासितैस्तीर्थपुष्क-
रैः कर्षे स्वर्णेन रचितं नवरत्नसमन्वितं। कर्णिकामध्यविलसद्यन्त्रं पदं तु कारयेत्॥ मध्यस्थकलशे रम्यं यथावत्तद्विनिक्षिपेत्। पंचरत्नानि सर्वेषु कलशेषु विनिःक्षि-
पेत्। पंचरत्नानि तु वज्रं मुक्ताफलं नीलं पद्मरागं तथैव च। मरकतेन समायुक्तमिदं विदुरित्यादित्यपुराणोक्तानि तथा। पंडीरोशीरकाश्मीरं च शागुरुतमालकं जाती
कंकोलसंयुक्तं संपिष्य तानि भागशः। कलशेषु च सर्वेषु यथाविधि विलोडयेत्। सदाभद्रा च दूर्वा च देवी श्री च मधुव्रता। अपामार्गस्य पत्राणि मुशलीवल्लरी वकप्रियंगुश्री-
ह्रस्वमुद्गगोधूमतंडुलान्। शालिमाषाश्च सलिलेयवान्प्रक्षिप्य निक्षिपेत्। कदलीनारिकेलं श्रीधात्रीलकुचमस्तुहं। फलानि पद्मबकुलजातिसौगंधिकानि च। पाधिकाशोक-
पुन्नागोत्थानि निक्षिपेत्। पुष्पाणि केतकीतद्भुलसीपल्लवानि च। न्यग्रोधोदुंबरप्लक्षचैत्यादिबिल्वकूर्चकं। प्रक्षिप्य घारवस्त्राणि कादयेत्सकलैः शुभैः। साक्षतैः सफ-
लैः साञ्चविष्ट्ये क्षौमवाससा तेषु मध्यस्थकलशे समावाहयेन्महेश्वरीं। महालक्ष्मीं चंदनाद्यैरुपचारैश्च संयजेत्। शिष्टेषु घटेषु कुंभेषु स्वमायाः क्रमतो न्यसेत्। सुगंधैश्चंद-
नैः पुष्पैर्मनोहैर्धूपदीपकैः। भक्ष्यभोज्यानि वेद्यैश्च यथाविधि यजेत्सुधीः। संस्पृश्य तान्घटान्मन्त्री त्रिसहस्रं मनुं जपेत्। ततः साध्यं समानीय संस्थाप्य मंडले शुभे। सुपीठे तं नि-
वेश्यास्य तस्मिन्साध्ये तु योजयेत्। मनोहरैरलंकारैर्विविधैर्वसनैरपि। आदरात् तमलंकृत्य सुरक्तसुमनोवृतं। सुवासिनीभिर्योषाभिर्वितानां द्विजन्मनां। सहस्रैर्वैश्च नैः सर्व-
वाद्यानां निनदैः सह। वेदघोषेण च सह लग्ने चैव सुशोभने। तेषु मध्यस्थितं कुंभं समुद्धृत्य गुरुः स्वयं। मूलमंत्रं जपन् सिंचेत्साध्यशीर्षे ततोऽपरैः। कलशैः पूर्ववत्सिक्त्वा हस्तेन्य-
स्तशिरः शिरः। संस्पृशं वेदगादितं आशिषं च प्रयच्छति। कल्याणमस्तु च सदा संपदश्च निराकुलाः। प्रसीदतु महालक्ष्मीः सकला देवता अपि। रक्षंतु त्वां सदैव विजयोऽस्तु सुखी श्री
भवाद्य सुंदत्वाशिषः पश्चात्सहसी परिधाप्य च। आचान्तः प्रणमेत्सम्यक् यथाविधि गुरुं शिशुः। नानाविधैश्च वसनैर्नानालंकरणैरपि। धनैर्धान्यै रत्नगोभिर्महीभिर्मिश्रदा- ३२७
सकैः। दासीभिर्देवतां बुद्ध्या गुरुं संतोषयेत्सुधीः। नानाविधैर्भक्ष्यभोज्यैर्लेह्यचोष्यैः सखंडवरैः। दीनांधकृपणैः सार्धं भोजयेद्ब्राह्मणान्ततः। ततः स्वमंदिरं कुर्याद् इत्सवं बंधुभिः सह।

© Dharmartha Trust J&K. Digitized by eGangotri

महात्रिकोकरस्थंच ततः सनवरस्थं यं। कृतार्थं मन्यते सम्यगात्मानं नान्यथा ग्रहि। रा जाग्रा ऋन्निजयते भिषिक्तश्च यथाविधि। राजपुत्रश्च राजे पुरविता दा मृत्यत्वं दा
वंध्याभिषिक्ता रमणी प्रचिरा द्वांछितं प्रदं। महामतिं बलभते नात्र कार्या विचारणा। महाभयेषु भूतादिनिमित्तोत्थभयेषु वा। कृत्याद्रोहादिदोषेष्व च ग्रह कुर्याद भिषेचने।
अभिषेकेण मनुजानां नराणां भवति निश्चितं। सर्वसंपत्सौभाग्यं सर्वाभयशमस्तथा। सर्वोपद्रवारणं चैव सर्वसौख्यानि निश्चितं। पटीरः चंदनः। उशीरं बालकं काश्मीरं कुंकुमं के
सरं। चंद्रः कर्पूरः तमालकं पत्रकं जाती· जातीफलं कोल इति प्रसिद्धं। भागशः समभागेन सदा भज्य मुस्तादेवी सहदेवी। श्री अपराजिता। मधुव्रता भृंगराजः। मुशली ताप
लमूली· वल्ली· वल्लरी· दूर्वा रुणी· प्रियंगु कांगुनी· श्री· बिल्वः धात्री· आमलकी· लकुच· बडहरः इति प्रसिद्धः। प्लक्षः पाकड इति प्रसिद्धः। चैत्रो ग्रामप्रसिद्धि हेतुभूतो यस्य
वृक्षः ब्रह्मकूर्चं· पंचगव्यं पकैः आच्छादनपात्रैः। तथा। श्रीमायाकामयुक्तः प्रणवागतमधोसाध्यमालिख्य मध्ये किंजल्केषु त्वबीजत्रितयमपि लिख्य पुनः शम्याकं पत्र।
मंत्रार्णान्वा षोडशारं स्वरलसितदलं कादियुक्तपत्रमूले हक्षोद्यत्कोण भूमीगृहयुगलवषट्प्रांततत्तूर्णा चतस्यात्। यंत्रमेतत्महालक्ष्म्याः प्रोक्तं संपत्करं परा। सर्व
सौभाग्यदं चापि सर्वदुःखविमोचनं। आपन्निवारणं प्रोक्तं किं बहूक्तेन सर्वदं। अस्यार्थः। द्वादशदले पद्मं विरच्य तत्कर्णिकायां प्रणवं विलिख्य तस्योदरे श्रीमा
या कामबीजानि प्रतिकेसरमेकैकमिति बीजत्रयस्याष्टधा चतुर्विंशतिकेसरेष्वपि विलिख्य द्वादशदलेषु मूलमंत्रस्य वर्णानेकैकशो विलिख्य। बहिः प
ऊशदलं पद्मं कृत्वा तत्केसरेषु ककारादिरादितान्वर्णान्द्वात्रिंशतं द्वंद्वशो विलिख्य तद्दलेषु षोडशस्वरान्विलिख्य तद्बहिश्चतुरस्रद्वयेनाष्ट कोणं कृत्वा तत्कोणेषु प्रति
कोणं हक्षौ विलिख्य वषट्तयालंकृता विद्ययावेष्टयेत्। अत्रालंकृताविद्यावेष्टनेन तु अष्टकोणाद्बहिर्वृत्तद्वयं कृत्वा तयोरंतराले वीथ्यां यथाक्रमालंकृता विद्या वेष्टयेदिति
संप्रदायः। एतच्चंत्रमुक्तफलदं। तथा। तारः श्री शक्तिलक्ष्मी कः सूर्यः शिवयुता धराः चतुराननसूर्यौ च दीर्घयुक्तः पुरंदरः उपांतशिवयुक्तो वायुक्लो हितोग्निमृतो भृगुः चतु
र्थस्वरयुक्तः थांतः पुनरेतत्त्रयं वदेत्। बीजत्रयं महालक्ष्म्या हृदंतोगदितो मनुः सर्वदोषमहालक्ष्म्या मंत्रराजः प्रकीर्तितः। तारः प्रणवः श्रीः श्री बीजं शक्तिर्भुवनेशीः लक्ष्मी
श्री बीजं कः स्वरूपं सूर्यो मकारः धरा ल शिव एतन्मलो चतुराननः कः सूर्यो म दीर्घयुक्तः पुरंदरः तेन ला उपांत्यो ल शिव ए वायुयातेन य लो हित पः अग्नियुतः रफ युतः
तेन प्र भृगुः स चतुर्थस्वरः ई तेन सी थांतः द पुनरेतत्त्रयं। प्रसीदेति बीजत्रयं श्री शक्ति लक्ष्मी बीजानि महालक्ष्म्यै स्वरूपं हृदंतो नमोंतः अत्र केचित्लक्ष्मी शब्दस्य चतु
र्थ्यंतत्वं नेच्छंति महालक्ष्मी इत्येवोद्धरंति। तथा च प्रपंचसारे। महालक्ष्मी हृदिंदिमंत्र इति दक्षिणामूर्तिसंहितायां। दक्षप्रजापतिश्चास्य ऋषिश्छंदस्तथैव च गायत्री देवता

© Dharmartha Trust J&K. Digitized by eGangotri

विधार्णव ३२९ लक्ष्मीरितिसारसंग्रहे ॥ त्रिबीजपुटितैर्मन्त्रवर्णैः पंचांगमीरितं । त्रिष्वग्निवह्निवेदेश्च ततो देवीं विचिंतयेत् । इक्षुपंच ५ अग्नि ३ वेद ४ सिंदूरारक्तकांतिः सरसिजवस-
तिर्भ्रान्तलावण्यभूमिर्हस्ताब्जे रत्नपात्रं सरसिजयुगलं दर्पणं संवहंती । दासीभिस्त्राभिर्विनीतामलिमयमुकुटा हारसत्कुंडलाढ्या कांचीप्रोद्यन्नितंबांगदसितभुजाभ्ये-
यसेव्या सुलक्ष्मीः ॥ वामाधःकरमारभ्य दक्षिणाधःकरपर्यंतमायुधध्याने । दक्षाधस्तदारभ्य वा । पूर्वादिते यन्त्रे लिंठ वक्ष्यमाणेन वर्त्मना । पुरोगानियजेल्लक्ष्म्या श्रीधरादीन्मूर्ति-
तः सुधीः ॥ श्रीधरश्च हृषीकेशो वैकुंठो विश्वरूपकः । वासुदेवादयश्चान्ये चत्वारः समुदीरिताः ॥ भारत्यादिं ततस्तस्या भारती पार्वती तथा । चांद्री शची च संप्रोक्ता दमकाद्यान्
यजेत्क्रमात् । यजेच्छाणा महालक्ष्म्या अनुरागादिकान्बहिः ॥ अनुरागो विसंवादो विजयो वल्लभो मदः ॥ हर्षो बलश्च तेजश्च यजेल्लोकेश्वरान्बहिः ॥ तदायुधानि तद्बाह्ये पूजयेद्वं-
दनादिभिः । एवं संपूजयेल्लक्ष्मीं यो मर्त्यो विधिनामुना । तत्रास्ति नित्यं महालक्ष्मीर्वर्द्धते नजहाति तं ॥ अथ प्रयोगः ॥ तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलमंत्रेण प्राणायामत्र-
यं कृत्वा शिरसि दक्षप्रजापतये ऋषये नमः मुखे गायत्री छंदसे· हृदये श्रीमहालक्ष्मीदेवतायै· इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा ॐ श्रीं ह्रीं श्रीं कमले ॐ ह्रीं श्रीं हृदयाय·
ॐ ह्रीं श्रीं कमलालये ॐ ह्रीं श्रीं शि· ॐ ह्रीं श्रीं प्रसीद ॐ ह्रीं श्रीं शिखा· ॐ ह्रीं श्रीं प्रसीद ॐ ह्रीं श्रीं कवचा· ॐ ह्रीं श्रीं महालक्ष्म्यै ॐ ह्रीं श्रीं अस्त्राय फट् इति पंचांगमंत्रान्
मूलमंत्राभिन्नद्वयांगुष्ठादिकनिष्ठांतास्वंगुलीषु विन्यस्य नेत्रवर्जं हृदयादिषु न्यसेत् । ततो ध्यानमानसपूजांते षट्दलकमलं च यंत्रं चतुर्द्वारं स्फुरद्वज्रं रस्त्रत्रयान्वितं तत्पूजा-
वरकमुधा स्थाप्य स्थापनाद्यंगपूजांतं तत्र षट्दलेषु ॐ श्रीधराय· हृषीकेशाय· वैकुंठाय· विश्वरूपाय· वासुदेवाय· संकर्षणाय· प्रद्युम्नाय· अनिरुद्धाय· इति संपूज्य दैष्या-
दिग्दक्षिणव्यत्र संपूज्य द्वितीयषट्दलेषु दिक्पत्रेषु भारत्यै· पार्वत्यै· शच्यै· आग्नेयादिषु पत्रेषु· दमकाय· सलिलाय· गुग्गुलवे· कुरंटकाय· इति संपूज्य ततो तृतीयषट्दले
अनुरागाय· विसंवादाय· विजयाय· वल्लभाय· मदाय· हर्षाय· बलाय· तेजसे· इति संपूज्य प्राग्वद्दिग्गीशान् दिशेश्वं समापयेदिति ॥ दक्षिणामूर्तिसंहितायां ॥ अंगैः प्रथमा-
वरणं भारत्यादिवतस्रभिः श्रीधरादिभिस्तु द्वितीया अनुरागादिभिस्तृतीया । ततो लोकेशास्तदस्त्रैरिति पंचावरणमुक्तं ॥ दक्षिणामूर्तिः ॥ लक्षं जपेत्फले बिल्वैर्हु- श्री ३२९
कुर्यान्मधुरोक्षितैः ॥ दशांशं संस्कृते वह्नौ प्राक्प्रोक्तेनैव वर्त्मना । एवं जपः कृतपुरापरः एवं सिद्धमनुर्मंत्री साधयेदिष्टमात्मनः ॥ वंदनाक्तैः सरसिजैः लक्षं प्रजुहुया-
त्सुधीः ॥ लभते नृपतिर्वैरिणां राज्यं समरं विना । महालक्ष्मीमंत्रं चैव जपेत् परां प्रसभां व्रजेत् ॥ तथा समान्यते नित्यं नात्र कार्या विचारणा ॥ सहदेवीरमा हृद्वा कांता भद्रा मधुव्रता ॥ ५
शक्रवल्ली कांजलिनी मुशली हरिवंदनं । घनसारं वंदनं च कक्कोलं रोचनं वरं ॥ कामापूरके सरोसर्वं पिष्ट्वा सम्यक् हरिद्रया ॥ सजप्तं मनुना सम्यगष्टोत्तरसहस्रतः ॥ अनेन

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ पद्मप्रभं पद्मसुंदरीपद्मर्षे स्वाहा

तिलकं कुर्यात्सर्ववश्यं भवेद्ध्रुवं । रमा श्री लता क्रांता अपराजिता हरिचंदनं रक्तचंदनं हरिर्जा कपिले त्रिधितिकोशातः घनसारः कर्पूरः रुकुकुष्ठ । सारसंग्रहे श्रीं
एवं शुद्धवासांते सेह ह्रदेतेम हापद्मा ३ । तन्त्री ह्न्न मनुप्रोक्तश्चतुर्दशभिरक्षरैः शुद्धवासस्वरूपे से स्वरूपे ह्न नमः महा स्वरूपे ३ । ता श्रीः श्रियै ह्न नमः मनोः पदे
श्रपं वांग पूर्वं वस्मान पूजनं । जपस्त्रिलक्षमतस्य पद्मैर्होमो दशांशतः पूर्ववन्महालक्ष्मीवत् । जपः कलियुगपरः तेन कृष्णादिकमपि तन्त्रोक्तं ज्ञेयं । तथा यो तो
मोतभयप्रोक्ता श्रियै श्री नमः इत्यपि यो तो मोतभयस्वरूपे श्रियै श्री नमः इत्यपि स्वरूपे एकादशार्णो मंत्रो यं जमदग्निर्मुनिर्मतः त्रिष्टुप् छंदः रमादेवी देवता परिकी
र्तिता । आद्यपंचमंत्रवर्णैश्च हृदंते ह त्रांगुष्ठांतकैः शिरः शिखावषट् भयो हृत्रोंते कवचं मतं । श्रियै नेत्रं । श्री नमोस्त्रं विदध्यात् ध्यानमुक्तं तत्र ध्यानमिलुपलक्षणं
स्नानादिकमपि तथा ज्ञेयं ॥ अथ प्रयोगः ॥ प्राग्वच्छ्रीपीठन्यासांते मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि जमदग्नये ऋषये नमः मुखे त्रिष्टुप् छंदसे । हृदि श्री महालक्ष्म्यै
देवतायै । इति विन्यस्य प्राग्वद्युक्ति नियोग मुक्तो यो तो मोतभये नमः हृदयाय । यो तो मोतभये स्वाहा शिरसे । यो तो मोतभये वषट् शिखायै । यो तो मोतभये हुं कवचाय
श्रियै नेत्रत्रयाय वौषट् । श्री नमः अस्त्राय फट् । इति षडंगमंत्रान्प्राग्वत्करयो हृदयादिषु च विन्यस्य परां महालक्ष्मीवत्सर्वं कुर्यात् । तथा । नित्यं द्वादशसाहस्रं सं
वत्सरं मनुं जपेत् । तेन सिद्धो भवेन्मंत्रः साधकस्य न संशयः । अत्र होमो नोक्तः तथापि पूर्वोक्तमंत्रहोमवद्द्वेजपदशांशतो होमः कार्य इति सांप्रदायिकाः । तथा । लक्ष्मी
सुवर्णांबुकरां ध्यात्वा मंत्रमिमं जपेत् । अष्टोत्तरसहस्रं च वसलभेद्धं श्रियं । जपं नष्टशतं वश्यं तिलकाद्दर्शयेद्ध्रुवं । मासत्रये तथा जप्त्वा ग्रामं मंत्री समाप्नुयात् । वा
तथा पद्मप्रभं पद्मसुंदरीति पदद्वंद्वेत् । पद्मर्षेऽग्निवधूमंत्रश्चतुर्दशभिरक्षरैः । मंत्रो ह्न्रारः सुमनः पदश्चतुर्थैः सर्वेणपंचांगेगदितं मनोः । जपपूजादिकं सर्वं अस्य पू
र्ववदाचरेत् । पूर्वपदेकाक्षरा पूर्ववत् । इयं सिद्धा महाविद्या भक्तानां कल्पवल्लिका । एते मंत्राः पुरश्चरणमपि तन्त्रोक्तमेव ॥ अथ शक्तिलक्ष्मीमंत्रः ॥ स तु वक्ष्यमाण त्रिपु
रामंत्र एव यत्तन्नविधिरपि तन्त्रोक्त एव च मे वक्ष्ये यः श्री दक्षिणामूर्त्तिसंहितायां । अथ वक्ष्ये महादेवि सर्वसाम्राज्यदेवतां । यस्या आराधनाद्विष्णुर्भवल्लक्ष्मीपतिः स्वयं
ऐंद्रेणमादनं क्षोभशो वह्नि दीर्घाक्षिमंडितः । विंदु क्रूरेश्वरी पुत्रे विद्येयं वेद्यवीप्रियाः श्री वीजं संपुटं कुर्यात् सर्वसाम्राज्यदायिनी । वं दः सोमदनं ककारः क्ष्मा लकारः ईशो
हकारः वह्निः रेफः दीर्घाक्षी ईकारः विंदुशब्देन नादो गृह्यते । जनकजनं न्ययोस्तयोरभेदात् । नादौ वेदार्जनकजन्यत्वा शारदातिलके । आसीच्छक्तिस्तथा

© Dharmartha Trust J&K. Digitized by eGangotri

नादोनादष्टह्रिंदुरसमुद्भवं हृति। अक्रूरेभ्यो द्विंदुः एतेन मायोध्द्रता। तथा। ऋषिर्हरिस्तथा छंदोऽनायत्री वास्य संमता। देवता मोहिनी लक्ष्मीः सर्वसाम्राज्यदायिनी। बी
जं कूटं समाख्यातं शक्तिः श्री बीजमुच्यते। षड्भिः कूटस्वरैर्भिन्नैः षडंगानि प्रविन्यसेत्। आसीपुष्पसंकाशां रत्नभूषणभूषितां। शंखचक्रगदापद्मशार्ङ्गबाणाघ
तां करैः। षड्भिः कराभ्यां देवेशि वरदाभयशोभितां। ध्यायेदिति शेषः। ग्रामाघूर्णेयो राघोतदग्धः षस्को यारितरं इत्यायुध ध्यानं। तथा। यंत्रो द्धारं भणुप्रियं यंत्रं कोणं
वाष्टपत्रं च भूबिंबं ततो लिखेत्। चतुर्द्वारोपशोभाढ्यं यंत्रमेतत्समालिखेत्। अस्मिन् समावाह्य देवी पूजयेत् कुर्पचारकैः। पूर्ववत्परमेशानि षडंगावरणं यजेत्। गायत्री
चैव सावित्री स्वर स्वत्य ग्रकागतः क्रमेण पूजयेन्मंत्री ब्राह्म्याद्याश्च स्वरैः पृथक्। अष्टपत्रेषु भूबिंबे वैंकाद्यारणं पूर्ववज्जपेत्। अष्टादश महाकोटीयोगिनीभ्यो नमो लिखे
त्। अनेन मनुना यश्चादिं द्वादी पूजयेत्ततः। पुनर्देवीं समभ्यर्च्य गंधपुष्पाक्षतादिभिः। वटुकक्षेत्रपालेभ्यो योगिनीभ्यो बलिं हरेत्। अत्र वटुकक्षेत्रपालेभ्य इति वटुकवचनं
गणेशस्यापि ग्रहणार्थं तेन वटुकक्षेत्रपालगणेशेभ्य इत्यर्थः॥ अथ प्रयोगः॥ तत्र प्रातः कृत्यादि [illegible] योगपीठन्यासांतं मूलेन प्राणायामत्रयं कृत्वा शिरसि हरये ऋषये
नमः मुखे गायत्री छंदसे। हृदये श्री सर्वसाम्राज्यलक्ष्म्यै देवतायै नमः। गुह्ये सकल ऐं बीजाय नमः पादयोः श्रीं शक्तये नमः इति विन्यस्य ममेत्यादि प्राग्वदिति योगा
मुक्त्वा स्क्लां हृदयाय नमः स्क्लीं शिरसे स्वाहा। स्क्लूं शिखायै वषट्। स्क्लैं कवचाय हुं। स्क्लौं नेत्रत्रयाय वौषट्। स्क्लः अस्त्राय फट् इति षडंगमंत्रैः प्राग्वत्करषडंगन्या
सं कृत्वा ध्यानाद्यात्मपूजांते प्रागुक्त लक्ष्मीपीठमभ्यर्च्यावाहनादिपुष्पोपचारांतं प्राग्वदंगानि संपूज्य त्रिकोणाग्न्यादिप्रादक्षिण्येन ॐ गायत्र्यै नमः ॐ सावित्र्यै नमः
ॐ सरस्वत्यै नमः इति संपूज्य अष्टदले पु प्राग्वत्ब्राह्म्याद्याः संपूज्य चतुरस्रे अष्टादश कोटिमहायोगिनीभ्यो नम इति देवी परितः संपूज्य लोकेशाद्यावरणं प्राग्वत्स
माप्य बल्यादि॥ तथा। एवमष्ट भुजां ध्यात्वा त्रिलक्षं प्रजपेत्सुधीः। तद्दशांशेन पद्मैस्तु हुने त्साम्राज्यसिद्धये। जितेंद्रियः सविधिवदिति॥ विधिवदित्यनेन तर्पणादि
ब्राह्मणभोजनांतं कर्तव्यमित्युक्तं। तथा सारसंग्रहे॥ हृदयं पञ्चतनयासंयुक्तो रमामनुः सप्तार्णमिति तस्यास्य षडंगान्यमुनैव हि। नमः हृत्पञ्चतनयशिरः नमः
शिखापञ्चतनयेकवचं। नमो नेत्रायपञ्चतनय अस्त्रं ध्यानपूजादिकं तावदि पूर्ववच्चास्य कीर्तितं पूर्वदेकाक्षरोक्तवत्। तथा। रमामंत्रेषु यो मंत्रः श्रीसूक्तेसज्जपेत्सु
धीः॥ विधानं वक्ष्यते सम्यक् पंचदशकस्य हि। हिरण्यवर्णामित्यस्याः ऋचो लक्ष्मीर्मुनिर्मतः। छंदोऽनुष्टुप्समाख्यातमन्यासां मुनयः क्रमात्। आनंदकर्दमश्रीलो
तश्रीपुत्राश्च मीमताः। तां म आवहजातांश्च पूर्वाभित्यनयोर्मतः। छंदोऽनुष्टुप् वकांसोस्मितामस्या वृहती मता। चंद्रां प्रभामादित्यवर्णे अनयोस्त्रिष्टुबीरिता। उपैतु मां क्षु

श्री
३२९

© Dharmartha Trust J&K. Digitized by eGangotri

त्पिपासांगं धह्वरां दुरेति वा । मनसः कर्दमेनाथः सुक्तं आर्द्रां च सप्तमी । आर्द्रां पुष्करिणीमासामष्टमीं च प्रकीर्तितं । छंदोनुष्टुप् तां म आवह इत्यस्य प्रकीर्तितं । प्रस्ता
र पंक्तिः सर्वासां देवतं श्रीर्विभावसु । मूर्द्ध्नि क्षिकं च नासाकालदेहे स्मितामिषु । गुह्ये पादयुगे जानुजंघापसुन्यसेद् बुधः । हिरण्मयी च चंद्रा वत्स तीया रजतस्र
जा हिरण्या चा स्रजालं स्या हिरण्या च तथापरा । हिरण्यवर्णा चैताभिः कुर्याद् दंगानि षट् क्रमात् । एताभिश्चतुर्थी नमोंताभिः एताभिर्ङे नमोंताभिरंगकल्पनमी
रितमिति । मंत्रतंत्रप्रकाशवचनात् । संरक्तो च तुरस्रिजतनःपुंड्रवर्णाकरा कैरिपद्मा मीतिकमलयुगलं धारयंतीमनो ज्ञा सम्प क्रोडरत्नप्रचरत्नलिंगसंस्थि
ताचारुभूषा भूयाद्दुसैपु मनजननी श्रीरियं रत्नमौलिः ॥ एकाक्षरोक्त रूवदायुध ध्यानं ॥ यजेद् द्वीपुरस्प्रोक्ते पीठ आवाह्य मंत्रवित् । यजेदंगानि पद्माद्या लोकपा
लोः सह तयं । ... वाहनं वासनं स्याद्र्घपाद्याचमनानि वा । चश्रीरे ... सी नमः । ततः पूर्वं यदा च मंनीयां । ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं स
र्भूतानां) आवाहनं वासनं स्यादर्घपाद्याचमनानि वा । मधुपर्को विधे रोच वस्त्रालंकारवंदनं पुष्पं धूपं दीपभोज्यम्योद्वासनमथापि वा एतत्तनि मंत्रविल्कुर्याद्
क्रपंच दशाकेनहि । पद्माद्याय पद्मवर्णाय ... स्थाज्ञातुरायकां तर्पयंती मसल्पान्या ज्वलंती सप्तमी मता । स्वर्णप्राकारसंलय मष्टमी समुदाहृता । अथ प्रयोगो
प्राग्वद्योगपीठन्यासो ते ग्रपणे नश्रीबीजेनवाया प्राणायाममनयं रुलाशिरसि आनंदकर्दमचिक्लीतश्रीपुत्रेभ्यो ऋषिभ्यो नमः मुखे अनुष्टुप् बृहती त्रिष्टुप्छंद
पुष्पप्रस्तारपंक्तिभ्यो छंदोभ्यो नमः हृदि श्रीविभावसुभ्यां देवताभ्यां नमः इतिविन्यस्य प्राग्वद्विनियोगमुक्त्वा हिरण्मयै नमः हृदयाय नमः चंद्रायै नमः शिरसे स्वा
हा । रजतस्रजायै नमः शिखायै वषट् । हिरण्यस्रजायै कवचाय नमः हिरण्यायै नमः नेत्रत्रयाय वौषट् । हिरण्यवर्णायै नमः अस्त्राय फट् । इति षडंगमंत्रा
नेगुष्ठादितलांते करयोर्हृदयादिपादांतं गेषु पृष्ठि न्यस्य शिरसि हिरण्यवर्णामित्यादि नमः नेत्रयोः तां म आवहेति कर्णयोः अश्वपूर्वामिति नासायां
कांसोस्मितामिति मुखे । चंद्रामिति गले । आदित्यवर्णे इति बाह्वोः । उपैतु मामिति हृदि । क्षुत्पिपासेति नाभौ । गंधद्वारामिति गुह्ये । मनसः कामिति पादौ कर्दमेन
ति ऊर्वोः । आपः सृजंतु इति जान्वोः । आर्द्रामिति जंघयोः । आर्द्रामिति पादयोः । तां म आवह इत्यादि एवमेताः रूवः प्रणवादि नमोतानि न्यस्य ध्यानमात्र संपूज्य तं वर्तुर्दस्यु
ते चतुरस्रं त्रयावृत्तं अष्टदलं कमलं पूजाचक्रं । निर्माय प्राग्वत्स्वरतो त्रिधा यार्घ्यस्थापनादि पीठावेनांते । ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां चंद्रां हि
रण्मयीं लक्ष्मीं जातवेदो म आवह १ इत्यावाहयामि दावाहनी मुद्रया चावाहनादि परमीकरणांतं तन्मुद्रया विधाय । ॐ तां म आवह जातवेदो लक्ष्मीमन

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव ३३०

330

पद्मामिनीं। यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं २ श्रीरेवते आसनं नमः ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीं। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां ३ श्रीरे
वते पाद्यं स्वाहा। कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं ४ श्रीरेवते पाद्यं नमः ॐ चंद्रां प्रभासां यशसा ज्वलं
तीं श्रियं लोके देवजुष्टामुदारां। तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ५ श्रीरेवते आचमनीयं सुधां नमः पूर्ववदाचमनीयं। ॐ उपैतु मां देवसखः
कीर्तिश्च मणिना सह। ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः। तस्य फलानि तपसा नुदंतु मायान्तरायाश्च बाह्या अलक्ष्मीः ६ श्रीरेवते मधुपर्कं
सुधा। ततः पूर्ववदाचमनीयं। ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ७ श्रीरेवते स्नानं नमः। क्षुत्पिपासामलां ज्येष्ठामल
क्ष्मीं नाशयाम्यहं। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ८ श्रीरेवते वाससी नमः ततः पूर्ववदाचमनीयं। ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभू
तानां तामिहोपह्वये श्रियं ९ श्रीरेवते भूषणानि नमः ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः १० श्रीरेवते गंधो न
मः। कर्दमेन प्रजा भूता मयि संभव कर्दम। श्रियं वासय मे गृहे मातरं पद्ममालिनीं ११ श्रीरेवते पुष्पं वौषट्। इति पुष्पांतानुपचारानुपचर्य पूर्ववदंगानि संपूज्याष्टदले स्थाप्य
दिशा दक्षिणेन। ॐ पद्मसनायै ॐ पद्मवर्णायै ॐ पद्मस्थायै आर्द्रायै ॐ तर्पयंत्यै ॐ तृप्तायै ॐ ज्वलंत्यै ॐ स्वर्णप्राकारायै इति संपूज्य आगच्छन्तु कोकपास्तदा सुधान्वित
संपूज्य ॐ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले १२ श्रीरेवते धूपो नमः ॐ आर्द्रां पुष्करिणीं यष्टिं सुवर्णां हेममालिनीं। चंद्रां हिर
ण्मयीं लक्ष्मीं जातवेदो ममावह १३ श्रीरेवते दीपो यं नमः ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं। चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह १४ श्रीरेवते नैवेद्यं नमः।
ततः पुनराचमनादिकं दत्वा तांबूलादि सर्वं प्राक्पूजाप्रकारेण कृत्वा ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीं। यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान् वि
देयं पुरुषानहं १५ श्रीक्षमस्वेति विसर्जयेत् प्राग्वत् कृत्वा समापयेदिति। अत्र सर्वपूजावारेषु आगतजोपकरणे कृपाकारण्ये प्रयत्नः कर्तव्यस्तत्रतत्र तत्सर्वं
कुर्यात्। तथा प्रारंभपक्षे प्रतिपदमारभ्य एकादशी भवेत्। तावद्वादशसाहस्रं जपं निश्चलमानसः ब्रह्मचर्यरतः शुद्धवस्त्रदंतादिकः सुधाः पद्मे स्थिम पुरोपि ने
र्वा तेन पयोधसा श्रीः समिद्भिः सर्पिषा च पद्मस्य च त्रिशतं हुनेत्। द्वादश्यां द्वादशैव वा च विप्रान् संभोजयेत्। तेन हि सिद्धो भवेन्मंत्रो नात्र कार्या विचारणा। अत्र द्वाद श्री
शसाहस्रे कर्त्तव्ये तु मूलेन संप्रदायः। एकादशभिर्दिनैः सकृत्स्य द्वादशसाहस्रात् तेन संभवो दशकालात् तदा लेकादशभिर्दिनैः रघुशतावृत्तिः सकृत्स्य कार्या ३३०

© Dharmartha Trust J&K. Digitized by eGangotri

तत्राष्टदिनपर्यंतं प्रत्यहं त्रिसप्तत्यावृत्तिः सूक्तस्य कार्या। अनंतरदिनत्रये द्वासप्तत्यावृत्तिः प्रत्यहं कार्या तेन द्वादशसाहस्रं ऋग्जपमावृत्तिर्भवतीति श्री
सप्तर्षिभिर्विल्वसमिद्भिः तथा। कुंभेंदारकुमुदमालतीपद्मकेतरैः नंद्यावर्तकुंदजातीकल्हारचंपकैस्तथा। रक्तोत्पलादिपुष्पाणि लक्ष्म्याः श्रीतिप्रियाणि हि। स्नानका
ले वस्त्रैर्नैः सूक्तैरभिषिंचेत्त्रिभिः सुधीः। यावज्जपेद्धि मुख्यस्तर्पयेत्तावदेव तु। पूर्वोक्तविधिना सम्यक्पूजयेत्परमेश्वरीं। त्रिवारं प्रत्यहं मंत्री जुहुयाद्वा यथाविधिः। एवमा
संयः करोत्येवं साक्षाल्लक्ष्मीपतिः स्वयं। विकचन्मात्रएवाकुं नवनीतं प्रविश्य सेत्। मध्ये सकेसरे पद्मे सम्यक्पत्रांतराले के। सुसामिंद्रनले तद्य समुद्धत्य क्रमेण सुधीः। अभ्य
र्चोत्तरशतं जपश्चाभ्रगुणाक्षरे। चत्वारिंशाक्षरस्यास्य महालक्ष्मीस्वंचलां तुरीयकां चतुः कुर्यात् घृतेनैकादशाकृतिः। एवं कुर्वीत एवास्य चलमासात्स्यान्महं दिनः प्रधान
तर्पणं तेन संतर्प्य श्रीकृष्यस्तिमाः प्रणवाद्यहं दं तां च श्रीलक्ष्मीवरदायकां। विष्णुपत्नीं च वसुदां रूपां स्यां स्वाहि हिरण्यतः। स्वर्णमालिन्यपि परावेत नारं जतरजः सुवर्ण
घगृहस्वर्णप्राकारां पद्मवासिनी पद्महस्ते प्रिये मुक्तालंकारा सूर्यकां परां। वंद्यां विश्वप्रिये श्वर्यो मुक्तिश्चापि प्रभक्तियुक्। विभुवद्धि समद्धिश्च तुष्टिः पुष्टिर्धनाग्रदा। भुव
नेशी चक्षुः स्यात्तुर्यांगिनी भोगदा मता। धात्री विधात्री द्वात्रिंशच्छक्तयः समुदीरिताः। द्वात्रिंशद्भिश्च पूजांते मंत्री मंत्रैर्बलिं हरेत्। मंत्रेनामममंत्रेः श्रीरषले बलिं नेमः इत्यादि
भिः श्रीमत्रजापिनो के विदुः पर्वते नियमा इहा तिलान्यश्चनाम्नीयान्नमसो येन संविसुलेत्। अभुविर्नस्वपेत्काष्ठे पिहाभ्यां स्यादशुचिर्भवेत्। जवर्णं तिलसंभूतं नाश्नीयान्नमसो
यत्संविहितं। केवलं सुधीः। लिपेद्दुरिज्जांच्छलेनात्त नं तं प्रवदेत्कवित्। कदाचिन्मलिनो न स्यात् कुर्वन् नैवाल्लिखे द्वृथा। श्रीफलं वृक्षसंभवं न मूर्ध्नि धारयेत्। तथा वति
मेलावारः शुक्लः शुक्लमाल्याभवेत्। शुक्लमाल्यानुलेपश्च शुक्लाभरणभूषितः। श्वेतवस्त्रापरीधानः शुद्धदेहस्थलं कृतः। उत्कृष्टां धानुलेपः शुद्धदंतश्च सन्नरत्नः। विष्णुभक्तेश्च
विमलः रमयशायामवेत्सु धीः। निंदितान्वयसंभूतां दुष्टां च कलहप्रियां। दुष्टयोनिमनिष्टां च रोगग्रहनिवेचितां। अन्यासक्तामसक्तां च कर्शांगीं मुखदहनं तनुः। नातिक्रसांस
दीर्घां च विरम्यां भोगलोलुपां। अन्यपुरुषलोलां च काकाक्षीं राजयोषितां। रजस्वलामकचारां योषितं न स्पृशेदपि। शांतः शुचिस्मितो वाग्मी मधुरालापवान्भवेत्। त्रिणीश्चमतरः
स्त्रीयदारलुब्धो न्यमभाषणं। एतादृशोऽस्य नियमैर्युक्तो लक्ष्मीं लभेत सद्य। द्यार्द्रवित्त आचार्यदेवतिथ्यर्चनारतः। गुरुर्विप्रपूजानिरतः पुण्यशीलो दृढव्रतः। नित्यस्नायीपाठी माधा
मुरवाशीशीलवान् भवेत्। तां वर्णोऽश्रमतरः स्त्रीयदारलुब्धो न्यभाषणं। एतादृशोऽस्य नियमैर्युक्तो लक्ष्मीं लभेत सः। नारायणीये। नाग्निचेत्ता क्रमेण जपांत द्विजं न च भक्षयेत् तत
स्यात् मलिष्ठो न लिंद्याद्भिलं भमोशयीशनग्नः ल वणामलकेवर्जं नागादि त्यतिथौ क्रमात्। नागादि तृतीया पंचमीसप्तम्यां। पंचम्यां च मुत्तरे स्त्रीवर्ज्यो प्रत्यक्षु रवोशन्नो। विल्वैर्न
माजं यदंतानृद्धि सेव्यं ब्राणमेकतान्न। प्रातर्भक्षास्तिलास्ते च धार्या लक्ष्मीं न भक्षयेत्। प्रायेण सर्वान्नमुत्तरे मधुरान्नधकः। पायसं विल्ववीजं च भक्षयेत् क्षुद्रूपं वेणिषु की

© Dharmartha Trust J&K. Digitized by eGangotri

पर्वतीति पूर्णिमायां॥ शारदातिलके॥ आयीतस्तु द्वयं ध्यायां तरुण्या सहना यथा। मलिनो न भवेत्तातु कुत्सितान्नं न भक्षयेत्॥ द्रोणपंकजविल्वानि पद्मांजनानुन
लेपयेत्॥ सहदेवीमिंद्रवल्लीं श्रीदेवीं विष्णुवल्लभां। कन्यां जंबूजवालं च धारयेन्मूर्ध्नि सर्वदा॥ आद्देवी श्रीललिता विष्णुवल्लभा अपराजिताः। कन्याकुमारी प्रयो
गसारे॥ यान्यथोक्तं कृत्वा शतनराणां नमस्य पद्मपरिनाथ तुर्वंशां। तोत्तरापरशिरान व नग्नो नाद्रूपाणि शरणः श्रियमिच्छन्॥ यंत्रसारे॥ श्रीवीजं साध्यसंयुक्तं क
र्णिकायां विलिख्य च स्वादिलकाष्टसंख्यपत्रेष्वपि यथाक्रमं। श्रीसूक्तस्याष्टौ मंत्रमक्षरमालिख्य तद्बहिः॥ यः शुचिः प्रयतो भूत्वेत्त्यामा तकयापि वा। सर्वे स्वर्व
धरादिव कोणेषु श्रियमालिखेत्॥ श्रीसूक्ते यंत्रमेतत्तु धारयेद्योपयथा विधिः। पुत्रारोग्य धरा धान्य धन गोशस्यशालिनी॥ लक्ष्मीति व कुलाल क्ष्मीजी वेश्मश
रदां शतं॥ इदमेव तामत्रपट्टे विलिख्य जलाच सिक्तं संतपातं। संस्थाप्यं गणानाम्मो लक्ष्मीमावाह्य साधु संपूज्य भूयः परिवारयुतां बलिं हरेत्॥ भजन्वलिं समीकृत्य यस्मिन्नाराधि
यते॥ वद्धतेतवसंपच्चेति संपुत्रैर्दारैरिष्टैर्विभवैर्भैर्सैश्व धान्यैश्वानागै रथैसुरंगैर्वचभैर्गोभिश्च सरस्या याहीनैः॥ रमयंतीजिहेसर्वं न्विहरत्वा भजनसंस्वलक्ष्मीः॥
अस्यार्थः॥ अष्टदलकमले कृत्वा तत्कर्णिकायां श्रीवीजं साध्यसहितं विलिख्याष्टदलेषु हिरण्यवर्णामित्यादिरभ्यतामिहाव इत्येक श्रियमित्यंतमष्टचामर्द्धमर्द्धमालि
ख्य तद्बहिः षोडशदलकमलं कृत्वा तद्दलेषु स्वाग्रादि प्रादक्षिण्येन चंद्रां प्रभासामित्यारभ्य मयि श्रीः श्रयतां यशाइत्यंतमवाम द्वैमर्द्धमालिख्य तद्बहिर्वृत्तत्रयं कृत्वा
ध्यंतरवीथ्या यः शुचिः प्रयतो भूत्वा जुहुयाद्द्व्यमन्वहं। श्रियः पंचदशर्चं च श्रीकामः सततं जपेत्॥ इत्यचासवेष्ट्य वहिर्वीथ्यां मातृकाया संवेष्ट्य तद्बहिश्चतुरस्रे वि
लिख्य तत्कोणेषु श्रीवीजमालिखेत्। एतद्यंत्रमुक्तफलं दं भवति॥ अथाश्विन नवरात्रे वैदेकप्रकारेण महालक्ष्मीपूजनं वक्ष्यते॥ तत्रादौ लेखुकर्त्तेऽत्था यश्रीगुरु
स्मरण कुंडलिनी ध्यानाजपासंकल्प शौचदंतधावनस्नानमंत्रस्नान तिलकधारणवैदिकसंध्यामंत्रसंध्यासूर्यार्घ्यदेवर्षिपितृतर्पणानि विधाय स्वासने समुप
विश्य भूतशुद्धि दीपनाथ वंदनविघ्नोत्सारणकरशुद्धि दिग्बंधनाग्निप्राकारत्रयशांतिपाठ भूतशुद्धि प्राणप्रतिष्ठामातृकान्यासादि योगपीठन्यासांतं वि
यमूलेन प्राणायामत्रयं कृत्वा गणपतिकुलदेवताभ्यां ललाटादीन्नमस्कृत्य ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः। लंबोदरश्च विकटो विघ्ननाशो गणा
धिपः॥ धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्त
स्य न जायते॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये॥ अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नच्छिदे

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मै गणाधिपतये नमः। यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम। अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभि
युक्तानां योगक्षेमं वहाम्यहं। स्मृते सकलकल्याणभाजनं यत्र जायते। पुरुषस्तमजं नित्यं व्रजामि शरणं हरिं। सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवा
न्मंगलायतनं हरिः। तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि। इति मंगलं कृत्वा। अद्याश्विने मासि चैत्रे वा अमु
कगोत्रोऽमुकदेवशर्माहं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतिपूर्वकं दुरितनिवारणक्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्धिकामः प्रतिपदारभ्य नवमीपर्यन्तमिष्ट
देवताः स्वरूपिण्याः श्रीमहालक्ष्म्याः षोडशोपचारपूजां श्रीसप्तशतीचंडीपाठं तद्दशांशहोमं च करिष्ये इति संकल्प्य निर्विघ्नार्थं गणपतिपूजनं करिष्ये। ततः रक्ताक्षतादिभिः
रष्टदलकमलं पीठे विरच्य तत्र ॐ भूर्भुवः स्वः महागणपतये सिद्धिबुद्धिसहिताय सवाहनाय सायुधाय सपरिवाराय इहागच्छ हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिप
ते त्र्यक्ष लक्षलाभपितः पितः। नागास्य नागहार त्वं गणराज चतुर्भुज। भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः। आवाहये त्वां पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य
गृहाण त्वं पूजां कर्तुं च रक्ष मे। आवाहयेद्गणेशानं पूजाद्रव्यैः प्रपूजयेत्। ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं ह
वामहे। वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधं। ॐ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्व
न्नूतिभिः सीद सादनं। इति मंत्रेण आवाहनं स्वागतं पाद्यमर्घ्यं आचमनीयं मधुपर्कं पुनराचमनीयं स्नानं वस्त्रं आभरणं तिलकं गंधं पुष्पं धूपं दीपं नैवेद्यं ताम्बूलं
दक्षिणां नमस्कारान् समर्प्य हस्तद्वयेन नारिकेलादिकं अर्घ्यपात्रस्थं सपुष्पं गृहीत्वा प्रार्थयेत्। रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता त्राता
भव भवार्णवात्। द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो। वरदस्त्वं वरं देहि वांछितं वांछितार्थद। अनेन सफलार्घ्येण सफलोस्तु सदा मम। इति फलं दत्वा प्रार्थयेत्। विघ्नेश्वराय
वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय। नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते। भक्तार्तिनाशनपराय गणेश्वराय सर्वे
श्वराय शुभदाय सुरेश्वराय। विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते। नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। विश्वरूपस्वरूपाय नमस्ते ब्र
ह्मचारिणे। भक्तप्रियाय देवाय नमस्तुभ्यं विनायक। इति नमस्कृत्वा। त्वं विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुखदेति फलप्रदेति। विद्याप्रदेत्यघहरेति च ये स्तुवं
ति तेभ्यो गणेश वरदो भव नित्यमेव। इति सम्यक् प्रार्थ्य ऋत्विग्वरणं कृत्वा यवान् वापयित्वा तन्मध्ये कलशस्थापनं कुर्यात्। तद्यथा। ॐ मही द्यौः पृथिवी च न इमं यज्ञं मि
मिक्षतां। पिपृतां नो भरीमभिः। इति भूमिं स्पृष्ट्वा ॐ स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। इति भूमिं प्रार्थ्य। मन्त्रेणैकेन हर मे पापं इति मन्त्रेणौ

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णे
३३२
332

क्षिप्त्वा ॐ ओषधयः संवदंते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि। यवान्क्षिप्त्वा ॐ आजिघ्र कलशं मह्या त्वा विशंत्विंदवः। पुनरूर्जा निव
र्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती। पुनर्मा विशताद्रयिः। इति तत्र कलशं निधाय ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसदन्य
सि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद। इति जलेन पूरयित्वा ॐ या ॐ ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं शतं धामानि सप्त
च। इति सर्वौषधीः स्थापयित्वा ॐ स्योना पृथिवीति पंचमृत्तिकाः निक्षिप्य। ॐ ओषधयः संवदंते इति यवान्निक्षिप्य। कांडात्कांडात्प्ररोहंती परुषः परुषस्परि। ए
वा नो दूर्वे प्रतनु सहस्रेण शतेन च। इति दूर्वां निक्षिप्य। ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषं। इति पंचपल्लवान्निक्षि
प्य। याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचत्वंहसः। इति फलं क्षिप्त्वा ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्ना
नि दाशुषे। इति पंचरत्नानि। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। इति हिरण्यं। युवा
सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः। तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः। इति रक्तवस्त्रेण सूत्रेण वेष्टयेत्। गंधद्वारां दुराधर्षां
नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं। इति गंधं। ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो। इति धान्य
पूर्णमुपरि पात्रं विन्यस्य तदुपरि नारिकेरफलं स्थापयित्वा ॐ तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंस मा न आ
युः प्रमोषीः। इति मंत्रेण वरुणमावाहनं कृत्वा तेन मंत्रेण षोडशोपचारैः पूजयेत्। ततः ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन मे देव तीर्थं देहि दि
वाकर। इति अंकुशमुद्रया रविमंडलात्तीर्थान्याकृष्य ॐ गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधु कावेरि जलेऽस्मिन्संनिधिं कुरु। सर्वे समुद्राः सरितस्तीर्थानि
जलदा नदाः। आयांतु लक्ष्मीपूजार्थं दुरितक्षयकारकाः। इत्यावाह्य चंदनाक्षतपुष्पमालादिभिः कलशमलंकृत्य ॐ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः। श्री
इति कलशमभिमंत्र्य ॐ देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुंभ विधृतो विष्णुना स्वयं। त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठंति भू ३३२
तानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठंति सर्वेपि [illegible]तः कामफलप्रदाः। त्वत्प्र

© Dharmartha Trust J&K. Digitized by eGangotri

सालादिमं यज्ञं कर्तुरीह जलेऽम्भवा। सान्निध्यं कुरु देवेशि प्रसन्नो भव सर्वदा। इति प्रार्थयेत्। इत्थं कलशस्थापनं विधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा अस्य श्रीसूक्त
स्य शिरसि आनंदकर्दमचिक्लीतश्रीपुत्रेभ्यो ऋषिभ्यो नमः हृदि श्री विभावसुभ्यां देवताभ्यां नमः मुखे अनुष्टुप्बृहतीत्रिष्टुब्बनुष्टुप्प्रस्तारपंक्तिभ्यो छंदोभ्यो नमः इति वि
न्यस्य मम सकुटुंबस्य क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थे विनियोगः। इति कृतांजलिरुक्त्वा हिरण्यायै नमः हृदयाय· ॐ चंद्रायै नमः शिरसे स्वाहा। ॐ रजतस्रजायै नमः शि
खायै वषट्। ॐ हिरण्यस्रजायै नमः कवचाय हुं। ॐ हिरण्मय्यै नमः नेत्रत्रयाय वौषट्। ॐ हिरण्यवर्णायै नमः अस्त्राय फट्। इति षडंगमंत्रान्नंगुष्ठादितलांतं करयोर्हृदया
दिषडंगेष्वपि न्यसेत्। शिरसि हिरण्यवर्णां। नेत्रयोः तामम आवह। कर्णयोः अश्वपूर्वां। नासिकायां कांसोस्मितां। मुखे चंद्रां। गले आदित्यवर्णे। बाह्वोः उपैतु मां। हृदि क्षुत्पिपासां।
नाभौ गंधद्वारां। गुह्ये मनसः कामां। गुदे कर्दमेन। ऊर्वोः आपस्रजंतु। जान्वोः आर्द्रां। जंघयोः आर्द्रां। पादयोः तां म आवह। इति विन्यस्य ॐ श्रीं ह्रीं श्रीं ऐं श्रीं नमः इत्येव षडंगानि विन्यस्याग्
केरीयास्व हृत्कमले देवीं ध्यायेत्॥ अरुणकमलसंस्था तद्रजःपुंजवर्णा करकमलधृतेष्टाभीतियुग्मांबुजा वा मणिमुकुटविचित्रालंकृताकल्पजालैर्भवतु भुवनमाता संततं श्रीः श्रि
येनमः इति ध्यात्वा मानसोपचारैः संपूज्य अर्घ्यादिस्थापनं तेऽत्र ॐ क्रौं ह्रीं हंसः सोऽहं स्वाहा मंत्रेणात्मपूजां विधाय पीठपूजामारभेत्। ॐ मंडूकाय· एवं कालाग्निरुद्राय· मूलप्रकृत्यै· आधार
शक्त्यै· कूर्माय· अनंताय· वराहाय· पृथिव्यै· सुधासमुद्राय· श्वेतद्वीपाय· स्वर्णपर्वताय· नंदनोद्यानाय· कल्पवृक्षवनाय· स्वर्णप्राकाराय· कनकमणितोयपरिखाय· स्वर्णमंडपाय· पूर्व
द्वारश्रियै· इंद्राय· ब्रह्मणे· सत्याय· ऋग्वेदाय· आत्मने· कालतत्त्वाय· विकृत्यै· इंद्राण्यै· वेदमात्रे· शैलपुत्र्यै· ब्रह्मचारिण्यै· चंडाय· स्कंदमात्रे· कात्यायन्यै· कालरात्र्यै· गौर्यै·
ततो दक्षिणद्वारे द्वारश्रियै· यमाय· शांत्यै· सिद्ध्यै· क्षमायै· विष्णवे· यजुर्वेदाय· रजसे· विद्यातत्त्वाय· जगन्मात्रे· मायायै· शिवायै· शांत्यै· प्रभायै· क्लींकारायै· क्लींकरायै· म
मायाशक्त्यै· वीरायै· प्रवीरायै· अंतरात्मने· दंडधराय· ततः पश्चिमद्वारे द्वारश्रियै· वरुणाय· रुद्राय· सामवेदाय· आदित्याय· वारुण्यै· शैलायुधायै· हंसवाहिन्यै· जग
ज्जीवायै· जगद्बीजायै· षोडशकलायै· पूर्णकलशाय· चित्रिण्यै· चित्रमालायै· चित्रायै· चामुंडायै· तत उत्तरद्वारे द्वारश्रियै· कपालधारिण्यै· भक्तवत्सलायै· हूंकारायै·
क्षांकारायै· विमलरूपायै· ईशानाय· पार्वत्यै· ब्रह्मणे· अथर्वणवेदाय· धात्रे· ज्योत्स्नायै· कल्याण्यै· शर्वाण्यै· चंद्रकलायै· चंद्रवदनायै· विभूत्यै· परमविभू
त्यै· भस्मधारिण्यै· पवनायै· गंगायै· भागीरथ्यै· गोदावर्यै· प्रवरायै· प्रणतायै· क्रांकारायै· क्रींकारायै· क्रौंकारायै· सर्वबीजात्मने· बीजप्रवाहिन्यै· मध्ये रत्नवेदिकायै·
रत्नसिंहासनाय· धर्माय· ज्ञानाय· वैराग्याय· ऐश्वर्याय· अधर्माय· अज्ञानाय· अवैराग्याय· अनैश्वर्याय· श्वेतछत्राय· विकृत्यै· मायाशक्त्यै· आनंदकंदाय· सच्चिन्

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव ३३३

333

लायः॥ प्रकृतिमयप्रेतेभ्यो॰ विकारमयकेसरेभ्यो॰ पंचाशद्वर्णबीजाढ्यसर्वतत्वस्वरूपायै कर्णिकायै॰ अं अर्कमंडलाय॰ मं वह्निमंडलाय॰ सं सोममंडलाय॰ सं स
त्वाय॰ रं रजसे॰ तं तमसे॰ आं आत्मने॰ अं अंतरात्मने॰ पं परमात्मने॰ ह्रीं ज्ञानात्मने॰ ओं आत्मतत्वाय॰ मायातत्वाय॰ विद्यातत्वाय॰ कलातत्वाय॰ परतत्वाय॰ इति संपूज्य
केसरेषु पूर्वादिदिक्षु मध्ये च ॐ विभूत्यै॰ उन्नत्यै॰ कांत्यै॰ हृष्ट्यै॰ कीर्त्यै॰ सन्नत्यै॰ पुष्ट्यै॰ उत्कृष्ट्यै॰ मत्यै॰ ऋद्ध्यै॰ इति संपूज्य ओं श्रीसर्वशक्तिकमलासनाय नमः इति समस्त
पीठं संपूज्य मूलमंत्रमुच्चार्य श्रीलक्ष्मीमूर्तिं परिकल्पयामि नमः इति कलशोपरि मूर्तिं परिकल्प्य घटोपरि स्वकरे लक्ष्मीदुर्गादेवी अवकाशितां स्थापयामि महादेवीं सर्वसौ
भाग्यदायिनीं। इति संस्थाप्य स्वहृत्कमले प्राग्वद्देवीं ध्यात्वा दिव्याश्लेषेनादीपाद्दीपांतरमिव वहन्नासापुटाध्वना पुष्पांजलावानीय एह्येहि देवदेवेशि परिवारसमन्विते। भाव
[illegible] महाय भवनीतस्थकारणानंदविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि। इत्यावाह्यावाहनादिदशमुद्राः प्रदर्श्य ध्यायेत्। लक्ष्मीं क्षी
रसमुद्रराजतनयां श्रीरंगधामेश्वरीं दासीभूतसमस्तदेववनितां लोकैकदीपांकुरां श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेंद्रगंगाधरां त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मु
कुंदप्रियां। इति ध्यात्वा मूलमंत्रेणादीपिन्यामालिन्यार्घ्योदकेन त्रिवारं प्रोक्ष्य पिल्याप्राणप्रतिष्ठां विधाय पुष्पांजलिं गृहीत्वा ॐ दुर्गे कात्यायनी देवी शांभवी शंकरप्रिये मम
याभक्त्या कृतां पूजां गृहाण त्वं सुरेश्वरि। हिरण्यवर्णां जातवेदसे॰ नमो देव्यै॰ श्रीमहालक्ष्म्यै नमः आवाहनं समर्पयामि इति दत्वा। ॐ तप्तकांचनवर्णाभं मुक्तामणिविराजि
तं। अमलं कमलं दिव्यमासनं परिगृह्यतां। तां म आवह। जातवेदसे नमो देव्यै॰ महासरस्वत्यै नमः श्रीरत्नं स्वागतं नमः ॐ स्वागतं कुशलं पृच्छे महादेवि महेश्वरि। सुस्वागतं
त्वया भद्रे कृपया भक्तवत्सले। तां म आवह॰ जातवेदसे॰ नमो देव्यै॰ महासरस्वत्यै नमः श्रीरत्नं स्वागतं नमः। गंगादितीर्थसंभूतं गंधपुष्पाक्षतैर्युतं। पाद्यं ददाम्यहं तुभ्यं नम
स्ते कमलालये। अश्वपूर्वां॰ जातवेदसे॰ नमो देव्यै॰ श्रीरत्नं पाद्यं नमः। अर्घ्यं गंधसमायुक्तं स्वर्णपात्रे प्रपूरितं। अर्घ्यं ददाम्यहं तुभ्यं प्रसीद त्वं सुरेश्वरि। कांसोस्मितां।
जातवेदसे॰ नमो देव्यै॰ लोकमात्रे नमः श्रीरत्नं अर्घ्यः स्वाहा। सर्वलोकस्य या माता या माता लोकपावनी। ददाम्याचमनं तस्यै महालक्ष्म्यै प्रयत्नतः॰ चंद्रां प्रभासां जातवेद
से॰ नमो देव्यै॰ वरदायै नमः श्रीरत्नं आचमनीयं समर्पयामि। कपिलादधिकुंदेंदुधवलं मधुसंयुतं। स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण मे। आदित्यवर्णे॰ जातवेदसे॰ नमो श्री
देव्यै॰ भक्तप्रियायै नमः श्रीरत्नं मधुपर्कः स्वाहा। कर्पूरवासितं वारि निर्मलं शुद्धहेतुकं। गृहाण परमेशानि पुनराचमनीयकं। आदित्यवर्णे॰ जातवेदसे॰ नमो देव्यै॰ भक्त ३३३
प्रियायै नमः श्रीरत्नं स्नानीयं नमः। एहि पांडकया देवि स्नानार्थं स्नानमंडपं। स्नानं साटीरगंधाढ्यं त्वत्स्नानाय समागता। सुगंधितैलगंगाद्यादि पंचामृतजलादिकैः सुगं

© Dharmartha Trust J&K. Digitized by eGangotri

घृतलक्ष्मा सूर्लं च तथो द्वृतेन कादिकं। नाना तीर्थ समुद्भवं तोयं स्नानीयं च गृह्यताम्। आदित्यवर्णे। जातवेदसे। नमो देव्यै। भक्तप्रियायै नमः श्री रत्नं स्नानीयं नमः।
आपो हि ष्ठेति मलापकर्षणं। पयो दधि घृतं चैव शर्करा मधु संयुतं। पंचामृतं मया नीतं गृहाण परमेश्वरि। आदित्यवर्णे। जातवेदसे। नमो देव्यै। भद्रायै नमः श्री रत्नं
पंचामृतस्नानं। पुरुषसूक्तेन शुद्धोदकेन स्नानं। जातवेदसे। पुनराचमनीयं। दिव्यांबरं नवं श्वेतं क्षौमं चातिमनोहरं। त्रैलोक्यजननी देवी दीयमानं गृहाण मे। उपैतु मां।
जातवेदसे। नमो देव्यै। श्री लक्ष्म्यै नमः। एतत् वस्त्रयुग्मं नमः। एहि देवि विभूषार्थं नेपथ्यागारमुत्तमं। विभूषासनमास्थाय तया दर्शं विलोक्य च। केशप्रसाधनं कृत्वा
भूषणान्यंगसात्कुरु। रत्नतिलकं कर्णवैडूर्यमुक्ताहारादिकानि च। सुप्रसन्नेन सदा लक्ष्मी भूषणानि गृहाण मे। क्षुत्पिपासा। नमो देव्यै। जातवेदसे। हिरण्यायै नमः। श्री रत्नानि
भूषणानि नमः। एहि देवि निजं स्थानं सिंहासनमनुत्तमं। एतावक्रं समास्थाय गंधं दिव्यंगसात्कुरु। चंदनागरुकर्पूरकुंकुमाद्यैः समन्वितं। कस्तूरीरोचनायुतं गंधं देवि गृ
हाण मे। गंधद्वारां। जातवेदसे। नमो देव्यै। महादेव्यै नमः। श्री रत्नं गंधं नमः। शुद्धमुक्ताफलाभिस्त्वं रक्षितैः शालिसत्तिभैः। सर्वाधिपे महालक्ष्मी चौतयामि सुभक्तितः।
जातवेदसे। नमो देव्यै। देव्यै नमः। श्री रत्नास्ते अक्षताः। हरिद्रां च मया नीतां देवि कल्याणदायिनि। सौभाग्यवर्द्धनां नित्यं गृहाण हरिवल्लभे। जातवेदसे। नमो देव्यै। हरिप्रियायै
नमः श्री रत्नं हारिद्रां। कुंकुमं शोभनं दिव्यं सर्वदा मंगलप्रदं। महानीलं महादेवि तुभ्यं दास्यामि सुंदरि। जातवेदसे। नमो देव्यै। मंगलायै नमः। श्री रत्नं कुंकुमं नमः। सिंदूरं च
भद्रं नित्यं महाशक्ति प्रियं सदा। प्रयच्छामि महादेवि सर्वसौभाग्यदायिनि। जातवेदसे। नमो देव्यै। महादेव्यै नमः। श्री रत्नं सिंदूरं नमः। मालतीमल्लिकादीनि नवानि कुसुमानि च।
एकनाथे प्रयच्छामि पुष्पाणि प्रतिगृह्यतां। मनसः काममा। जातवेदसे। नमो देव्यै। एकनाथायै नमः। श्री रत्नानि पुष्पाणि। विविधैः पुष्पैर्मल्लिकादिविचित्रितैः। पुष्प
मालां प्रयच्छामि प्रसीद त्वं सुरेश्वरि। जातवेदसे। नमो देव्यै। श्री रत्नं पुष्पमाला नमः। सुगंधं शीतलं शुभ्रं नानागंधसमन्वितं। श्रीसर्थं तव देवेशि सम्मूलं प्रतिगृह्यतां। जातवेद
से। नमो देव्यै। सुभगायै नमः। एतत् परिमलद्रव्यं नमः। अथांगपूजा। चंचलायै नमः पादौ पूजयामि। एवं चपलायै। गुल्फौ। कांसे। जानुनी। मंगलायै। जंघे। भद्रकाल्यै। ऊरू।
कमलिन्यै। कटिं। शिवायै। नाभिं। क्षमायै उदरं। गौर्यै उदरं। सिंहवाहिन्यै। स्तनद्वयं। स्कंदमात्रे। भुजद्वयं। कंबुकंठायै। कंठं। सरस्वत्यै। मुखं। सुवासिन्यै। नासिकां। स्वर्णकुं
डलायै। कुंडले। कर्णद्वयं। चंडिकायै। नेत्रद्वयं। शिवायै। ललाटं। कुमार्यै। शिरः। सर्वरूपायै नमः सर्वांगं पूजयामि। इति संपूज्याष्टोत्तरशतनामभिः पूजयेत्। अस्य श्री महाल
क्ष्म्यष्टोत्तरशतनाममंत्रस्य ब्रह्मा ऋषिरनुष्टुप् छंदः श्री महालक्ष्मीर्देवता। श्री महालक्ष्मी प्रीत्यर्थं श्री महालक्ष्मी अष्टोत्तरशतनामभिः पूजयिष्ये। ततः श्री वीतषडूनय

© Dharmartha Trust J&K. Digitized by eGangotri

ऊं न्यासं कृत्वा लक्ष्मीं क्षीरसमुद्रेति ध्यात्वा पुष्पाक्षतैर्वा पूजयेत्। तद्यथा। महालक्ष्म्यै॰ महाकाल्यै॰ महासरस्वत्यै॰ महाकन्यायै॰ महागौर्यै॰ महादेव्यै॰ भक्तानुग्रह
कारिण्यै॰ स्वप्रकाशात्मरूपिण्यै॰ महामायायै॰ माहेश्वर्यै॰ वागीश्वर्यै॰ जगद्धात्र्यै॰ कालरात्र्यै॰ त्रिलोकजनायै॰ भद्रकाल्यै॰ कपालिन्यै॰ महाशौर्यै॰ त्रिलोकात्मिकायै॰ सि
द्धलक्ष्म्यै॰ श्रियालक्ष्म्यै॰ लोकमातृप्रदायिन्यै॰ अरूपायै॰ सुरूपायै॰ विश्वरूपिण्यै॰ पंचभूतात्मिकायै॰ देवमात्रे॰ सुरेश्वर्यै॰ दारिद्र्यध्वंसिन्यै॰ वीणापुस्तकधारिण्यै॰
सर्वेशान्यै॰ ब्रह्मात्मिकायै॰ अष्टांगरूपिण्यै॰ नवदुर्गात्मिकायै॰ अप्रभैरव्यै॰ गंगायै॰ शारदायै॰ वन्द्यै॰ सर्वशास्त्रधारिण्यै॰ समुद्रवसनायै॰ ब्रह्मांडमणिमेखलायै॰
अवस्थात्रयनिर्मुक्तायै॰ गुणत्रयविवर्जितायै॰ योगध्यानैकसंन्यासिन्यै॰ योगध्यानैकपरायणायै॰ देवत्रयविशिष्टकायै॰ वेदांतज्ञानरूपिण्यै॰ पद्मावत्यै॰ विशाला
क्ष्यै॰ नागयज्ञोपवीतिन्यै॰ सूर्यचंद्रावभासायै॰ ग्रहनक्षत्ररूपिण्यै॰ वेदिकायै॰ वेदरूपिण्यै॰ गिरिसंभवायै॰ कैवल्यदायै॰ विश्वंभरायै॰ सूर्यमंडलसंस्थितायै॰ सोममं
डलमध्यस्थायै॰ वायुमंडलसंस्थितायै॰ वह्निमंडलसंस्थितायै॰ शक्तिमंडलसंस्थितायै॰ चक्रिकायै॰ चक्रमध्यस्थितायै॰ चक्रमार्गप्रदायिन्यै॰ सर्वसिद्धांतमार्गप्रदा
यिन्यै॰ षड्वर्गवर्जितायै॰ प्रत्यक्षादिप्रमावतायै॰ विद्यामूर्त्यै॰ त्रैलोक्यमोहिन्यै॰ विद्यायै॰ वरदायै॰ रक्षायै॰ ब्रह्मस्थापितरूपायै॰ कैवल्यज्ञानगोचरायै॰ करुणायै॰
वरुणायै॰ मधुकैटभमर्दिन्यै॰ अविद्यालक्षणायै॰ गायत्र्यै॰ सदाभक्तघनाशिन्यै॰ महारमायै॰ परमेश्वर्यै॰ सुसिद्धलक्ष्म्यै॰ महाकालिक्यै॰ सद्योजातायै॰ वामदेव्यै॰
अघोरायै॰ तत्पुरुषायै॰ ईशानरूपिण्यै॰ एकाक्षरदेव्यै॰ योगिन्यै॰ योगध्यानपराक्रमायै॰ श्रीसिद्धलक्ष्म्यै॰ श्रियै॰ कमलायै॰ कमलालयायै॰ पद्मायै॰ नलिनयुग्म
करांबुजायै॰ भूलपुत्र्यै॰ ब्रह्मचारिण्यै॰ चंडघंटायै॰ कूष्मांडायै॰ स्कंदमात्रे॰ कात्यायन्यै॰ कालरात्र्यै॰ महागौर्यै॰ सिद्धिदायै॰ सर्वात्मिकायै॰ इति संपूज्य कर्णिकायां श्रां हृद
याय॰ श्रीं शिरसे नमः॰ श्रूं शिखायै॰ श्रैं कवचाय नमः॰ श्रौं नेत्रत्रयाय नमः॰ श्रः अस्त्राय नमः॰ ततो षट्दलेषु पूर्वादि ॐ पद्मासनायै॰ ॐ पद्मवर्णायै॰ ॐ पद्मस्थायै॰ ॐ
आर्द्रायै॰ ॐ तर्पयंत्यै॰ ॐ तर्पयंत्यै॰ ॐ तृप्तायै॰ ॐ ज्वालिन्यै॰ ॐ स्वर्णप्राकारायै॰ ततो दलाग्रेषु ब्राह्म्यै॰ माहेश्वर्यै॰ कौमार्यै॰ वैष्णव्यै॰ वाराह्यै॰ ऐन्द्र्यै॰ चामुंडायै॰ महा
लक्ष्म्यै॰ ततो भूपुरे लं इन्द्राय सायुधाय सवाहनाय सपरिवाराय सशक्तिपुत्राय नमः। ७ एवं रं अग्नये॰ टं यमाय॰ क्षं निर्ऋतये॰ वं वरुणाय॰ यं वायवे॰ सं कुबेराय॰ हौं
ईशानाय॰ आं ब्रह्मणे॰ ह्रीं अनन्ताय॰ तदनु हि वं वज्राय॰ शं शक्तये॰ दं दंडाय॰ खं खड्गाय॰ पं पाशाय॰ अं अंकुशाय॰ गं गदायै॰ शं शूलाय॰ पं पद्माय॰ चं चक्रा

© Dharmartha Trust J&K..Digitized by eGangotri

यन्नमः इति संपूज्य देव्यै पुष्पांजलिं दत्वा। दशांगं गुग्गुलं धूपं वज्रनागरसंयुतं। भक्त्या दत्तं मया देवि अक्षीदलं महेश्वरि। कर्दमेन॰ जातवेदसे॰ नमो देव्यै॰ भद्रकाल्यै श्रीरपते धूपो
नमः। कर्पूरवर्तिसंयुक्तं गोघृतेन समन्वितं। दीपं गृहाण देवेशि महालक्ष्मि नमोऽस्तु ते। आपस्रजंतु॰ जातवेदसे॰ नमो देव्यै॰ श्रीमहालक्ष्म्यै नमः श्रीरपते दीपान्नमः। नैवेद्यं गृहा
णं देवि भक्ष्यभोज्यसमन्वितं। षड्रसैरन्वितं दिव्यं घृतेन परिपूरितं। आर्द्रां॰ जातवेदसे नमो देव्यै॰ पूर्णमालिन्यै नमः श्रीरतत्ते नैवेद्यं सुधा॰ मृध्येपानीयं॰ उत्तरापोशनं॰ पुनराच
मनीयं॰ कर्पूरचंदनौ मिश्रं दिव्यं गंधसमन्वितं। करोद्वर्तनकं नित्यं गृहाण परमेश्वरि। जातवेदसे॰ नमो देव्यै॰ महेश्वर्यै नमः श्रीरपते करोद्वर्तनं नमः। पूगीफलैः सकर्पूरैर्नाग
वल्लीदलैर्युतं। कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यतां। आर्द्रां॰ जातवेदसे॰ नमो देव्यै॰ पिंगलायै नमः श्रीरपते तांबूलं। जातवेदसे॰ नमो देव्यै॰ दक्षायै नमः श्रीरपते सुवर्णपुष्पं॰ इदं
फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि। जातवेदसे॰ नमो देव्यै॰ सिद्धिदायै नमः श्रीरतत्ते फलं। त्वं सूर्यश्चंद्र विद्युदग्निस्त्वमेव हि। नीराजनं मया
दत्तं गृहाण परमेश्वरि। तां म आवह॰ जातवेदसे॰ नमो देव्यै॰ यमुनाद्रिवासिन्यै नमः श्रीरतत्ते नीराजनं। गौरीर्मिमाय॰ जातवेदसे॰ प्रणतो देवी॰ समस्तश्रीसूक्तं॰ नमो देव्यै॰ महालक्ष्म्यै कालै
नमः। महालक्ष्म्यै॰ महासरस्वत्यै नमः श्रीरपते मंत्रपुष्पं। सर्वस्वरूपे॰ जातवेदसे॰ नमो देव्यै॰ महाकाल्यै नमः श्रीरतानि प्रदक्षिणानि। सर्वतः पाणिपादं तत्॰ यः शुचिः प्रयत इत्यादि
समस्तं। नमस्तेऽस्तु महादेवि नमस्तेऽस्तु हरिप्रिये। नमस्ते भुजगध्यात्रि नमस्ते शिववल्लभे। जातवेदसे॰ नमो देव्यै॰ महामायै नमः श्रीरतानि लवंदनानि। पद्मप्रिये॰ यासाप आसनस्था प
मायामधुकैटभप्रशमनी या माहिषोन्मूलिनी या धूम्राक्षिविनिचंडमुंडमथनी या रक्तबीजाशनी। शक्तिः शुंभनिशुंभदैत्यदमनी या सिद्धलक्ष्मी परा सा देवी नवकोटिशक्तिसहिता मां पा
तु विश्वेश्वरी। जातवेदसे॰ नमो देव्यै॰ श्रीरतत्ते प्रार्थना॥ ततः श्रीसूक्तं चंडीपाठ लक्ष्मीहृदयादिकं पाठयित्वा गुह्येत्यादिना तत्सर्वं समर्पयेदिति लक्ष्मीपूजा॥ अथ लक्ष्मीहृदयं॥ अस्य श्री
लक्ष्मीहृदयस्य शिरसि भार्गवाय ऋषये नमः मुखे त्रिष्टुबादिछंदोभ्यो नमः हृदये महालक्ष्म्यै देवतायै नमः इति विन्यस्य मम अलक्ष्मीपरिहारपूर्वक दीर्घायुरुपत्नेन मम महादैश्वर्य
फलावाप्त्यर्थं लक्ष्मीहृदयपाठे विनियोगः। इति कृतांजलिर्वदेत्। ततः श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति मंत्रैः षडंगन्यासं विधाय ध्यायेत्। ध्यानं। हस्तद्वयेन कमले धारयंती तु लीलया। हारनू
पुरसंयुक्तां लक्ष्मीं देवीं विचिंतयेत्॥ वंदे लक्ष्मीं परशिवमयीं शुद्धजांबूनदाभां तेजोरूपां कनकवसनां सर्वभूषोज्वलांगीं। बीजापूरं कनककलशं हेमपद्मे दधानामाद्यां शक्तिं सकल
जननीं विष्णुवामांकसंस्थां॥२॥ श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीं। सर्वकामफलावाप्तिसाधनैकसुखावहां॥३॥ नमामि नित्यं देवेशि त्वया प्रेरितमानसः। त्वदाज्ञां शिरसा धृ
त्वा भजामि परमेश्वरीं॥४ समस्तसंपत्सुखदां महाश्रियं। समस्तकल्याणकरीं महाश्रियं॥५॥ विज्ञानसंपत्सुखदां सनातनीं। विचित्रवाग्भूतकरीं महेश्वरीं। मोहरां॥ अनंतभोगसुखदायि

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यालव श्रियं

३३५ श्रीं नमाम्यहं भूतिकरीं हरिप्रियां। ६। समस्तभूतांतरसंस्थिता त्वं समस्तभोक्त्रीश्वरि विश्वरूपे। तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं श्रीः॥७ दारिद्र्यदुःखौघतमो
पहंत्री त्वत्पादपद्मं मयि सन्निधत्स्व। दीनार्त्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिंच मां श्रीः॥८। अंब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व।
३३५ आलोकय प्रणतहृद्गतशोकहंत्री त्वत्पादपद्मयुगले प्रणमाम्यहं श्रीः॥९ शां त्वै नमोस्तु शरणागतरक्षणायै कों त्वै नमोस्तु कमनीयगुणाश्रयायै। क्षां त्वै नमोस्तु दुरि
तक्षयकारणायै धां त्वै नमोस्तु धनधान्यसमृद्धिदायै १० शं त्वै नमोस्तु शशिशेखरसंस्थितायै रं त्वै नमोस्तु रजनीकरसोदरायै। भं त्वै नमोस्तु भवसागरतारका
यै मं त्वै नमोस्तु मधुसूदनवल्लभायै ११ लक्ष्म्यै नमोस्तु शुभलक्षणलक्षितायै सिं ध्यै नमोस्तु शिवसंघसुपूजितायै। धं त्वै नमोस्त्वमितदुर्गतिभंजनायै गं त्वै नमो
स्तु वरसमृद्धिदायिकायै १२ दं त्वै नमोस्तु दिविदेवगणार्चितायै भं त्वै नमोस्तु भवार्त्तिविनाशनायै। दां त्वै नमोस्तु धरणीधरवल्लभायै पुं त्वै नमोस्तु पुरुषोत्तम
वल्लभायै १३ सुतीव्रदारिद्र्यदुःखहंत्र्यै नमोस्तु ते सर्वभयापहंत्र्यै। श्रीविष्णुवक्षस्थलसंस्थितायै नमो नमः सर्वविभूतिकायै १४ जयतु जयतु लक्ष्मीर्लक्षणा
ललितांगी जयतु जयतु पद्मा पद्मसद्माभिवंद्या। जयतु जयतु विद्या विष्णुवामांकसंस्था जयतु जयतु सम्यक् सर्वसंपत्करी श्रीः १५ जयतु जयतु देवी देवसंघाभिपूज्या
जयतु जयतु भद्रा भार्गवी भाग्यरूपा। जयतु जयतु नित्या निर्मलज्ञानवेद्या जयतु जयतु सत्या सर्वभूतांतरस्था १६ जयतु जयतु रम्या रत्नगर्भांतरस्था जयतु जयतु शुद्धा
शुद्धजांबूनदाभा। जयतु जयतु कांता कांतिमद्भासितांगी जयतु जयतु शांता शीघ्रमायाहि सौम्ये १७ यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च देवाः
५ दिवि जीवंति सर्वेपि सशक्तयस्ते प्रभुत्वमापुः परमायुषस्ते १८ लिलिखत्रिर्लेविधिर्मम लिपिं विसृज्यांतरं त्वया विलिल मम तदिति तत्फलमाप्नुये तदंतरं इह स्फुरं
कमलवासिनि श्रीरमां समर्पय समृद्धिकां सकलभाग्यसंसूचिकां १९ तादृशतिमिरं भाले स्फुरं कमलवासिनि। श्रियं समुद्रजा देहि सर्वभाग्यस्य सूचिकां २० कृ
पां तया देवि जीवंति सचराचरं। तथा संपत्करे लक्ष्मि सर्वदा संप्रसीद मे यथा विष्णुर्ध्रुवे नित्यं स्वकलां संन्यवेशयत्। तथैव स्वकलां लक्ष्मी सर्वदा संप्रसीद मे म श्री
यि सम्यक् समर्पय २२ यथा सौख्यप्रदे देवि भक्तानामभयप्रदे। अचलां कुरु यत्नेन कमलां सन्निवेशितां २३ सदा सा तां मज्जाले परमपदलक्ष्मीः स्फुरत्कला सदा वै ३३५
कुंठश्रीर्निवसतु कलामे नयनयोः वक्त्रे त्वल्लोके मम वसतु लक्ष्मीर्वरकलाश्रियः श्वेतद्वीपे निवसतु कलामे स्वकरयोः २४ तां नित्यं ... मां गेहे कुसीरा ... श्री

शिरस्त्वतं ८ तावन्नित्यं १

© Dharmartha Trust J&K. Digitized by eGangotri

फलायसेत्। सूर्येवंद्रमसौ यावद्यावल्लक्ष्मीपतिः श्रिया २५ सर्वमंगलसंपूर्णा सर्वैश्वर्यसमन्विता। आद्यादि श्रीर्महालक्ष्मी त्वत्कलामयि तिष्ठतु २६ अज्ञानति
का मिरं हन्तुं शुद्धज्ञानप्रकाशिता। सर्वैश्वर्यप्रदा मेस्तु त्वत्कलामयि सुस्थिरा २७ अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा। वितनोतु मम श्रेयस्त्वत्कलामयि संस्थिता २८ ऐश्वर्य
मंगलोत्पत्तिस्त्वत्कलायां निधीयते अहं तस्मात्कृतार्थोस्मि पात्रमस्मि स्थितेस्तव २९ भवदावेशभाग्याहं भाग्यवानस्मि भार्गवि। त्वत्प्रसादात्पवित्रोहं लोकमातर्नमोस्तुते ३०
पुनासि मां त्वत्कलयैव यस्मादतः समागच्छ ममाग्रतो। भगवत्स्वां परंपदं श्रीभव सुप्रसन्ना मय्यच्युतेन सह विशादि लक्ष्मि ३१ श्रीवैकुण्ठस्थिते लक्ष्मि त्वं समागच्छ सन्निधिं।
वासुदेवेन सहिता प्रसीद वरदा भव। ३२ श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते। विष्णुना सहिते देवि जगन्मातः प्रसीद मे ३३ क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ समाध
वे। त्वत्कृपादृष्टिसुधया सततं मां विलोकय। ३४ रत्नगर्भस्थिते लक्ष्मि परिपूर्णे हिरण्मयि। समागच्छ समागच्छ स्थित्वा सुपुरतो मम ३५ स्थिरा भव महालक्ष्मि निश्चला भ
व निर्मले। प्रसन्नकमले देवि प्रसन्नहृदया भव ३६ श्रीधरे श्रीमहाभूते त्वदंतस्थं महानिधिं। शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ३७ वसुंधरे श्रीवसुधे वसुदोग्ध्रि कृपाम
यि। त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे संप्रदर्शय। ३८ विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे। त्वद्गर्भगतहेमादीन् संदर्शय दर्शय। ३९ रसातलगते लक्ष्मि शीघ्रमागच्छ मे पु
रः। न जाने परमं रूपं मातर्मे संप्रदर्शय ४० आविर्भव मनोवेगा शीघ्रमागच्छ मे पुरः। मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष मां। ४१ देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते।
वी। मातस्त्वद्भृत्यभृत्योहं मृगये कुतूहलात्। ४२ उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि। अक्षयान्हेमकलशान् सुवर्णेन सुपूरितान्। ४३ निक्षेपान्मे समाकृष्य समुद्धृत्य ममा
ग्रतः। समुन्नतानना भूत्वा समुद्धेहि धरान्तरात्। ४४ मत्सन्निधिं समागच्छ मदाहितकृपारसा। प्रसीद श्रेयसां दोग्ध्रि लक्ष्मि मे नयनाग्रतः। ४५ अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव
हिरण्मयि। सुस्थिरा भव संप्रीत्या प्रसन्ना वरदा भव ४६ आनीतांस्त्वं तथा देवि निधीन्मे संप्रदर्शय। अद्य क्षणेन सहसा दत्वा संरक्ष मां सदा। ४७ मयि तिष्ठ तथा नित्यं यथेंद्रा
दिषु तिष्ठसि। अभयं कुरु मे देवि महालक्ष्मि नमोस्तु ते। ४८ समागच्छ महालक्ष्मि शुद्धजांबूनदस्थिते। प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ४९ लक्ष्मी भुवनगता भा
सि यत्र यत्र हिरण्मयि। तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ५० क्रीडन्ती त्वं बहुधा परिपूर्णकृपामयि। मम मूर्धनि ते हस्तमविलंबितमर्पय ५१ फलद्भाग्योदये लक्ष्मि
समस्तपुरवासिनि। प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे। ५२ अयोध्यादिषु सर्वेषु नगरेषु समास्थिते। वैभवैर्विविधैर्युक्ता समागच्छ बलान्विता। ५३ समागच्छ समाग

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव ३३६ 336 344

क्षेमं मां जे भव सुस्थिरा। करुणारसनिष्यंदे तत्र ह्यविलासिनी॥५४॥ सन्निधिं स्य महालक्ष्मि त्वत्पाणिं मम मस्तके। करुणासुधयामोत्व मभिषिच्य स्थिरे कुरु॥५५॥ सर्वराज्य
गृहा लक्ष्मीः समागच्छ गुणान्विता। स्थितानु पुरतो मे घ प्रसादेनाभयं कुरु॥५६॥ प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे। अचला भव सप्रीता सुस्थिरा भव मद्गृहे॥५७॥ यथा
वन्निष्ठंति देवाश्च यावत्त्वं मम तिष्ठति। यावद्दिक्सुस्थयावत्त्वं तावत्कुरु स्थिरा मयि॥६०॥ वांछीकलायथाशुक्ले वर्द्धते सा दिने दिने। तथा दयात्मे मय्येव वर्द्धतां मयि वर्द्धतां॥६१॥
यथा वैकुण्ठनगरे यथा वै क्षीरसागरे। तथा मम कुले नित्यं स्थिरा श्री विष्णुना सह॥६२॥ योगिनां हृदये नित्यं यथा तिष्ठति विष्णुना। तथा मम कुले नित्यं स्थिरा श्री विष्णुना सह॥६३॥
नारायणस्य हृदये भवती यथास्ते नारायणोपि तव हृत्कमले यथास्ते। नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयान्विता श्रीः॥६४॥ विज्ञान वृद्धिं हृदये
व कुरु श्री सौभाग्य वृद्धिं कुरु मे गृहे श्रि। दयासु पुष्टिं कुरुतां मयि श्री सुवर्ण वृद्धिं कुरु मे करे श्री॥६५॥ नमां त्यजेथाः श्रितकल्पवल्लि मद्भक्ति चिंतामणि कामधेनो। विश्वस्य
मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे॥६६॥ आद्यादिमाये त्वमजांडबीजं त्वमेव साकार निराकृतिस्त्वं। त्वया धृताश्चाब्जभवांड संघाश्चित्रं चरित्रं तव देवि विष्णोः॥
६७॥ ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः। महिमानं तव स्तोतुं मंदो हं शक्नुयां कथं॥६८॥ अंब त्वद्वत्स वाक्यानि सूक्तासूक्तानि यानि च। तानि स्वीकुरु सर्वज्ञे दयालुत्वे
न सादरं॥६९॥ भवंतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः। इति संचिंत्य मनसा त्वामहं शरणं व्रजे॥७०॥ अनेन तान तसुखिन स्व ... जना स्त्व सरायणाः
संविल्य इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे॥७१॥ तव प्रतिज्ञा मद्भक्ता न नश्यंतीत्यपि क्वचित्। इति संचिंत्य संचिंत्य प्राणान्संधारयाम्यहं॥७२॥ त्वदधीनस्त्वहं मातस्त्वत्कृपाम
यि विद्यते। यावत्संपूर्णकामः स्यात्तावद्देहि कृपानिधे॥७३॥ क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना। न जीवंतीह जलजा जलं त्यक्त्वा जलाश्रयाः॥७४॥ यथाहि पु
त्रवात्सल्याज्जननी प्रस्नुतस्तनी। वत्सं त्वरितमागत्य संप्रीणयति वत्सला॥७५॥ यदि स्यां तव पुत्रोहं माता त्वं यदि मामकी। दयापयोधरस्तन्य सुधाभिरभिषिंच
मां॥७६॥ मृग्यो न गुणलेशोपि मयि दोषैक मंदिरे। पांसूनां वृष्टिबिंदूनां दोषाणां च न मे मतिः॥७७॥ पापिनामहमेकाग्रो दयालूनां त्वमग्रणीः। दयनीयो मदन्योस्ति श्री
तव कोत्र जगत्त्रये॥७८॥ विधिनाहं न सृष्टश्चेन्न स्यात्तव दयालुता। आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः॥७९॥ कृपा मदग्रजा किं ते ह्यहं किं वा तदग्रजः। विचा ३३
र्याय देहि मे वित्तं तव देवि दयानिधे॥८०॥ माता पिता त्वं गुरुः सद्गतिः श्रीस्त्वमेव संजीवन हेतुभूता। अन्यं न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्यं॥८१॥ आधि

© Dharmartha Trust J&K. Digitized by eGangotri

भैरव ५

लक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्री। अज्ञानहंत्री त्रिगुणातिरिक्ता प्रज्ञाननेत्रे भव सुप्रसन्ना ८२ अशेषवाग्जाड्यमलापहन्त्री नवं नवं स्पष्टसुवाक्प्र
दायिनि ममैव जिह्वाग्रसुरंगनर्तकी भव प्रसन्ना वदने च मे श्री ८३ समस्तसंपत्सु विराजमाना समस्ततेजःसु विराजमाना। विष्णुप्रिये त्वं भवदीप्यमाना वाग्देवता मे नयने
प्रसन्ना ८४ भक्तानतानां सकलार्थदे त्वं प्रभासु लावण्यदयासुदोग्ध्रि सुवर्णदे त्वं सुमुखी भव श्री हिरण्मयी मे नयने प्रसन्ना ८५ सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभ
यापहन्त्री सर्वोन्नता त्वं सुमुखी भव श्री हिरण्मयी मे नयने प्रसन्ना ८६ समस्तविघ्नौघविनाशकारिणी समस्तविघ्नोद्धरणे विचक्षणा। अनंतसौभाग्यसुखप्रदायिनी हिरण्म
यी मे नयने प्रसन्ना ८७ देवि प्रसीद दयनीयतमाय मह्यं देवाधिनाथभवदेवगणाभिवंद्ये मातस्तथैव भव सान्निहिता दृशोर्मे पत्या समं मम मुखे भव सुप्रसन्ना ८८ मा वत्स
मेरज्यदानकरणार्पितसत्मौलोमममेति मयि दीनदयानुकंपे मातः समर्पय मुदा करुणाकटाक्षं मोगत्यवीतमहिमानुसतं मुमौ तत् ८९ करात्संदृक्कामधुक्तयमैसुचिंताम
णिः करः सुरलतः सदा नवनिधिस्त्वमेव इंदिरे। भवेत्तव दयारसोरसरसायनेन त्वं च हे सुखं तव कृपानिधिर्विविधवांछितार्थप्रदे ९० यथा रसस्पर्शनतोऽयसोपि सुवर्णता स्या
त्कमले तथैव कटाक्षसंस्पर्शनतो जनानां ममंगलानामपि मंगलत्वं ९१ देहीति नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणं प्रसन्नः अतः सदास्मिन्नभयप्रदा त्वं सहैव पत्या
मम सन्निधेहि ९२ कल्याणकुंभेन मणिनासहितासुरम्याश्रीसत्कलामयि रसेन रसायनेन आस्तां यतो मम भवत्करपाणिपादस्पृष्टाः सुवर्णवपुषः स्थिरजंगमाः स्युः ९३ श्रं
सम्मी आद्यादिविद्विष्टाः स्थिरधर्मपत्नी त्वमेव पत्या मम सान्निधेहि आद्यादिलक्ष्मीत्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ९४ आद्यादिलक्ष्मीहृदये पठेद्यः सराजल
क्ष्मीमचलां तनोति महादरिद्रोपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ९५ यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ९६ इदं
रहस्यं हृदयं सर्वकामफलप्रदं। जपः पंचसहस्रं तु पुरश्चरणमुच्यते ९७ त्रिकालमेककालं वा नरो भक्तिसमन्वितः। यः पठेच्छृणुयाद्वापि स याति परमां श्रियं ९८ महा
लक्ष्मीं समुद्दिश्य निशि भार्गववासरे। इदं श्रीहृदयं जप्त्वा पंचवारं धनी भवेत् ९९ अनेन हृदयेनान्नं गर्भिण्या अभिमंत्रितं। ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयं १००
नरेणाप्यथवा नार्या लक्ष्मीहृदयमंत्रिते। जले पीते च तद्वंशे मंदभाग्यो न जायते १०१ य आश्विने मासि च शुक्लपक्षे रमोत्सवे सन्निहिते च भक्त्या पठेत्तथैकोत्तरवारवृ
द्ध्या लभेत्स सौवर्णमयीं सुवृष्टिं १०२ य एकभक्त्यान्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी स मंदभाग्योपि रमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः १०३ श्रीशा
ङ्घ्रिभक्तिं हरिदासदास्यं प्रसन्नमंत्रार्थदृढैकनिष्ठां गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मे देहि परं पदं श्रि १०४ पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्द्धिसि

© Dharmartha Trust J&K. Digitized by eGangotri

सुवर्णश्चर्द्धिं कुरु मे रक्ष ह्रीः कल्याणं ऋद्धिं कुरु मे रक्ष क्लीं विभूतिश्चर्द्धिं कुरु मे रक्ष ऐं सौभाग्यश्चर्द्धिं कुरु मे रक्ष

द्धिं संपूर्णसिद्धिं वकुरु वर्षभोग्यं प्रदेहि मे देहि पुनः पुनस्त्वं १०५ वाञ्छार्थसिद्धिं कुरु कुरु वश्ये नयः स्थिरत्वे ललनासु भोगं पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भा
गो विज्ञ भजन्ति १०७ ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां विद्युद्वर्णां वरवरधरां भूषणाढ्यां सुशोभां वीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं भर्त्री
युक्तां मुद्रां भयदां शाश्वदप्यच्युतश्री १०८ ॥ इति श्री अथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं संपूर्णं ॥ ॥ अथ सारसंग्रहे। अथो अतेमहामन्त्राः दुर्गायाः कथिता
र्थदाः त्रिवर्गफलमोक्षाप्तिदायकाविजयप्रदाः १० सद्यः सदंडी हल्लेखा सधाति क्लादिनीदुयुक् । अत्री धिका विसर्गस्तु प्रतिष्ठा श्रियासहा रध्रुमाविंः स्याट
पंक्तिर्णसंज्ञकं तेषु वर्णकाः दुर्गामनुः समाख्यातो भजतां सर्वकामदः ३ सद्यः दंडी अनुस्वारः तद्युक्तः तेन प्रणवः हल्लेखा भुवनेश्वरी बीजं धातिर्हकारः क्ला
दिनी दकारः इंदु अनुस्वारः तेन दुं अत्रिर्दकारः दूं धिका ईकारः विसर्गयुक्तः तेन दुः सप्ततिर्गकारः प्रतिष्ठा आतेन गा श्री एकारः ध्रुमाविर्यकारः तस्यसस
तुषो हरिति रेफः तेन वर्णाद्वयस्य संधिः तेन दुर्गायै इति मन्त्रे बोद्धव्यं ११ तद्यथा। मुनिः प्रोक्तो नारदाख्यो गायत्रं छंद ईरितं दुर्गा च देवता प्रोक्ता दुष्टादष्टफलप्र
दाः षड्दीर्घयुक्तेश शयं तेन मनुपूर्वं षड्दीर्घैः जातियुक्तैः षडंगानि मनोरस्य प्रकल्पयेत् । तेन ओं ह्रां दुं दुर्गायै ह्रां हृदयाय नमः इति षडंगमन्त्रानुन्याः ॥ तादुःक
मावायैवरणैः तारो माया च दुर्गायै ह्रां माद्यान्तांगकल्पनं तिव कारः ॥ इं समुद्धिता श्रीतिपमाचार्यैः तथा। सिंहस्कन्धसमारूढा द्युतिमिंदुचूडांशं खं चापं करतलैर्दधती
प्रारासं चापाणि त्रिनेत्रलसितां । भवदुःखहं श्रीदुर्गा नमामि मणिभूषणभूषितांगीं । वामा च यो रायेतदा च धस्थयोरन्वेद्भुपुध ध्यानं ॥ तथा। अष्टपत्रां वुजं द्वं
वनुरस्रत्रयावृतं। चतुर्द्वारसमायुक्तं कुंकुमादिभिरुद्धरेत् । कुर्याच्च पीठपूजायां नवशक्तिसमर्चनं तां च प्रभासमायासजयास्क्षमाविशुद्धासार्त। नंदिन्या सुप्रभा
या विजया सर्वसिद्धिं नवमी। एकवह्निशरकीवहीनैरद्भिः प्रपूजयेत्। एकेति। अइउऋऋलॄलृ इति सप्तस्वररहितैरद्भिः आईऊएऐ ओ औ अं अः इति नव
भिस्वरैः सहितान वयवक्रयः पूज्या इत्यर्थः तारो वज्रनखदंष्ट्रायुधाय वमहापदं सिंहाय वमो स्त्रनतिः प्रातः सिंहासुरीरितः ॥ आसने मनुना तेन हयाम्मूलेन क
ल्पयेत् । वर्मदुं अस्त्रं फट् नतिर्नमः मूर्तिमावाद्य तस्यां तां पूजयेच्च दलादिभिः ॥ प्रथमा वृत्तिरंगैः स्याज्जयादिभिः परापराशेखाद्दिके रायुधैः स्याच्चतुर्थी ज्ञादिभिःप
राल्पदायुधैश्च दुर्गायाः पूजनं समुदीरितं । सजयां विजया कीर्तिः प्रीतिः प्रभयासमीरिताश्च श्रद्धा मेधाश्रुतिः स्वनामाद्यक्षरपूर्वाः समभ्यर्च्याः अरिदरखड्गशरचापा
शांकुशधरयधनुष्पाद्यायुधान्यिंगदितानि ॥ इत्थं दुर्गामंत्रं यो भजते स नर ईदिरांजभते ॥ अथ प्रयोगः ॥ तत्र प्रातरुत्थाय नित्ययोगपीठन्यासांते मूले न प्राणायामत्रयं

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्वा शिरसि ॐ नारदाय ऋषये नमः मुखे गायत्री छंदसे नमः हृदये ॐ श्रीदुर्गा देवतायै । इति विंन्यस्य कृतांजलिर्मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः इत्युक्त्वा ॐ दुर्गा श्रौ
यै क्रौं हृदयाय । क्रौं क्लीं दुं दुर्गायै क्रौं शिरसे । इत्यादि षडंगमेवात्रांगुष्ठादितलांतं हृदयादि षडंगेष्वपि विंन्यस्य ध्यानादिमानसपूजांते स्वर्णादिपट्टे चंदनादिना रक्तवर्ण वा हितं भक्तो
नाष्टदलकमलं कृत्वा तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं कुर्यादिति पूजावक्त्रं निर्माय प्राग्वत्पुरतः संस्थाप्यार्घस्थापनादि परतत्त्वार्चां तं विधाय अष्टदलकेसरेषु स्वाग्रादि
प्रादक्षिण्येन ओं प्रभायै । ईं मायायै । ऊं जयायै । ऐं सूक्ष्मायै । ऐं विशुद्धायै । ॐ नंदिन्यै । ॐ सुप्रभायै । ॐ विजयायै । मध्ये अः सर्वसिद्ध्यै । इति संपूज्य ॐ वज्रनखदंष्ट्रायुधा
य महासिंहासनाय हुं फट् नमः इति पीठमध्ये समभ्यर्च्यावाहनादि पुष्पोपचारांतं प्राग्वद्दत्त्वा निसंपूज्यांतरष्टदलेषु स्वाग्रादि प्रादक्षिण्येन ओं जं जयायै । ॐ विं विजयायै । ॐ
किं कीर्त्यै । ॐ प्रिं प्रीत्यै । ॐ प्रं प्रभायै । श्रं श्रद्धायै । मं मेधायै । श्रं श्रुत्यै । इति संपूज्य बाह्याष्टदलेषु ॐ शं शंखाय । ॐ चं चक्राय । गदायै । खड्गाय । पाशाय । अंकुशाय । शरेभ्यो । धनु
षे । इति प्रादक्षिण्येन संपूज्य प्राग्वद्भूपुरेषु लोकपालार्चादि सर्वं समापयेदिति ॥ तथा । जितेंद्रियो हविष्याशी वसुलक्षं जपेन्मनुं । तद्दशांशं तिलैः स्वादुलोलितैर्जुहुयात्
घसा जुहुयाद्दधि तेन क्रौं तर्पणादि ततश्चरेत् । वसुलक्षं अष्टलक्षं । स्वादुत्रिमधु । एवं सिद्धमनुर्मंत्री प्रयोगानाचरेत्सुधीः । यथोक्तविधानेन नवकुंभान्मनोरमान्
पंचरत्नसमायुक्तान् नवस्थानेषु विंन्यसेत् । मंत्री दुर्गां यजेत्तेषु ध्येलन्यत्र चतुर्यादिकाः । चंदनाद्यैः समभ्यर्च्य धूपदीपैश्च मंत्रवित् । अभिषिंचेत्ततो यं साध्यं राजानं वा शिशुं वु
धः । विजयश्रीसमायुक्तो राजा भवति नान्यथा । भूतापस्मारवेतालपिशाचाद्यैर्विमुच्यते । विंध्यावलंबनापुत्रं त्रिविजीतं त्राप्नुयात्कुमं । आमयान्मुच्यते मर्त्यो दीर्घायुष्यं नसे
वायनः अनेनैव विधानेन जनानामनुरंजनं । एवं दुर्गामनुं मर्त्यो यो भजेद्विधिना मुदा । स दीर्घायुष्यदुरितान् जपेत्सुष विजितामयः । पश्चेतारगतां शक्तिं ससाध्यां तद्दलेषु च
मंत्रवर्णांल्लिखेद्बहिस्त्रिष्टुभमंत्रेण वेष्टयेत् । मातृकार्णैर्बहिर्बीजं चतुरस्रेण वेष्टयेत् । दौर्गं यंत्रमिदं प्रोक्तं सर्वसिद्धिकरं परं । अपस्मारमहाभूतक्षुद्रज्वरनिवारणं । तर्णांवि
जयदं स्त्रीणां पुत्रदं नात्र संशयः । अस्यार्थः । अष्टदलपद्मं कृत्वा तन्मध्ये तारं तस्योदरे शक्तिबीजं तदुदरे साध्यनामच विलिख्य तद्दलेषु मंत्रवर्णान्नैकैकशो विलिख्य तद्बहि
र्वेतत्त्रयं कृत्वांतर्वीथ्यां जातवेदसे सुनवाम इति त्रिष्टुभमंत्रेण संवेष्टयेत् तद्बहिर्वीथ्यां मातृकया संवेष्टयेत् तद्बहिश्चतुरस्रं कुर्यात् । एतद्यंत्रमुक्तफलदं भवति । पूर्वोक्तनवकुं
भस्थापनमस्मिन्नेव यंत्रे ज्ञेयं । नारायणीये । विषंहिमज्ञाकालोग्निरत्रिनित्रिकेतिरहूयां । मंत्रो महिषमर्दिन्याजोक्तो वस्वक्षरात्मकः । विषं । महिषरूपां मज्जा ष् काले य
त्रग्निः र । अत्रिनित्रिकोदकारस्य तेनर्द नित्यरूपं ठद्वयं स्वाहा । मार्कंडेयो मुनिश्छंदो गायत्री देवता मनोः । सुरासुरनतादेवी प्रोक्ता महिषमर्दिनी ॥ शारदातिलके ॥ महि

© Dharmartha Trust J&K. Digitized by eGangotri

वि॰ घार्ण
३३८

षमर्दिनी ॐ फट् हृदयं परिकीर्त्तितं । महिषशत्रो साधि हुं फट् शिरो गं स समुदीरितं । महिषं हे षय हुं हुं फट् ततः शिखा समनुः । महिषं हनयुग्मांते देवी ॐ फट् तनुच्छदं । माहि
षांते सूदनि ॐ फट् तथास्त्र मीरितं । मंत्रैरेतैर्जातियुक्तैः पंचांगानि प्रकल्पयेत् । गारुडोपलसंनिभां मणिमौलिकुंडलमंडितां । नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीं ।
शंखचक्रकृपाणखेटकबाणकार्मुकभूलिकां तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखरां । दक्षाधूर्ध्वयोरधोतदाधस्थयोरन्येतथाऽधःस्थयोरितरे । इत्यायुधध्या
नं । ईशानाशिवतनुंध्यायेल्लक्ष्यां मां महादुर्गां सर्वाभरणभूषितां । तरामुकुटशोभाढ्यां स्फुरत्कुंडलकान्वितां । पीतांबरधरां देवीं पीनोन्नतकुचद्वयां । शंखचक्रलसद्वस्तीतद
धःखड्गखेटकौ । बाणचापौ वतदधः समूलौ तर्जनीमधः । तर्ज्जनी तर्ज्जनी मुद्रा सामुद्रान्तु । तर्ज्जन्यकाकिनी तद्वीशेषाः सन्निमिता वधः । मुद्रेयं तर्जनी प्रोक्ता वक्रप्रोत्रो
सुभीतिदेति । सारसंग्रहोक्ता । ततः पूर्वोदितपीठे यजेन्माहिषमर्दिनीं । प्रथमावृतिरंगैस्याद्दुर्गाद्यापिपरापरा । ध्यानोक्तैरायुधैर्योधैर्लोकपालैः परेवृता । तदायुधैः पं
चमीस्यादेवं पूजा समीरिता । दुर्गाद्याभिः षदवरवर्णिन्याद्याचार्यकृत्रकप्रभा । कृत्तिकाद्याभयाद्याच प्रदाकन्यासुरूपिका । दीर्घस्वराद्याः क्रमतः पूजयेन्मंत्रवित्तमः । दी
र्घाद्या क्लीवात्यरहितदीर्घस्वराद्याः । नारायणीये । पूर्वपटले अनंतत्र्यक्षियो न्यादीत्युक्तोत्तरपटले आद्यैः स्वरैः क्रमादित्युक्तो । आद्यैः आईऊएऐॐ औ आमितिस
रः इति टीकायां वैद्यविदिभिः ह्रातेरिति ॥ अथ प्रयोगः । तत्र प्राग्वद्योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा । शिरसि मार्कंडेयाय ऋषये नमः । मुखे गायत्री छंदसे नमः ।
हृदये श्रीमाहिषमर्दिन्यै देवतायै नमः । इति विन्यस्य विनियोगः । मुक्तीत्यं महिषमर्दिनी ॐ फट् हृदयाय नमः । महिषशत्रो साधि हुं फट् शिरसे स्वाहा । माहिषं हेषय हुं फट् शिखा
यै । महिषं हन देवि ॐ फट् कवचाय । महिषसूदनि ॐ फट् अस्त्राय । इति पंचांगमंत्रान् मूलमंत्राभिमंत्रयेः पाण्योरंगुष्ठादिकनिष्ठांतांगुलिषु विन्यस्येत्त्ररहितेषु हृदया
दिपंचांगेषु विन्यस्य ध्यानमानसपूजांतेषु पूर्वमंत्रोक्ते पूजाचक्रे निमार्य अर्घ्यस्थापनादंगपूजांते तदष्टदलेषु स्वात्यादि प्रादक्षिण्येन । दुर्गायै नमः । ईं वरवर्णिन्यै । ऊं आ
र्यायै । एं कनकप्रभाः । ऐं कृत्तिकायै । ॐ अभयप्रदायै । औं कन्यायै । अं सरूपायै । इति संपूज्य द्वितीयष्टदले स्वात्यादिप्रादक्षिण्येन यं शंखाय । रं चक्राय । लं खड्गाय । वं खे
टकाय । शं बाणाय । षं बाणसनाय । सं भूलाय । हं तर्जन्यै । इति संपूज्य दिग्गीशार्वादिशेषं प्रविष्टसमापयेदिति ॥ तथा । जपेद्दशलक्षं च तत्साहस्रं तिलैर्जुहुयात् । एवं सिद्धमनुर्मं
त्री प्रयोगानाचरेत्ततः । तिलहोमाद्धूलीकारोन्नरो स्त्रीणां भवेद्ध्रुवं । आमयानुच्यते मर्त्यः सर्षपहोमतः । पद्महोमात्तधाराहः संग्रामे विजयी भवेत् । दूर्वाहोमेन
र्यानां रोगशांतिर्भवेद्ध्रुवं । बिल्वलक्षोत्थकुसुमैर्लभते पुष्टिमुत्तमां । ध्यान्यहोमेन ध्यान्याप्तिः कांकपक्षकुंजेन च । विद्वेषो जायते लोके द्यस्यं तैः सुहृदोरपि । शत्रुर्गच्छति श्री
३३८

© Dharmartha Trust J&K. Digitized by eGangotri

करयोः २ सिंसिंहायः नेत्रयोः परमहंसायः पादयोः २ महिषसहितप्रेताय नमः । सोतस्त्वयापि कुलिशाल्पतितो विशीर्णो दोस्तेन तेषां वहति प्रथितः प्रभावो देवोपि दानववधे
तः सदनं जगाम । भूयोपितस्य चरितान्यथयोवकारसालं प्रपत्नी दशिव इति वीजभितं तेन ७ विचित्रं तदेतमवैरपियेनजेयाः शस्त्राभिघातपतिता रुधिरा दर्पणे भूमौ वभूवुरमितः
प्रतिरक्तवीजास्तेपि क्षयं वगगने गलिता समस्ताः ८ आश्चर्यमेतदतुलं पदभूसुरारिस्त्रैलोक्यवैभवविलुंठनहृष्टपाणी शस्त्रैर्निहत्य शुचिशं शुभनिशुंभसंहौ नीतौ त्वयाजन
नितावपिनाकलोकं ९ त्वत्तेजसि प्रलयकालकृतानुभेस्मिं तस्मिं प्रयांति विभुजानि सहस्रः तस्मिं निपत्य शलभाइतिदानवेंद्राभस्मी भवंति भवानि किमत्र चित्रं १० तल्लिंग
ह्वाण भवती भवती व्रतायसर्वदुःखं प्रणयिनी प्रणमजनेषु तालिंगहाण भवति भवती प्रताप सर्वांगे । २ महेशायनमः पुनः सर्वांगे २ चंडिकायै इति षष्ठो न्यासः ब्रह्मरं
ध्रे ओं ऐं नमः दक्षकर्णे ओं ह्रीं नमः वामकर्णे ॐ क्लीं नमः दक्षनेत्रे ॐ चां नमः वामनेत्रे ॐ मुं नमः दक्षनासायां ॐ डां नमः वामनासायां ॐ यें नमः मुखे ॐ विं न
मः लिंगे ॐ चैं नमः इति सप्तमो न्यासः । गुदे ॐ ऐं नमः लिंगे ॐ ह्रीं नमः मुखे ॐ क्लीं नमः वामनासायां ॐ चां नमः दक्षनासायां ॐ मुं नमः वामनेत्रे ॐ डां नमः दक्ष
नेत्रे ॐ यें नमः वामकर्णे ॐ विं नमः दक्षकर्णे ॐ चें नमः ॥ इत्यष्टमो न्यासः ॥ स्वपूर्वांगे मूर्धादिपादांतं मूलमंत्रमुच्चार्य नमः एवं दक्षपार्श्वे । पृष्ठभागे वामभागे । पुनर्मूर्धि
पृष्ठे । दक्षभागे । पूर्वांगे व्यापकत्वेन न्यसेत् । इति नवमो न्यासः ॥ ततो मूलमंत्रमुच्चार्य हृदयाय नमः एवं षडंगन्यासं कुर्यात् । इति दशमो न्यासः ॥ खड्गिनी शूलिनी घोरे
त्येकं श्लोकं रुद्रवर्णं ध्यात्वा सर्वांगे व्यापकं । शूलेन पाहि नो देवी त्यादि रक्षसर्वत इत्यंतं श्लोकचतुष्टयं वालार्कवर्णं ध्यायन् व्यापकं । सर्वस्वरूपे सर्वेशे इत्यादि चंडिके
त्वां नता वयामि त्यंतं श्लोकपंचकं शुद्धस्फटिकसंकाशं ध्यायन् सर्वांगे व्यापकं न्यसदिति ॥ इति एकादशो न्यासः ॥ अथ स्वहृदये वक्ष्यमाणं पूजापीठं विभाव्य तं
मध्ये मूलमंत्रस्य वीजत्रयं ध्यात्वा मध्यवीजे श्रीमहालक्ष्मीं सर्वदेवशरीरतेजसो रूपां ध्यायेत् । सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा । सुचित्रजघना चित्रमाल्यां
वरविभूषणा । चित्रानुलेपना कांतिरूपसौभाग्यशालिनी । अष्टादशभुजा पूज्या सा सहस्रभुजा सती । आयुधान्यत्र वक्ष्यंते दक्षिणाधः करक्रमात् । अक्षमाला च क
मलं वाणोसी मुसलं गदा । चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः । शक्तिर्दंडश्चर्म चापः पानपात्रं कमंडलुः । अलंकृतभुजामेभिरायुधैः कमलासनां । सर्वदेवम
यीमीशां महालक्ष्मीमिमां नृप । पूजयेत्सर्वदेवानां लोकानां च प्रभुर्भवेत् । इति महालक्ष्मीं ध्यात्वा प्रथमवीजे महाकालीं ध्यायेत् । दशवक्त्रा दशभुजा दशपादांजन
प्रभा । विशालया राजमाना त्रिंशल्लोचनमालया । स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप । रूपसौभाग्यकांतीनां सा प्रतिष्ठा महाश्रियां । खड्गवाणगदाशूलचक्र

© Dharmartha Trust J&K. Digitized by eGangotri

पाशं भुशुंडिमत्तापरिघं कार्मुकं शीर्षं निःश्च्योतद्रुधिरं दधाना एषा सा वैष्णवी माया कालरात्रिर्दुरत्यया। आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरं। इति महाकाली ध्यात्वा महा
लक्ष्म्या वामभागे सरस्वतीं तृतीय वीजं ध्यायेत्। गौरी देहसमुद्भूता या सत्त्वैकगुणाश्रिता। साक्षात्सरस्वती प्रोक्ता शुंभासुरनिवर्हिणी। दधाना अष्टभुजा वाणान्मुसलं
लं चक्रं शूलं भृता। शंखं घंटां लांगलं च धनुः कार्मुकं वसुधाधिपा। एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति। इति महासरस्वतीं च ध्यात्वा वक्ष्यमाणपीठपूजापुरःसरं महा
लक्ष्मीं सांगां सावरणां मानसैरुपचारैः स्वमूलाधारे आत्मादिचतुष्टयरूपं चतुरस्रकुंडं उत्पन्नाग्नि समुज्वलं ध्यात्वा मूलमंत्रमुच्चार्य अहंतां जुहोमि स्वाहा। पुनर्मूलमुच्चार्य
सत्यं जुहोमि स्वाहा। इत्येवं महतापि अन्यकामक्रोधलोभमोहमदमात्सर्याणि सुषुम्णास्रुचा मनःस्रुवेण पथकुपथकुड्यानि दग्ध्वानि निखिलं वैरिगणं अखि
रविर्तो मूलमंत्रं यथाशक्ति जपित्वा जपं समर्प्य बाह्यपूजामारभेत्। तत्र स्वर्णादिपीठे कुंकुमादिना षट्कोणं तद्बहिर्वृत्तं तद्बहिरष्टदलं तद्बहिर्वृत्तं तद्ब
हिश्चतुर्द्वारयुक्तं चतुरस्रं तत्र यंत्रं रचयेदिति पूजाचक्रं निर्मायं षट्कोणमध्ये वाग्भवमायाकामराजवीजत्रयं पंचदशाक्षरेण विलिख्य स्वाग्न्यादिषट्कोणेषु आदासे
एषेनचा कारादिवीजषट्कं विलिख्य तत्तोऽर्घ्यादिपात्राण्यासाद्य पूजोपकरणानि संप्रोक्ष्य ॐ ह्रीं हंसः सोऽहं स्वाहा इति मंत्रेण स्वशरीरे गंधादिभिरलंकृत्य स्वा
त्मानं देवीरूपं विभाव्य प्राग्वन्मूलाधारे चतुरस्रं कुंडलिरूपं अग्निं संचिंत्य मूलं धर्माधर्म हविर्दीप्त आत्माग्नौ मनसा स्रुचा। सुषुम्णावर्त्मना नित्यमक्षवृत्तिं जुहोम्यहं
स्वाहा। एवं पापं जुहोमि स्वाहा। इदं पुण्यपापं कृत्याकृत्यं संकल्पविकल्पं धर्मानुकूलापुनर्मूलं प्रकाशामर्शहस्ताभ्यामवलंब्योन्मनीस्रुवा। धर्माधर्मकलास्नेहपू
र्णाग्नौ जुहोम्यहं। अधर्मं जुहोमि स्वाहा। इति पूर्णाहुतिं कृत्वा देवीरूपमात्मानं ध्यात्वा मूलमंत्रं यथाशक्ति जपित्वा समर्प्य पूजापीठमध्ये देवीमभ्यर्च्य षट्कोणे ॐ
ओंकारपीठाय नमः अष्टदले ॐ पूर्णगिरिपीठाय नमः चतुरस्रे ॐ कां कामपीठाय नमः इति संपूज्य पीठबहिश्चतुर्दिक्षु ॐ गं गणेशाय नमः ॐ क्षं क्षेत्रपाला
य नमः ॐ दुं दुर्गायै नमः ॐ बं वटुकाय नमः इति संपूज्याग्नेयादिकोणेषु ॐ जं जयायै नमः विं विजयायै नमः अं अजितायै नमः अं अपराजितायै नमः मध्ये मूलमंत्रे ॐ
आं आधारशक्त्यै नमः कुं कूर्माय नमः शं शेषाय नमः पं पृथिव्यै नमः नां नालाय नमः पं पद्माय नमः इति संपूज्याष्टदलकर्णिकायां षट्कोणाद्बहिः ॐ विं
विष्णुमायायै नमः एवं ॐ चेतनायै नमः बुं बुद्ध्यै निं निद्रायै क्षुं क्षुधायै इति पंचदशाक्षरीः संपूज्य दक्षिणादिशि ॐ छां छायायै ॐ शं शक्त्यै ॐ तं तृष्णायै

श्री
३४३

© Dharmartha Trust J&K. Digitized by eGangotri

ओं क्षां क्षान्त्यै॰ ओं जां जात्यै॰ ओं लं लज्जायै॰ इति पश्चाच्छक्तिषट्कं संपूज्य पश्चिमदिशि ओं शां शान्त्यै॰ ओं श्रं श्रद्धायै॰ ओं कां कान्त्यै॰ ओं लं लक्ष्म्यै॰ ओं धृं धृत्यै॰ ओं वृं वृत्यै॰
रमं इति शक्तिषट्कं संपूज्योत्तरदिशि ओं स्मं स्मृत्यै॰ ओं दं दयायै॰ ओं तुं तुष्ट्यै॰ ओं पुं पुष्ट्यै॰ ओं मां मात्रे॰ ओं भ्रां भ्रान्त्यै॰ इति शक्तिषट्कं संपूज्य दिति प्रादक्षिण्येन त्रयोविंश-
ति देवताः संपूज्य मध्यबीजे मूले श्रीमहालक्ष्म्या मूर्तये नमः इति मूर्तिं संपूज्य कराभ्यां पुष्पांजलिमादाय हृदयकमले यथोक्तरूपां सांगां सावरणां महालक्ष्मीं ध्यात्वा तत्ते-
जो रूपतामापाद्य सुषुम्णावर्त्मना ब्रह्मरंध्रे नीत्वा प्रवहन्नासारंध्रेण पुष्पांजलौ संयोज्य मूलेन तत्तेजः समानीय ओं ध्यायामि मनसा दुर्गां नाभिमध्ये व्यवस्थितां। आवाह-
ये त्वां दुर्गे संसारभयतारिणीं। कल्याणजननीं सत्यां कामदां करुणाकरां। अनन्तशक्तिसंपन्नां दुर्गामावाहयाम्यहं। महापद्मवनान्तस्थे कारणानन्दविग्रहे। सर्वभूतहिते
मातरेह्येहि परमेश्वरि। इति पुष्पांजलिप्रक्षेपेणावाहयावाहनादिनवमुद्राः प्रदर्श्य। देवेशि भक्तिसुलभे सर्वावरणसंयुते। यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इति आर्घ्यं।
भे ओं दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे। आसनं मम संपर्थ गृहाण त्वं सुरेश्वरि। आसनं। ओं स्वागतं कुशलं पृच्छे महादेवि महेश्वरि। सुस्वागतं त्वया भद्रे कृपया भक्तवत्सले स्वाग-
तं। जगत्पूज्ये त्रिलोकेशि देवदानववन्दिते। अष्टांगार्घ्यं गृहाण त्वं देवि विश्वार्तिहारिणि। अर्घ्यं। कात्यायनि महादुर्गे चामुंडे शंकरप्रिये। पाद्यं गृहाण देवेशि भद्रकालि नमोस्तु १३
ते। पाद्यं। सर्वलोकस्य या माता या माता लोकपावनि। ददाम्याचमनं तस्यै महालक्ष्म्यै प्रयत्नतः। आचमनीयं। कपिलादधिकुंदेंदुधवलं मधुसंयुतं। स्वर्णपात्रस्थितं देवि मधुपर्कं
गृहाण मे। मधुपर्कं। कर्पूरवासितं वारि निर्मलं शुद्धहेतुकं। गृहाण परमेशानि पुनराचमनीयकं। पुनराचमनीयं। स्नानमर्तं भद्रकालि दिव्यमर्तें सुरेश्वरि। स्नानं गृहाण देवेशि नी-
र्थोदकविमिश्रितं। स्नानं। वस्त्रं स्वच्छं महार्हं हि पट्टसूत्रविनिर्मितं। गृहाण सुभगे देवि पट्टकूलं सुरार्चिते। वस्त्रं। सुरासुरशिरोरत्ननिघृष्टचरणाम्बुजे। अलंकारान् गृहाण त्वं नानारत्नविभू-
षितान्। अलंकारान्। श्रीखंडागरुकर्पूररोचनानाभिसंयुतं। गृहाण गंधं देवि सर्वकामफलप्रदे। गंधं। नानापुष्पविचित्राढ्यां पुष्पमालां सु[illegible]शोभितां। प्रयच्छामि महादेवि
गृहाण त्वं सुरेश्वरि। पुष्पाणि। इति पुष्पान्तानुपचारानुपचर्य श्रीभगवति परिवारपूजार्थमनुज्ञां देहि। इति प्रार्थ्य। मध्ये प्रथमबीजे ओं महासरस्वत्यै नमः। तृतीयबीजे ओं महा-
काल्यै नमः। महालक्ष्म्याः पृष्ठे ब्रह्मसरस्वतीभ्यां नमः। महासरस्वती पृष्ठे रुद्रगौरीभ्यां नमः। महाकाल्याः पृष्ठे हृषीकेशलक्ष्मीभ्यां नमः। महालक्ष्म्या वामाग्रे। ओं महिषासुराय
नमः। दक्षाग्रे। सिंसिंहाय नमः। इति संपूज्य षट्कोणे पूर्वादि ओं नंदजायै नमः। ओं रक्तदन्तिकायै नमः। ओं शाकंभर्यै नमः। ओं दुर्गायै नमः। ओं भीमायै नमः। ओं भ्रामर्यै नमः। इति सं-
पूज्य षट्कोणबहिः कालिकायाम्ये च चंडांगानि संपूज्य अष्टदलेषु ब्राह्म्याद्यष्टमातृकाः संपूज्य चतुरस्रे प्रथमवीथ्यां इन्द्रादीन् द्वितीयवीथ्यां वज्रादीन् संपूज्य मूले सांगायै स-
परिवारायै श्रीमहालक्ष्म्यै नमः इति पुष्पांजलीन् दद्यात्। गुग्गुलं घृतसंयुक्तं मर्गवादिसमाहितं। दशांगं गृहाण धूपं त्वं भद्रकालि नमोस्तु ते। धूपं। रके स[illegible]। ज्वलसद्वर्तिगा

© Dharmartha Trust J&K. Digitized by eGangotri

घृतेन च पूरितां दीपं गृहाण देवेशि नमस्ते कालिके सुंदरि। दीपं दिव्यान्नरसं संपुष्टं नाना भक्ष्यैस्तु संस्कृतं। चोष्यपेयसमायुक्तमन्नं देवि गृहाण मे। नैवेद्यं। इति नै
वेद्यं समर्प्य देवीं भुंजानां भावयन् मूलं दशवारं जप्त्वा चुलुकोदकं दद्यात् निवेद्य समाचम्य ततो मूलेन पंचविंशत्याहुतीः कृत्वा षडंगमंत्रैः षडाहुतीरावरणदेवताभ्यः
एकैकामाहुतिं कृत्वा पूजास्थानमागत्य स्ववामाग्रे त्रिकोणमंडले न्नमंसं नयुतं साधारं बलिपात्रं निधाय ओं क्लीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा सर्वभूतेभ्यो
एष बलिर्नमः इति मंत्रेण बलिमुत्सृज्य दद्यात् उत्तरापोशनादिकं दत्वा ततः गृहाण देवि तांबूलं कर्पूरेण सुवासितं। पूगीफलसमायुक्तं सचूर्णं मुखमंडनं। तांबूलं।
मंगले कालिके दुर्गे महिषासुरसूदनि। नीराजनं मया दत्तं गृहाण सुरसुंदरि। नीराजनं। दुर्गे देवि नमस्तुभ्यं सकलासुरनाशिनि। पु ... ष्पांजलिं गृहाण त्वं मया दत्तं
सुरार्चिते। पुष्पांजलिः। सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यंबके दुर्गे कात्यायनि नमोस्तुते। नमस्कारः। मया जन्मसहस्रेषु अर्चितं पापसंचयं। तत्सर्वं ना
शय क्षिप्रं प्रदक्षिणपदे पदे। प्रदक्षिणा। पूजायाः सफलार्थं तु दक्षिणा दीयते मया। तां गृहाण महेशानि पूजां मे सफलं कुरु। हिरण्यं। महिषघ्नि महामाये चामुंडे पापहा
रिणि। यशो देहि धनं देहि तव भक्तिं च देहि मे। प्रार्थना। ततो मूलमंत्रं यथाशक्ति जपित्वा जपं समर्प्य सप्तशतीपाठं कुर्यात्। तत्र। अद्येत्यादि संकल्पं कृत्वा प्रथमचरित्र
स्य ब्रह्मा ऋषिः गायत्री छंदः महाकाली देवता। रक्तदंतिका बीजं। नंदा शक्तिः अग्निस्तत्त्वं। प्रथमचरित्रजपे विनियोगः। मध्यमचरित्रस्य विष्णुऋषिः पंक्तिश्छंदः महाल
क्ष्मीर्देवता। दुर्गा बीजं शाकंभरी शक्तिः वायुस्तत्त्वं। मध्यमचरित्रजपे विनियोगः। उत्तमचरित्रस्य रुद्रऋषिः अनुष्टुप् छंदः महासरस्वती देवता। भ्रामरी बीजं भीमा
शक्तिः सूर्यस्तत्त्वं। उत्तमचरित्रजपे विनियोगः। इति विन्यस्य पठेत्। पूजायंत्रस्य चतुरस्राद्बहिः प्राच्यां २ उड्याणपीठाय· उंडेश्वरनाथाय· उंडां वापादुकां पूजयामि।
आग्नेये २ मातंगपीठाय· मातंगेश्वरनाथाय· मातंगां वापादु० दक्षिणे २ जालंधरपीठाय· जालमुखनाथाय· जालां वापा० नैर्ऋत्ये २ कोलापुरपीठा
य· कोलापुरेश्वरनाथाय· कोलां वापादु० पश्चिमे २ पूर्णगिरिपीठाय· पूर्णेश्वरनाथाय· पूर्णां वापा० वायव्ये २ चौहारपीठाय· चौहारनाथाय· चौहारां वापा० उत्तरे
कोलगिरिपीठाय· कोलागिरिपीठाय· कोलगिरीश्वरनाथाय· कोलां वापा० ईशान्ये २ कामरूपपीठाय· कामेश्वरनाथाय· कोलां वापा० मध्ये २ योगिनीपीठाय· त
आग्नेयादिकोणेषु वेतालान् पूजयेत्। अग्निमुखाय· प्रेतवाहनाय· ज्वालामुखाय· धूम्राक्षाय· ततो मध्ये षट्कोणेषु गुरुभ्यो· परमगुरुभ्यो· परमेष्ठिगुरुभ्यो·

© Dharmartha Trust J&K. Digitized by eGangotri

गणेशाय· हरये· हराय· ततो मध्ये देवीपृष्ठभागे महालक्ष्मीहृषीकेशाभ्यां· सरस्वतीविरिंचिभ्यां· उमामहेश्वराभ्यां· दक्षिणे कालाय· रुद्राय· महासिं
हाय· वामस्कंधे· मध्ये विजयाय· गणपाय· महिषाय· चंडिकायै· उत्तरे। कालाय· दक्षिणे· यमाय यम महति संपूज्य पाणिमुद्रां प्रदर्शयेत्॥ अथ जातवे
दसादिमंत्राः॥ ब्राह्ममुहूर्ते चोत्थाय पूर्वोक्तवत् गुरुध्यानअजपास्नानसंध्याभूतशुद्ध्यादिमातृकान्यासांते विधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा
मंत्रन्यासान्कुर्यात्॥ अस्य श्रीजातवेदसमहामंत्रस्य मरीचिः कश्यपो ऋषये नमः शिरसि। त्रिष्टुप्छंदसे नमः मुखे। जातवेदाग्निस्वरूपिणी दुर्गा
देवतायै नमः हृदि। मम मा विनियोगः। जातवेदसे हृदयाय० सोममरातीयतो शिरसे स्वाहा। निदहाति वेदः शिखायै वषट्। सनः पर्षदति कवचाय हुं।
दुर्गाणि विश्वा नावेव नेत्रत्रयाय वौषट्। सिंधुं दुरितात्यग्निः अस्त्राय फट्। एवमंगुलीन्यासः। ॐ जां नमः दक्षांगुष्ठे। ॐ तं नमः वामांगुष्ठे। ॐ वें नमः द
क्षगुल्फे। ॐ दं नमः वामगुल्फे। ॐ सें नमः दक्षजंघायां। ॐ सुं नमः वामजंघायां। ॐ नं नमः दक्षजानुनि। ॐ वां नमः वामजानुनि। ॐ मं नमः दक्षोरौ। ॐ
रां नमः वामोरौ। ॐ यं नमः दक्षकट्यां। ॐ रां नमः वामकट्यां। ॐ तिं नमः अधुनि। ॐ ये नमः नाभौ। ॐ तो नमः हृदि। ॐ निं नमः दक्षस्तने। ॐ दं नमः वामस्त
ने। ॐ हां नमः दक्षपार्श्वे। ॐ तीं नमः वामपार्श्वे। ॐ नमः पृष्ठे। ॐ दं नमः दक्षस्कंधे। ॐ सं नमः वामस्कंधे। ॐ नं नमः मध्ये। ॐ पं न दक्षबाहुमूले। ॐ रं न
मः वामबाहुमूले। ॐ षं नमः दक्षोपबाहौ। ॐ दं नमः वामोपबाहौ। ॐ तिं नमः दक्षप्रकूर्परे। ॐ दुं नमः वामप्रकूर्परे। ॐ गां नमः दक्षप्रकोष्ठे। ॐ णीं न
मः वामप्रकोष्ठे। ॐ विं नमः मणिबंधादितलांते। ॐ श्वां नमः वामबंधादितलांते। ॐ नां नमः मुखे। ॐ वें नमः दक्षनासिकायां। ॐ वं नमः वामनासिका
यां। ॐ सिं नमः दक्षनेत्रे। ॐ धुं नमः वामनेत्रे। ॐ दुं नमः दक्षकर्णे। ॐ रिं नमः वामकर्णे। ॐ तां नमः मस्तके। ॐ त्यं नमः मध्यास्तके। ॐ ग्निं नमः म +
र्ध्नि। इत्यक्षरन्यासः॥ जातशिखायां। वेदसे ललाटे। सुनवाम कर्णयोः। सोमं नासिकायां। अरातीयतः चक्षुरोष्ठयोः। निदंतेषु। दहाति तालुनोः। वेदोजिह्वा
यां। सोग्रीवायां। नोवा कोः। परुषदत्स्तनयोः। अति हृदये। दुः कुक्षौ। गाणिनाभौ। विश्वापृष्ठे। नावा अपाने। इव वृषणयोः। सिंधुं शिश्ने। दुः कपोः। इता
वोः। अत्रिजंघयोः। अग्निः पादयोः। अग्नी रक्षतु। इति पदन्यासः सृष्टिः। ततः समग्रमंत्रेण व्यापकं विन्यस्य। जातवेदसे पादयोः। सुनवाम अंगुलीषु सं

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
३४५
३४५

मंत्रान्वोः॥ अरातीयतः ऊर्वोः॥ निगुह्ये। दहाति कट्योः॥ वेदो नाभौ। सः हृदये। नः पृष्ठे। पर्षद्बाह्वोः॥ अति कंठे। दुर्गाणि वक्त्रे। विश्वा चक्षुषोः॥ नावेव नासिकयोः॥
सिंधुं कर्णे। यो॥ दुरिता ललाटे। अति मुकुटे। अग्निः मूर्धनि। पादयोः विष्णवे नमः॥ हृदि ब्रह्मणे नमः मूर्धनि परमात्मने नमः॥ शिखायां सप्त ऋषिभ्यो नमः॥ ना
सिकायां सप्त वायुभ्यो नमः॥ चक्षुषोः शशिभास्कराभ्यां नमः॥ श्रोत्रयोरश्विनीदेवेभ्यो नमः॥ जिह्वायां सरस्वत्यै नमः॥ वाच्यग्नये नमः दंतेषु मरुद्भ्यो नमः॥ कंठे देवे
भ्यो नमः॥ हृदि वरुणाय नमः॥ उदरे हव्यवाहनाय नमः॥ कुक्षौ पृथिव्यै नमः कट्यां नवग्रहेभ्यो नमः॥ नाभौ भैरवेभ्यो नमः अस्त्रे जातवेदसे नमः॥ अस्त्रे जातवेदसे न
मः॥ शिखायां अग्न्यस्त्रायै नमः॥ शिरसि अग्न्यायाय नमः नेत्रयोः ज्योतिषे नमः कवचे बृहिषे नमः उद्यतः शक्तिः ज्वलंतः प्रहरणे। वज्रांगुलि त्राणं। यस्याः सिं
हारथे युक्ता यस्याग्राघ्रानुगामिनः॥ तामिमां रुद्रसंयुक्तां दुर्गामावाहयाम्यहं। आयातु दुर्गा दुर्गरूपा अभयं मे ददातु। तां दुर्गां कुमारीं ऋषिभिः पूजितां। शरणमहं प्रपद्ये।
ॐ दुर्गायै नमः ॐ याम्यै नमः रौद्र्यै नमः आदित्यायै नमः कात्यायन्यै नमः गौर्यै नमः धात्र्यै शान्त्यै नमः चामुंडायै नमः सरस्वत्यै नमः इति नवशक्तियुक्तां शंखचक्रं त
था बाणं १ नु वामे चाभयदायिनी। धनुश्चक्रं तथा पात्रं दक्षिणे सुवरप्रदं। चक्रं षडंग शरान् शूलं लोहमुष्टिं च तोमरं। वलयं भिंदिपालं च दधाने चाष्टभुजे। पाश
वांकुशं वै च धारयंती त्रिलोचनां। सिध्यंति सर्वकार्याणि निश्चितं हि द्विजोत्तम। ऋग्वेद संस्तुता देवी काश्यपेन प्रकीर्तिता। जातवेदः प्रभावेण विभुक्ति मुक्ति प्रदायिनी। मे
रुपर्वत कुंभं व्याघ्रानुसारिणी। सिंहचतुर्मुखवाहिनी। अष्टादशभुजा शुक्ला स्कंदे वासिनी। सर्वाभरणभूषिता। जातवेदस देवी ध्यात्वा मानसैरुपचारैः संपूज्य
तद्देवदेवीस्वरूपं स्वात्मानमित्यभेदभावनां कृत्वा न्यासषडंगं कुर्यात्। ॐ हरहरि ज्वालामालिनि त्रिशूलिनि दुष्टग्रहनिवारिणि ध्यां स्वाहा हृदयाय नमः। अग्नितेजो ज्वाला
मालिनि शिरसे स्वाहा। यं तेजो ज्वालामालिनि शिखायै वषट्। ब्रह्मतेजो ज्वालामालिनि कवचाय हुं। आदित्यतेजो ज्वालामालिनि नेत्रत्रयाय वौषट्। विद्युत्तेजो ज्वा
लामालिनि सर्वतेजो ज्वालामालिनि ज्वल ज्वालामालिनि त्रिशूलिनि दुष्टग्रहनिवारिणि दह दह जातवेदसे संभृति स्वाहा अस्त्राय फट्। इति रक्षाषडंगं कृत्वा ॐ जातवे
दसे सुनवाम सोमं सुरासुरैर्वंदिजगणैः पिशाचोरगराक्षसैः॥ रात्रौ भये समुत्पन्ने अरातीयतो निदहाति वेदः॥ राजद्वारे भये घोरे संग्रामे शत्रुसंकटे॥ सर्वं रक्ष्यति दुरितं
सनः पर्षदति दुर्गाणि विश्वा॥ महत्स्वप्नभये समुत्पन्ने स्मरंति च पठंति वा। सर्वं तरति दुर्गाणि नावेव सिंधुं दुरितात्यग्निः॥ इति पठन् स्वात्मानं स्वप्रकाशचिदानंदतनुं देवतास्व श्री
यं ध्यात्वा मूलषडंगं कुर्यात्। ॐ जातवेदसे सुनवाम हलाहलिनि ज्वल ज्वालामालिनि वज्रांगुलि त्राणि निहृदयाय नमः सोममरातीयत हलाहलिनि ज्वलज्वा ३४५
लामालिनि वज्रांगुलि त्राणि शिरसे स्वाहा। निदहाति वेदः हलाहलिनि ज्वल ज्वालामालिनि वज्रांगुलि त्राणि शिखायै वषट्। स नः पर्षदति ह

© Dharmartha Trust J&K. Digitized by eGangotri

लो हलिनि ज्वल ज्वालामालिनि वज्रगो धांगुलित्राणिनि कवचाय हुं। दुर्गाणि विश्वानि वैव हलाहलिनि ज्वल ज्वालामालिनि वज्रगो धांगुलित्राणिनि नेत्र
त्रयाय वौषट्। सिंधुं दुरितात्यग्निः हलाहलिनि ज्वल ज्वालामालिनि वज्रगो धांगुलित्राणिनि अस्त्राय फट्। इति षडंगं कृत्वा मंत्रेण सर्वांगं व्याप्य स्ववामभागे
कलशस्थापनं कृत्वा स्वदक्षिणभागे शंखं संस्थाप्य मध्ये अर्घ्यादिपंचपात्राणि संस्थाप्य देवीसूक्तेन देवीमभिषेकं कृत्वा पीठपूजां कुर्यात्। कालाग्निरुद्राय नमः मंडूका
य नमः आधारशक्त्यै· कूर्माय· अनंताय· वाराहाय· पृथिव्यै· एवमुपर्युपरि संपूज्य क्षीरसमुद्राय श्वेतद्वीपाय· कल्पवृक्षाय· रत्नवेदिकाय· रत्नसिंहासनाय नमः
आग्नेयादि। धर्माय· ज्ञानाय· वैराग्याय· ऐश्वर्याय· एते पादरूपिणः अधर्माय· अज्ञानाय· अवैराग्याय· अनैश्वर्याय· एते सिंहासनगात्ररूपिणः इति
संपूज्य तदुपरि क्रीं आदिमायायै· चित्कलायै· तदुपरि आनंदकंदाय· सविन्नालाय· प्रकृतिमयपत्रेभ्यो· विकारमयकेसरेभ्यो· पंचाशद्वर्णबीजाढ्यसर्व
तत्वरूपायै कर्णिकायै· तस्यां अं अर्कमंडलाय· सं सोममंडलाय· रं वह्निमंडलाय· सं सत्वाय· रं रजसे· तं तमसे· आं आत्मने· अं अंतरात्मने· पं परमा
त्मने· क्रीं ज्ञानात्मने· आत्मतत्वाय· मायातत्वाय· विद्यातत्वाय· कलातत्वाय· मध्ये परमतत्वाय· इति संपूज्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये च पीठशक्तीः
प्रपूजयेत्। क्रीं जं जयायै· क्रीं विं विजयायै· क्रीं भं भद्र[illegible]यै· क्रीं भं भद्रकाल्यै· क्रीं सुं सुमुख्यै· क्रीं दुं दुर्मुख्यै· क्रीं व्यां व्याघ्रमुख्यै· क्रीं सिं सिंहमुख्यै· मध्ये
क्रीं दुं दुर्गायै· इति संपूज्य ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः इति पीठं संपूज्य तदुपरि मूलमंत्रमुच्चरन् देवीयंत्रं संस्थाप्य आवाहनं कुर्यात्। यस्याः
सिंहा रथे युक्ता व्याघ्राश्चास्या भुजामितः तामिमां रुद्रसंयुक्तां दुर्गामावाहयाम्यहं। इत्यावाह्य आवाहिता भव। आस्थापिता भव। संनिरोधिता भव। संमुखीकृता
भव। सकलीकृता भव। अवगुंठिता भव। सकलीकृता भव। परमीकृता भव। अमृतीकृता भव। इत्युच्चरन् तत्तन्मुद्राः प्रदर्शयेत्। ध्यानं। सिंहस्था शशिशे
खरां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां। हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं। बिभ्राणामनलात्मि
कां शशिधरां दुर्गां त्रिनेत्रां स्मरेत्॥ इति ध्यात्वा मूलमंत्रेण पाद्यार्घ्याचमनमधुपर्कादिषोडशोपचारपूजां कृत्वा वरणपूजामारभेत्। यथा। आग्नेयकोणे
जातवेदसे सुनवाम हृदयाय· ईशान्ये सोममरातीयतः शिरसे स्वाहा। नैरृते नि दहाति वेदः शिखायै वषट्। वायव्ये स नः पर्षदति कवचाय हुं। मध्ये दु

© Dharmartha Trust J&K. Digitized by eGangotri

ग्लौं ति विश्वानावेव नेत्रत्रयाय वौषट्। पूर्वादिचतुर्दिक्षु सिंधुं दुरिताग्निभिः अस्त्राय फट्। इति षडंगपूजा प्रथमावरणं॥ ततः अष्टदलेषु पूर्वादिप्रादक्षिण्येन जात
वेदसे नमः· सप्तजिह्वाय· हव्यवाहनाय· अश्वोदराय· वैश्वानराय· कौमारतेजसे· विश्वमुखाय· देवमुखाय·॥ इति द्वितीयावरणं॥ ततः पात्राग्रेषु पूर्वादिचतुर्दिक्षु ॐ
पृथिव्यात्मने· सलिलात्मने· अग्न्यात्मने· वाय्वात्मने· आग्नेयादिकोणेषु निवृत्त्यै· सुप्रतिष्ठायै· विद्यायै· शांत्यै·॥ इति तृतीयावरणं॥ ततः पूर्वादिकोणेषु प्रा
दक्षिण्येन· दशनालिकाभिमुखीभ्यो धोमुखीभ्यः स्त्रीदेवताभ्यो नमः· ॐ जां जागरायै· ॐ तं तपनायै· ॐ वें वेदगर्भायै· ॐ दं दनस्पिण्यै· ॐ सं सं सुखंडायै· शब्दस्प
र्शरूपरसगंधात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः स्त्रीदेवताभ्यो नमः· शुं शुं मर्हंत्र्यै· नं नभश्चारिण्यै· गां गांगीश्यै· मं मं द्वाहायै· सों सोमरूपायै· षा कौशिकमया
त्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः स्त्रीदेवताभ्यो नमः· मं मनोजयायै· मं मरुद्वेगायै· रां रात्र्यै· नीं नीवृकोपायै· यं यशोवत्यै· तों तोयात्मिकायै· षड्भूम्यात्मिकाभिमु
खीभ्य ऊर्ध्वमुखीभ्यः स्त्रीदेवताभ्यो नमः। निं निद्रायै· दं दयावत्यै· हों हरिण्यै· तिं तिरस्क्रियायै· वें वेदमात्रे· दं दमनप्रियायै· सप्तधात्वात्मिकाभिमुखीभ्य उभयमु
खीभ्यः स्त्रीदेवताभ्यो नमः· सं समाराध्यायै· नं नंदिन्यै· पं परायै· रिं रिपुमर्दिन्यै· घं घघ्र्यै· दं दंडिन्यै· तिं तिग्मायै· पंचभूतात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः स्त्रीदे
देवताभ्यो नमः· दुं दुर्गायै· गां गायत्र्यै· गिं गिरवर्धायै· विं विशालाक्ष्यै· श्वां श्वासोद्वाहायै· कर्मेंद्रियात्मक ऊर्ध्वमुखीभ्योभिमुखीभ्यः स्त्रीदेवताभ्यो नमः· नां नादिन्यै·
वें वेदनायै· वं वह्निवासिन्यै· सिं सिंहवाहकायै· धुं धुंधुमायै· ज्ञानेंद्रियात्मकाभिमुखीभ्य ऊर्ध्वमुखीभ्यः स्त्रीदेवताभ्यो नमः· दुः दुर्विषयायै· रीं रीं रंसायै· तां तापहारि
ण्यै· सं सक्रोधायै· निः निः सपत्नायै· एतास्त्रज्वलत्केशा वदनाभीमदंष्ट्राभयापहाः ध्येयाः॥ इति चतुर्थावरणं॥ तद्बहिः पूर्वादिदलेषु इंद्राय· रं अग्नये· मं यमाय· क्षं
निर्ऋतये· वं वरुणाय· यं वायवे· सं कुबेराय· हों ईशानाय॥ इति पंचमावरणं॥ तद्बहिः वं वज्रायुधाय· शं शक्त्यायुधाय· दं दंडायुधाय· खं खड्गायुधाय· पं पाशायुधाय·
क्रों अंकुशायुधाय· गं गदायुधाय· शूं शूलायुधाय॥ इति षष्ठावरणं॥ एवं संपूज्य नैवेद्यादिकं निवेद्य आरार्त्तिकं पुष्पांजलित्रयं तं समर्प्य मूलमंत्रेण प्राणायामत्रयं कृ
त्वा यथाशक्ति जपित्वा गुह्यातिमंत्रेण जपफलं समर्प्य पूर्वोक्तमंत्रैर्दिक्पालेभ्यः बलिं हरेत्। एवं गायत्री जप द्विगुणसहितं चतुश्चत्वारिंशत्सहस्राणि जपित्वा तिल
सर्षपवित्रमूलसमिद्भिर्दुग्धवृक्षाज्यपायससमिद्भिराज्याक्तहविषान्नेन दशांशतः होतव्यः कृतपुरश्चरणो भवति। तत आग्नेयास्त्राधिकारी भवति। तदुक्तं॥ आग्ने श्री
यमभिधास्यामि मंत्रं सर्वार्थसाधनं॥ मरीचिः। कश्यपः ऋषिः मुनिरस्य महामनोः। त्रिष्टुप् छंदो देवता जातवेदाग्निरीरितः। नवभिः सप्तभिः षड्भिः सप्तभिः मुन ३४६
रष्टभिः सप्तभिर्मूलमंत्रार्णैः षडंगविधिरीरितः॥ अंगुष्ठगुल्फजंघाजानुजानूरुमुष्कनाभिमुखहृदि स्तनयोः पार्श्वयोर्द्वयोः पृष्ठतः स्कंधयो

© Dharmartha Trust J&K. Digitized by eGangotri

मेध्येवाङ्कुमूलोपवाहुषु। प्रकूर्परप्रकोष्ठेषु मणिबंधतलेष्वपि। मुखनासाक्षिकर्णेषु मस्तमस्तिष्कमूर्धसु। क्रमेण विन्यसेद्वर्णान् मंत्री मंत्रसमुद्भवान्॥ शिरोललाटा
टनयनकं कंठोष्ठरदनास्वधासकंठेवाकुहृत्कुक्षिकटिगुह्योजानुषु पंघयोर्पादयोर्न्यसेत्पदान्यस्यमनो: सुधी:॥ विशुद्धमसमत्रभांप्रजापतिस्कंदस्थितां भी
षणांकन्याभि: करवालखेटविलसद्धस्ताभिरासेवितां। हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत्॥
मंत्रवर्णसहस्राणि जपमंत्रं विशालधी:। तद्दशांशं तिलैः सिक्तैः पवित्रमूलैः सामिद्वरे:। क्षीरद्रुमाणामाज्येन हविषान्नेन च। तत्पुते चतुर्ह्वलारंशदर्भवर्तु:शाल
समन्वितं। वर्तु: सहस्रं जुहुयात्पूर्वेऽत्र हव्यवाहने। मंडले सर्वतोभद्रे षट्कोणांकितकर्णिके। विधिना वक्ष्यमाणेन पीठे देव्या: प्रपूजयेत्। जयाख्या विजयाभद्रा
भद्रकाली मनंतरं। सुमुखी दुर्मुखी सैंहां पश्चाद्व्याघ्रमुखी पुन:। अथ सिंहमुखी दुर्गा नववक्तीः प्रपूजयेत्। अथ नृसिंहमंत्रेण दद्याद्युक्तेन देशिक:। प्रणवा
नंतरं वज्रनखदंष्ट्रायुधाय च। महासिंहाय वर्माऽस्त्रान्तितिः सिंहमंत्रः समीरित:। मूर्त्तिं संकल्प्य मूलेन तस्यामावाह्य पूजयेत्। षडंगानि यथापूर्वं केसरेष्वर्चयेत्सुधी:।
ज्याहिपादाष्ट कोणन्नामूर्त्तयोर्वोबहि: पुन: जातवेदा: सप्तजिव्हो हव्यवाहन संज्ञका:। अश्वोदरजसंज्ञोन्य: पुनर्वैश्वानराह्वय:। कौमारतेज: स्याद्विश्वमुखो दे
वमुखस्तत:। ततो भसलिलाग्नी नानानमजाता नमोन्विता न्। वर्युर्दिक्षु समभ्यर्च्य कोणे पतकलापुन:। पूर्वादिदिक्षु संपूज्या नारसिंहा सा जशक्तय:। नागरा
तपसा वेदगर्भा दत्तरूपिणी। संदुखंडा सुंभहंत्री जभारिरूपनंतरं। वागीश्वरा मंदवाहा सामरूपा मनोजवा। मत्तदूगाराचित्रिसंज्ञा तीव्रकोपा यशोवती। तोपालि
कापुनर्निसा दयाव्यपिहारिणी। तिरस्किया वेदमाता तत्परा दमनप्रिया। समाराध्या नंदिनी च परा कीरिपुमर्दिनी। षष्ठी च देवी नीलिमा दुर्गा त्र्यत्र नंतरं
णिरवध्याविशालाक्षी भासो हाहावनादिनी। वेदमात् वह्निज भोगख्या सिंहवाहकृता तथा। कुर्दुर्धुर्या दुर्विषयापुष्पा द्रीरसाला पहारिणी। सरू दोषाग्नि: स
मसपत्नावलारिंशच्चतुर्युता:। लोकपालांस्ततो भ्यर्च्य हृज्जाधायुधसंयुतान्। इत्थं जपादिभि: सिद्धमंत्रेऽस्मिन् साधको नमः। आग्नेयास्त्राभिचारास्यात्दिव्या
नामिहोच्यते। अस्य श्री आग्नेयास्त्रमंत्रस्य मरीचि: पुत्र कश्यप ऋषि: त्रिष्टुप् छंद: उग्रकृत्यादेवता। शत्रुक्षयार्थं जपे विनियोग:। प्रतिलोममंत्रेण करं भुजै
कृत्वा। निस्यतारिंदुं धुं सि। अस्य स्त्राय: फट्। वबेनाभ्यायविणिगोदुनेत्रत्रयाय वौषट्। निदपरिप न: कवचाय हुं। दोचनिहादनि। शिरसे वै षट्। नोपालिरामम

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णव
३४७
347

ह्रो शिरसे स्वाहा। ममवानमुसेरद्वे तजा हृदयाय नमः इति षडंगे कुलाक्षरन्यासपदन्यासान् प्रतिलोमेन कृत्वा गुरूपदिष्टमार्गेण ध्यात्वा ब्रह्मास्त्र
द्विगुणजपसहितं प्रतिलोममंत्रं चतुश्चत्वारिंशत्सहस्रसंख्याकं जप्त्वा पंचगव्येन पञ्चवरुणं दशांशहोमः कार्यस्तेन अस्त्रसिद्धिर्भवति। तदुक्तं आगमेया
स्त्रमिति प्रोक्तं विलोमेष्ट रितोमनुः। पूर्वोक्ता एवमुत्याद्यामंत्रस्यास्य प्रकीर्त्तिताः। प्रतिलोमक्रमादस्य षडंगानि प्रकल्पयेत्। वर्णन्यासपदन्यासान्विदु
ध्यात्वा प्रतिलोमतः। ध्यानभेदान्विजानीयाद्गुरूपदेशान्तरतो यथा। पूर्ववज्जपक्लृप्तिः स्यात्कुर्यात्सर्वसंख्यया। पंचगव्यसुपक्केन चरुणा तस्य मि हुये। अर्च
नं पूर्ववत्कुर्यात्सिद्धिस्तु प्रतिलोमतः। सर्वत्र देशिकः कुर्यात्गायत्र्या द्विगुणं जपं। क्रूरकर्मणि कुर्वीत प्रतिलोमविधानतः। प्रयोगकाले प्रजपेद्यथा
न्विलोमतः। शोधितो जायते पश्चात् मंत्रोयं विधिनामुना। स्यादि पंचाक्षरः पादो हेया त्वानं द्वियात्मकः। धुमाद्यो नः पंचवर्णः स्मृतः पंचद्वियात्मकः। आद्य
स्तृतीयः पंचार्णः पंचभूतमयः स्मृतः। साद्यः सप्ताक्षरः पादश्चतुर्थो धातुरूपकः। दः पूर्वः पंचमः पादः ॐ मित्ररूपः षडक्षरः। तो वर्णादिः षडर्णो न्यञ्चा
कौशिकमुनीमतः। सो वर्णः पंचवर्णोन्त्यः शब्दादिविषयईरितः। से वर्णा षष्ठमो हेयः पंचवर्णो दवनादिकः। एवं तत्वसमायोगात्पादाः कोषिस्मृदीरिताः
मत्पादाक्षरो यन्नाम तत्तावत्सो वर्णो देवताः। प्रधानमूर्त्तिप्रतिभासस्य वर्णोदितप्रभाः। प्रज्वलच्छेशवदनाभीमदंष्ट्रा भयापहस्तु। देवता इंद्रियात्मनाः ॐ धी
द्विषय ईरिताः। देवताभूतपादाश्च सात्विकव्यक्ताः प्रकीर्तिताः। धातुरूपाक्षरो स्मृतानु भयाननशोभिताः। ॐ मितो ऊर्ध्वे वदनाः कोशोधात्मित्रकानना
एताः सर्वाः स्मृताः ख्रीवा इंद्रियार्थोभवाः स्त्रियः। अधस्तिर्यक्मुखाप्येताः ईरिता वर्णदेवताः। आभिमुख्याः स्मृताः सोम्यपराक्मुख्येन कर्मणि। आस्याः से
ख्यासमुत्पन्ना देवता ज्वलितानना। यामिर्मत्री देहच्छत्रो राज्यानि गिरिकाननो। अस्त्रमनुष्यनक्षत्रेषु आरभेत विचक्षणः। असुरेषु प्रयुंजीत देवता सर्पसह
रेतः। पूर्वोत्तरत्रयं पश्चात् द्रणहरिणानां धरोहिणी। इमान्निमानुषान्याहुर्नक्षत्राणि मनीषिणः। ज्येष्ठा शतभिषा मूलं धनिष्ठाश्लेषकृत्तिकाः। चित्रा मघा विशा
खास्तु स्वातौ राक्षसदेवताः। अश्विनी रेवती पुष्य स्वाति हस्ता पुनर्वसु। अनुराधामृगशिरश्रवणं देवतारकाः। उपक्रमेत नेदासुर ताम्स्वरुक्तो विसर्जयेत्। भ
द्रास्वाहरणे कुर्याज्जया स्याल्ल्वंतमु तमो। उपक्रमो भौमवारे शनिवारे विसर्जयेत्। प्रतिसंहरणं वारे गुरुशुक्रस्य वा भवेत्। भानुनामोक्षसंहारो कुर्यात्वक्ष दूयसुधीः

श्री
३४७

© Dharmartha Trust J&K. Digitized by eGangotri

स्थिरेषु राशीष्वारंभश्चरेषु स्थादिसत्तनं। स्वस्त्रसंहरणे कुर्यादुभयेषु विचक्षणः॥ कृष्णपक्षे नले वा स्त्रं विसर्जयेच्छिवापुनः॥ शुक्लपक्षे क्रमादस्त्रं पुनरात्मनि संहरेत्॥ आप
श्रिमाभिमुखो भूत्वा कर्मैतत्सर्वं तत्र कारयेत्। नक्षत्रवृक्षशकलान्संध्याख्याकर्मसंयुतान्॥ तत्वमंत्राक्षरोपेतान् मंत्री मंत्रार्णसंख्यया॥ कुर्यादग्निमये वक्रो मारये
द्रिपुमात्मनः॥ कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी॥ धत्तूरविषवृक्षाख्यभूरुहोत्थान्समिद्वरान्॥ राजितैलेन संयुक्तान् पृथक् सप्तसहस्रकं॥ जुहुयात्संयतो भ
रिपुर्यमपुरं व्रजेत्॥ सप्तरात्रं प्रजुहुयात् त्रिकोणस्थे हलो लितैः। आर्द्रवस्त्रो वृश्चिकाले मरीचैर्मनुनामुना। निगृह्यते ज्वरेणाशु प्रलयाग्निसमेन स सताले ज्वये स
मालिस्यशत्रुनामयथाविधि। आग्नेव्यास्त्राणसंवेष्ट्य कुंडमध्ये निखातयेत्॥ जुहुयान्मरीचैः कुंडे ज्वराक्रांतः स जायते॥ तदादाय क्षिपेत्तोये शीतले न वशो भवेत्॥
विभायामाग्नेबीजानि मरीचिमधुसंयुतं। अस्पृष्ट्वा ज्वलति तोये निक्षिप्य वाधयेत्ततः॥ ऋक्षवृक्षप्रतिकृतेर्हृदये वदने न सि। किंचित्किंचित् क्षिपेत्तोयं दद्या का
रस्करोप्यया। आग्नेयमुच्चरन्मंत्री सो चिराज्जपतो भवेत्। क्वथितं भसितां क्षिप्त्वा हन्याच्छत्रुमयत्नतः॥ तीक्ष्णास्त्रेहनसोलिप्ताशत्रोः प्रकृतिकृतिं निधि॥
तापयेद्धितवक्रो प्रतिलोममनुं जपेत्। ज्वरेणाबाध्यते स द्यो मासादस्थपतिर्भवेत्॥ सामुद्रसलिले हिंगुविषजीरकलोडिते। क्वाथितेपुत्तलीं साध्यनक्ष
त्रतरुनिर्मितां। अधोवक्त्रां विनिक्षिप्य यस्याविषतत्वथया। तच्छिरस्ताडनं कुर्यात् जपेदस्त्रं विलोमतः॥ सप्ताहान्मरणं याति शत्रुर्ज्वरविमोहितः॥ आदित्य
थनामं द्रव्यस्तां घृतदिग्धाहतं। नग्नतैले न क्षिप्तांगं दग्धं भानुमरीचिभिः॥ अधोमुखं निजरिपुं ध्यात्वा क्वथितवारिणा। तर्पयेद्भानुमालोक्य शत्रुर्मृत्युप्रियो भ
वेत्। बिभ्रतीं मुसलं शूलं ध्यात्वा कार्पासबीजैर्निंबपत्रैर्माहिषीघृतप्लुतैः॥ कुलाचदूषयेच्छत्रून् अस्त्रेणानेन देशिकः॥ बिभ्राणां तर्जनीं शूलं ध्यात्वा दुर्गां त्रि
यंकरीं। माहिषीघृतसंप्लुतैः पलाशैर्विषवृक्षजैः॥ कुलारिपोः क्षणात्सेनाप्रभुत्यायाति मं चचितः॥ ध्यात्वा देवीं पुरा प्रोक्तां चतुर्भिर्मरिचान्वितैः। अजारुधिरसंप्
लुतैर्जुहुयाद्दिवसत्रयं॥ रिपोरुच्चाटनं कुर्यात् सेनायानात्रसंशयः॥ अग्निशूलकरां दुर्गां ज्वलतीं प्रलयाग्निवत्। ध्यात्वा सर्षपतैलाक्तैर्बीजैर्धत्तूरसंभवैः॥
कुलाविमोहयेच्छत्रून् मरीचैर्वा ससर्षपैः॥ कालांजननिभां दुर्गां शूलखड्गधरां स्मरेत्। नक्षत्रवृक्षसंभूतैर्ब्राणकृतस्नेहलोहितैः॥ सामिधैर्जुहुयाद्व्या
न्यासेन वैरिणः॥ सिंहारूढां प्रधावतीं धावमानं रिपुं प्रति। शरान् कार्मुकनिर्मुक्तान् वह्निज्वालासमाकुलान्॥ मुंचतीं संस्मरेद्दुर्गां तर्पयेद्दुष्टवारिणा। भानु
बिंबसमालोक्य रिपोरुच्चाटनं भवेत्। अतिदुर्गामयीं पुष्टिं गदाहस्तां विचिंतयेत्। विद्युद्दामसमानाभां माहिषीघृतसंप्लुतैः॥ पुलाकैर्जुहुयान्नित्यं वेश्मीनि सा

के

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यार्णे
३४८
348

दूरैः कोद्रवैरथवा शत्रोः सेनायाः स्तंभनं भवेत्। त्रातयाङ्कुशं दुर्गां विघ्नां दुर्गां विचिंतयेत्। फणिनीकुसुमैः पुष्कैः शं दत्तांभः समुत्थितैः। सुष्कृयान्निशि
यो मंत्री तस्य विघ्नं वशं नयेत्। शरच्चंद्रनिभां देवीं विकालस्वरमाकृतां। पाशांकुशधरां ध्यात्वा सिंधुं दुर्गां समिद्धैरेन वेतसैर्मधुरासिक्तैर्जुहुयाद्दृष्टिसिद्धये। क
पाले त्रिशिखे पाशमंकुशं बिभ्रतीं करैः। जपाकुसुमसंकाशां भक्त्या दुर्गां विचिंतयेत्। कुलालवर्णपुष्पैर्व्योम मधुरत्रययुक्तया। आकर्षयेच्छिन्नां धीमान् साध्या
मंत्रविंना मंत्र संशयः। अतिदुर्जयमित्याप्राफ डंतात्रिषु वीरितां। ऊर्ध्वपर्णां तावगाएया घृतगानि दुर्गां समीरितां। विस्मा घात्पक्षेरो तासां विभूदुर्गा
समीरितां। सिंधाघासावकारीतां सिंधुदुर्गां लिंगयेत्। संतामग्र्यादिकोमेनामग्नि दुर्गां चिन्नि बुधाः। अग्रलो सछिद्रे ले कृत्वा सुगंधिकुसुमादिभिः दे
वीमूध्यर्वयन्नितं प्रागुक्ते नैव वर्त्मना। आहरेद्वा त्रिषु वले वरुणा तस्य सिद्धये। तैस्तारोगग्रह द्रोहभूतादीन्नाशयेदयो। यथावद्दत्तिमास ध्यागंधपु
योमनोहरैः सिलातस्याग्रतो मंत्री जपेन्मंत्रमनन्यधीः। जपायं सर्वसिद्धिस्यान्नात्र कार्या विचारणा। लवणैर्मधुरासिक्तैर्जुहुयात् श्रीमामुरवः मं
र्णसंख्यया मंत्री रिपुमालां वशं नयेत्। शालीन्प्रक्षाल्य संशोध्य अप्सुद्धान्कुर्वीत तंडुलान्। जपित्वा पंचवक्त्रेषु संस्कृते हव्यवाहने। यत्रं पवेजपस्तं श्रीमवनार्य
पुनः सुधीः। आर्चयित्वा विशदधीर्देवीमग्रे यथापुरा। जुहुयाद्वारुणानेन साध्ये नाष्टसहस्रकं। पात्रे संपातनैकुर्यात्तसाध्यस्तत्राशयेन्नरः। शिष्वं तेनिरव
न कारिसं पात्रं प्रांगणांतरे। कृत्वा रोगा विनश्यंति सहभूतग्रहासुरैः। परैः कृत्वादिता कृत्वा पुनस्तानेव भक्षयेत्। ह्रीं हि मिर्ह। विषाक्षी रेपयो वक्षसमिद्रैः।
आज्यैर्मधुत्रयोपेतैरेतैर्दशशतं पृथक्। जुहुयात्संपदं भूमि साधको भवति ध्रुवं। भास्करे मेषराशिस्थे मंत्रज्ञो ह्रो रुगुलेन दिने। नवांसमुद्भागामि मांसत्वालां मंत्रीप
